॥ श्री गुरुभ्यो नमः ॥

ऋग्वेदे समानपदमन्त्राः

ऋग्वेदसंहितास्थानां समानसङ्ख्याकपदानां मन्त्राणां सङ्ग्रहः

सम्पादकः

श्री नीलकण्ठशास्त्री

प्राध्यापकः,
काञ्ची-कामकोटि-पीठम् वेद-वेदान्त-पाठशाला
पळूर्

प्रकाशकः

श्री काञ्ची-कामकोटि-पीठम्

काञ्चीपुरम्

Samanapada Mantras in the Rigveda

collection of mantras with the same number words found in the Rigveda Samhita

PREFACE

The Rigveda has eight vikṛtis (recitation patterns): Jaṭā, Mālā, Śikhā, Rekhā, Dhvajā, Daṇḍa, Ratha, and Ghana. These eight vikṛtis cannot be practiced on all mantras. Some of the vikṛtis, especially Ratha and Krama-mālā, require that the padas (words) be in equal number - the first vākya (line) and the second vākya should have the same pada count - only then can we render these vikṛtis on that mantra.

This book is a collection of mantras on which we can recite all vikṛtis. The total number of samānapada mantras (mantras with equal number of padas in both lines) where we can recite all vikṛtis is 1,539.

Released on the auspicious occasion of the Svarṇa Rathārpaṇam (Golden Chariot Offering) to Śrī Ekāmbranātha Swāmy, by the grace of His Holiness Śrī Śaṅkara Vijayendra Sarasvatī Swāmigaḷ and His Holiness Śrī Satya Chandra Śekharendra Sarasvatī Swāmigaḷ.

EDITOR'S NOTE

Koṭiśaḥ praṇāmāḥ to His Holiness Śrī Śaṅkara Vijayendra Sarasvatī Swāmigaḷ and His Holiness Śrī Satya Chandra Śekharendra Sarasvatī Swāmigaḷ. In the Rigveda, most mantras are composed of two vākyas (lines). When the number of padas (words) in the first vākya and the second vākya are equal, we call such mantras samānapada mantras (mantras with equal padas). In these mantras, the recitation of Ratha vikṛti and Krama-mālā vikṛti becomes feasible. In this compilation, the count of padas excludes galita padas. Only those mantras that have no galita padas whatsoever are included here.

Mantras ranging from four padas to fourteen padas per line are presented here. The highest number is of seven-pada mantras - 181 mantras. The second highest is nine-pada mantras - 473 mantras.

This book will be extremely useful for Vedic study and for the practice of vikṛti recitations.

This work has been accomplished only through the anugraha of His Holiness. I humbly dedicate this book to the lotus feet of His Holiness.

R. Neelakantha Shastri

विषयसूची
(Table of Contents)

चतुष्पदवाक्यकाः मन्त्राः (१३ मन्त्राः) 4

पञ्चपदवाक्यकाः मन्त्राः (४१ मन्त्राः) ६

षट्पदवाक्यकाः मन्त्राः (१०७ मन्त्राः) १२

सप्तपदवाक्यकाः मन्त्राः (१८१ मन्त्राः) २८

अष्टपदवाक्यकाः मन्त्राः (३३५ मन्त्राः) ५५

नवपदवाक्यकाः मन्त्राः (४७३ मन्त्राः) १०५

दशपदवाक्यकाः मन्त्राः (२९६ मन्त्राः) १७५

एकादशपदवाक्यकाः मन्त्राः (७५ मन्त्राः) २२०

द्वादशपदवाक्यकाः मन्त्राः (१६ मन्त्राः) २३१

चतुर्दशपदवाक्यकाः मन्त्राः (२ मन्त्रौ) २३४

चतुष्पदवाक्यकाः मन्त्राः
(१३ मन्त्राः)

१. मण्डलम् १, सूक्तम् ५, मन्त्रः २ (ऋक्सङ्ख्या : ४२)
वाक्यम् १: पुरूतमं पुरूणामीशानं वार्याणाम्।
पदानि : पुरुऽतमम्। पुरूणाम्। ईशानम्। वार्याणाम्
वाक्यम् २: इन्द्रं सोमे सचा सुते॥
पदानि : इन्द्रम्। सोमे। सचा। सुते

२. मण्डलम् १, सूक्तम् २३, मन्त्रः ८ (ऋक्सङ्ख्या : २३७)
वाक्यम् १: इन्द्रज्येष्ठा मरुद्गणा देवासः पूषरातयः।
पदानि : इन्द्रऽज्येष्ठाः। मरुत्ऽगणाः। देवासः। पूषऽरातयः
वाक्यम् २: विश्वे मम श्रुता हवम्॥
पदानि : विश्वे। मम। श्रुत। हवम्

३. मण्डलम् १, सूक्तम् ४३, मन्त्रः ४ (ऋक्सङ्ख्या : ५१२)
वाक्यम् १: गाथपतिं मेधपतिं रुद्रं जलाषभेषजम्।
पदानि : गाथऽपतिम्। मेधऽपतिम्। रुद्रम्। जलाषऽभेषजम्
वाक्यम् २: तच्छंयोः सुम्नमीमहे॥
पदानि : तत्। शम्ऽयोः। सुम्नम्। ईमहे

४. मण्डलम् १, सूक्तम् ९१, मन्त्रः १२ (ऋक्सङ्ख्या : ९९९)
वाक्यम् १: गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः।
पदानि : गयऽस्फानः। अमीवऽहा। वसुऽवित्। पुष्टिऽवर्धनः
वाक्यम् २: सुमित्रः सोम नो भव॥
पदानि : सुऽमित्रः। सोम। नः। भव

५. मण्डलम् ३, सूक्तम् ३७, मन्त्रः १ (ऋक्सङ्ख्या : २८०१)
वाक्यम् १: वार्त्रहत्याय शवसे पृतनाषाह्याय च।
पदानि : वार्त्रऽहत्याय। शवसे। पृतनाऽसह्याय। च
वाक्यम् २: इन्द्र त्वा वर्तयामसि॥
पदानि : इन्द्र। त्वा। आ। वर्तयामसि

६. मण्डलम् ३, सूक्तम् ५२, मन्त्रः १ (ऋक्सङ्ख्या : २९१३)
वाक्यम् १: धानावन्तं करम्भिणमपूपवन्तमुक्थिनम्।
पदानि : धानाऽवन्तम्। करम्भिणम्। अपूपऽवन्तम्। उक्थिनम्
वाक्यम् २: इन्द्र प्रातर्जुषस्व नः॥
पदानि : इन्द्र। प्रातः। जुषस्व। नः

७. मण्डलम् ४, सूक्तम् ४६, मन्त्रः ४ (ऋक्सङ्ख्या : ३५४५)

वाक्यम् १: रथं॑ हिर॑ण्यवन्धुर॒मिन्द्र॑वायू स्वध्व॒रम्।
पदानि : रथ॑म्। हिर॑ण्यऽवन्धुरम्। इन्द्र॑वायू॒ इति॑। सु॒ऽअ॒ध्व॒रम्
वाक्यम् २: आ हि स्थाथो॑ दिवि॒स्पृश॑म्॥
पदानि : आ। हि। स्थाथः॑। दि॒वि॒ऽस्पृश॑म्

८. मण्डलम् ८, सूक्तम् ५, मन्त्रः २८ (ऋक्सङ्ख्या : ६१२३)
वाक्यम् १: रथं॑ हिर॑ण्यवन्धुरं॒ हिर॑ण्याभीशुमश्विना।
पदानि : रथ॑म्। हिर॑ण्यऽवन्धुरम्। हिर॑ण्यऽअभीशुम्। अ॒श्वि॒ना
वाक्यम् २: आ हि स्थाथो॑ दिवि॒स्पृश॑म्॥
पदानि : आ। हि। स्थाथः॑। दि॒वि॒ऽस्पृश॑म्

९. मण्डलम् ८, सूक्तम् २५, मन्त्रः २२ (ऋक्सङ्ख्या : ६६०२)
वाक्यम् १: ऋ॒ज्रमु॑क्षण्यायने रज॒तं हर॑याणे।
पदानि : ऋ॒ज्रम्। उ॒क्षण्यायने। र॒ज॒तम्। हर॑याणे
वाक्यम् २: रथं॒ युक्तम॑सनाम सुषाम॑णि॥
पदानि : रथ॑म्। युक्तम्। अ॒स॒ना॒म॒। सु॒ऽसाम॑नि

१०. मण्डलम् ८, सूक्तम् २६, मन्त्रः १२ (ऋक्सङ्ख्या : ६६१६)
वाक्यम् १: युवाद॑त्तस्य धिष्ण्या युवानी॑तस्य सू॒रिभिः॑।
पदानि : युवाऽद॑त्तस्य। धि॒ष्ण्या॒। युवाऽनी॑तस्य। सू॒रिऽभिः॑
वाक्यम् २: अह॑रहर्वृषण॒ मह्यं॑ शिक्षतम्॥
पदानि : अहः॑ऽअहः। वृ॒ष॒णा॒। मह्य॑म्। शि॒क्ष॒त॒म्

११. मण्डलम् ८, सूक्तम् ३४, मन्त्रः १८ (ऋक्सङ्ख्या : ६७५५)
वाक्यम् १: पारा॑वतस्य रा॒तिषु॑ द्रवच्चक्रे॒ष्वा॒शुषु॑।
पदानि : पारा॑वतस्य। रा॒तिषु॑। द्रव॒त्ऽच॑क्रेषु। आ॒शुषु॑
वाक्यम् २: तिष्ठ॑ वन॑स्य॒ मध्य॒ आ॥
पदानि : तिष्ठ॑म्। वन॑स्य। मध्ये। आ

१२. मण्डलम् ९, सूक्तम् ३५, मन्त्रः २ (ऋक्सङ्ख्या : ७९५६)
वाक्यम् १: इन्दो॑ समुद्रमी॒ङ्खय॒ पव॑स्व विश्वमेजय।
पदानि : इन्दो॒ इति॑। स॒मु॒द्रम्ऽई॒ङ्खय॒। पव॑स्व। वि॒श्व॒म्ऽए॒ज॒य॒
वाक्यम् २: रा॒यो ध॒र्ता न॒ ओज॑सा॥
पदानि : रा॒यः। ध॒र्ता। नः॒। ओज॑सा

१३. मण्डलम् ९, सूक्तम् १०६, मन्त्रः ६ (ऋक्सङ्ख्या : ८६९२)
वाक्यम् १: अ॒स्मभ्यं॑ गातुवित्तमो दे॒वेभ्यो॒ मधु॑मत्तमः।
पदानि : अ॒स्मभ्य॑म्। गा॒तु॒वित्ऽत॑मः। दे॒वेभ्यः॑। मधु॑मत्ऽतमः
वाक्यम् २: स॒हस्रं॑ याहि प॒थिभिः॒ कनि॑क्रदत्॥
पदानि : स॒हस्र॑म्। या॒हि॒। प॒थिऽभिः॑। कनि॑क्रदत्

पञ्चपदवाक्यकाः मन्त्राः
(४१ मन्त्राः)

१. मण्डलम् १, सूक्तम् ११, मन्त्रः १ (ऋक्सङ्ख्या : १०३)
वाक्यम् १: इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः।
पदानि : इन्द्रम्। विश्वाः। अवीवृधन्। समुद्रऽव्यचसम्। गिरः
वाक्यम् २: रथीतमं रथीनां वाजानां सत्पतिं पतिम्॥
पदानि : रथिऽतमम्। रथिनाम्। वाजानाम्। सत्ऽपतिम्। पतिम्

२. मण्डलम् १, सूक्तम् ४५, मन्त्रः ६ (ऋक्सङ्ख्या : ५३७)
वाक्यम् १: त्वां चित्रश्रवस्तम हवन्ते विक्षु जन्तवः।
पदानि : त्वाम्। चित्रश्रवःऽतमम्। हवन्ते। विक्षु। जन्तवः
वाक्यम् २: शोचिष्केशं पुरुप्रियाग्ने हव्याय वोळ्हवे॥
पदानि : शोचिःऽकेशम्। पुरुऽप्रिय। अग्ने। हव्याय। वोळ्हवे

३. मण्डलम् १, सूक्तम् १३३, मन्त्रः २ (ऋक्सङ्ख्या : १४८०)
वाक्यम् १: अभिव्लग्या चिदद्रिवः शीर्षा यातुमतीनाम्।
पदानि : अभिऽव्लग्य। चित्। अद्रिऽवः। शीर्षा। यातुऽमतीनाम्
वाक्यम् २: छिन्धि वटूरिणा पदा महावटूरिणा पदा॥
पदानि : छिन्धि। वटूरिणा। पदा। महाऽवटूरिणा। पदा

४. मण्डलम् १, सूक्तम् १४२, मन्त्रः २ (ऋक्सङ्ख्या : १५५३)
वाक्यम् १: घृतवन्तमुप मासि मधुमन्तं तनूनपात्।
पदानि : घृतऽवन्तम्। उप। मासि। मधुऽमन्तम्। तनूऽनपात्
वाक्यम् २: यज्ञं विप्रस्य मावतः शशमानस्य दाशुषः॥
पदानि : यज्ञम्। विप्रस्य। माऽवतः। शशमानस्य। दाशुषः

५. मण्डलम् १, सूक्तम् १४२, मन्त्रः ५ (ऋक्सङ्ख्या : १५५६)
वाक्यम् १: स्तृणानासो यतस्रुचो बर्हिर्यज्ञे स्वध्वरे।
पदानि : स्तृणानासः। यतऽस्रुचः। बर्हिः। यज्ञे। सुऽअध्वरे
वाक्यम् २: वृञ्जे देवव्यचस्तमिन्द्राय शर्म सप्रथः॥
पदानि : वृञ्जे। देवव्यचःऽतमम्। इन्द्राय। शर्म। सऽप्रथः

६. मण्डलम् २, सूक्तम् ३२, मन्त्रः ७ (ऋक्सङ्ख्या : २३२५)
वाक्यम् १: या सुबाहुः स्वङ्गुरिः सुषूमा बहुसूवरी।
पदानि : या। सुऽबाहुः। सुऽअङ्गुरिः। सुऽसूमा। बहुऽसूवरी
वाक्यम् २: तस्यै विश्पत्न्यै हविः सिनीवाल्यै जुहोतन॥
पदानि : तस्यै। विश्पत्न्यै। हविः। सिनीवाल्यै। जुहोतन

७. मण्डलम् ३, सूक्तम् १०, मन्त्रः १ (ऋक्सङ्ख्या : २५४९)
वाक्यम् १: त्वामग्ने मनीषिणः सम्राजं चर्षणीनाम्।
पदानि : त्वाम्। अग्ने। मनीषिणः। सम्ऽराजम्। चर्षणीनाम्
वाक्यम् २: देवं मर्तास इन्धते समध्वरे॥
पदानि : देवम्। मर्तासः। इन्धते। सम्। अध्वरे

८. मण्डलम् ३, सूक्तम् २८, मन्त्रः ३ (ऋक्सङ्ख्या : २६७४)
वाक्यम् १: अग्ने वीहि पुरोळाशमाहुतं तिरोअह्न्यम्।
पदानि : अग्ने। वीहि। पुरोळाशम्। आऽहुतम्। तिरःऽअह्न्यम्
वाक्यम् २: सहसः सूनुरस्यध्वरे हितः॥
पदानि : सहसः। सूनुः। असि। अध्वरे। हितः

९. मण्डलम् ३, सूक्तम् ५२, मन्त्रः ४ (ऋक्सङ्ख्या : २९१६)
वाक्यम् १: पुरोळाशं सनश्रुत प्रातःसावे जुषस्व नः।
पदानि : पुरोळाशम्। सनऽश्रुत। प्रातःऽसावे। जुषस्व। नः
वाक्यम् २: इन्द्र क्रतुर्हि ते बृहन्॥
पदानि : इन्द्र। क्रतुः। हि। ते। बृहन्

१०. मण्डलम् ४, सूक्तम् ३२, मन्त्रः १२ (ऋक्सङ्ख्या : ३४१८)
वाक्यम् १: अवीवृधन्त गोतमा इन्द्र त्वे स्तोमवाहसः।
पदानि : अवीवृधन्त। गोतमाः। इन्द्र। त्वे इति। स्तोमऽवाहसः
वाक्यम् २: ऐषु धा वीरवद्यशः॥
पदानि : आ। एषु। धाः। वीरऽवत्। यशः

११. मण्डलम् ५, सूक्तम् २२, मन्त्रः ३ (ऋक्सङ्ख्या : ३८००)
वाक्यम् १: चिकित्विन्मनसं त्वा देवं मर्तास ऊतये।
पदानि : चिकित्वित्ऽमनसम्। त्वा। देवम्। मर्तासः। ऊतये
वाक्यम् २: वरेण्यस्य तेऽवस इयानासो अमन्महि॥
पदानि : वरेण्यस्य। ते। अवसः। इयानासः। अमन्महि

१२. मण्डलम् ५, सूक्तम् ३५, मन्त्रः ६ (ऋक्सङ्ख्या : ३९१९)
वाक्यम् १: त्वामिद्वृत्रहन्तम जनासो वृक्तबर्हिषः।
पदानि : त्वाम्। इत्। वृत्रहन्ऽतम। जनासः। वृक्तऽबर्हिषः
वाक्यम् २: उग्रं पूर्वीषु पूर्व्यं हवन्ते वाजसातये॥
पदानि : उग्रम्। पूर्वीषु। पूर्व्यम्। हवन्ते। वाजऽसातये

१३. मण्डलम् ५, सूक्तम् ३५, मन्त्रः ७ (ऋक्सङ्ख्या : ३९२०)
वाक्यम् १: अस्माकमिन्द्र दुष्टरं पुरोयावानमाजिषु।
पदानि : अस्माकम्। इन्द्र। दुस्तरम्। पुरःऽयावानम्। आजिषु
वाक्यम् २: सयावानं धनेधने वाजयन्तमवा रथम्॥
पदानि : सऽयावानम्। धनेऽधने। वाजऽयन्तम्। अव। रथम्

१४. मण्डलम् ५, सूक्तम् ६५, मन्त्रः २ (ऋक्सङ्ख्या : ४२२०)
वाक्यम् १: ता हि श्रेष्ठवर्चसा राजाना दीर्घश्रुत्तमा ।
पदानि : ता । हि । श्रेष्ठऽवर्चसा । राजाना । दीर्घश्रुत्ऽतमा
वाक्यम् २: ता सत्पती ऋतावृधं ऋतावानाा जनेजने ॥
पदानि : ता । सत्पती इति सत्ऽपती । ऋतऽवृधा । ऋतऽवाना । जनेऽजने

१५. मण्डलम् ६, सूक्तम् १६, मन्त्रः ४१ (ऋक्सङ्ख्या : ४५३४)
वाक्यम् १: प्र देवं देववीतये भरता वसुवित्तमम् ।
पदानि : प्र । देवम् । देवऽवीतये । भरत । वसुवित्ऽतमम्
वाक्यम् २: आ स्वे योनौ नि षीदतु ॥
पदानि : आ । स्वे । योनौ । नि । सीदतु

१६. मण्डलम् ८, सूक्तम् २, मन्त्रः ४० (ऋक्सङ्ख्या : ६०४८)
वाक्यम् १: इत्था धीवन्तमद्रिवः काण्वं मेध्यातिथिम् ।
पदानि : इत्था । धीऽवन्तम् । अद्रिऽवः । काण्वम् । मेध्यऽअतिथिम्
वाक्यम् २: मेषो भूतोऽभि यन्नयः ॥
पदानि : मेषः । भूतः । अभि । यन् । अयः

१७. मण्डलम् ८, सूक्तम् १२, मन्त्रः २ (ऋक्सङ्ख्या : ६२८०)
वाक्यम् १: येना दशग्वमध्रिगुं वेपयन्तं स्वर्णरम् ।
पदानि : येन । दशऽग्वम् । अध्रिऽगुम् । वेपयन्तम् । स्वःऽनरम्
वाक्यम् २: येना समुद्रमाविथा तमीमहे ॥
पदानि : येन । समुद्रम् । आविथ । तम् । ईमहे

१८. मण्डलम् ८, सूक्तम् १२, मन्त्रः १९ (ऋक्सङ्ख्या : ६२९७)
वाक्यम् १: देवंदेवं वोऽवस इन्द्रमिन्द्रं गृणीषणि ।
पदानि : देवम्ऽदेवम् । वः । अवसे । इन्द्रम्ऽइन्द्रम् । गृणीषणि
वाक्यम् २: अधा यज्ञायं तुर्वणे व्यानशुः ॥
पदानि : अध । यज्ञाय । तुर्वणे । वि । आनशुः

१९. मण्डलम् ८, सूक्तम् १३, मन्त्रः २७ (ऋक्सङ्ख्या : ६३३८)
वाक्यम् १: इह त्या सधमाद्या युजानः सोमपीतये ।
पदानि : इह । त्या । सधऽमाद्या । युजानः । सोमऽपीतये
वाक्यम् २: हरी इन्द्र प्रतद्वसू अभि स्वर ॥
पदानि : हरी इति । इन्द्र । प्रतद्वसू इति प्रतत्ऽवसू । अभि । स्वर

२०. मण्डलम् ८, सूक्तम् २३, मन्त्रः ९ (ऋक्सङ्ख्या : ६५२९)
वाक्यम् १: ऋतावानमृतायवो यज्ञस्य साधनं गिरा ।
पदानि : ऋतऽवानम् । ऋतऽयवः । यज्ञस्य । साधनम् । गिरा

वाक्यम् २: उपो॑ एनं जुजुषु॒र्नमं॑सस्प॒दे ॥
पदानि : उपो॒ इति॑ । ए॒न॒म् । जु॒जु॒षुः॒ । नमं॑सः । प॒दे

२१. मण्डलम् ८, सूक्तम् २३, मन्त्रः २० (ऋक्सङ्ख्या : ६५४०)
वाक्यम् १: तं हु॑वेम य॒तस्रु॑चः सु॒भास॑ꣳ शु॒क्रशो॑चिषम् ।
पदानि : तम् । हु॒वे॒म॒ । य॒तऽस्रु॑चः । सु॒ऽभास॑म् । शु॒क्रऽशो॑चिषम्
वाक्यम् २: वि॒शाम॒ग्निम॒जरं॑ प्र॒त्नमीड्यं॑म् ॥
पदानि : वि॒शाम् । अ॒ग्निम् । अ॒जर॑म् । प्र॒त्नम् । ईड्य॑म्

२२. मण्डलम् ८, सूक्तम् २३, मन्त्रः २२ (ऋक्सङ्ख्या : ६५४२)
वाक्यम् १: प्र॒थ॒मं जा॒तवे॑दसम॒ग्निं य॒ज्ञेषु॑ पू॒र्व्यम् ।
पदानि : प्र॒थ॒मम् । जा॒तऽवे॑दसम् । अ॒ग्निम् । य॒ज्ञेषु॑ । पू॒र्व्यम्
वाक्यम् २: प्रति॒ स्रुगे॑ति॒ नमं॑सा हु॒विष्मं॑ती ॥
पदानि : प्रति॑ । स्रुक् । ए॒ति॒ । नमं॑सा । हु॒विष्मं॑ती

२३. मण्डलम् ८, सूक्तम् २४, मन्त्रः २० (ऋक्सङ्ख्या : ६५७०)
वाक्यम् १: अगो॑रुधाय ग॒विषे द्यु॒क्षाय॒ दस्म्यं॑ वचः॑ ।
पदानि : अगो॑ऽरुधाय । गो॒ऽइ॒षे॒ । द्यु॒क्षाय॑ । दस्म्य॑म् । वचः॑
वाक्यम् २: घृ॒तात्स्वादी॑यो॒ मधु॑नश्च वोचत ॥
पदानि : घृ॒तात् । स्वादी॑यः । मधु॑नः । च॒ । वो॒च॒त॒

२४. मण्डलम् ८, सूक्तम् २५, मन्त्रः ४ (ऋक्सङ्ख्या : ६५८४)
वाक्यम् १: म॒हान्ता॑ मि॒त्रावरु॑णा स॒म्राजा॑ दे॒वावसु॑रा ।
पदानि : म॒हान्ता॑ । मि॒त्रावरु॑णा । स॒म्ऽराजा॑ । दे॒वौ । असु॑रा
वाक्यम् २: ऋ॒तावा॑नावृतमा घो॑षतो बृ॒हत् ॥
पदानि : ऋ॒तऽवा॑नौ । ऋ॒तम् । आ । घो॒ष॒तः॒ । बृ॒हत्

२५. मण्डलम् ८, सूक्तम् २५, मन्त्रः २० (ऋक्सङ्ख्या : ६६००)
वाक्यम् १: वचो॑ दी॒र्घप्र॑सद्मनीशे॒ वाज॑स्य॒ गोम॑तः ।
पदानि : वचः॑ । दी॒र्घऽप्र॑सद्मनि । ईशे॑ । वाज॑स्य । गोऽम॑तः
वाक्यम् २: ईशे॒ हि पि॒त्वोऽवि॒षस्यं॑ दा॒वने ॥
पदानि : ईशे॑ । हि । पि॒त्वः॑ । अ॒वि॒षस्य॑ । दा॒वने॑

२६. मण्डलम् ८, सूक्तम् २५, मन्त्रः २४ (ऋक्सङ्ख्या : ६६०४)
वाक्यम् १: स्मद॑भीशू कशा॑वन्ता॒ विप्रा॑ नवि॑ष्ठया म॒ती ।
पदानि : स्मद॑भीशू इति॒ स्मत्ऽअ॑भीशू । कशा॑ऽवन्ता । विप्रा॑ । नवि॑ष्ठया । म॒ती
वाक्यम् २: म॒हो वा॒जिना॒वर्व॑न्ता॒ सचा॑सनम् ॥
पदानि : म॒हः । वा॒जिनौ॑ । अर्व॑न्ता । सचा॑ । अ॒स॒न॒म्

२७. मण्डलम् ८, सूक्तम् २६, मन्त्रः १४ (ऋक्सङ्ख्या : ६६१८)

वाक्यम् १: यो वा॑मुरुव्यच॑स्तमं॒ चिके॑तति नृपा॒य्य॑म्।
पदानि : यः। वा॒म्। उ॒रु॒व्यच॑ऽतमम्। चिके॑तति। नृऽपाय्य॑म्
वाक्यम् २: व॒र्तिर॑श्विना॒ परि॑ यातमस्म॒यू॥
पदानि : व॒र्तिः। अ॒श्वि॒ना॒। परि॑। या॒त॒म्। अ॒स्म॒यूइत्य॑स्म॒ऽयू

२८. मण्डलम् ८, सूक्तम् २७, मन्त्रः ७ (ऋक्सङ्ख्या : ६६३६)
वाक्यम् १: व॒यं वो॑ वृ॒क्तब॑र्हिषो हि॒तप्र॑यस आनु॒षक्।
पदानि : व॒यम्। वः॒। वृ॒क्तऽब॑र्हिषः। हि॒तऽप्र॑यसः। आ॒नु॒षक्
वाक्यम् २: सु॒तसो॑मासो वरुण हवामहे मनुष्व॒दिद्धाग्न॑यः॥
पदानि : सु॒तऽसो॑मासः। व॒रु॒ण॒। हु॒वा॒म॒हे॒। म॒नु॒ष्व॒त्। इ॒द्धऽअ॑ग्नयः

२९. मण्डलम् ८, सूक्तम् ३२, मन्त्रः १५ (ऋक्सङ्ख्या : ६७०३)
वाक्यम् १: नकि॑रस्य शची॑नां नियु॒न्ता सू॒नृता॑नाम्।
पदानि : नकिः॑। अ॒स्य॒। शची॑नाम्। नि॒ऽयु॒न्ता। सू॒नृता॑नाम्
वाक्यम् २: नकि॑र्व॒क्ता न दा॒दिति॑॥
पदानि : नकिः॑। व॒क्ता। न। दा॒त्। इति॑

३०. मण्डलम् ८, सूक्तम् ६९, मन्त्रः २ (ऋक्सङ्ख्या : ७२३५)
वाक्यम् १: न॒दं व॒ ओद॑तीनां न॒दं योयु॑वतीनाम्।
पदानि : न॒दम्। वः॒। ओद॑तीनाम्। न॒दम्। योयु॑वतीनाम्
वाक्यम् २: पति॑ं वो॒ अघ्या॑नां धेनू॒नामि॑षुध्यसि॥
पदानि : पति॑म्। वः॒। अघ्या॑नाम्। धे॒नू॒नाम्। इ॒षु॒ध्य॒सि॒

३१. मण्डलम् ८, सूक्तम् ७४, मन्त्रः १३ (ऋक्सङ्ख्या : ७३३०)
वाक्यम् १: अ॒हं हु॑वा॒न आ॒र्क्षे श्रु॒तर्वणि मद॒च्युति॑।
पदानि : अ॒हम्। हु॒वा॒नः। आ॒र्क्षे। श्रु॒तर्वणि। म॒दऽच्युति॑
वाक्यम् २: शर्धा॑सीव स्तु॒का॒विना॑ मृक्षा शी॒र्षा च॑तु॒र्णाम्॥
पदानि : शर्धा॑सिऽइव। स्तु॒काऽविना॑म्। मृ॒क्षा। शी॒र्षा। च॒तु॒र्णाम्

३२. मण्डलम् ८, सूक्तम् ७९, मन्त्रः ७ (ऋक्सङ्ख्या : ७३८८)
वाक्यम् १: सु॒शेवो॑ नो मृळ॒याकु॑रद॑ब्धक्रतुरवा॒तः।
पदानि : सु॒ऽशेवः॑। नः॒। मृ॒ळ॒याकुः॑। अद॑ब्धऽक्रतुः। अ॒वा॒तः
वाक्यम् २: भवा॑ नः सोम॒ शं हृ॒दे॥
पदानि : भव॑। नः॒। सो॒म॒। शम्। हृ॒दे

३३. मण्डलम् ८, सूक्तम् ८३, मन्त्रः ५ (ऋक्सङ्ख्या : ७४२३)
वाक्यम् १: वा॒मस्य॒ हि प्र॑चेतस॒ ईशा॑नाशो रिशादसः।
पदानि : वा॒मस्य॑। हि। प्र॒ऽचे॒त॒सः॒। ईशा॑नासः। रि॒शा॒द॒सः॒
वाक्यम् २: नेमा॑दित्या अघस्य॒ यत्॥
पदानि : न। ई॒म्। आ॒दि॒त्याः॒। अ॒घस्य॑। यत्

३४. मण्डलम् ९, सूक्तम् ६४, मन्त्रः १३ (ऋक्सङ्ख्या : ८१९१)
वाक्यम् १: इ॒षे पं॑वस्व॒ धार॑या मृ॒ज्यमा॑नो मनी॒षिभिः॑ ।
पदानि : इ॒षे । प॒व॒स्व॒ । धार॑या । मृ॒ज्यमा॑नः । म॒नी॒षिऽभिः॑
वाक्यम् २: इन्दो॑ रु॒चाभि गा इ॑हि ॥
पदानि : इन्दो॒ इति॑ । रु॒चा । अ॒भि । गाः । इ॒हि॒

३५. मण्डलम् ९, सूक्तम् ६५, मन्त्रः ५ (ऋक्सङ्ख्या : ८२१३)
वाक्यम् १: आ प॑वस्व सुवी॒र्यं॑ मन्द॒मानः॒ स्वायुध ।
पदानि : आ । प॒व॒स्व॒ । सु॒ऽवी॒र्य॑म् । मन्द॑मानः । सु॒ऽआ॒यु॒ध॒
वाक्यम् २: इ॒हो ष्वि॑न्दु॒वा ग॑हि ॥
पदानि : इ॒हो इति॑ । सु । इ॒न्दो॒ इति॑ । आ । ग॒हि॒

३६. मण्डलम् ९, सूक्तम् १००, मन्त्रः ६ (ऋक्सङ्ख्या : ८६४१)
वाक्यम् १: पव॑स्व वाज॒सात॑मः प॒वित्रे॒ धार॑या सु॒तः ।
पदानि : पव॑स्व । वा॒ज॒ऽसात॑मः । प॒वित्रे॑ । धार॑या । सु॒तः
वाक्यम् २: इन्द्रा॑य सोम॒ विष्ण॑वे दे॒वेभ्यो॒ मधु॑मत्तमः ॥
पदानि : इन्द्रा॑य । सो॒म॒ । विष्ण॑वे । दे॒वेभ्यः॑ । मधु॑मत्ऽतमः

३७. मण्डलम् ९, सूक्तम् १०१, मन्त्रः १ (ऋक्सङ्ख्या : ८६४५)
वाक्यम् १: पुरो॑जिती॒ वो॒ अन्ध॑सः सु॒ताय॑ माद॒यि॒त्नवे॑ ।
पदानि : पुरः॑ऽजिती । वः॒ । अन्ध॑सः । सु॒ताय॑ । मा॒द॒यि॒त्नवे॑
वाक्यम् २: अप॒ श्वानं॑ श्थिष्ट॒न॒ सखा॑यो दीर्घजि॒ह्व्यम् ॥
पदानि : अप॑ । श्वान॑म् । श्थि॒ष्ट॒न॒ । सखा॑यः । दी॒र्घ॒ऽजि॒ह्व्यम्

३८. मण्डलम् ९, सूक्तम् १०१, मन्त्रः १० (ऋक्सङ्ख्या : ८६५४)
वाक्यम् १: सोमाः॑ पवन्त इन्द॒वो॒ऽस्मभ्यं॑ गातुवित्त॒माः ।
पदानि : सोमाः॑ । प॒व॒न्ते॒ । इ॒न्द॒वः॒ । अ॒स्मभ्य॑म् । गा॒तु॒वित्ऽत॑माः
वाक्यम् २: मि॒त्राः सु॑वा॒ना अरे॒पसः॑ स्वा॒ध्यः॑ स्व॒र्विदः॑ ॥
पदानि : मि॒त्राः । सु॒वा॒नाः । अरे॒पसः॑ । सु॒ऽआ॒ध्यः॑ । स्वः॒ऽविदः॑

३९. मण्डलम् ९, सूक्तम् १०३, मन्त्रः ४ (ऋक्सङ्ख्या : ८६७२)
वाक्यम् १: परि॑ णे॒ता म॑ती॒नां वि॒श्वदे॑वो॒ अदा॑भ्यः ।
पदानि : परि॑ । ने॒ता । म॒ती॒नाम् । वि॒श्वऽदे॑वः । अदा॑भ्यः
वाक्यम् २: सोमः॑ पुना॒नश्च॒म्वो॑र्विशद्धरिः॑ ॥
पदानि : सोमः॑ । पु॒ना॒नः । च॒म्वोः॑ । वि॒श॒त् । हरिः॑

४०. मण्डलम् १०, सूक्तम् ९३, मन्त्रः २ (ऋक्सङ्ख्या : ९८४६)
वाक्यम् १: य॒ज्ञेय॑ज्ञे स मर्त्यो॑ दे॒वान्त्स॑पर्यति ।
पदानि : य॒ज्ञेऽय॑ज्ञे । सः । मर्त्यः॑ । दे॒वान् । स॒प॒र्य॒ति॒
वाक्यम् २: यः सु॒म्नैर्दी॑र्घ॒श्रुत्त॑म आ॒विवा॑सत्येनान् ॥

पदानि : यः । सुम्नैः । दीर्घश्रुत्ऽतमः । आऽविवासाति । एनान्

४१. मण्डलम् १०, सूक्तम् १३६, मन्त्रः ४ (ऋक्सङ्ख्या : १०२९२)
वाक्यम् १: अन्तरिक्षेण पतति विश्वा रूपावचाकशत् ।
पदानि : अन्तरिक्षेण । पततति । विश्वा । रूपा । अवऽचाकशत्
वाक्यम् २: मुनिर्देवस्यदेवस्य सौकृत्याय सखा हितः ॥
पदानि : मुनिः । देवस्यऽदेवस्य । सौकृत्याय । सखा । हितः

षड्दवाक्यकाः मन्त्राः
(१०७ मन्त्राः)

१. मण्डलम् १, सूक्तम् १०, मन्त्रः १ (ऋक्सङ्ख्या : ९१)
वाक्यम् १: गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः ।
पदानि : गायन्ति । त्वा । गायत्रिणः । अर्चन्ति । अर्कम् । अर्किणः
वाक्यम् २: ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे ॥
पदानि : ब्रह्माणः । त्वा । शतक्रतो इति शतऽक्रतो । उत् । वंशम्ऽइव । येमिरे

२. मण्डलम् १, सूक्तम् ११, मन्त्रः ४ (ऋक्सङ्ख्या : १०६)
वाक्यम् १: पुरां भिन्दुर्युवा कविरमितौजा अजायत ।
पदानि : पुराम् । भिन्दुः । युवा । कविः । अमितऽओजाः । अजायत
वाक्यम् २: इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ॥
पदानि : इन्द्रः । विश्वस्य । कर्मणः । धर्ता । वज्री । पुरुऽस्तुतः

३. मण्डलम् १, सूक्तम् २८, मन्त्रः १ (ऋक्सङ्ख्या : ३१३)
वाक्यम् १: यत्र ग्रावा पृथुबुध्न ऊर्ध्वो भवति सोतवे ।
पदानि : यत्र । ग्रावा । पृथुऽबुध्नः । ऊर्ध्वः । भवति । सोतवे
वाक्यम् २: उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥
पदानि : उलूखलऽसुतानाम् । अव । इत् । ऊँ इति । इन्द्र । जल्गुलः

४. मण्डलम् १, सूक्तम् ४४, मन्त्रः ५ (ऋक्सङ्ख्या : ५२२)
वाक्यम् १: स्तविष्यामि त्वामहं विश्वस्यामृत भोजन ।
पदानि : स्तविष्यामि । त्वाम् । अहम् । विश्वस्य । अमृत । भोजन
वाक्यम् २: अग्ने त्रातारममृतं मियेध्य यजिष्ठं हव्यवाहन ॥
पदानि : अग्ने । त्रातारम् । अमृतम् । मियेध्य । यजिष्ठम् । हव्यऽवाहन

५. मण्डलम् १, सूक्तम् ४५, मन्त्रः २ (ऋक्सङ्ख्या : ५३३)
वाक्यम् १: श्रुष्टीवानो हि दाशुषे देवा अग्ने विचेतसः ।
पदानि : श्रुष्टीऽवानः । हि । दाशुषे । देवाः । अग्ने । विऽचेतसः
वाक्यम् २: तान्रोहिदश्व गिर्वणस्त्रयस्त्रिंशतमा वह ॥
पदानि : तान् । रोहित्ऽअश्व । गिर्वणः । त्रयःऽत्रिंशतम् । आ । वह

६. मण्डलम् १, सूक्तम् ४५, मन्त्रः १० (ऋक्सङ्ख्या : ५४१)
वाक्यम् १: अ॒र्वाञ्चं॒ दैव्यं॑ जन॒मग्ने॒ यक्ष्व॒ सहू॑तिभिः ।
पदानि : अ॒र्वाञ्च॑म्॑ । दैव्य॑म् । जन॑म् । अग्ने॑ । यक्ष्व॑ । सहू॑तिऽभिः
वाक्यम् २: अ॒यं सोमः॑ सुदानव॒स्तं पा॑त॒ तिरोअ॑ह्न्यम् ॥
पदानि : अ॒यम् । सोमः॑ । सु॒ऽदा॒न॒वः॒ । तम् । पा॒त॒ । ति॒रः॒ऽअ॑ह्न्यम्

७. मण्डलम् १, सूक्तम् ५०, मन्त्रः ११ (ऋक्सङ्ख्या : ५९७)
वाक्यम् १: उ॒द्यन्न॒द्य मि॑त्रमह आरोहन्नुत्त॑रां॒ दिव॑म् ।
पदानि : उ॒त्ऽयन् । अ॒द्य । मि॒त्र॒ऽम॒हः॒ । आ॒ऽरो॒ह॒न् । उत्ऽत॑राम् । दिव॑म्
वाक्यम् २: हृ॒द्रो॒गं मम॑ सूर्य हरि॒माणं॑ च नाशय ॥
पदानि : हृ॒त्ऽरो॒गम् । मम॑ । सूर्य॑ । ह॒रि॒माण॑म् । च॒ । ना॒श॒य॒

८. मण्डलम् १, सूक्तम् ५९, मन्त्रः ७ (ऋक्सङ्ख्या : ६८७)
वाक्यम् १: वै॒श्वा॒न॒रो म॑हि॒म्ना वि॒श्वकृ॑ष्टि॒र्भर॑द्वाजेषु यज॒तो वि॒भावा॑ ।
पदानि : वै॒श्वा॒न॒रः । म॒हि॒म्ना । वि॒श्वऽकृ॑ष्टिः । भ॒र॒त्ऽवा॑जेषु । य॒ज॒तः । वि॒भाऽवा॑
वाक्यम् २: शा॒त॒व॒ने॒ये श॒तिनी॑भिर॒ग्निः पु॑रुणी॒थे ज॑रते सू॒नृता॑वान् ॥
पदानि : शा॒त॒ऽव॒ने॒ये । श॒तिनी॑भिः । अ॒ग्निः । पु॒रु॒ऽनी॒थे । ज॒र॒ते । सू॒नृता॑ऽवान्

९. मण्डलम् १, सूक्तम् ८४, मन्त्रः ५ (ऋक्सङ्ख्या : ९१९)
वाक्यम् १: इन्द्रा॑य नूनम॑र्चतो॒क्थानि॑ च ब्रवीतन ।
पदानि : इन्द्रा॑य । नूनम् । अ॒र्च॒त॒ । उ॒क्थानि॑ । च॒ । ब्र॒वी॒त॒न॒
वाक्यम् २: सुता अ॑मत्सुरिन्द॑वो॒ ज्येष्ठं॑ नमस्यता॒ सहः॑ ॥
पदानि : सु॒ताः । अ॒म॒त्सुः॒ । इन्द॑वः । ज्येष्ठ॑म् । न॒म॒स्य॒त॒ । सहः॑

१०. मण्डलम् १, सूक्तम् ८४, मन्त्रः ८ (ऋक्सङ्ख्या : ९२२)
वाक्यम् १: क॒दा मर्त॑मरा॒धस॑ं प॒दा क्षुम्प॑मिव स्फुरत् ।
पदानि : क॒दा । मर्त॑म् । अ॒रा॒धस॑म् । प॒दा । क्षुम्प॑म्ऽइव । स्फु॒र॒त्
वाक्यम् २: क॒दा नः॑ शुश्रव॒द्गिर॒ इन्द्रो॑ अङ्ग ॥
पदानि : क॒दा । नः॒ । शु॒श्र॒व॒त् । गिरः॑ । इन्द्रः॑ । अ॒ङ्ग॒

११. मण्डलम् १, सूक्तम् १७५, मन्त्रः ४ (ऋक्सङ्ख्या : १८६७)
वाक्यम् १: मु॒षा॒य सूर्यं॑ क॒वे च॒क्रमीशा॑न॒ ओज॑सा ।
पदानि : मु॒षा॒य । सूर्य॑म् । क॒वे॒ । च॒क्रम् । ईशा॑नः । ओज॑सा
वाक्यम् २: वह॒ शुष्णा॑य व॒धं कुत्सं॑ वात॒स्याश्वैः॑ ॥
पदानि : वह॑ । शुष्णा॑य । व॒धम् । कुत्स॑म् । वात॑स्य । अश्वैः॑

१२. मण्डलम् १, सूक्तम् १७६, मन्त्रः ३ (ऋक्सङ्ख्या : १८७२)
वाक्यम् १: यस्य॒ विश्वा॑नि॒ हस्त॑योः॒ पञ्च॑ क्षिती॒नां वसु॑ ।
पदानि : यस्य॑ । विश्वा॑नि । हस्त॑योः । पञ्च॑ । क्षि॒ती॒नाम् । वसु॑

वाक्यम् २: स्पाशयस्व यो अस्मध्रुग्दिव्येवाशनिर्जहि ॥
पदानि : स्पाशयस्व । यः । अस्मऽध्रुक् । दिव्याऽइव । अशनिः । जहि

१३. मण्डलम् १, सूक्तम् १९१, मन्त्रः २ (ऋक्सङ्ख्या : १९९२)
वाक्यम् १: अदृष्टान्हन्त्यायत्यथो हन्ति परायती ।
पदानि : अदृष्टान् । हन्ति । आऽयती । अथो इति । हन्ति । पराऽयती
वाक्यम् २: अथो अवघ्नती हन्त्यथो पिनष्टि पिंषती ॥
पदानि : अथो इति । अवऽघ्नती । हन्ति । अथो इति । पिनष्टि । पिंषती

१४. मण्डलम् १, सूक्तम् १९१, मन्त्रः ८ (ऋक्सङ्ख्या : १९९८)
वाक्यम् १: उत्पुरस्तात्सूर्य एति विश्वदृष्टो अदृष्टहा ।
पदानि : उत् । पुरस्तात् । सूर्यः । एति । विश्वऽदृष्टः । अदृष्टऽहा
वाक्यम् २: अदृष्टान्त्सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः ॥
पदानि : अदृष्टान् । सर्वान् । जम्भयन् । सर्वाः । च । यातुऽधान्यः

१५. मण्डलम् २, सूक्तम् ५, मन्त्रः १ (ऋक्सङ्ख्या : २०५६)
वाक्यम् १: होताजनिष्ट चेतनः पिता पितृभ्य ऊतये ।
पदानि : होता । अजनिष्ट । चेतनः । पिता । पितृऽभ्यः । ऊतये
वाक्यम् २: प्रयक्षञ्जेन्यं वसु शकेम वाजिनो यमम् ॥
पदानि : प्रऽयक्षन् । जेन्यम् । वसु । शकेम । वाजिनः । यमम्

१६. मण्डलम् २, सूक्तम् ४१, मन्त्रः १७ (ऋक्सङ्ख्या : २४२५)
वाक्यम् १: त्वे विश्वा सरस्वति श्रितायूंषि देव्याम् ।
पदानि : त्वे इति । विश्वा । सरस्वति । श्रिता । आयूंषि । देव्याम्
वाक्यम् २: शुनहोत्रेषु मत्स्व प्रजां देवि दिदिड्ढि नः ॥
पदानि : शुनऽहोत्रेषु । मत्स्व । प्रऽजाम् । देवि । दिदिड्ढि । नः

१७. मण्डलम् ३, सूक्तम् ८, मन्त्रः ७ (ऋक्सङ्ख्या : २५३५)
वाक्यम् १: ये वृक्णासो अधि क्षमि निमितासो यतस्रुचः ।
पदानि : ये । वृक्णासः । अधि । क्षमि । निऽमितासः । यतऽस्रुचः
वाक्यम् २: ते नो व्यन्तु वार्यं देवत्रा क्षेत्रसाधसः ॥
पदानि : ते । नः । व्यन्तु । वार्यम् । देवऽत्रा । क्षेत्रऽसाधसः

१८. मण्डलम् ३, सूक्तम् ९, मन्त्रः १ (ऋक्सङ्ख्या : २५४०)
वाक्यम् १: सखायस्त्वा ववृमहे देवं मर्तास ऊतये ।
पदानि : सखायः । त्वा । ववृमहे । देवम् । मर्तासः । ऊतये
वाक्यम् २: अपां नपातं सुभगं सुदीदितिं सुप्रतूर्तिमनेहसम् ॥
पदानि : अपाम् । नपातम् । सुऽभगम् । सुऽदीदितिम् । सुऽप्रतूर्तिम् । अनेहसम्

१९. मण्डलम् ३, सूक्तम् १३, मन्त्रः २ (ऋक्सङ्ख्या : २५७७)

वाक्यम् १: ऋ॒तावा॒ यस्य॒ रोद॑सी॒ दक्षं॑ सच॑न्त ऊ॒तय॑: ।
पदानि : ऋ॒तऽवा॑ । यस्य॑ । रोद॑सी॒ इति॑ । दक्ष॑म् । सच॑न्ते । ऊ॒तय॑:
वाक्यम् २: ह॒विष्म॑न्त॒स्तमी॑ळते॒ तं स॑नि॒ष्यन्तोऽव॑से ॥
पदानि : ह॒विष्म॑न्तः । तम् । ई॒ळ॒ते॒ । तम् । स॒नि॒ष्यन्तः॑ । अव॑से

२०. मण्डलम् ३, सूक्तम् १३, मन्त्रः ६ (ऋक्सङ्ख्या : २५८१)
वाक्यम् १: उ॒त नो॒ ब्रह्म॑न्नविष उ॒क्थेषु॑ देव॒हूत॑मः ।
पदानि : उ॒त । नः॒ । ब्रह्म॑न् । अ॒वि॒षः॒ । उ॒क्थेषु॑ । दे॒व॒ऽहूत॑मः
वाक्यम् २: शं नः॑ शोचा म॒रुद्वृ॑धोऽग्ने सहस्रसात॒मः ॥
पदानि : शम् । नः॒ । शो॒च॒ । म॒रुत्ऽव॑धः । अग्ने॑ । स॒ह॒स्र॒ऽसात॑मः

२१. मण्डलम् ३, सूक्तम् १६, मन्त्रः १ (ऋक्सङ्ख्या : २५९७)
वाक्यम् १: अ॒यम॒ग्निः सु॑वीर्य॒स्येशे म॒हः सौभ॑गस्य ।
पदानि : अ॒यम् । अ॒ग्निः । सु॒ऽवी॒र्य॒स्य । ईशे । म॒हः । सौभ॑गस्य
वाक्यम् २: रा॒य ईशे स्वप॒त्यस्य॒ गोम॑त॒ ईशे वृ॒त्र॒हथा॑नाम् ॥
पदानि : रा॒यः । ईशे॒ । सु॒ऽअ॒प॒त्यस्य॑ । गोऽम॑तः । ईशे । वृ॒त्र॒ऽहथा॑नाम्

२२. मण्डलम् ३, सूक्तम् २१, मन्त्रः २ (ऋक्सङ्ख्या : २६२४)
वाक्यम् १: घृ॒तव॑न्तः पावक ते स्तो॒काः श्वो॑तन्ति मेद॒सः ।
पदानि : घृ॒तऽव॑न्तः । पा॒व॒क॒ । ते॒ । स्तो॒काः । श्वो॒त॒न्ति॒ । मेद॒सः
वाक्यम् २: स्वध॑र्मन्दे॒ववी॑तये॒ श्रेष्ठं॑ नो धेहि॒ वार्य॑म् ॥
पदानि : स्वऽध॑र्मन् । दे॒वऽवी॑तये । श्रेष्ठ॑म् । नः॒ । धे॒हि॒ । वार्य॑म्

२३. मण्डलम् ३, सूक्तम् २४, मन्त्रः १ (ऋक्सङ्ख्या : २६३८)
वाक्यम् १: अग्ने॒ सह॑स्व पृत॒ना अ॒भिमा॑ती॒रपा॑स्य ।
पदानि : अग्ने॑ । सह॑स्व । पृ॒त॒नाः । अ॒भिऽमा॑तीः । अप॑ । अ॒स्य॒
वाक्यम् २: दु॒ष्टर॒स्तर॒न्नरा॑ती॒र्वर्चो॑ धा य॒ज्ञव॑ाहसे ॥
पदानि : दु॒स्तरः॑ । तर॑न् । अरा॑तीः । वर्चः॑ । धाः॒ । य॒ज्ञऽवा॑हसे

२४. मण्डलम् ३, सूक्तम् २९, मन्त्रः २ (ऋक्सङ्ख्या : २६७९)
वाक्यम् १: अ॒रण्यो॒र्निहि॑तो जा॒तवे॑दा॒ गर्भ॑ इव॒ सुधि॑तो ग॒र्भिणी॑षु ।
पदानि : अ॒रण्योः॑ । निऽहि॑तः । जा॒तऽवे॑दाः । गर्भः॑ऽइव । सुऽधि॑तः । ग॒र्भिणी॑षु
वाक्यम् २: दि॒वेदि॑व॒ ईड्यो॑ जागृ॒वद्भि॑र्ह॒विष्म॑द्भिर्मनुष्ये॒भिर॒ग्निः ॥
पदानि : दि॒वेऽदि॑वे । ईड्यः॑ । जा॒गृ॒वत्ऽभिः॑ । हु॒विष्म॑त्ऽभिः । म॒नु॒ष्ये॑भिः । अ॒ग्निः

२५. मण्डलम् ४, सूक्तम् ३४, मन्त्रः ८ (ऋक्सङ्ख्या : ३४४९)
वाक्यम् १: स॒जोष॑स आदि॒त्यैर्मा॑दयध्वं स॒जोष॑स ऋभव॒: पर्व॑तेभिः ।
पदानि : स॒ऽजोष॑सः । आ॒दि॒त्यैः । मा॒द॒य॒ध्व॒म् । स॒ऽजोष॑सः । ऋ॒भ॒व॒: । पर्व॑तेभिः
वाक्यम् २: स॒जोष॑सो दैव्ये॒ना स॑वि॒त्रा स॒जोष॑स॒: सिन्धु॑भी रत्न॒धेभिः॑ ॥
पदानि : स॒ऽजोष॑सः । दैव्ये॑न । स॒वि॒त्रा । स॒ऽजोष॑सः । सिन्धु॑ऽभिः । र॒त्न॒ऽधेभिः॑

२६. मण्डलम् ५, सूक्तम् ७, मन्त्रः ६ (ऋक्सङ्ख्या : ३७१५)
वाक्यम् १: यं मर्त्यः पुरुस्पृहं विदद्विश्वस्य धायसे ।
पदानि : यम् । मर्त्यः । पुरुऽस्पृहम् । विदत् । विश्वस्य । धायसे
वाक्यम् २: प्र स्वादनं पितूनामस्तंतातिं चिदायवे ॥
पदानि : प्र । स्वादनम् । पितूनाम् । अस्तंऽतातिम् । चित् । आयवे

२७. मण्डलम् ५, सूक्तम् १७, मन्त्रः २ (ऋक्सङ्ख्या : ३७७६)
वाक्यम् १: अस्य हि स्वयंशस्तर आसा विंधर्मन्मन्यसे ।
पदानि : अस्य । हि । स्वयंशःऽतरः । आसा । विऽधर्मन् । मन्यसे
वाक्यम् २: तं नाकं चित्रशोंचिषं मन्द्रं परो मनीषयां ॥
पदानि : तम् । नाकम् । चित्रऽशोंचिषम् । मन्द्रम् । परः । मनीषयां

२८. मण्डलम् ५, सूक्तम् १८, मन्त्रः १ (ऋक्सङ्ख्या : ३७८०)
वाक्यम् १: प्रातरग्निः पुरुप्रियो विशः स्तवेतातिंथिः ।
पदानि : प्रातः । अग्निः । पुरुऽप्रियः । विशः । स्तवेत । अतिंथिः
वाक्यम् २: विश्वांनि यो अमर्त्यो हव्या मर्तेषु रण्यंति ॥
पदानि : विश्वांनि । यः । अमर्त्यः । हव्या । मर्तेषु । रण्यंति

२९. मण्डलम् ५, सूक्तम् १८, मन्त्रः ३ (ऋक्सङ्ख्या : ३७८२)
वाक्यम् १: तं वों दीर्घायुंशोचिषं गिरा हुंवे मघोनांम् ।
पदानि : तम् । वः । दीर्घायुंऽशोचिषम् । गिरा । हुवे । मघोनांम्
वाक्यम् २: अरिंष्टो येषां रथो व्यश्वदावन्नीयंते ॥
पदानि : अरिंष्टः । येषांम् । रथः । वि । अश्वऽदावन् । ईयंते

३०. मण्डलम् ५, सूक्तम् १९, मन्त्रः ३ (ऋक्सङ्ख्या : ३७८७)
वाक्यम् १: आ श्वैत्रेयस्यं जन्तवों द्युमद्वंर्धन्त कृष्टयः ।
पदानि : आ । श्वैत्रेयस्यं । जन्तवः । द्युऽमत् । वर्धन्त । कृष्टयः
वाक्यम् २: निष्कग्रींवो बृहदुंक्थ एना मध्वा न वांजयुः ॥
पदानि : निष्कऽग्रींवः । बृहत्ऽउंक्थः । एना । मध्वा । न । वाजऽयुः

३१. मण्डलम् ५, सूक्तम् २१, मन्त्रः ३ (ऋक्सङ्ख्या : ३७९६)
वाक्यम् १: त्वां विश्वे सजोषंसो देवासों दूतमंक्रत ।
पदानि : त्वाम् । विश्वे । सऽजोषंसः । देवासः । दूतम् । अक्रत
वाक्यम् २: सपर्यन्तंस्त्वा कवे यज्ञेषु देवमीळते ॥
पदानि : सपर्यन्तः । त्वा । कवे । यज्ञेषु । देवम् । ईळते

३२. मण्डलम् ५, सूक्तम् २२, मन्त्रः २ (ऋक्सङ्ख्या : ३७९९)
वाक्यम् १: न्य१ग्निं जातवेदसं दधांता देवमृत्विजम् ।
पदानि : नि । अग्निम् । जातऽवेदसम् । दधात । देवम् । ऋत्विजम्
वाक्यम् २: प्र यज्ञ एंत्वानुषगद्या देवव्यंचस्तमः ॥

पदानि : प्र । यज्ञः । एतु । आनुषक् । अद्य । देवव्यचःऽतमः

३३. मण्डलम् ५, सूक्तम् २३, मन्त्रः ३ (ऋक्सङ्ख्या : ३८०४)
वाक्यम् १: विश्वे हि त्वा सजोषसो जनासो वृक्तबर्हिषः ।
पदानि : विश्वे । हि । त्वा । सऽजोषसः । जनासः । वृक्तऽबर्हिषः
वाक्यम् २: होतारं सद्मसु प्रियं व्यन्ति वार्या पुरु ॥
पदानि : होतारम् । सद्मऽसु । प्रियम् । व्यन्ति । वार्या । पुरु

३४. मण्डलम् ५, सूक्तम् २५, मन्त्रः ४ (ऋक्सङ्ख्या : ३८१३)
वाक्यम् १: अग्निर्देवेषु राजत्यग्निर्मर्तेष्वाविशन् ।
पदानि : अग्निः । देवेषु । राजति । अग्निः । मर्तेषु । आऽविशन्
वाक्यम् २: अग्निर्नो हव्यवाहनोऽग्निं धीभिः संपर्यत ॥
पदानि : अग्निः । नः । हव्यऽवाहनः । अग्निम् । धीभिः । सपर्यत

३५. मण्डलम् ५, सूक्तम् २८, मन्त्रः ४ (ऋक्सङ्ख्या : ३८३७)
वाक्यम् १: समिद्धस्य प्रमहसोऽग्ने वन्दे तव श्रियम् ।
पदानि : सम्ऽइद्धस्य । प्रऽमहसः । अग्ने । वन्दे । तव । श्रियम्
वाक्यम् २: वृषभो द्युम्नवाँ असि समध्वरेष्विध्यसे ॥
पदानि : वृषभः । द्युम्नऽवान् । असि । सम् । अध्वरेषु । इध्यसे

३६. मण्डलम् ५, सूक्तम् ३५, मन्त्रः ३ (ऋक्सङ्ख्या : ३९१६)
वाक्यम् १: आ तेऽवो वरेण्यं वृषन्तमस्य हूमहे ।
पदानि : आ । ते । अवः । वरेण्यम् । वृषन्ऽतमस्य । हूमहे
वाक्यम् २: वृषजूतिर्हि जज्ञिष आभूभिरिन्द्र तुर्वणिः ॥
पदानि : वृषऽजूतिः । हि । जज्ञिषे । आऽभूभिः । इन्द्र । तुर्वणिः

३७. मण्डलम् ५, सूक्तम् ३५, मन्त्रः ५ (ऋक्सङ्ख्या : ३९१८)
वाक्यम् १: त्वं तमिन्द्र मर्त्यममित्रयन्तमद्रिवः ।
पदानि : त्वम् । तम् । इन्द्र । मर्त्यम् । अमित्रऽयन्तम् । अद्रिऽवः
वाक्यम् २: सर्वरथा शतक्रतो नि याहि शवसस्पते ॥
पदानि : सर्वऽरथा । शतक्रतो इति शतऽक्रतो । नि । याहि । शवसः । पते

३८. मण्डलम् ५, सूक्तम् ५०, मन्त्रः १ (ऋक्सङ्ख्या : ४०५८)
वाक्यम् १: विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् ।
पदानि : विश्वः । देवस्य । नेतुः । मर्तः । वुरीत । सख्यम्
वाक्यम् २: विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे ॥
पदानि : विश्वः । राये । इषुध्यति । द्युम्नम् । वृणीत । पुष्यसे

३९. मण्डलम् ५, सूक्तम् ५१, मन्त्रः ८ (ऋक्सङ्ख्या : ४०७०)
वाक्यम् १: सजूर्विश्वेभिर्देवेभिरश्विभ्यामुषसा सजूः ।

पदानि : स॒ऽजू॒ः । विश्वे॑भिः । दे॒वेभिः॑ । अ॒श्वि॒ऽभ्या॑म् । उ॒षसा॑ । स॒ऽजू॒ः
वाक्यम् २: आ या॑ह्यग्ने अत्रि॒वत्सु॒ते र॑ण ॥
पदानि : आ । या॒हि॒ । अ॒ग्ने॒ । अ॒त्रि॒ऽवत् । सु॒ते । र॒ण॒

४०. मण्डलम् ५, सूक्तम् ५२, मन्त्रः १ (ऋक्सङ्ख्या : ४०७८)
वाक्यम् १: प्र श्या॑वाश्व धृष्णु॒यार्चा म॒रुद्भि॒र्ऋक्वभिः॑ ।
पदानि : प्र । श्या॒व॒ऽअ॒श्व॒ । धृ॒ष्णु॒ऽया । अर्च॑ । म॒रुत्ऽभिः॑ । ऋक्व॑ऽभिः
वाक्यम् २: ये अ॑द्रो॒घमनु॑ष्वधं श्रवो॒ मदं॑न्ति य॒ज्ञिया॑ः ॥
पदानि : ये । अ॒द्रो॒घम् । अनु॑ऽस्वधम् । श्रवः॑ । मदं॑न्ति । य॒ज्ञिया॑ः

४१. मण्डलम् ५, सूक्तम् ५६, मन्त्रः ५ (ऋक्सङ्ख्या : ४१४०)
वाक्यम् १: उत्ति॑ष्ठ नूनमेषां॑ स्तोमै॒ः समु॑क्षितानाम् ।
पदानि : उत् । ति॒ष्ठ॒ । नू॒नम् । ए॒षा॒म् । स्तोमैः॑ । सम्ऽउ॑क्षितानाम्
वाक्यम् २: म॒रुता॑ पुरु॒तम॒मपू॑र्व्यं॑ गवां॒ सर्गमिव ह्वये ॥
पदानि : म॒रुता॑म् । पु॒रु॒ऽत॒म॑म् । अपू॑र्व्यम् । गवा॑म् । सर्ग॑म्ऽइव । ह्व॒ये॒

४२. मण्डलम् ५, सूक्तम् ६६, मन्त्रः ५ (ऋक्सङ्ख्या : ४२२९)
वाक्यम् १: तद्दृ॒तं पृ॑थिवि बृ॒हच्छ्र॑वए॒ष ऋषी॑णाम् ।
पदानि : तत् । ऋ॒तम् । पृ॒थि॒वि॒ । बृ॒हत् । श्र॒वः॑ऽए॒षे । ऋषी॑णाम्
वाक्यम् २: ज्र॒य॒सा॒नाव॑रं पृथ्व॒तिं क्षर॑न्ति॒ याम॑भिः ॥
पदानि : ज्र॒य॒सा॒नौ । अर॑म् । पृ॒थु । अति॑ । क्ष॒र॒न्ति॒ । याम॑ऽभिः

४३. मण्डलम् ५, सूक्तम् ७३, मन्त्रः २ (ऋक्सङ्ख्या : ४२५६)
वाक्यम् १: इ॒ह त्या पु॑रुभूत॒मा पुरू दं॑सां॒सि॒ बिभ्र॑ता ।
पदानि : इ॒ह । त्या । पु॒रु॒ऽभू॒त॒मा । पुरु । दं॒सां॒सि॒ । बिभ्र॑ता
वाक्यम् २: व॒र॒स्या या॒म्यध्रि॑गू हुवे तुविष्ट॒मा भुजे ॥
पदानि : व॒र॒स्या । या॒मि॒ । अध्रि॑गू इत्यध्रि॑ऽगू । हु॒वे॒ । तु॒विः॑ऽत॒मा । भु॒जे

४४. मण्डलम् ५, सूक्तम् ७३, मन्त्रः १० (ऋक्सङ्ख्या : ४२६४)
वाक्यम् १: इ॒मा ब्रह्मा॑णि॒ वर्ध॒नाश्वि॑भ्या॒ सन्तु॒ शं॑तमा ।
पदानि : इ॒मा । ब्रह्मा॑णि । वर्ध॑ना । अ॒श्वि॒ऽभ्या॑म् । स॒न्तु॒ । शम्ऽत॑मा
वाक्यम् २: या तक्षा॑म॒ रथाँ॑ इ॒वावो॑चाम बृ॒हन्नमः॑ ॥
पदानि : या । तक्षा॑म । रथा॑न्ऽइव । अवो॑चाम । बृ॒हत् । नमः॑

४५. मण्डलम् ५, सूक्तम् ७८, मन्त्रः ९ (ऋक्सङ्ख्या : ४३०२)
वाक्यम् १: दश॒ मासा॑ञ्छशया॒नः कु॑मा॒रो अधि॑ मा॒तरि॑ ।
पदानि : दश॑ । मासा॑न् । श॒श॒या॒नः । कु॒मा॒रः । अधि॑ । मा॒तरि॑
वाक्यम् २: नि॒रैतु॑ जी॒वो अक्ष॑तो जी॒वो जीव॑न्त्या॒ अधि॑ ॥
पदानि : निः॑ऽऐतु॑ । जी॒वः । अक्ष॑तः । जी॒वः । जीव॑न्त्याः । अधि॑

४६. मण्डलम् ५, सूक्तम् ८२, मन्त्रः ५ (ऋक्सङ्ख्या : ४३२८)
वाक्यम् १: विश्वा॑नि देव सवितर्दुरि॒ता॒नि॒ परा॑ सुव ।
पदानि : विश्वा॑नि । दे॒व॒ । स॒वि॒तः॒ । दुः॒ऽइ॒ता॒नि॑ । परा॑ । सु॒व॒
वाक्यम् २: यद्भ॒द्रं तन्न॒ आ सु॑व ॥
पदानि : यत् । भ॒द्रम् । तत् । नः॒ । आ । सु॒व॒

४७. मण्डलम् ६, सूक्तम् १४, मन्त्रः ४ (ऋक्सङ्ख्या : ४४७२)
वाक्यम् १: अ॒ग्निर॒प्सामृ॑तीषहं॑ वी॒रं द॑दाति॒ सत्प॑तिम् ।
पदानि : अ॒ग्निः । अ॒प्साम् । ऋ॒ति॒ऽसह॑म् । वी॒रम् । द॒दा॒ति॒ । सत्ऽप॑तिम्
वाक्यम् २: यस्य॒ त्रस॑न्ति॒ शव॑सः सं॒चक्षि॒ शत्र॑वो भि॒या ॥
पदानि : यस्य॑ । त्रस॑न्ति । शव॑सः । स॒म्ऽचक्षि॑ । शत्र॑वः । भि॒या

४८. मण्डलम् ६, सूक्तम् ४६, मन्त्रः १३ (ऋक्सङ्ख्या : ४८१७)
वाक्यम् १: यदि॑न्द्र॒ सर्गे॑ अ॒र्व॑तश्चो॒द॒यां॑से महाध॒ने ।
पदानि : यत् । इ॒न्द्र॒ । सर्गे॑ । अ॒र्व॑तः । चो॒द॒यां॑से । म॒हाऽध॒ने
वाक्यम् २: अ॒स॒म॒ने अध्व॑नि वृ॒जि॒ने प॒थि श्ये॒नाँ इ॑व श्रवस्य॒तः ॥
पदानि : अ॒स॒म॒ने । अध्व॑नि । वृ॒जि॒ने । प॒थि । श्ये॒नान्ऽइ॑व । श्र॒व॒स्य॒तः

४९. मण्डलम् ६, सूक्तम् ५६, मन्त्रः ६ (ऋक्सङ्ख्या : ४९६६)
वाक्यम् १: आ ते स्व॒स्तिमी॑महे आ॒रेअ॑घा॒मुपा॑वसुम् ।
पदानि : आ । ते॒ । स्व॒स्तिम् । ई॒म॒हे॒ । आ॒रेऽअ॑घाम् । उप॑ऽवसुम्
वाक्यम् २: अ॒द्या च॑ स॒र्वता॑तये॒ श्वश्च॑ स॒र्वता॑तये ॥
पदानि : अ॒द्य । च॒ । स॒र्वऽता॑तये । श्वः । च॒ । स॒र्वऽता॑तये

५०. मण्डलम् ६, सूक्तम् ७५, मन्त्रः ९ (ऋक्सङ्ख्या : ५१२३)
वाक्यम् १: स्वा॒दुषं॑सदः॑ पि॒तरो॑ वयो॒धाः कृ॑च्छ्रे॒श्रितः॒ शक्ती॑वन्तो गभी॒राः ।
पदानि : स्वा॒दुऽस॑सदः॑ । पि॒तरः॑ । व॒यः॒ऽधाः । कृ॒च्छ्रे॒ऽश्रितः॑ । शक्ति॑ऽवन्तः । ग॒भी॒राः
वाक्यम् २: चि॒त्रसे॑ना॒ इषु॑बला॒ अमृ॑ध्राः स॒तोवी॑रा उ॒रवो॑ व्रातसा॒हाः ॥
पदानि : चि॒त्रऽसे॑नाः । इषु॑ऽबलाः । अमृ॑ध्राः । स॒तःऽवी॑राः । उ॒रवः॑ । व्रा॒त॒ऽस॒हाः

५१. मण्डलम् ७, सूक्तम् ९४, मन्त्रः १२ (ऋक्सङ्ख्या : ५८८७)
वाक्यम् १: ताविद्दुः॑शंसं॒ मर्त्यं॑ दुर्विद्वां॑सं॒ रक्ष॑स्विनम् ।
पदानि : तौ । इत् । दुः॒ऽशंस॑म् । मर्त्य॑म् । दुः॒ऽविद्वां॑सम् । र॒क्ष॒स्विन॑म्
वाक्यम् २: आ॒भो॒गं ह॒न्म॑ना हतमुद॒धिं ह॒न्म॑ना हतम् ॥
पदानि : आ॒ऽभो॒गम् । ह॒न्म॑ना । ह॒त॒म् । उ॒द॒ऽधिम् । ह॒न्म॑ना । ह॒त॒म्

५२. मण्डलम् ८, सूक्तम् १, मन्त्रः १३ (ऋक्सङ्ख्या : ५९८७)
वाक्यम् १: मा भू॑म॒ निष्ट्या॑ इ॒वेन्द्र॒ त्वद॑र॒णा इव ।
पदानि : मा । भू॒म॒ । निष्ट्या॑ः॒ऽइव । इ॒न्द्र॒ । त्वत् । अ॒र॒णाः॒ऽइव
वाक्यम् २: वना॑नि॒ न प्र॑ज॒हि॒ता॒न्य॑द्रिवो दुरोषा॑सो अमन्महि ॥
पदानि : वना॑नि । न । प्र॒ऽज॒हि॒तानि॑ । अ॒द्रि॒ऽवः॒ । दु॒रोषा॑सः । अ॒म॒न्म॒हि

५३. मण्डलम् ८, सूक्तम् १, मन्त्रः २५ (ऋक्सङ्ख्या : ५९९९)
वाक्यम् १: आ त्वा रथे हिरण्यये हरी मयूरशेप्या।
पदानि : आ। त्वा। रथे। हिरण्यये। हरी इति। मयूरऽशेप्या
वाक्यम् २: शितिपृष्ठा वहतां मध्वो अन्धसो विवक्षणस्य पीतये॥
पदानि : शितिऽपृष्ठा। वहताम्। मध्वः। अन्धसः। विवक्षणस्य। पीतये

५४. मण्डलम् ८, सूक्तम् १२, मन्त्रः १ (ऋक्सङ्ख्या : ६२७९)
वाक्यम् १: य इन्द्र सोमपातमो मदः शविष्ठ चेतति।
पदानि : यः। इन्द्र। सोमऽपातमः। मदः। शविष्ठ। चेतति
वाक्यम् २: येना हंसि न्यत्रिणं तमीमहे॥
पदानि : येन। हंसि। नि। अत्रिणम्। तम्। ईमहे

५५. मण्डलम् ८, सूक्तम् १३, मन्त्रः १ (ऋक्सङ्ख्या : ६३१२)
वाक्यम् १: इन्द्रः सुतेषु सोमेषु क्रतुं पुनीत उक्थ्यम्।
पदानि : इन्द्रः। सुतेषु। सोमेषु। क्रतुम्। पुनीते। उक्थ्यम्
वाक्यम् २: विदे वृधस्य दक्षसो महान्हि षः॥
पदानि : विदे। वृधस्य। दक्षसः। महान्। हि। सः

५६. मण्डलम् ८, सूक्तम् १३, मन्त्रः ३ (ऋक्सङ्ख्या : ६३१४)
वाक्यम् १: तमह्वे वाजसातय इन्द्रं भराय शुष्मिणम्।
पदानि : तम्। अह्वे। वाजऽसातये। इन्द्रम्। भराय। शुष्मिणम्
वाक्यम् २: भवा नः सुम्ने अन्तमः सखा वृधे॥
पदानि : भव। नः। सुम्ने। अन्तमः। सखा। वृधे

५७. मण्डलम् ८, सूक्तम् १३, मन्त्रः २४ (ऋक्सङ्ख्या : ६३३५)
वाक्यम् १: तमीमहे पुरुष्टुतं यह्वं प्रत्नाभिरूतिभिः।
पदानि : तम्। ईमहे। पुरुऽस्तुतम्। यह्वम्। प्रत्नाभिः। ऊतिऽभिः
वाक्यम् २: नि बर्हिषि प्रिये सददधं द्विता॥
पदानि : नि। बर्हिषि। प्रिये। सदत्। अधं। द्विता

५८. मण्डलम् ८, सूक्तम् १५, मन्त्रः ११ (ऋक्सङ्ख्या : ६३७०)
वाक्यम् १: सत्रा त्वं पुरुष्टुतँ एको वृत्राणि तोशसे।
पदानि : सत्रा। त्वम्। पुरुऽस्तुत। एकः। वृत्राणि। तोशसे
वाक्यम् २: नान्य इन्द्रात्करणं भूय इन्वति॥
पदानि : न। अन्यः। इन्द्रात्। करणम्। भूयः। इन्वति

५९. मण्डलम् ८, सूक्तम् १८, मन्त्रः १५ (ऋक्सङ्ख्या : ६४१४)
वाक्यम् १: पाकत्रा स्थन देवा हृत्सु जानीथ मर्त्यम्।
पदानि : पाकऽत्रा। स्थन। देवाः। हृत्ऽसु। जानीथ। मर्त्यम्

वाक्यम् २: उप॑ द्व॒युं चाद्व॑युं च वसवः ॥
पदानि : उप॑ । द्व॒युम् । च॒ । अद्व॑युम् । च॒ । व॒स॒वः॒

६०. मण्डलम् ८, सूक्तम् २३, मन्त्रः १० (ऋक्सङ्ख्या : ६५३०)
वाक्यम् १: अच्छा॑ नो॒ अङ्गि॑रस्तमं य॒ज्ञासो॑ यन्तु सं॒यत॑: ।
पदानि : अच्छ॑ । नः॒ । अङ्गि॑रःऽतमम् । य॒ज्ञास॑: । य॒न्तु॒ । स॒म्ऽयत॑:
वाक्यम् २: होता॒ यो अस्ति॑ वि॒क्ष्वा य॒शस्त॑मः ॥
पदानि : होता॑ । यः । अस्ति॑ । वि॒क्षु । आ । य॒शःऽत॑मः

६१. मण्डलम् ८, सूक्तम् २३, मन्त्रः २१ (ऋक्सङ्ख्या : ६५४१)
वाक्यम् १: यो अ॑स्मै हु॒व्यदा॑तिभि॒राहु॑तिं॒ मर्तो॑ऽविधत् ।
पदानि : यः । अ॒स्मै॒ । हु॒व्यदा॑तिऽभिः । आऽहु॑तिम् । मर्तः॑ । अविधत्
वाक्यम् २: भूरि॒ पोष॑ं स धत्ते वी॒रव॒द्यश॑: ॥
पदानि : भूरि॑म् । पोष॑म् । सः । ध॒त्ते॒ । वी॒रऽव॑त् । यश॑:

६२. मण्डलम् ८, सूक्तम् २४, मन्त्रः १ (ऋक्सङ्ख्या : ६५५१)
वाक्यम् १: सखा॑य॒ आ शि॑षामहि॒ ब्रह्मेन्द्रा॑य व॒ज्रिणे ।
पदानि : सखा॑यः । आ । शि॒षा॒म॒हि॒ । ब्रह्म॑ । इन्द्रा॑य । व॒ज्रिणे॑
वाक्यम् २: स्तु॒ष ऊ॒ षु वो॒ नृत॑माय धृ॒ष्णवे ॥
पदानि : स्तु॒षे । ऊँ॒ इति॑ । सु । वः॒ । नृऽत॑माय । धृ॒ष्णवे॑

६३. मण्डलम् ८, सूक्तम् २४, मन्त्रः २१ (ऋक्सङ्ख्या : ६५७१)
वाक्यम् १: यस्यामि॑तानि वी॒र्या३॑ न राध॒: पर्येत॑वे ।
पदानि : यस्य॑ । अमि॑तानि । वी॒र्या॑ । न । राधः॑ । परि॑ऽएतवे
वाक्यम् २: ज्योति॒र्न विश्व॑म॒भ्यस्ति॒ दक्षि॑णा ॥
पदानि : ज्योतिः॑ । न । विश्व॑म् । अ॒भि । अस्ति॑ । दक्षि॑णा

६४. मण्डलम् ८, सूक्तम् २४, मन्त्रः ३० (ऋक्सङ्ख्या : ६५८०)
वाक्यम् १: यत्त्वा॑ पृ॒च्छादी॑जा॒नः कु॒हया॑ कु॒हयाकृ॑ते ।
पदानि : यत् । त्वा॒ । पृ॒च्छात् । ई॒जा॒नः । कु॒हया॑ । कु॒हया॑ऽकृ॑ते
वाक्यम् २: ए॒षो अप॑श्रितो व॒लो गो॑म॒तीमव॑ तिष्ठति ॥
पदानि : ए॒षः । अप॑ऽश्रितः । व॒लः । गो॒ऽम॒तीम् । अव॑ । ति॒ष्ठ॒ति॒

६५. मण्डलम् ८, सूक्तम् २६, मन्त्रः ५ (ऋक्सङ्ख्या : ६६०९)
वाक्यम् १: जु॒हु॒रा॒णा चि॑दश्वि॒ना म॑न्येथां वृषण्वसू ।
पदानि : जु॒हु॒रा॒णा । चि॒त् । अ॒श्वि॒ना । आ । म॒न्ये॒था॒म् । वृ॒ष॒ण्व॒सू॒ इति॑ वृषण्ऽवसू
वाक्यम् २: यु॒वं हि रु॑द्रा पर्षथो अ॒ति द्विष॑: ॥
पदानि : यु॒वम् । हि । रु॒द्रा॒ । पर्ष॑थः । अति॑ । द्विष॑:

६६. मण्डलम् ८, सूक्तम् २६, मन्त्रः ९ (ऋक्सङ्ख्या : ६६१३)

वाक्यम् १: व॒यं हि वा॒मव॑मह उक्षण्यन्तो॑ व्यश्व॒वत् ।
पदानि : व॒यम् । हि । वा॒म् । हव॑महे । उ॒क्ष॒ण्य॒न्तः॑ । व्य॒श्व॒ऽवत्
वाक्यम् २: सु॒म॒ति॒भि॒रुप॑ विप्रावि॒हा ग॑तम् ॥
पदानि : सु॒म॒तिऽभिः॑ । उप॑ । वि॒प्रौ॒ । इ॒ह । आ । ग॒त॒म्

६७. मण्डलम् ८, सूक्तम् ४६, मन्त्रः १८ (ऋक्सङ्ख्या : ६९६४)
वाक्यम् १: ये पा॒तय॑न्ते अज्म॒भिर्गिरी॑णां स्नु॒भिरेषाम् ।
पदानि : ये । पा॒तय॑न्ते । अज्म॑ऽभिः । गि॒री॒णाम् । स्नु॒ऽभिः॑ । ए॒षा॒म्
वाक्यम् २: य॒ज्ञं म॑हि॒ष्वणी॑नां सु॒म्नं तु॑वि॒ष्वणी॑नां प्राध्व॒रे ॥
पदानि : य॒ज्ञम् । म॒हि॒ऽस्वनी॑नाम् । सु॒म्नम् । तु॒वि॒ऽस्वनी॑नाम् । प्र । अ॒ध्व॒रे

६८. मण्डलम् ८, सूक्तम् ४६, मन्त्रः १९ (ऋक्सङ्ख्या : ६९६५)
वाक्यम् १: प्र॒भ॒ङ्गं दु॑र्म॒ती॒नामिन्द्रं॑ शविष्ठा भर॑ ।
पदानि : प्र॒ऽभ॒ङ्गम् । दुः॒ऽम॒ती॒नाम् । इन्द्र॑म् । श॒वि॒ष्ठ॒ । आ । भ॒र॒
वाक्यम् २: र॒यिम॒स्मभ्यं॑ युज्यं॑ चोदयन्मते ज्येष्ठं॑ चोदयन्मते ॥
पदानि : र॒यिम् । अ॒स्मभ्य॑म् । यु॒ज्य॑म् । चो॒द॒य॒त्ऽम॒ते॒ । ज्येष्ठ॑म् । चो॒द॒य॒त्ऽम॒ते॒

६९. मण्डलम् ८, सूक्तम् ५२, मन्त्रः २ (ऋक्सङ्ख्या : ७०४४)
वाक्यम् १: पृष॑ध्रे मेध्ये मात॒रिश्व॑नीन्द्रं॑ सु॒वा॒ने अम॑न्दथाः ।
पदानि : पृष॑ध्रे । मेध्ये । मा॒त॒रिश्व॑नि । इन्द्र॑म् । सु॒वा॒ने । अम॑न्दथाः
वाक्यम् २: यथा॒ सोम॑ दशशिप्रे दशो॑ण्ये स्यू॒मर॑श्मावृजू॒नसि ॥
पदानि : यथा॑ । सोम॑म् । दश॑ऽशिप्रे । दश॑ऽओण्ये । स्यू॒मऽर॑श्मौ । ऋ॒जू॒नसि

७०. मण्डलम् ८, सूक्तम् ६३, मन्त्रः ४ (ऋक्सङ्ख्या : ७१४६)
वाक्यम् १: स प्र॒त्न॒था॑ कविवृ॒ध इन्द्रो॑ वा॒कस्य॑ व॒क्षणिः॑ ।
पदानि : सः । प्र॒त्न॒ऽथा॑ । क॒वि॒ऽवृ॒धः । इन्द्रः॑ । वा॒कस्य॑ । व॒क्षणिः॑
वाक्यम् २: शि॒वो अ॒र्कस्य॒ होम॑न्यस्मि॒त्रा ग॒न्त्ववं॑से ॥
पदानि : शि॒वः । अ॒र्कस्य॑ । होम॑नि । अ॒स्मि॒ऽत्रा । ग॒न्तु॒ । अव॑से

७१. मण्डलम् ८, सूक्तम् ६९, मन्त्रः ९ (ऋक्सङ्ख्या : ७२४२)
वाक्यम् १: अव॑ स्वराति॒ गर्ग॑रो॒ गो॒धा परि॑ सनिष्वणत् ।
पदानि : अव॑ । स्व॒रा॒ति॒ । गर्ग॑रः । गो॒धा । परि॑ । स॒नि॒स्व॒न॒त्
वाक्यम् २: पिङ्गा॒ परि॑ चनिष्कद॒दिन्द्रा॑य ब्रह्मो॒द्यत॑म् ॥
पदानि : पिङ्गा॑ । परि॑ । च॒नि॒स्क॒द॒त् । इन्द्रा॑य । ब्रह्म॑ । उत्ऽय॑तम्

७२. मण्डलम् ८, सूक्तम् ७१, मन्त्रः १० (ऋक्सङ्ख्या : ७२७६)
वाक्यम् १: अच्छा॑ नः शी॒रशो॑चिषं॒ गिरो॑ यन्तु दर्श॒तम् ।
पदानि : अच्छ॑ । नः॒ । शी॒रऽशो॑चिषम् । गिरः॑ । य॒न्तु॒ । द॒र्श॒तम्
वाक्यम् २: अच्छा॑ य॒ज्ञासो॒ नम॑सा पुरू॒वसुं॑ पुरुप्रश॒स्तमू॒तये ॥
पदानि : अच्छ॑ । य॒ज्ञासः॑ । नम॑सा । पु॒रु॒ऽवसु॑म् । पु॒रु॒ऽप्र॒श॒स्तम् । ऊ॒तये॑

७३. मण्डलम् ८, सूक्तम् ७४, मन्त्रः ४ (ऋक्सङ्ख्या : ७३२१)
वाक्यम् १: आगंन्म वृत्रहन्तंमं ज्येष्ठंमग्निमानंवम्।
पदानि : आ। अगन्म्। वृत्रहन्ऽतंमम्। ज्येष्ठम्। अग्निम्। आनंवम्
वाक्यम् २: यस्यं श्रुतर्वा बृहन्नार्क्षो अनींक एधंते॥
पदानि : यस्यं। श्रुतर्वा। बृहन्। आर्क्षः। अनींके। एधंते

७४. मण्डलम् ८, सूक्तम् ७५, मन्त्रः १४ (ऋक्सङ्ख्या : ७३४६)
वाक्यम् १: यस्याजुंषन्नमस्विनः शमीमदुंर्मखस्य वा।
पदानि : यस्यं। अजुंषत्। नमस्विनः। शमीम्। अदुंःऽमखस्य। वा
वाक्यम् २: तं घेदग्निर्वृधावंति॥
पदानि : तम्। घ। इत्। अग्निः। वृधा। अवति

७५. मण्डलम् ८, सूक्तम् ९९, मन्त्रः ७ (ऋक्सङ्ख्या : ७६२५)
वाक्यम् १: इत ऊती वों अजरं प्रहेतारमप्रंहितम्।
पदानि : इतः। ऊती। वः। अजरंम्। प्रऽहेतारंम्। अप्रंऽहितम्
वाक्यम् २: आशुं जेतारं हेतारं रथीतंममतूर्तं तुग्र्यावृधंम्॥
पदानि : आशुम्। जेतारम्। हेतारम्। रथिऽतंमम्। अतूर्तम्। तुग्र्यऽवृधंम्

७६. मण्डलम् ८, सूक्तम् १०१, मन्त्रः १ (ऋक्सङ्ख्या : ७६३९)
वाक्यम् १: ऋधंगित्था स मर्त्यः शशमे देवतांतये।
पदानि : ऋधंक्। इत्था। सः। मर्त्यः। शशमे। देवऽतांतये
वाक्यम् २: यो नूनं मित्रावरुंणावभिष्टंय आचक्रे हव्यदांतये॥
पदानि : यः। नूनम्। मित्रावरुंणौ। अभिष्टंये। आऽचक्रे। हव्यऽदांतये

७७. मण्डलम् ९, सूक्तम् ५, मन्त्रः ९ (ऋक्सङ्ख्या : ७७३९)
वाक्यम् १: त्वष्टारमग्रजां गोपां पुरोयावानमा हुवे।
पदानि : त्वष्टारम्। अग्रऽजाम्। गोपाम्। पुरःऽयावानम्। आ। हुवे
वाक्यम् २: इन्दुरिन्द्रो वृषा हरिः पवमानः प्रजापतिः॥
पदानि : इन्दुः। इन्द्रः। वृषा। हरिः। पवमानः। प्रजाऽपतिः

७८. मण्डलम् ९, सूक्तम् ५, मन्त्रः ११ (ऋक्सङ्ख्या : ७७४१)
वाक्यम् १: विश्वे देवाः स्वाहाकृतिं पवमानस्या गत।
पदानि : विश्वे। देवाः। स्वाहाऽकृतिम्। पवमानस्य। आ। गत
वाक्यम् २: वायुर्बृहस्पतिः सूर्योऽग्निरिन्द्रः सजोषसः॥
पदानि : वायुः। बृहस्पतिः। सूर्यः। अग्निः। इन्द्रः। सऽजोषसः

७९. मण्डलम् ९, सूक्तम् ६७, मन्त्रः ३१ (ऋक्सङ्ख्या : ८२९९)
वाक्यम् १: यः पावमानीरध्येत्यृषिभिः संभृतं रसम्।
पदानि : यः। पावमानीः। अधिऽएति। ऋषिऽभिः। सम्ऽभृतम्। रसम्
वाक्यम् २: सर्वं स पूतमश्नाति स्वदितं मातरिश्वना॥

पदानि : सर्वम्। सः। पूतम्। अश्नाति। स्वदितम्। मातरिश्वना

८०. मण्डलम् ९, सूक्तम् ९८, मन्त्रः ११ (ऋक्सङ्ख्या : ८६२६)
वाक्यम् १: ते प्रत्नासो व्युष्टिषु सोमाः पवित्रे अक्षरन्।
पदानि : ते। प्रत्नासः। विऽउष्टिषु। सोमाः। पवित्रे। अक्षरन्
वाक्यम् २: अपप्रोथन्तः सनुतर्हुरश्चितः प्रातस्ताँ अप्रचेतसः॥
पदानि : अपऽप्रोथन्तः। सनुतः। हुरःऽचितः। प्रातरितिं। तान्। अप्रऽचेतसः

८१. मण्डलम् ९, सूक्तम् ९९, मन्त्रः ४ (ऋक्सङ्ख्या : ८६३१)
वाक्यम् १: तं गाथया पुराण्या पुनानमभ्यनूषत।
पदानि : तम्। गाथया। पुराण्या। पुनानम्। अभि। अनूषत
वाक्यम् २: उतो कृपन्त धीतयो देवानां नाम बिभ्रतीः॥
पदानि : उतो इतिं। कृपन्त। धीतयः। देवानाम्। नामं। बिभ्रतीः

८२. मण्डलम् ९, सूक्तम् ९९, मन्त्रः ५ (ऋक्सङ्ख्या : ८६३२)
वाक्यम् १: तमुक्षमाणमव्यये वारे पुनन्ति धर्णसिम्।
पदानि : तम्। उक्षमाणम्। अव्यये। वारे। पुनन्ति। धर्णसिम्
वाक्यम् २: दूतं न पूर्वचित्तय आ शासते मनीषिणः॥
पदानि : दूतम्। न। पूर्वऽचित्तये। आ। शासते। मनीषिणः

८३. मण्डलम् ९, सूक्तम् १००, मन्त्रः ७ (ऋक्सङ्ख्या : ८६४२)
वाक्यम् १: त्वां रिहन्ति मातरो हरिं पवित्रे अद्रुहः।
पदानि : त्वाम्। रिहन्ति। मातरः। हरिम्। पवित्रे। अद्रुहः
वाक्यम् २: वत्सं जातं न धेनवः पवमान विधर्मणि॥
पदानि : वत्सम्। जातम्। न। धेनवः। पवमान। विऽधर्मणि

८४. मण्डलम् ९, सूक्तम् १००, मन्त्रः ८ (ऋक्सङ्ख्या : ८६४३)
वाक्यम् १: पवमान महि श्रवश्चित्रेभिर्यासि रश्मिभिः।
पदानि : पवमान। महि। श्रवः। चित्रेभिः। यासि। रश्मिऽभिः
वाक्यम् २: शर्धन्तमांसि जिघ्नसे विश्वानि दाशुषो गृहे॥
पदानि : शर्धन्। तमांसि। जिघ्नसे। विश्वानि। दाशुषः। गृहे

८५. मण्डलम् ९, सूक्तम् १०१, मन्त्रः ५ (ऋक्सङ्ख्या : ८६४९)
वाक्यम् १: इन्दुरिन्द्राय पवत इतिं देवासो अब्रुवन्।
पदानि : इन्दुः। इन्द्राय। पवते। इतिं। देवासः। अब्रुवन्
वाक्यम् २: वाचस्पतिर्मखस्यते विश्वस्येशान ओजसा॥
पदानि : वाचः। पतिः। मखस्यते। विश्वस्य। ईशानः। ओजसा

८६. मण्डलम् ९, सूक्तम् १०२, मन्त्रः १ (ऋक्सङ्ख्या : ८६६१)
वाक्यम् १: क्राणा शिशुर्महीनां हिन्वन्नृतस्य दीधितिम्।

पदानि : क्राणा । शिशुः । महीनाम् । हिन्वन् । ऋतस्य । दीधितिम्
वाक्यम् २: विश्वा परि प्रिया भुवदध द्विता ॥
पदानि : विश्वा । परि । प्रिया । भुवत् । अध । द्विता

८७. मण्डलम् ९, सूक्तम् १०७, मन्त्रः १४ (ऋक्सङ्ख्या : ८७१४)
वाक्यम् १: अभि सोमास आयवः पवन्ते मद्यं मदम् ।
पदानि : अभि । सोमासः । आयवः । पवन्ते । मद्यम् । मदम्
वाक्यम् २: समुद्रस्याधि विष्टपि मनीषिणो मत्सरासः स्वर्विदः ॥
पदानि : समुद्रस्य । अधि । विष्टपि । मनीषिणः । मत्सरासः । स्वः ऽविदः

८८. मण्डलम् १०, सूक्तम् १४, मन्त्रः १३ (ऋक्सङ्ख्या : ८९१५)
वाक्यम् १: यमाय सोमं सुनुत यमाय जुहुता हविः ।
पदानि : यमाय । सोमम् । सुनुत । यमाय । जुहुत । हविः
वाक्यम् २: यमं ह यज्ञो गच्छत्यग्निदूतो अरंकृतः ॥
पदानि : यमम् । ह । यज्ञः । गच्छति । अग्निऽदूतः । अरम्ऽकृतः

८९. मण्डलम् १०, सूक्तम् १९, मन्त्रः ५ (ऋक्सङ्ख्या : ८९७९)
वाक्यम् १: य उदानड्व्ययनं य उदानट् परायणम् ।
पदानि : यः । उत्ऽआनट् । विऽअयनम् । यः । उत्ऽआनट् । पराऽअयनम्
वाक्यम् २: आवर्तनं निवर्तनमपि गोपा नि वर्तताम् ॥
पदानि : आऽवर्तनम् । निऽवर्तनम् । अपि । गोपाः । नि । वर्तताम्

९०. मण्डलम् १०, सूक्तम् २६, मन्त्रः २ (ऋक्सङ्ख्या : ९०४१)
वाक्यम् १: यस्य त्यन्महित्वं वाताप्यमयं जनः ।
पदानि : यस्य । त्यत् । महिऽत्वम् । वाताप्यम् । अयम् । जनः
वाक्यम् २: विप्र आ वंसद्धीतिभिश्चिकेत सुष्टुतीनाम् ॥
पदानि : विप्रः । आ । वंसत् । धीतिऽभिः । चिकेत । सुऽस्तुतीनाम्

९१. मण्डलम् १०, सूक्तम् २६, मन्त्रः ४ (ऋक्सङ्ख्या : ९०४३)
वाक्यम् १: मंसीमहि त्वा वयमस्माकं देव पूषन् ।
पदानि : मंसीमहि । त्वा । वयम् । अस्माकम् । देव । पूषन्
वाक्यम् २: मतीनां च साधनं विप्राणां चाधवम् ॥
पदानि : मतीनाम् । च । साधनम् । विप्राणाम् । च । आऽधवम्

९२. मण्डलम् १०, सूक्तम् ७२, मन्त्रः २ (ऋक्सङ्ख्या : ९५६७)
वाक्यम् १: ब्रह्मणस्पतिरेता सं कर्मार इवाधमत् ।
पदानि : ब्रह्मणः । पतिः । एता । सम् । कर्मारः ऽइव । अधमत्
वाक्यम् २: देवानां पूर्व्ये युगेऽसतः सदजायत ॥
पदानि : देवानाम् । पूर्व्ये । युगे । असतः । सत् । अजायत

९३. मण्डलम् १०, सूक्तम् ८५, मन्त्रः २ (ऋक्सङ्ख्या : ९६६८)
वाक्यम् १: सोमे॑नादि॒त्या ब॒लिन॒: सोमेन पृथि॒वी म॒ही ।
पदानि : सोमेन । आ॒दि॒त्याः । ब॒लिनः॑ । सोमेन । पृ॒थि॒वी । म॒ही
वाक्यम् २: अथो॒ नक्ष॑त्राणामे॒षामु॑पस्थे॒ सोम॒ आहि॑तः ॥
पदानि : अथो॒ इति॑ । नक्ष॑त्राणाम् । ए॒षाम् । उ॒प॒ऽस्थे॒ । सोमः॑ । आऽहि॑तः

९४. मण्डलम् १०, सूक्तम् ८५, मन्त्रः ८ (ऋक्सङ्ख्या : ९६७४)
वाक्यम् १: स्तोमा॑ आसन्प्रति॒धय॑: कु॒रीरं॑ छन्द॒ ओप॒शः ।
पदानि : स्तोमाः॑ । आ॒स॒न् । प्र॒ति॒ऽधयः॑ । कु॒रीर॑म् । छन्दः॑ । ओ॒प॒शः
वाक्यम् २: सू॒र्यायां॑ अ॒श्विना॑ वरा॒ग्निरा॑सीत्पुरोग॒वः ॥
पदानि : सू॒र्यायाः॑ । अ॒श्विना॑ । व॒रा । अ॒ग्निः । आ॒सी॒त् । पु॒रः॒ऽग॒वः

९५. मण्डलम् १०, सूक्तम् ८५, मन्त्रः २८ (ऋक्सङ्ख्या : ९६९४)
वाक्यम् १: नील॒लोहि॑तं भवति कृ॒त्यास॒क्तिर्व्य॑ज्यते ।
पदानि : नील॒ऽलोहि॑तम् । भ॒व॒ति॒ । कृ॒त्या । आ॒स॒क्तिः । वि । अ॒ज्य॒ते
वाक्यम् २: एध॑न्ते अस्या ज्ञा॒तय॒: पति॑र्ब॒न्धेषु॑ बध्यते ॥
पदानि : एध॑न्ते । अ॒स्याः॒ । ज्ञा॒तयः॑ । पतिः॑ । ब॒न्धेषु॑ । ब॒ध्य॒ते

९६. मण्डलम् १०, सूक्तम् ८५, मन्त्रः ४६ (ऋक्सङ्ख्या : ९७१२)
वाक्यम् १: स॒म्रा॒ज्ञी श्व॑शु॒रे भव स॒म्रा॒ज्ञी श्व॒श्वां भ॑व ।
पदानि : स॒म्ऽरा॒ज्ञी॑ । श्व॒शु॒रे । भ॒व॒ । स॒म्ऽरा॒ज्ञी॑ । श्व॒श्वाम् । भ॒व॒
वाक्यम् २: ननां॑न्दरि सम्रा॒ज्ञी॑ भव सम्रा॒ज्ञी अधि॑ दे॒वृषु॑ ॥
पदानि : ननां॑न्दरि । स॒म्ऽरा॒ज्ञी॑ । भ॒व॒ । स॒म्ऽरा॒ज्ञी॑ । अधि॑ । दे॒वृषु॑

९७. मण्डलम् १०, सूक्तम् ९७, मन्त्रः १३ (ऋक्सङ्ख्या : ९९१७)
वाक्यम् १: सा॒कं य॑क्ष्म प्र प॑त॒ चाषेण किकि॑दी॒विना॑ ।
पदानि : सा॒कम् । य॒क्ष्म॒ । प्र । प॒त॒ । चाषेण । किकि॑दी॒विना॑
वाक्यम् २: सा॒कं वात॑स्य॒ ध्राज्या॑ सा॒कं न॑श्य नि॒हाक॑या ॥
पदानि : सा॒कम् । वात॑स्य । ध्राज्या॑ । सा॒कम् । न॒श्य॒ । नि॒ऽहाक॑या

९८. मण्डलम् १०, सूक्तम् ९७, मन्त्रः २२ (ऋक्सङ्ख्या : ९९२६)
वाक्यम् १: ओष॑धय॒: सं व॑दन्ते सोमेन स॒ह राज्ञा॑ ।
पदानि : ओष॑धयः । सम् । व॒द॒न्ते॒ । सोमेन । स॒ह । राज्ञा॑
वाक्यम् २: यस्मै॑ कृ॒णोति॑ ब्राह्म॒णस्तं रा॑जन्पारयामसि ॥
पदानि : यस्मै॑ । कृ॒णोति॑ । ब्रा॒ह्म॒णः । तम् । रा॒ज॒न् । पा॒र॒या॒म॒सि

९९. मण्डलम् १०, सूक्तम् १०१, मन्त्रः ५ (ऋक्सङ्ख्या : ९९६८)
वाक्यम् १: निरा॑हावान्कृणोतन॒ सं व॑र॒त्रा द॑धातन ।
पदानि : निः । आ॒ऽहा॒वा॒न् । कृ॒णो॒त॒न॒ । सम् । व॒र॒त्राः । द॒धा॒त॒न॒
वाक्यम् २: सि॒ञ्चामा॑हा अव॒तमु॒द्रिणं॑ व॒यं सु॒षेक॑मनु॑पक्षितम् ॥
पदानि : सि॒ञ्चाम॑है । अ॒व॒तम् । उ॒द्रिण॑म् । व॒यम् । सु॒ऽसेक॑म् । अनु॑ऽपक्षितम्

१००. मण्डलम् १०, सूक्तम् १३१, मन्त्रः ४ (ऋक्सङ्ख्या : १०२५७)
वाक्यम् १: युवं सुरामंमश्विना नमुचावासुरे सचा।
पदानि : युवम्। सुरामंम्। अश्विना। नमुचौ। आसुरे। सचा
वाक्यम् २: विपिपाना शुंभस्पती इन्द्रं कर्मस्वावतम्॥
पदानि : विऽपिपाना। शुभः। पती इतिं। इन्द्रम्। कर्मऽसु। आवतम्

१०१. मण्डलम् १०, सूक्तम् १३५, मन्त्रः ६ (ऋक्सङ्ख्या : १०२८७)
वाक्यम् १: यथाभंवदनुदेयी ततो अग्रंमजायत।
पदानि : यथा। अभंवत्। अनुऽदेयी। ततः। अग्रंम्। अजायत
वाक्यम् २: पुरस्तांद्बुध्न आततः पश्चान्निरयंणं कृतम्॥
पदानि : पुरस्तात्। बुध्नः। आऽततः। पश्चात्। निःऽअयंनम्। कृतम्

१०२. मण्डलम् १०, सूक्तम् १४१, मन्त्रः ३ (ऋक्सङ्ख्या : १०३२३)
वाक्यम् १: सोमं राजानमवंसेऽग्निं गीर्भिर्हवामहे।
पदानि : सोमंम्। राजानम्। अवंसे। अग्निम्। गीःऽभिः। हवामहे
वाक्यम् २: आदित्यान्विष्णुं सूर्यं ब्रह्माणं च बृहस्पतिंम्॥
पदानि : आदित्यान्। विष्णुम्। सूर्यम्। ब्रह्माणम्। च। बृहस्पतिंम्

१०३. मण्डलम् १०, सूक्तम् १४२, मन्त्रः ८ (ऋक्सङ्ख्या : १०३३४)
वाक्यम् १: आयंने ते परायंणे दूर्वा रोहन्तु पुष्पिणीः।
पदानि : आऽअयंने। ते। पराऽअयंने। दूर्वाः। रोहन्तु। पुष्पिणीः
वाक्यम् २: ह्रदाश्च पुण्डरींकाणि समुद्रस्यं गृहा इमे॥
पदानि : ह्रदाः। च। पुण्डरींकाणि। समुद्रस्यं। गृहाः। इमे

१०४. मण्डलम् १०, सूक्तम् १५०, मन्त्रः २ (ऋक्सङ्ख्या : १०३७५)
वाक्यम् १: इमं यज्ञमिदं वचो जुजुषाण उपागंहि।
पदानि : इमम्। यज्ञम्। इदम्। वचः। जुजुषाणः। उपऽआगंहि
वाक्यम् २: मर्तासस्त्वा समिधान हवामहे मृळींकायं हवामहे॥
पदानि : मर्तासः। त्वा। सम्ऽइधान। हवामहे। मृळींकायं। हवामहे

१०५. मण्डलम् १०, सूक्तम् १५१, मन्त्रः ३ (ऋक्सङ्ख्या : १०३८१)
वाक्यम् १: यथा देवा असुरेषु श्रद्धामुग्रेषु चक्रिरे।
पदानि : यथा। देवाः। असुरेषु। श्रद्धाम्। उग्रेषु। चक्रिरे
वाक्यम् २: एवं भोजेषु यज्वंस्वस्माकमुदितं कृधि॥
पदानि : एवम्। भोजेषु। यज्वंऽसु। अस्माकम्। उदितम्। कृधि

१०६. मण्डलम् १०, सूक्तम् १५१, मन्त्रः ४ (ऋक्सङ्ख्या : १०३८२)
वाक्यम् १: श्रद्धां देवा यजंमाना वायुगोंपा उपासते।
पदानि : श्रद्धाम्। देवाः। यजंमानाः। वायुऽगोंपाः। उप। आसते

वाक्यम् २: श्रद्धां हृदय्यया॑ऽऽकू॒त्या श्रद्धया॑ विन्दते॒ वसु॑ ॥
पदानि : श्रद्धाम्। हृदय्ययाः। आऽकू॑त्या। श्रद्धया॑। विन्दते। वसु॑

१०७. मण्डलम् १०, सूक्तम् १६४, मन्त्रः ४ (ऋक्सङ्ख्या : १०४५०)
वाक्यम् १: यदि॑न्द्र ब्रह्मणस्पतेऽभिद्रो॒हं चरा॑मसि।
पदानि : यत्। इ॒न्द्र॒। ब्र॒ह्म॒णः॒। प॒ते॒। अ॒भि॒ऽद्रो॒हम्। चरा॑मसि
वाक्यम् २: प्रचे॒ता न आङ्गि॑रसो द्विष॒तां पा॒त्वंह॑सः ॥
पदानि : प्रऽचे॒ताः। नः॒। आङ्गि॑रसः। द्वि॒ष॒ताम्। पा॒तु॒। अंह॑सः

सप्तपदवाक्यकाः मन्त्राः
(१८१ मन्त्राः)

१. मण्डलम् १, सूक्तम् ३५, मन्त्रः १० (ऋक्सङ्ख्या : ४२०)
वाक्यम् १: हिर॑ण्यहस्तो॒ असु॑रः सु॒नी॒थः सु॒मृ॒ळी॒कः स्ववाँ॑ यात्व॒र्वाङ्।
पदानि : हिर॑ण्यऽहस्तः। असु॑रः। सु॒ऽनी॒थः। सु॒ऽमृ॒ळी॒कः। स्वऽवा॑न्। या॒तु॒। अ॒र्वाङ्
वाक्यम् २: अप॒सेध॑न्र॒क्षसो॑ यातु॒धाना॒नस्था॒द्देवः॑ प्र॑तिदो॒षं गृ॑णा॒नः ॥
पदानि : अप॒ऽसेध॑न्। र॒क्षसः॑। या॒तु॒ऽधाना॑न्। अस्था॑त्। दे॒वः॑। प्र॒ति॒ऽदो॒षम्। गृ॒णा॒नः

२. मण्डलम् १, सूक्तम् ३६, मन्त्रः १५ (ऋक्सङ्ख्या : ४३६)
वाक्यम् १: पा॒हि नो॑ अग्ने र॒क्षसः॑ पा॒हि धू॒र्तेररा॑व्णः।
पदानि : पा॒हि। नः॒। अ॒ग्ने॒। र॒क्षसः॑। पा॒हि। धू॒र्तेः। अरा॑व्णः
वाक्यम् २: पा॒हि रीष॑त उ॒त वा॒ जिघां॑सतो बृह॒द्भानो॒ यवि॑ष्ठ्य ॥
पदानि : पा॒हि। रिष॑तः। उ॒त। वा॒। जिघां॑सतः। बृ॒ह॒त्ऽभानो। इति॑ बृह॒त्ऽभानो। यवि॑ष्ठ्य

३. मण्डलम् १, सूक्तम् ३९, मन्त्रः १० (ऋक्सङ्ख्या : ४८१)
वाक्यम् १: असा॒म्योजो॑ बिभृथा सुदान॒वोऽसा॑मि धूतयः॒ शवः॑।
पदानि : असा॑मि। ओजः॑। बि॒भृ॒थ॒। सु॒ऽदा॒न॒वः॒। असा॑मि। धू॒त॒यः॒। शवः॑
वाक्यम् २: ऋ॒षि॒द्विषे॒ मरुतः परिम॒न्यव॒ इषुं॒ न सृ॑जत द्वि॒षम् ॥
पदानि : ऋ॒षि॒ऽद्विषे। म॒रु॒तः॒। प॒रि॒ऽम॒न्यवे। इषु॑म्। न। सृ॒ज॒त॒। द्वि॒षम्

४. मण्डलम् १, सूक्तम् ४३, मन्त्रः ९ (ऋक्सङ्ख्या : ५१७)
वाक्यम् १: यास्ते॒ प्र॒जा अ॒मृ॒त॑स्य॒ पर॑स्मिन्धाम॑न्नृ॒तस्य॑।
पदानि : याः। ते॒। प्र॒ऽजाः। अ॒मृ॒त॑स्य। पर॑स्मिन्। धाम॑न्। ऋ॒तस्य॑
वाक्यम् २: मू॒र्धा नाभा॑ सोम वेन आ॒भूष॑न्तीः सोम वेदः ॥
पदानि : मू॒र्धा। नाभा॑। सो॒म॒। वे॒नः॒। आ॒ऽभूष॑न्तीः। सो॒म॒। वे॒दः॒

५. मण्डलम् १, सूक्तम् ४४, मन्त्रः ४ (ऋक्सङ्ख्या : ५२१)
वाक्यम् १: श्रेष्ठं॒ यवि॑ष्ठमति॑थिं॒ स्वा॑हुतं॒ जुष्टं॒ जना॑य दा॒शुषे॑।
पदानि : श्रेष्ठ॑म्। यवि॑ष्ठम्। अति॑थिम्। सु॒ऽआ॑हुतम्। जुष्ट॑म्। जना॑य। दा॒शुषे॑
वाक्यम् २: दे॒वाँ अच्छा या॑तवे जा॒तवे॑दसम॒ग्निमी॑ळे॒ व्यु॑ष्टिषु ॥

पदानि : देवान्। अच्छ। यातवे। जातऽवेदसम्। अग्निम्। ईळे। विऽउष्टिषु

६. मण्डलम् १, सूक्तम् ४४, मन्त्रः ९ (ऋक्सङ्ख्या : ५२६)
वाक्यम् १: पतिर्ह्यध्वराणामग्ने दूतो विशामसि।
पदानि : पतिः। हि। अध्वराणाम्। अग्ने। दूतः। विशाम्। असि
वाक्यम् २: उषर्बुध आ वह सोमपीतये देवाँ अद्य स्वर्दृशः॥
पदानि : उषःऽबुधः। आ। वह। सोमऽपीतये। देवान्। अद्य। स्वः।ऽदृशः

७. मण्डलम् १, सूक्तम् ४४, मन्त्रः १० (ऋक्सङ्ख्या : ५२७)
वाक्यम् १: अग्ने पूर्वा अनूषसो विभावसो दीदेथ विश्वदर्शतः।
पदानि : अग्ने। पूर्वाः। अनु। उषसः। विभावसो इति विभाऽवसो। दीदेथ। विश्वऽदर्शतः
वाक्यम् २: असि ग्रामेष्वविता पुरोहितोऽसि यज्ञेषु मानुषः॥
पदानि : असि। ग्रामेषु। अविता। पुरःऽहितः। असि। यज्ञेषु। मानुषः

८. मण्डलम् १, सूक्तम् ४४, मन्त्रः ११ (ऋक्सङ्ख्या : ५२८)
वाक्यम् १: नि त्वा यज्ञस्य साधनमग्ने होतारमृत्विजम्।
पदानि : नि। त्वा। यज्ञस्य। साधनम्। अग्ने। होतारम्। ऋत्विजम्
वाक्यम् २: मनुष्वद्देव धीमहि प्रचेतसं जीरं दूतममर्त्यम्॥
पदानि : मनुष्वत्। देव। धीमहि। प्रऽचेतसम्। जीरम्। दूतम्। अमर्त्यम्

९. मण्डलम् १, सूक्तम् ४५, मन्त्रः ८ (ऋक्सङ्ख्या : ५३९)
वाक्यम् १: आ त्वा विप्रा अचुच्यवुः सुतसोमा अभि प्रयः।
पदानि : आ। त्वा। विप्राः। अचुच्यवुः। सुतऽसोमाः। अभि। प्रयः
वाक्यम् २: बृहद्भा बिभ्रतो हविरग्ने मर्ताय दाशुषे॥
पदानि : बृहत्। भाः। बिभ्रतः। हविः। अग्ने। मर्ताय। दाशुषे

१०. मण्डलम् १, सूक्तम् ४८, मन्त्रः ५ (ऋक्सङ्ख्या : ५७१)
वाक्यम् १: आ घा योषेव सूनर्युषा याति प्रभुञ्जती।
पदानि : आ। घ। योषाऽइव। सूनरी। उषाः। याति। प्रऽभुञ्जती
वाक्यम् २: जरयन्ती वृजनं पद्वदीयत उत्पातयति पक्षिणः॥
पदानि : जरयन्ती। वृजनम्। पत्ऽवत्। ईयते। उत्। पातयति। पक्षिणः

११. मण्डलम् १, सूक्तम् ५०, मन्त्रः १३ (ऋक्सङ्ख्या : ५९९)
वाक्यम् १: उदगादयमादित्यो विश्वेन सहसा सह।
पदानि : उत्। अगात्। अयम्। आदित्यः। विश्वेन। सहसा। सह
वाक्यम् २: द्विषन्तं मह्यं रन्धयन्मो अहं द्विषते रधम्॥
पदानि : द्विषन्तम्। मह्यम्। रन्धयन्। मो इति। अहम्। द्विषते। रधम्

१२. मण्डलम् १, सूक्तम् ६०, मन्त्रः १ (ऋक्सङ्ख्या : ६८८)
वाक्यम् १: वह्निं यशसं विदथस्य केतुं सुप्राव्यं दूतं सद्योअर्थम्।

पदानि : वह्निम्। यशसम्। विदथस्य। केतुम्। सुप्रऽअव्यम्। दूतम्। सद्यःऽअर्थम्
वाक्यम् २: द्विजन्मानं रयिमिव प्रशस्तं रातिं भरद्भृगवे मातरिश्वा ॥
पदानि : द्विऽजन्मानम्। रयिम्ऽइव। प्रऽशस्तम्। रातिम्। भरत्। भृगवे। मातरिश्वा

१३. मण्डलम् १, सूक्तम् ६२, मन्त्रः १ (ऋक्सङ्ख्या : ७०९)
वाक्यम् १: प्र मन्महे शवसानाय शूषमाङ्गूषं गिर्वणसे अङ्गिरस्वत्।
पदानि : प्र। मन्महे। शवसानाय। शूषम्। आङ्गूषम्। गिर्वणसे। अङ्गिरस्वत्
वाक्यम् २: सुवृक्तिभिः स्तुवत ऋग्मियायार्चामार्कं नरे विश्रुताय ॥
पदानि : सुवृक्तिऽभिः। स्तुवते। ऋग्मियाय। अर्चाम। अर्कम्। नरे। विऽश्रुताय

१४. मण्डलम् १, सूक्तम् ७९, मन्त्रः १ (ऋक्सङ्ख्या : ८६६)
वाक्यम् १: हिरण्यकेशो रजसो विसारेऽहिर्धुनिर्वातइव ध्रजीमान्।
पदानि : हिरण्यऽकेशः। रजसः। विऽसारे। अहिः। धुनिः। वातःऽइव। ध्रजीमान्
वाक्यम् २: शुचिभ्राजा उषसो नवेदा यशस्वतीरपस्युवो न सत्याः ॥
पदानि : शुचिऽभ्राजाः। उषसः। नवेदाः। यशस्वतीः। अपस्युवः। न। सत्याः

१५. मण्डलम् १, सूक्तम् ८४, मन्त्रः ४ (ऋक्सङ्ख्या : ९१८)
वाक्यम् १: इममिन्द्र सुतं पिब ज्येष्ठममर्त्यं मदम्।
पदानि : इमम्। इन्द्र। सुतम्। पिब। ज्येष्ठम्। अमर्त्यम्। मदम्
वाक्यम् २: शुक्रस्य त्वाभ्यक्षरन्धारा ऋतस्य सादने ॥
पदानि : शुक्रस्य। त्वा। अभि। अक्षरन्। धाराः। ऋतस्य। सादने

१६. मण्डलम् १, सूक्तम् ८४, मन्त्रः ६ (ऋक्सङ्ख्या : ९२०)
वाक्यम् १: नकिष्ट्वद्रथीतरो हरी यदिन्द्र यच्छसे।
पदानि : नकिः। त्वत्। रथिऽतरः। हरी इति। यत्। इन्द्र। यच्छसे
वाक्यम् २: नकिष्ट्वानु मज्मना नकिः स्वश्व आनशे ॥
पदानि : नकिः। त्वा। अनु। मज्मना। नकिः। सुऽअश्वः। आनशे

१७. मण्डलम् १, सूक्तम् ९३, मन्त्रः ३ (ऋक्सङ्ख्या : १०३१)
वाक्यम् १: अग्नीषोमा य आहुतिं यो वां दाशाद्धविष्कृतिम्।
पदानि : अग्नीषोमा। यः। आऽहुतिम्। यः। वाम्। दाशात्। हविःऽकृतिम्
वाक्यम् २: स प्रजयां सुवीर्यं विश्वमायुर्व्यश्नवत् ॥
पदानि : सः। प्रऽजया। सुऽवीर्यम्। विश्वम्। आयुः। वि। अश्नवत्

१८. मण्डलम् १, सूक्तम् ११३, मन्त्रः १८ (ऋक्सङ्ख्या : १२५३)
वाक्यम् १: या गोमतीरुषसः सर्ववीरा व्युच्छन्ति दाशुषे मर्त्याय।
पदानि : याः। गोऽमतीः। उषसः। सर्वऽवीराः। विऽउच्छन्ति। दाशुषे। मर्त्याय
वाक्यम् २: वायोरिव सूनृतानामुदर्के ता अश्वदा अश्नवत्सोमसुत्वा ॥
पदानि : वायोःऽइव। सूनृतानाम्। उत्ऽअर्के। ताः। अश्वऽदाः। अश्नवत्। सोमऽसुत्वा

१९. मण्डलम् १, सूक्तम् १२३, मन्त्रः १० (ऋक्सङ्ख्या : १३९५)
वाक्यम् १: कन्येव तन्वाꣳ शाशदानाँ एषि देवि देवमियक्षमाणम्।
पदानि : कन्याऽइव। तन्वा। शाशदाना। एषि। देवि। देवम्। इयक्षमाणम्
वाक्यम् २: सꣳस्मयमाना युवतिः पुरस्तादाविर्वक्षाँसि कृणुषे विभाती॥
पदानि : सम्ऽस्मयमाना। युवतिः। पुरस्तात्। आविः। वक्षाँसि। कृणुषे। विऽभाती

२०. मण्डलम् १, सूक्तम् १२५, मन्त्रः ६ (ऋक्सङ्ख्या : १४१७)
वाक्यम् १: दक्षिणावतामिदिमानि चित्रा दक्षिणावतां दिवि सूर्यासः।
पदानि : दक्षिणाऽवताम्। इत्। इमानि। चित्रा। दक्षिणाऽवताम्। दिवि। सूर्यासः
वाक्यम् २: दक्षिणावन्तो अमृतं भजन्ते दक्षिणावन्तः प्र तिरन्त आयुः॥
पदानि : दक्षिणाऽवन्तः। अमृतम्। भजन्ते। दक्षिणाऽवन्तः। प्र। तिरन्ते। आयुः

२१. मण्डलम् १, सूक्तम् १२६, मन्त्रः ४ (ऋक्सङ्ख्या : १४२२)
वाक्यम् १: चत्वारिꣳशद्दशरथस्य शोणाः सहस्रस्याग्रे श्रेणिं नयन्ति।
पदानि : चत्वारिꣳशत्। दशऽरथस्य। शोणाः। सहस्रस्य। अग्रे। श्रेणिम्। नयन्ति
वाक्यम् २: मदच्युतः कृशनावतो अत्यान्कक्षीवन्त उदमृक्षन्त पज्राः॥
पदानि : मदऽच्युतः। कृशनऽवतः। अत्यान्। कक्षीवन्तः। उत्। अमृक्षन्त। पज्राः

२२. मण्डलम् १, सूक्तम् १४०, मन्त्रः ४ (ऋक्सङ्ख्या : १५२९)
वाक्यम् १: मुमुक्ष्वोꣳ मनवे मानवस्यते रघुद्रुवः कृष्णसीतास ऊ जुवः।
पदानि : मुमुक्ष्वः। मनवे। मानवस्यते। रघुऽद्रुवः। कृष्णऽसीतासः। ऊँ इति। जुवः
वाक्यम् २: असमना अजिरासो रघुष्यदो वातजूता उप युज्यन्त आशवः॥
पदानि : असमनाः। अजिरासः। रघुऽस्यदः। वातऽजूताः। उप। युज्यन्ते। आशवः

२३. मण्डलम् १, सूक्तम् १७०, मन्त्रः २ (ऋक्सङ्ख्या : १८२८)
वाक्यम् १: किं न इन्द्र जिघांससि भ्रातरो मरुतस्तव।
पदानि : किम्। नः। इन्द्र। जिघांससि। भ्रातरः। मरुतः। तव
वाक्यम् २: तेभिः कल्पस्व साधुया मा नः समरणे वधीः॥
पदानि : तेभिः। कल्पस्व। साधुऽया। मा। नः। सम्ऽअरणे। वधीः

२४. मण्डलम् १, सूक्तम् १७५, मन्त्रः ३ (ऋक्सङ्ख्या : १८६६)
वाक्यम् १: त्वं हि शूरः सनिता चोदयो मनुषो रथम्।
पदानि : त्वम्। हि। शूरः। सनिता। चोदयः। मनुषः। रथम्
वाक्यम् २: सहावान्दस्युमव्रतमोषः पात्रं न शोचिषा॥
पदानि : सहऽवान्। दस्युम्। अव्रतम्। ओषः। पात्रम्। न। शोचिषा

२५. मण्डलम् १, सूक्तम् १९०, मन्त्रः १ (ऋक्सङ्ख्या : १९८३)
वाक्यम् १: अनर्वाणं वृषभं मन्द्रजिह्वं बृहस्पतिं वर्धया नव्यमर्कैः।
पदानि : अनर्वाणम्। वृषभम्। मन्द्रऽजिह्वम्। बृहस्पतिम्। वर्धय। नव्यम्। अर्कैः
वाक्यम् २: गाथान्यः सुरुचो यस्य देवा आशृण्वन्ति नवमानस्य मर्ताः॥
पदानि : गाथान्यः। सुऽरुचः। यस्य। देवाः। आऽशृण्वन्ति। नवमानस्य। मर्ताः

२६. मण्डलम् २, सूक्तम् ५, मन्त्रः २ (ऋक्सङ्ख्या : २०५७)
वाक्यम् १: आ यस्मिन्त्सप्त रश्मयस्तता यज्ञस्य नेतरि ।
पदानि : आ । यस्मिन् । सप्त । रश्मयः । ततः । यज्ञस्य । नेतरि
वाक्यम् २: मनुष्वद्दैव्यमष्टमं पोता विश्वं तदिन्वति ॥
पदानि : मनुष्वत् । दैव्यम् । अष्टमम् । पोता । विश्वम् । तत् । इन्वति

२७. मण्डलम् २, सूक्तम् ५, मन्त्रः ४ (ऋक्सङ्ख्या : २०५९)
वाक्यम् १: साकं हि शुचिना शुचिः प्रशास्ता क्रतुनाजनि ।
पदानि : साकम् । हि । शुचिना । शुचिः । प्रऽशास्ता । क्रतुना । अजनि
वाक्यम् २: विद्वाँ अस्य व्रता ध्रुवा वया इवानु रोहते ॥
पदानि : विद्वान् । अस्य । व्रता । ध्रुवा । वयाःऽइव । अनु । रोहते

२८. मण्डलम् २, सूक्तम् १०, मन्त्रः ३ (ऋक्सङ्ख्या : २०९२)
वाक्यम् १: उत्तानायामजनयन्त्सुषूतं भुवदग्निः पुरुपेशासु गर्भः ।
पदानि : उत्तानायाम् । अजनयन् । सुऽसूतम् । भुवत् । अग्निः । पुरुऽपेशासु । गर्भः
वाक्यम् २: शिरिणायां चिदक्तुना महोभिरपरीवृतो वसति प्रचेताः ॥
पदानि : शिरिणायाम् । चित् । अक्तुना । महःऽभिः । अपरिऽवृतः । वसति । प्रऽचेताः

२९. मण्डलम् २, सूक्तम् १०, मन्त्रः ६ (ऋक्सङ्ख्या : २०९५)
वाक्यम् १: ज्ञेया भागं सहसानो वरेण त्वादूतासो मनुवद्वदेम ।
पदानि : ज्ञेयाः । भागम् । सहसानः । वरेण । त्वाऽदूतासः । मनुऽवत् । वदेम
वाक्यम् २: अनूनमग्निं जुह्वा वचस्या मधुपृचं घनसा जोहवीमि ॥
पदानि : अनूनम् । अग्निम् । जुह्वा । वचस्या । मधुऽपृचम् । घनऽसाः । जोहवीमि

३०. मण्डलम् ३, सूक्तम् १, मन्त्रः १६ (ऋक्सङ्ख्या : २४५१)
वाक्यम् १: उपक्षेतारस्तवं सुप्रणीतेऽग्ने विश्वानि धन्या दधानाः ।
पदानि : उपऽक्षेतारः । तवं । सुऽप्रनीते । अग्ने । विश्वानि । धन्या । दधानाः
वाक्यम् २: सुरेतसा श्रवसा तुञ्जमाना अभि ष्याम पृतनायूँरदेवान् ॥
पदानि : सुऽरेतसा । श्रवसा । तुञ्जमानाः । अभि । स्याम । पृतनाऽयून् । अदेवान्

३१. मण्डलम् ३, सूक्तम् ३, मन्त्रः ११ (ऋक्सङ्ख्या : २४८४)
वाक्यम् १: वैश्वानरस्य दंसनाभ्यो बृहदरिणादेकः स्वपस्यया कविः ।
पदानि : वैश्वानरस्य । दंसनाभ्यः । बृहत् । अरिणात् । एकः । सुऽअपस्यया । कविः
वाक्यम् २: उभा पितरा महयन्नजायतागग्निर्द्यावापृथिवी भूरिरेतसा ॥
पदानि : उभा । पितरा । महयन् । अजायत । अग्निः । द्यावापृथिवी इति । भूरिऽरेतसा

३२. मण्डलम् ३, सूक्तम् ९, मन्त्रः ७ (ऋक्सङ्ख्या : २५४६)
वाक्यम् १: तद्भद्रं तवं दंसना पाकाय चिच्छदयति ।
पदानि : तत् । भद्रम् । तवं । दंसना । पाकाय । चित् । छदयति

वाक्यम् २: त्वां यदग्ने पशवः समासते समिद्धमपिशर्वरे ॥
पदानि : त्वाम्। यत्। अग्ने। पशवः। सम्ऽआसते। सम्ऽइद्धम्। अपिऽशर्वरे

३३. मण्डलम् ३, सूक्तम् १६, मन्त्रः ६ (ऋक्सङ्ख्या : २६०२)
वाक्यम् १: शग्धि वाजस्य सुभग प्रजावतोऽग्ने बृहतो अध्वरे।
पदानि : शग्धि। वाजस्य। सुऽभग। प्रजाऽवतः। अग्ने। बृहतः। अध्वरे
वाक्यम् २: सं राया भूयसा सृज मयोभुना तुविद्युम्न यशस्वता ॥
पदानि : सम्। राया। भूयसा। सृज। मयःऽभुना। तुविऽद्युम्न। यशस्वता

३४. मण्डलम् ३, सूक्तम् ५४, मन्त्रः १३ (ऋक्सङ्ख्या : २९५७)
वाक्यम् १: विद्युद्रथा मरुतः ऋष्टिमन्तो दिवो मर्या ऋतजाता अयासः।
पदानि : विद्युत्ऽरथाः। मरुतः। ऋष्टिऽमन्तः। दिवः। मर्याः। ऋतऽजाताः। अयासः
वाक्यम् २: सरस्वती शृणवन्यज्ञियासो धाता रयिं सहवीरं तुरासः ॥
पदानि : सरस्वती। शृणवन्। यज्ञियासः। धातः। रयिम्। सहऽवीरम्। तुरासः

३५. मण्डलम् ३, सूक्तम् ५६, मन्त्रः ३ (ऋक्सङ्ख्या : २९९१)
वाक्यम् १: त्रिपाजस्यो वृषभो विश्वरूप उत त्र्युधा पुरुध प्रजावान्।
पदानि : त्रिऽपाजस्यः। वृषभः। विश्वऽरूपः। उत। त्रिऽउधा। पुरुध। प्रजाऽवान्
वाक्यम् २: त्र्यनीकः पत्यते माहिनावान्त्स रेतोधा वृषभः शश्वतीनाम् ॥
पदानि : त्रिऽअनीकः। पत्यते। माहिनऽवान्। सः। रेतःऽधाः। वृषभः। शश्वतीनाम्

३६. मण्डलम् ३, सूक्तम् ५९, मन्त्रः ३ (ऋक्सङ्ख्या : ३०१४)
वाक्यम् १: अनमीवास इळया मदन्तो मितज्ञवो वरिमन्ना पृथिव्याः।
पदानि : अनमीवासः। इळया। मदन्तः। मितऽज्ञवः। वरिमन्। आ। पृथिव्याः
वाक्यम् २: आदित्यस्य व्रतमुपक्षियन्तो वयं मित्रस्य सुमतौ स्याम ॥
पदानि : आदित्यस्य। व्रतम्। उपऽक्षियन्तः। वयम्। मित्रस्य। सुऽमतौ। स्याम

३७. मण्डलम् ४, सूक्तम् ७, मन्त्रः २ (ऋक्सङ्ख्या : ३१५१)
वाक्यम् १: अग्ने कदा त आनुषग्भुवद्देवस्य चेतनम्।
पदानि : अग्ने। कदा। ते। आनुषक्। भुवत्। देवस्य। चेतनम्
वाक्यम् २: अधा हि त्वा जगृभ्रिरे मर्तासो विक्ष्वीड्यम् ॥
पदानि : अध। हि। त्वा। जगृभ्रिरे। मर्तासः। विक्षु। ईड्यम्

३८. मण्डलम् ४, सूक्तम् ३७, मन्त्रः ८ (ऋक्सङ्ख्या : ३४७८)
वाक्यम् १: तं नो वाजा ऋभुक्षण इन्द्र नासत्या रयिम्।
पदानि : तम्। नः। वाजाः। ऋभुक्षणः। इन्द्र। नासत्या। रयिम्
वाक्यम् २: समश्वं चर्षणिभ्य आ पुरु शस्त मघत्तये ॥
पदानि : सम्। अश्वम्। चर्षणिऽभ्यः। आ। पुरु। शस्त। मघत्तये

३९. मण्डलम् ४, सूक्तम् ४२, मन्त्रः ९ (ऋक्सङ्ख्या : ३५१९)

वाक्यम् १: पुरुकुत्सा॑नी हि वा॒मदा॑शद्ध्व्ये॒भिरि॑न्द्रावरुणा॒ नमो॑भिः ।
पदानि : पुरु॑ऽकुत्सा॑नी । हि । वा॒म् । अदा॑शत् । हव्ये॑भिः॑ । इ॒न्द्रा॒व॒रु॒णा॒ । नमः॑ऽभिः
वाक्यम् २: अथा॒ राजा॑नं त्र॒सद॑स्युमस्या वृत्र॒हणं॑ ददथुरर्ध॒दे॒वम् ॥
पदानि : अथ॑ । राजा॑नम् । त्र॒सद॑स्युम् । अ॒स्याः॒ । वृ॒त्र॒ऽहन॑म् । द॒द॒थुः॒ । अ॒र्ध॒ऽदे॒वम्

४०. मण्डलम् ४, सूक्तम् ४८, मन्त्रः १ (ऋक्सङ्ख्या : ३५५३)
वाक्यम् १: वि॒हि होत्रा॒ अवी॑ता॒ विपो॒ न रायो॑ अ॒र्यः ।
पदानि : वि॒हि । होत्राः॑ । अवी॑ताः । विपः॑ । न । रायः॑ । अ॒र्यः
वाक्यम् २: वायो॒वा च॒न्द्रेण॒ रथेन॒ याहि॑ सु॒तस्य॑ पी॒तये ॥
पदानि : वायो॒ इति॑ । आ । च॒न्द्रेण॑ । रथे॑न । याहि॑ । सु॒तस्य॑ । पी॒तये॑

४१. मण्डलम् ४, सूक्तम् ५०, मन्त्रः ४ (ऋक्सङ्ख्या : ३५६७)
वाक्यम् १: बृह॒स्पतिः॑ प्रथ॒मं जाय॑मानो म॒हो ज्योति॑षः पर॒मे व्यो॑मन् ।
पदानि : बृह॒स्पतिः॑ । प्र॒थ॒मम् । जाय॑मानः । म॒हः । ज्योति॑षः । प॒र॒मे । विऽओ॑मन्
वाक्यम् २: स॒प्तास्य॑स्तुविजा॒तो रवे॑ण॒ वि स॒प्तर॑श्मिरधम॒त्तमां॑सि ॥
पदानि : स॒प्तऽआ॑स्यः । तु॒वि॒ऽजा॒तः । रवे॑ण । वि । स॒प्तऽर॑श्मिः । अ॒ध॒म॒त् । तमां॑सि

४२. मण्डलम् ४, सूक्तम् ५१, मन्त्रः ३ (ऋक्सङ्ख्या : ३५७७)
वाक्यम् १: उ॒च्छन्ती॑र॒द्य चि॑तयन्त भो॒जात्रा॑धो॒देया॑यो॒षसो॑ म॒घोनीः॑ ।
पदानि : उ॒च्छन्तीः॑ । अ॒द्य । चि॒त॒य॒न्त॒ । भो॒जान् । रा॒धः॒ऽदेया॑य । उ॒षसः॑ । म॒घोनीः॑
वाक्यम् २: अ॒चि॒त्रे अ॒न्तः प॒णयः॑ सस॒न्त्वबु॑ध्यमाना॒स्तम॑सो॒ विम॑ध्ये ॥
पदानि : अ॒चि॒त्रे । अ॒न्तरिति॑ । प॒णयः॑ । स॒स॒न्तु॒ । अबु॑ध्यमानाः । तम॑सः । विऽम॑ध्ये

४३. मण्डलम् ४, सूक्तम् ५६, मन्त्रः २ (ऋक्सङ्ख्या : ३६१७)
वाक्यम् १: दे॒वी दे॒वेभि॑र्यजते यजत्रै॒रमि॑नती तस्थतु॒रुक्षमा॑णे ।
पदानि : दे॒वी इति॑ । दे॒वेभिः॑ । य॒ज॒ते इति॑ । यज॑त्रैः । अमि॑नती इति॑ । त॒स्थ॒तुः॒ । उ॒क्षमा॑णे इति॑
वाक्यम् २: ऋ॒तावं॑री अ॒द्रुहा॑ दे॒वपु॑त्रे य॒ज्ञस्य॑ ने॒त्री शु॒चय॑द्भि॒र्कैः ॥
पदानि : ऋ॒तव॑री॒ इत्यृ॒तऽव॑री । अ॒द्रुहा॑ । दे॒वपु॑त्रे॒ इति॑ दे॒वऽपु॑त्रे । य॒ज्ञस्य॑ । ने॒त्री इति॑ । शु॒चय॑त्ऽभिः । अ॒र्कैः

४४. मण्डलम् ४, सूक्तम् ५७, मन्त्रः ४ (ऋक्सङ्ख्या : ३६२६)
वाक्यम् १: शु॒नं वा॒हाः शु॒नं नरः॑ शु॒नं कृ॑षतु लाङ्ग॒लम् ।
पदानि : शु॒नम् । वा॒हाः । शु॒नम् । नरः॑ । शु॒नम् । कृ॒ष॒तु॒ । लाङ्ग॒लम्
वाक्यम् २: शु॒नं व॑र॒त्रा ब॑ध्यन्तां शु॒नमष्ट्रा॒मुदि॑ङ्गय ॥
पदानि : शु॒नम् । व॒र॒त्राः । ब॒ध्य॒न्ता॒म् । शु॒नम् । अष्ट्रा॑म् । उत् । इ॒ङ्ग॒य॒

४५. मण्डलम् ५, सूक्तम् ७, मन्त्रः ३ (ऋक्सङ्ख्या : ३७१२)
वाक्यम् १: सं यदि॒षो वना॑महे॒ सं ह॒व्या मानु॑षाणाम् ।
पदानि : सम् । यत् । इ॒षः । वना॑महे । सम् । ह॒व्या । मानु॑षाणाम्
वाक्यम् २: उ॒त द्यु॒म्नस्य॒ शव॑स ऋ॒तस्य॑ र॒श्मिमा द॑दे ॥
पदानि : उ॒त । द्यु॒म्नस्य॑ । शव॑सा । ऋ॒तस्य॑ । र॒श्मिम् । आ । द॒दे॒

४६. मण्डलम् ५, सूक्तम् ७, मन्त्रः ५ (ऋक्सङ्ख्या : ३७१४)
वाक्यम् १: अवं स्म यस्य वेषणे स्वेदं पथिषु जुह्वति।
पदानि : अवं। स्म। यस्यं। वेषणे। स्वेदम्। पथिषुं। जुह्वति
वाक्यम् २: अभीमह स्वजेन्यं भूमां पृष्ठेव रुरुहुः॥
पदानि : अभि। ईम्। अह। स्वऽजेन्यम्। भूमं। पृष्ठाऽइव। रुरुहुः

४७. मण्डलम् ५, सूक्तम् ७, मन्त्रः ८ (ऋक्सङ्ख्या : ३७१७)
वाक्यम् १: शुचिः ष्म यस्मां अत्रिवत्प्र स्वधितीव रीयते।
पदानि : शुचिः। स्म। यस्मै। अत्रिऽवत्। प्र। स्वधितिःऽइव। रीयते
वाक्यम् २: सुषूरसूत माता क्राणा यदानशे भगम्॥
पदानि : सुऽसूः। असूत। माता। क्राणा। यत्। आनशे। भगम्

४८. मण्डलम् ५, सूक्तम् १०, मन्त्रः १ (ऋक्सङ्ख्या : ३७३४)
वाक्यम् १: अग्न ओजिष्ठमा भर द्युम्नमस्मभ्यमध्रिगो।
पदानि : अग्ने। ओजिष्ठम्। आ। भर। द्युम्नम्। अस्मभ्यम्। अध्रिगो इत्यध्रिऽगो
वाक्यम् २: प्र नो राया परीणसा रत्सि वाजाय पन्थाम्॥
पदानि : प्र। नः। राया। परीणसा। रत्सि। वाजाय। पन्थाम्

४९. मण्डलम् ५, सूक्तम् १६, मन्त्रः १ (ऋक्सङ्ख्या : ३७७०)
वाक्यम् १: बृहद्वयो हि भानवेऽर्चा देवायाग्नये।
पदानि : बृहत्। वयः। हि। भानवे। अर्च। देवाय। अग्नये
वाक्यम् २: यं मित्रं न प्रशस्तिभिर्मर्तासो दधिरे पुरः॥
पदानि : यम्। मित्रम्। न। प्रशस्तिऽभिः। मर्तासः। दधिरे। पुरः

५०. मण्डलम् ५, सूक्तम् १७, मन्त्रः ४ (ऋक्सङ्ख्या : ३७७८)
वाक्यम् १: अस्य क्रत्वा विचेतसो दस्मस्य वसु रथ आ।
पदानि : अस्य। क्रत्वा। विऽचेतसः। दस्मस्य। वसु। रथे। आ
वाक्यम् २: अधा विश्वासु हव्योऽग्निर्विक्षु प्र शस्यते॥
पदानि : अध। विश्वासु। हव्यः। अग्निः। विक्षु। प्र। शस्यते

५१. मण्डलम् ५, सूक्तम् २०, मन्त्रः १ (ऋक्सङ्ख्या : ३७९०)
वाक्यम् १: यमग्ने वाजसातम त्वं चिन्मन्यसे रयिम्।
पदानि : यम्। अग्ने। वाजऽसातम। त्वम्। चित्। मन्यसे। रयिम्
वाक्यम् २: तं नो गीर्भिः श्रवाय्यं देवत्रा पनया युजम्॥
पदानि : तम्। नः। गीःऽभिः। श्रवाय्यम्। देवऽत्रा। पनय। युजम्

५२. मण्डलम् ५, सूक्तम् २३, मन्त्रः १ (ऋक्सङ्ख्या : ३८०२)
वाक्यम् १: अग्ने सहन्तमा भर द्युम्नस्य प्रासहा रयिम्।
पदानि : अग्ने। सहन्तम्। आ। भर। द्युम्नस्य। प्रऽसहा। रयिम्
वाक्यम् २: विश्वा यश्चर्षणीरभ्यासा वाजेषु सासहत्॥

पदानि : विश्वाः । यः । चर्षणीः । अभि । आसा । वाजेषु । ससहत्

५३. मण्डलम् ५, सूक्तम् २३, मन्त्रः २ (ऋक्सङ्ख्या : ३८०३)
वाक्यम् १: तमग्ने पृतनाषहꣳ रयिं सहस्व आ भर ।
पदानि : तम् । अग्ने । पृतनाऽसहम् । रयिम् । सहस्वः । आ । भर
वाक्यम् २: त्वं हि सत्यो अद्भुतो दाता वाजस्य गोमतः ॥
पदानि : त्वम् । हि । सत्यः । अद्भुतः । दाता । वाजस्य । गोऽमतः

५४. मण्डलम् ५, सूक्तम् २५, मन्त्रः ७ (ऋक्सङ्ख्या : ३८१६)
वाक्यम् १: यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो ।
पदानि : यत् । वाहिष्ठम् । तत् । अग्नये । बृहत् । अर्च । विभावसो इतिं विभाऽवसो
वाक्यम् २: महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥
पदानि : महिषीऽइव । त्वत् । रयिः । त्वत् । वाजाः । उत् । ईरते

५५. मण्डलम् ५, सूक्तम् ३९, मन्त्रः १ (ऋक्सङ्ख्या : ३९३८)
वाक्यम् १: यदिन्द्र चित्र मेहनास्ति त्वादातमद्रिवः ।
पदानि : यत् । इन्द्र । चित्र । मेहना । अस्ति । त्वाऽदातम् । अद्रिऽवः
वाक्यम् २: राधस्तन्नो विदद्वस उभयाहस्त्या भर ॥
पदानि : राधः । तत् । नः । विदद्वसो इतिं विदत्ऽवसो । उभयाहस्ति । आ । भर

५६. मण्डलम् ५, सूक्तम् ४२, मन्त्रः ७ (ऋक्सङ्ख्या : ३९७८)
वाक्यम् १: उप स्तुहि प्रथमं रत्नधेयं बृहस्पतिꣳ सनितारं धनानाम् ।
पदानि : उप । स्तुहि । प्रथमम् । रत्नऽधेयम् । बृहस्पतिम् । सनितारम् । धनानाम्
वाक्यम् २: यः शंसते स्तुवते शंभविष्ठः पुरूवसुरागम्ज्योहुवानम् ॥
पदानि : यः । शंसते । स्तुवते । शम्ऽभविष्ठः । पुरुऽवसुः । आऽगमत् । जोहुवानम्

५७. मण्डलम् ५, सूक्तम् ४३, मन्त्रः १२ (ऋक्सङ्ख्या : ४००१)
वाक्यम् १: आ वेधसं नीलपृष्ठं बृहन्तं बृहस्पतिं सदने सादयध्वम् ।
पदानि : आ । वेधसम् । नीलऽपृष्ठम् । बृहन्तम् । बृहस्पतिम् । सदने । सादयध्वम्
वाक्यम् २: सादद्योनिं दम आ दीदिवांसं हिरण्यवर्णमरुषं सपेम ॥
पदानि : सादत्ऽयोनिम् । दमे । आ । दीदिऽवांसम् । हिरण्यऽवर्णम् । अरुषम् । सपेम

५८. मण्डलम् ५, सूक्तम् ५२, मन्त्रः २ (ऋक्सङ्ख्या : ४०७९)
वाक्यम् १: ते हि स्थिरस्य शवसः सखायः सन्ति धृष्णुया ।
पदानि : ते । हि । स्थिरस्य । शवसः । सखायः । सन्ति । धृष्णुऽया
वाक्यम् २: ते यामन्ना धृषद्विनस्त्मना पान्ति शश्वतः ॥
पदानि : ते । यामन् । आ । धृषत्ऽविनः । त्मना । पान्ति । शश्वतः

५९. मण्डलम् ५, सूक्तम् ५२, मन्त्रः ३ (ऋक्सङ्ख्या : ४०८०)
वाक्यम् १: ते स्पन्द्रासो नोक्षणोऽतिं ष्कन्दन्ति शर्वरीः ।

पदानि : ते । स्पन्द्रासः । न । उक्षणः । अति । स्कन्दन्ति । शर्वरीः
वाक्यम् २: मरुतामधा महो दिवि क्षमा च मन्महे ॥
पदानि : मरुताम् । अध । महः । दिवि । क्षमा । च । मन्महे

६०. मण्डलम् ५, सूक्तम् ५२, मन्त्रः ४ (ऋक्सङ्ख्या : ४०८१)
वाक्यम् १: मरुत्सु वो दधीमहि स्तोमं यज्ञं च धृष्णुया ।
पदानि : मरुत्ऽसु । वः । दधीमहि । स्तोमम् । यज्ञम् । च । धृष्णुऽया
वाक्यम् २: विश्वे ये मानुषा युगा पान्ति मर्त्यं रिषः ॥
पदानि : विश्वे । ये । मानुषा । युगा । पान्ति । मर्त्यम् । रिषः

६१. मण्डलम् ५, सूक्तम् ५२, मन्त्रः ७ (ऋक्सङ्ख्या : ४०८४)
वाक्यम् १: ये वावृधन्त पार्थिवा य उरावन्तरिक्ष आ ।
पदानि : ये । ववृधन्त । पार्थिवाः । ये । उरौ । अन्तरिक्षे । आ
वाक्यम् २: वृजने वा नदीनां सधस्थे वा महो दिवः ॥
पदानि : वृजने । वा । नदीनाम् । सधऽस्थे । वा । महः । दिवः

६२. मण्डलम् ५, सूक्तम् ६४, मन्त्रः २ (ऋक्सङ्ख्या : ४२१३)
वाक्यम् १: ता बाहवा सुचेतुना प्र यन्तमस्मा अर्चते ।
पदानि : ता । बाहवा । सुऽचेतुना । प्र । यन्तम् । अस्मै । अर्चते
वाक्यम् २: शेवं हि जार्यं वां विश्वासु क्षासु जोगुवे ॥
पदानि : शेवम् । हि । जार्यम् । वाम् । विश्वासु । क्षासु । जोगुवे

६३. मण्डलम् ५, सूक्तम् ६६, मन्त्रः २ (ऋक्सङ्ख्या : ४२२६)
वाक्यम् १: ता हि क्षत्रमविंहुतं सम्यगसुर्य१माशाते ।
पदानि : ता । हि । क्षत्रम् । अविंऽहुतम् । सम्यक् । असुर्यम् । आशाते इति
वाक्यम् २: अध व्रतेव मानुषं स्व१र्ण धायि दर्शतम् ॥
पदानि : अध । व्रताऽइव । मानुषम् । स्वः । न । धायि । दर्शतम्

६४. मण्डलम् ५, सूक्तम् ७३, मन्त्रः ३ (ऋक्सङ्ख्या : ४२५७)
वाक्यम् १: ईर्मान्यद्वपुषे वपुश्चक्रं रथस्य येमथुः ।
पदानि : ईर्मा । अन्यत् । वपुषे । वपुः । चक्रम् । रथस्य । येमथुः
वाक्यम् २: पर्यन्या नाहुषा युगा मह्ना रजांसि दीयथः ॥
पदानि : परि । अन्या । नाहुषा । युगा । मह्ना । रजांसि । दीयथः

६५. मण्डलम् ५, सूक्तम् ७३, मन्त्रः ७ (ऋक्सङ्ख्या : ४२६१)
वाक्यम् १: उग्रो वां ककुहो ययिः शृण्वे यामेषु संतनिः ।
पदानि : उग्रः । वाम् । ककुहः । ययिः । शृण्वे । यामेषु । सम्ऽतनिः
वाक्यम् २: यद्वां दंसोभिरश्विनात्रिर्नरावर्वतति ॥
पदानि : यत् । वाम् । दंसःऽभिः । अश्विना । अत्रिः । नरा । आऽववर्तति

६६. मण्डलम् ५, सूक्तम् ७४, मन्त्रः ८ (ऋक्सङ्ख्या : ४२७२)
वाक्यम् १: आ वां॑ रथो॒ रथा॑नां॒ येष्ठौ॑ यात्वश्विना ।
पदानि : आ । वा॒म् । रथः॑ । रथा॑नाम् । येष्ठुः॑ । या॒तु॒ । अ॒श्वि॒ना
वाक्यम् २: पु॒रू चि॑दस्मयु॒स्ति॒र आ॑ङ्गू॒षो मर्त्ये॑ष्वा ॥
पदानि : पु॒रु॒ । चि॒त् । अ॒स्म॒ऽयुः॒ । ति॒रः॒ । आ॒ङ्गू॒षः॒ । मर्त्ये॑षु । आ

६७. मण्डलम् ५, सूक्तम् ७८, मन्त्रः ८ (ऋक्सङ्ख्या : ४३०१)
वाक्यम् १: यथा॒ वातो॒ यथा॒ वन॑ं॒ यथा॑ समु॒द्र एज॑ति ।
पदानि : यथा॑ । वातः॑ । यथा॑ । वन॑म् । यथा॑ । स॒मु॒द्रः॑ । एज॑ति
वाक्यम् २: ए॒वा त्वं द॑शमास्य सहावेहि ज॒रायु॑णा ॥
पदानि : ए॒व । त्वम् । द॒श॒ऽमा॒स्य॒ । स॒ह॒ । अव॑ । इ॒हि॒ । ज॒रायु॑णा

६८. मण्डलम् ५, सूक्तम् ८४, मन्त्रः ३ (ऋक्सङ्ख्या : ४३४५)
वाक्यम् १: दृ॒ळ्हा चि॒द्या वन॒स्पती॑न्क्ष्म॒या दर्ध॑र्षि॒ ओज॑सा ।
पदानि : दृ॒ळ्हा । चि॒त् । या । वन॒स्पती॑न् । क्ष्म॒या । दर्धर्षि । ओज॑सा
वाक्यम् २: यत्ते॒ अ॒भ्रस्य॑ वि॒द्युतो॑ दि॒वो वर्ष॑न्ति वृ॒ष्टय॑: ॥
पदानि : यत् । ते॒ । अ॒भ्रस्य॑ । वि॒ऽद्युतः॑ । दि॒वः॑ । वर्ष॑न्ति । वृ॒ष्टयः॑

६९. मण्डलम् ५, सूक्तम् ८६, मन्त्रः ३ (ऋक्सङ्ख्या : ४३५६)
वाक्यम् १: तयो॒रिद॑मव॒च्छव॑स्ति॒ग्मा दि॒द्यु॒न्म॒घोनोः॑ ।
पदानि : तयोः॑ । इत् । अम॑ऽवत् । शवः॑ । ति॒ग्मा । दि॒द्यु॒त् । म॒घोनोः॑
वाक्यम् २: प्रति॒ द्रुणा॒ गभ॑स्त्योर्गवा॑ं वृत्रघ्न एषते ॥
पदानि : प्रति॑ । द्रुणा॑ । गभ॑स्त्योः । गवा॑म् । वृ॒त्र॒ऽघ्ने॒ । आ । ई॒ष॒ते॒

७०. मण्डलम् ५, सूक्तम् ८६, मन्त्रः ५ (ऋक्सङ्ख्या : ४३५८)
वाक्यम् १: ता वृ॑धन्ता॒वनु॒ द्यून्मर्ता॑य दे॒वाव॒दभा॑ ।
पदानि : ता । वृ॒ध॒न्तौ॒ । अनु॑ । द्यून् । मर्ता॑य । दे॒वौ । अ॒दभा॑
वाक्यम् २: अर्ह॑न्ता चित्पु॒रो द॒धेऽशे॑व दे॒वाव॑र्वते ॥
पदानि : अर्ह॑न्ता । चि॒त् । पु॒रः । द॒धे॒ । अंशा॑ऽइव । दे॒वौ । अर्व॑ते

७१. मण्डलम् ६, सूक्तम् २७, मन्त्रः ६ (ऋक्सङ्ख्या : ४६६३)
वाक्यम् १: त्रिं॒श॒च्छ॑तं व॒र्मिणं॑ इन्द्र सा॒कं य॒व्याव॑त्यां पुरुहूत श्रव॒स्या ।
पदानि : त्रिं॒श॒त्ऽश॑तम् । व॒र्मिणः॑ । इ॒न्द्र॒ । सा॒कम् । य॒व्याऽव॑त्याम् । पु॒रु॒ऽहू॒त॒ । श्र॒व॒स्या
वाक्यम् २: वृ॒ची॒व॑न्तः॒ शर॑वे॒ पत्य॑मानाः॒ पात्रा॑ भिन्दा॒ना न्य॒र्थान्या॑यन् ॥
पदानि : वृ॒ची॒व॑न्तः । शर॑वे । पत्य॑मानाः । पात्रा॑ । भि॒न्दा॒नाः । नि॒ऽअ॒र्थानि॑ । आ॒य॒न्

७२. मण्डलम् ६, सूक्तम् २८, मन्त्रः ८ (ऋक्सङ्ख्या : ४६७३)
वाक्यम् १: उपे॒दमु॑प॒पर्च॑नमा॒सु गो॒षूप॑ पृच्यताम् ।
पदानि : उप॑ । इ॒दम् । उ॒प॒ऽपर्च॑नम् । आ॒सु । गो॒षु । उप॑ । पृ॒च्य॒ता॒म्
वाक्यम् २: उप॑ ऋष॒भस्य॒ रेत॒स्युपेन्द्र तव॑ वी॒र्ये ॥
पदानि : उप॑ । ऋ॒ष॒भस्य॑ । रेत॑सि । उप॑ । इ॒न्द्र॒ । तव॑ । वी॒र्ये॑

७३. मण्डलम् ६, सूक्तम् ३२, मन्त्रः १ (ऋक्सङ्ख्या : ४६९०)
वाक्यम् १: अपूर्व्या पुरुतमान्यस्मै महे वीराय तवसे तुराय ।
पदानि : अपूर्व्या । पुरुऽतमानि । अस्मै । महे । वीराय । तवसे । तुराय
वाक्यम् २: विरप्शिने वज्रिणे शंतमानि वचांस्यासा स्थविराय तक्षम् ॥
पदानि : विऽरप्शिने । वज्रिणे । शम्ऽतमानि । वचाँसि । आसा । स्थविराय । तक्षम्

७४. मण्डलम् ६, सूक्तम् ४६, मन्त्रः ३ (ऋक्सङ्ख्या : ४८०७)
वाक्यम् १: यः सत्राहा विचर्षणिरिन्द्रं तं हूमहे वयम् ।
पदानि : यः । सत्राऽहा । विऽचर्षणिः । इन्द्रम् । तम् । हूमहे । वयम्
वाक्यम् २: सहस्रमुष्क तुविनृम्ण सत्पते भवा समत्सु नो वृधे ॥
पदानि : सहस्रऽमुष्क । तुविऽनृम्ण । सत्ऽपते । भव । समत्ऽसु । नः । वृधे

७५. मण्डलम् ६, सूक्तम् ४६, मन्त्रः ४ (ऋक्सङ्ख्या : ४८०८)
वाक्यम् १: बाधसे जनान्वृषभेव मन्युना घृषौ मीळ्ह ऋचीषम ।
पदानि : बाधसे । जनान् । वृषभाऽइव । मन्युना । घृषौ । मीळ्हे । ऋचीषम
वाक्यम् २: अस्माकं बोध्यविता महाधने तनूष्वप्सु सूर्ये ॥
पदानि : अस्माकम् । बोधि । अविता । महाऽधने । तनूषु । अप्ऽसु । सूर्ये

७६. मण्डलम् ६, सूक्तम् ४७, मन्त्रः १२ (ऋक्सङ्ख्या : ४८३०)
वाक्यम् १: इन्द्रः सुत्रामा स्ववाँ अवोभिः सुमृळीको भवतु विश्ववेदाः ।
पदानि : इन्द्रः । सुऽत्रामा । स्वऽवान् । अवःऽभिः । सुऽमृळीकः । भवतु । विश्वऽवेदाः
वाक्यम् २: बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम ॥
पदानि : बाधताम् । द्वेषः । अभयम् । कृणोतु । सुऽवीर्यस्य । पतयः । स्याम

७७. मण्डलम् ६, सूक्तम् ४८, मन्त्रः ३ (ऋक्सङ्ख्या : ४८५२)
वाक्यम् १: वृषा ह्यग्ने अजरो महान्विभास्यर्चिषा ।
पदानि : वृषा । हि । अग्ने । अजरः । महान् । विऽभासि । अर्चिषा
वाक्यम् २: अजस्रेण शोचिषा शोशुचच्छुचे सुदीतिभिः सु दीदिहि ॥
पदानि : अजस्रेण । शोचिषा । शोशुचत् । शुचे । सुदीतिऽभिः । सु । दीदिहि

७८. मण्डलम् ६, सूक्तम् ४८, मन्त्रः १२ (ऋक्सङ्ख्या : ४८६१)
वाक्यम् १: या शर्धाय मारुताय स्वभानवे श्रवोऽमृत्यु धुक्षत ।
पदानि : या । शर्धाय । मारुताय । स्वऽभानवे । श्रवः । अमृत्यु । धुक्षत
वाक्यम् २: या मृळीके मरुतां तुराणां या सुम्नैरवयावरी ॥
पदानि : या । मृळीके । मरुताम् । तुराणाम् । या । सुम्नैः । एवऽयावरी

७९. मण्डलम् ६, सूक्तम् ५०, मन्त्रः २ (ऋक्सङ्ख्या : ४८८८)
वाक्यम् १: सुज्योतिषः सूर्य दक्षपितृननागास्त्वे सुमहो वीहि देवान् ।
पदानि : सुऽज्योतिषः । सूर्य । दक्षऽपितॄन् । अनागाःऽत्वे । सुऽमहः । वीहि । देवान्

वाक्यम् २: द्विजन्मानो य ऋतसापः सत्याः स्वर्वन्तो यजता अग्निजिह्वाः ॥
पदानि : द्विऽजन्मानः । ये । ऋतऽसापः । सत्याः । स्वःऽवन्तः । यजताः । अग्निऽजिह्वाः

८०. मण्डलम् ६, सूक्तम् ५१, मन्त्रः १४ (ऋक्सङ्ख्या : ४९१५)
वाक्यम् १: ग्रावाणः सोम नो हि कं सखित्वनाय वावशुः ।
पदानि : ग्रावाणः । सोम । नः । हि । कम् । सखिऽत्वनाय । वावशुः
वाक्यम् २: जही न्यत्रिणं पणिं वृको हि षः ॥
पदानि : जहि । नि । अत्रिणम् । पणिम् । वृकः । हि । सः

८१. मण्डलम् ६, सूक्तम् ५९, मन्त्रः २ (ऋक्सङ्ख्या : ४९७८)
वाक्यम् १: बळित्था महिमा वामिन्द्राग्नी पनिष्ठ आ ।
पदानि : बट् । इत्था । महिमा । वाम् । इन्द्राग्नी इति । पनिष्ठः । आ
वाक्यम् २: समानो वां जनिता भ्रातरा युवं यमाविहेहमातरा ॥
पदानि : समानः । वाम् । जनिता । भ्रातरा । युवम् । यमौ । इहेह । ऽमातरा

८२. मण्डलम् ६, सूक्तम् ५९, मन्त्रः ४ (ऋक्सङ्ख्या : ४९८०)
वाक्यम् १: य इन्द्राग्नी सुतेषु वां स्तवत्तेष्वृतावृधा ।
पदानि : यः । इन्द्राग्नी इति । सुतेषु । वाम् । स्तवत् । तेषु । ऋतऽवृधा
वाक्यम् २: जोषवाकं वदतः पज्रहोषिणा न देवा भसथश्चन ॥
पदानि : जोषऽवाकम् । वदतः । पज्रऽहोषिणा । न । देवा । भसथः । चन

८३. मण्डलम् ६, सूक्तम् ५९, मन्त्रः ७ (ऋक्सङ्ख्या : ४९८३)
वाक्यम् १: इन्द्राग्नी आ हि तन्वते नरो धन्वानि बाह्वोः ।
पदानि : इन्द्राग्नी इति । आ । हि । तन्वते । नरः । धन्वानि । बाह्वोः
वाक्यम् २: मा नो अस्मिन्महाधने परा वर्क्तं गविष्टिषु ॥
पदानि : मा । नः । अस्मिन् । महाऽधने । परा । वर्क्तम् । गोऽइष्टिषु

८४. मण्डलम् ६, सूक्तम् ६०, मन्त्रः १४ (ऋक्सङ्ख्या : ५०००)
वाक्यम् १: आ नो गव्येभिरश्व्यैर्वसव्यैरुप गच्छतम् ।
पदानि : आ । नः । गव्येभिः । अश्व्यैः । वसव्यैः । उप । गच्छतम्
वाक्यम् २: सखायौ देवौ सख्याय शंभुवेन्द्राग्नी ता हवामहे ॥
पदानि : सखायौ । देवौ । सख्याय । शम्ऽभुवा । इन्द्राग्नी इति । ता । हवामहे

८५. मण्डलम् ६, सूक्तम् ६६, मन्त्रः १० (ऋक्सङ्ख्या : ५०५९)
वाक्यम् १: त्विषीमन्तो अध्वरस्येव दिद्युत्तृषुच्यवसो जुह्वोऽ नाग्नेः ।
पदानि : त्विषिऽमन्तः । अध्वरस्यऽइव । दिद्युत् । तृषुऽच्यवसः । जुह्वः । न । अग्नेः
वाक्यम् २: अर्चत्रयो धुनयो न वीरा भ्राजज्जन्मानो मरुतो अधृष्टाः ॥
पदानि : अर्चत्रयः । धुनयः । न । वीराः । भ्राजत्ऽजन्मानः । मरुतः । अधृष्टाः

८६. मण्डलम् ७, सूक्तम् १६, मन्त्रः २ (ऋक्सङ्ख्या : ५२६१)

वाक्यम् १: स योजते अरुषा विश्वभोजसा स दुद्रवत्स्वाहुतः ।
पदानि : सः । योजते । अरुषा । विश्वऽभोजसा । सः । दुद्रवत् । सुऽआहुतः
वाक्यम् २: सुब्रह्मा यज्ञः सुशमी वसूनां देवं राधो जनानाम् ॥
पदानि : सुऽब्रह्मा । यज्ञः । सुऽशमी । वसूनाम् । देवम् । राधः । जनानाम्

८७. मण्डलम् ७, सूक्तम् १६, मन्त्रः १२ (ऋक्सङ्ख्या : ५२७१)
वाक्यम् १: तं होतारमध्वरस्य प्रचेतसं वह्निं देवा अकृण्वत ।
पदानि : तम् । होतारम् । अध्वरस्य । प्रऽचेतसम् । वह्निम् । देवाः । अकृण्वत
वाक्यम् २: दधाति रत्नं विधते सुवीर्यमग्निर्जनाय दाशुषे ॥
पदानि : दधाति । रत्नम् । विधते । सुऽवीर्यम् । अग्निः । जनाय । दाशुषे

८८. मण्डलम् ७, सूक्तम् ३२, मन्त्रः १८ (ऋक्सङ्ख्या : ५४१६)
वाक्यम् १: यदिन्द्र यावतस्त्वमेतावदहमीशीय ।
पदानि : यत् । इन्द्र । यावतः । त्वम् । एतावत् । अहम् । ईशीय
वाक्यम् २: स्तोतारमिद्धिधिषेय रदावसो न पापत्वाय रासीय ॥
पदानि : स्तोतारम् । इत् । दिधिषेय । रदवसो इति रदऽवसो । न । पापऽत्वाय । रासीय

८९. मण्डलम् ७, सूक्तम् ४६, मन्त्रः १ (ऋक्सङ्ख्या : ५५४६)
वाक्यम् १: इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधावने ।
पदानि : इमाः । रुद्राय । स्थिरऽधन्वने । गिरः । क्षिप्रऽइषवे । देवाय । स्वधाऽवने
वाक्यम् २: अषाळ्हाय सहमानाय वेधसे तिग्मायुधाय भरता शृणोतु नः ॥
पदानि : अषाळ्हाय । सहमानाय । वेधसे । तिग्मऽआयुधाय । भरत । शृणोतु । नः

९०. मण्डलम् ७, सूक्तम् ७५, मन्त्रः ५ (ऋक्सङ्ख्या : ५७५६)
वाजिनीवती सूर्यस्य योषा चित्रामघा राय ईशे वसूनाम् ।
पदानि : वाजिनीऽवती । सूर्यस्य । योषा । चित्रऽमघा । रायः । ईशे । वसूनाम्
वाक्यम् २: ऋषिष्टुता जरयन्ती मघोन्युषा उच्छति वह्निभिर्गृणाना ॥
पदानि : ऋषिऽस्तुता । जरयन्ती । मघोनी । उषाः । उच्छति । वह्निऽभिः । गृणाना

९१. मण्डलम् ७, सूक्तम् ८१, मन्त्रः ६ (ऋक्सङ्ख्या : ५७९१)
वाक्यम् १: श्रवः सूरिभ्यो अमृतं वसुत्वनं वाजाँ अस्मभ्यं गोमतः ।
पदानि : श्रवः । सूरिऽभ्यः । अमृतम् । वसुऽत्वनम् । वाजान् । अस्मभ्यम् । गोऽमतः
वाक्यम् २: चोदयित्री मघोनः सूनृतावत्युषा उच्छदप स्रिधः ॥
पदानि : चोदयित्री । मघोनः । सूनृताऽवती । उषाः । उच्छत् । अप । स्रिधः

९२. मण्डलम् ७, सूक्तम् ९७, मन्त्रः ८ (ऋक्सङ्ख्या : ५९०७)
वाक्यम् १: देवी देवस्य रोदसी जनित्री बृहस्पतिं वावृधतुर्महित्वा ।
पदानि : देवी इति । देवस्य । रोदसी इति । जनित्री इति । बृहस्पतिम् । ववृधतुः । महिऽत्वा
वाक्यम् २: दक्षाय्याय दक्षता सखायः करद्ब्रह्माणे सुतरा सुगाधा ॥
पदानि : दक्षाय्याय । दक्षत । सखायः । करत् । ब्रह्माणे । सुऽतरा । सुऽगाधा

९३. मण्डलम् ८, सूक्तम् १, मन्त्रः ११ (ऋक्सङ्ख्या : ५९८५)
वाक्यम् १: यत्तुदत्सूर एतशं वङ्कू वातस्य पर्णिना ।
पदानि : यत् । तुदत् । सूरः । एतशम् । वङ्कू इति । वातस्य । पर्णिना
वाक्यम् २: वहत्कुत्समार्जुनेयं शतक्रतुः त्सरद्गन्धर्वमस्तृतम् ॥
पदानि : वहत् । कुत्सम् । आर्जुनेयम् । शतऽक्रतुः । त्सरत् । गन्धर्वम् । अस्तृतम्

९४. मण्डलम् ८, सूक्तम् १, मन्त्रः १२ (ऋक्सङ्ख्या : ५९८६)
वाक्यम् १: य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः ।
पदानि : यः । ऋते । चित् । अभिऽश्रिषः । पुरा । जत्रुऽभ्यः । आऽतृदः
वाक्यम् २: संधाता संधिं मघवा पुरूवसुरिष्कर्ता विह्रुतं पुनः ॥
पदानि : सम्ऽधाता । सम्ऽधिम् । मघऽवा । पुरुऽवसुः । इष्कर्ता । विऽह्रुतम् । पुनरिति

९५. मण्डलम् ८, सूक्तम् १, मन्त्रः २९ (ऋक्सङ्ख्या : ६००३)
वाक्यम् १: मम त्वा सूर उदिते मम मध्यंदिने दिवः ।
पदानि : मम । त्वा । सूरे । उत्ऽइते । मम । मध्यन्दिने । दिवः
वाक्यम् २: मम प्रपित्वे अपिशर्वरे वसवा स्तोमासो अवृत्सत ॥
पदानि : मम । प्रऽपित्वे । अपिऽशर्वरे । वसो इति । आ । स्तोमासः । अवृत्सत

९६. मण्डलम् ८, सूक्तम् १, मन्त्रः ३२ (ऋक्सङ्ख्या : ६००६)
वाक्यम् १: य ऋज्रा मह्यं मामहे सह त्वचा हिरण्ययां ।
पदानि : यः । ऋज्रा । मह्यम् । ममहे । सह । त्वचा । हिरण्ययां
वाक्यम् २: एष विश्वान्यभ्यस्तु सौभगासङ्गस्यं स्वनद्रथः ॥
पदानि : एषः । विश्वानि । अभि । अस्तु । सौभगा । आऽसङ्गस्यं । स्वनत्ऽरथः

९७. मण्डलम् ८, सूक्तम् ८, मन्त्रः ८ (ऋक्सङ्ख्या : ६२२६)
वाक्यम् १: किमन्ये पर्यासतेऽस्मत्स्तोमेभिरश्विना ।
पदानि : किम् । अन्ये । परि । आसते । अस्मत् । स्तोमेभिः । अश्विना
वाक्यम् २: पुत्रः कण्वस्य वामृषिर्गीर्भिर्वत्सो अवीवृधत् ॥
पदानि : पुत्रः । कण्वस्य । वाम् । ऋषिः । गीःऽभिः । वत्सः । अवीवृधत्

९८. मण्डलम् ८, सूक्तम् ८, मन्त्रः १३ (ऋक्सङ्ख्या : ६२३१)
वाक्यम् १: आ नो विश्वान्यश्विना धत्तं राधांस्यह्रया ।
पदानि : आ । नः । विश्वानि । अश्विना । धत्तम् । राधांसि । अह्रया
वाक्यम् २: कृतं न ऋत्वियावतो मा नो रीरधतं निदे ॥
पदानि : कृतम् । नः । ऋत्वियऽवतः । मा । नः । रीरधतम् । निदे

९९. मण्डलम् ८, सूक्तम् ८, मन्त्रः १६ (ऋक्सङ्ख्या : ६२३४)
वाक्यम् १: प्रास्मा ऊर्जं घृतश्चुतमश्विना यच्छतं युवम् ।
पदानि : प्र । अस्मै । ऊर्जम् । घृतऽश्चुतम् । अश्विना । यच्छतम् । युवम्
वाक्यम् २: यो वां सुम्नाय तुष्टवद्वसूयाद्वानुनस्पती ॥

पदानि : यः । वाम् । सुम्नाय । तुस्तवत् । वसुऽयात् । दानुनः । पती इति

१००. मण्डलम् ८, सूक्तम् ८, मन्त्रः १७ (ऋक्सङ्ख्या : ६२३५)
वाक्यम् १: आ नो गन्तं रिशादसेमं स्तोमं पुरुभुजा ।
पदानि : आ । नः । गन्तम् । रिशादसा । इमम् । स्तोमम् । पुरुऽभुजा
वाक्यम् २: कृतं नः सुश्रियो नरेमा दातमभिष्टये ॥
पदानि : कृतम् । नः । सुऽश्रियः । नरा । इमा । दातम् । अभिष्टये

१०१. मण्डलम् ८, सूक्तम् ९, मन्त्रः ४ (ऋक्सङ्ख्या : ६२४५)
वाक्यम् १: अयं वां घर्मो अश्विना स्तोमेन परि षिच्यते ।
पदानि : अयम् । वाम् । घर्मः । अश्विना । स्तोमेन । परि । सिच्यते
वाक्यम् २: अयं सोमो मधुमान्वाजिनीवसू येन वृत्रं चिकेतथः ॥
पदानि : अयम् । सोमः । मधुऽमान् । वाजिनीवसू इति वाजिनीऽवसू । येन । वृत्रम् । चिकेतथः

१०२. मण्डलम् ८, सूक्तम् ९, मन्त्रः १९ (ऋक्सङ्ख्या : ६२६०)
वाक्यम् १: यदापीतासो अंशवो गावो न दुह्र ऊधभिः ।
पदानि : यत् । आऽपीतासः । अंशवः । गावः । न । दुह्रे । ऊधऽभिः
वाक्यम् २: यद्वा वाणीरनूषत प्र देवयन्तो अश्विना ॥
पदानि : यत् । वा । वाणीः । अनूषत । प्र । देवऽयन्तः । अश्विना

१०३. मण्डलम् ८, सूक्तम् १३, मन्त्रः १५ (ऋक्सङ्ख्या : ६३२६)
वाक्यम् १: यच्छक्रासि परावति यदर्वावति वृत्रहन् ।
पदानि : यत् । शक्र । असि । पराऽवति । यत् । अर्वाऽवति । वृत्रऽहन्
वाक्यम् २: यद्वा समुद्रे अन्धसोऽविते दसि ॥
पदानि : यत् । वा । समुद्रे । अन्धसः । अविता । इत् । असि

१०४. मण्डलम् ८, सूक्तम् २४, मन्त्रः ६ (ऋक्सङ्ख्या : ६५५६)
वाक्यम् १: आ त्वा गोभिरिव व्रजं गीर्भिर्ऋणोम्यद्रिवः ।
पदानि : आ । त्वा । गोभिःऽइव । व्रजम् । गीःऽभिः । ऋणोमि । अद्रिऽवः
वाक्यम् २: आ स्मा कामं जरितुरा मनः पृण ॥
पदानि : आ । स्म । कामम् । जरितुः । आ । मनः । पृण

१०५. मण्डलम् ८, सूक्तम् २४, मन्त्रः १९ (ऋक्सङ्ख्या : ६५६९)
वाक्यम् १: एतो न्विन्द्रं स्तवाम सखायः स्तोम्यं नरम् ।
पदानि : एतो इति । नु । इन्द्रम् । स्तवाम । सखायः । स्तोम्यम् । नरम्
वाक्यम् २: कृष्टीर्यो विश्वा अभ्यस्त्येक इत् ॥
पदानि : कृष्टीः । यः । विश्वाः । अभि । अस्ति । एकः । इत्

१०६. मण्डलम् ८, सूक्तम् २७, मन्त्रः ११ (ऋक्सङ्ख्या : ६६४०)
वाक्यम् १: इदा हि व उपस्तुतिमिदा वामस्य भक्तये ।

पदानि : इ॒दा । हि । वः॒ । उप॑ऽस्तुतिम् । इ॒दा । वा॒मस्य॑ । भ॒क्तये॑
वाक्यम् २: उप॑ वो विश्ववेदसो नम॒स्युराँ अ॑सृक्ष्यन्या॑मिव ॥
पदानि : उप॑ । वः॒ । वि॒श्व॒ऽवे॒द॒सः॒ । न॒म॒स्युः । आ । अ॒सृ॒क्षि॒ । अ॒न्या॑म्ऽइव

१०७. मण्डलम् ८, सूक्तम् २७, मन्त्रः १७ (ऋक्सङ्ख्या : ६६४६)
वाक्यम् १: ऋ॒ते स वि॑न्दते युधः सुगे॒भिर्या॒त्यध्व॑नः ।
पदानि : ऋ॒ते । सः । वि॒न्द॒ते॒ । युधः । सुऽगे॒भिः॒ । या॒ति॒ । अध्व॑नः
वाक्यम् २: अ॒र्य॒मा मि॒त्रो वरु॑णः॒ सरा॑तयो॒ यं त्राय॑न्ते स॒जोष॑सः ॥
पदानि : अ॒र्य॒मा । मि॒त्रः । वरु॑णः॒ । सऽरा॑तयः । यम् । त्राय॑न्ते । स॒ऽजोष॑सः

१०८. मण्डलम् ८, सूक्तम् ४६, मन्त्रः ८ (ऋक्सङ्ख्या : ६९५४)
वाक्यम् १: यस्ते॒ मदो॒ वरे॑ण्यो॒ य इ॑न्द्र वृत्र॒हन्त॑मः ।
पदानि : यः । ते॒ । मदः॑ । वरे॑ण्यः । यः । इ॒न्द्र॒ । वृ॒त्र॒हन्ऽत॑मः
वाक्यम् २: य आ॑दु॒दिः स्व॑र्॒नृभि॒र्यः पृत॑नासु दु॒ष्टरः॑ ॥
पदानि : यः । आ॒ऽउ॒दिः । स्वः॑ । नृऽभिः॑ । यः । पृत॑नासु । दु॒स्तरः॑

१०९. मण्डलम् ८, सूक्तम् ४९, मन्त्रः २ (ऋक्सङ्ख्या : ७०१४)
वाक्यम् १: श॒तानी॑केव॒ प्र जि॑गाति धृष्णु॒या हन्ति॑ वृ॒त्राणि॑ दा॒शुषे॑ ।
पदानि : श॒तानी॑काऽइव । प्र । जि॒गा॒ति॒ । धृ॒ष्णु॒ऽया । हन्ति॑ । वृ॒त्राणि॑ । दा॒शुषे॑
वाक्यम् २: गि॒रेरि॑व॒ प्र रसा॑ अस्य पिन्विरे॒ दत्रा॑णि पुरु॒भोज॑सः ॥
पदानि : गि॒रेः॒ऽइ॑व । प्र । रसाः॑ । अ॒स्य॒ । पि॒न्वि॒रे॒ । दत्रा॑णि । पु॒रु॒ऽभोज॑सः

११०. मण्डलम् ८, सूक्तम् ४९, मन्त्रः १० (ऋक्सङ्ख्या : ७०२२)
वाक्यम् १: यथा॒ कण्वे॑ मघवन्त्र॒सद॑स्यवि॒ यथा॑ पु॒क्थे दश॑व्रजे ।
पदानि : यथा॑ । कण्वे॑ । म॒घ॒ऽव॒न् । त्र॒सद॑स्यवि । यथा॑ । पु॒क्थे । दश॑ऽव्रजे
वाक्यम् २: यथा॒ गोश॑र्ये असनो॒र्ऋ॒जिश्व॒नीन्द्र॒ गोम॒द्धिर॑ण्यवत् ॥
पदानि : यथा॑ । गोऽश॑र्ये । अ॒स॒नोः॒ । ऋ॒जिश्व॑नि । इ॒न्द्र॒ । गोऽम॑त् । हिर॑ण्यऽवत्

१११. मण्डलम् ८, सूक्तम् ५०, मन्त्रः १ (ऋक्सङ्ख्या : ७०२३)
वाक्यम् १: प्र सु श्रु॒तं सु॒राध॑स॒मर्चा॑ श॒क्रम॒भिष्ट॑ये ।
पदानि : प्र । सु । श्रु॒तम् । सु॒ऽराध॑सम् । अर्च॑ । श॒क्रम् । अ॒भिष्ट॑ये
वाक्यम् २: यः सु॑न्व॒ते स्तु॑व॒ते काम्यं॑ व॒सु स॒हस्रे॑णेव॒ मंह॑ते ॥
पदानि : यः । सु॒न्व॒ते । स्तु॒व॒ते । काम्य॑म् । व॒सु॑ । स॒हस्रे॑णऽइव । मंह॑ते

११२. मण्डलम् ८, सूक्तम् ५१, मन्त्रः २ (ऋक्सङ्ख्या : ७०३४)
वाक्यम् १: पा॒र्ष॒द्वा॒णः प्रस्क॑ण्व॒ं सम॑सादय॒च्छया॑नं॒ जिव्रि॒मुद्धि॑तम् ।
पदानि : पा॒र्ष॒द्वा॒णः । प्रस्क॑ण्वम् । सम् । अ॒सा॒द॒य॒त् । शया॑नम् । जिव्रि॑म् । उत्ऽहि॑तम्
वाक्यम् २: स॒हस्रा॑ण्यसिषासद्व॒वा॒मृषि॒स्त्वोतो॒ दस्य॑वे॒ वृकः॑ ॥
पदानि : स॒हस्रा॑णि । अ॒सि॒सा॒स॒त् । गवा॑म् । ऋषिः॑ । त्वाऽऊ॑तः । दस्य॑वे । वृकः॑

११३. मण्डलम् ८, सूक्तम् ५३, मन्त्रः ५ (ऋक्सङ्ख्या : ७०५७)
वाक्यम् १: इन्द्र नेदीय एदिहि मितमेधाभिरूतिभिः।
पदानि : इन्द्र। नेदीयः। आ। इत्। इहि। मितऽमेधाभिः। ऊतिऽभिः
वाक्यम् २: आ शंतम शंतमाभिरभिष्टिभिरा स्वापे स्वापिभिः॥
पदानि : आ। शम्ऽतम। शम्ऽतमाभिः। अभिष्टिऽभिः। आ। सुऽआपे। स्वापिऽभिः

११४. मण्डलम् ८, सूक्तम् ६०, मन्त्रः ३ (ऋक्सङ्ख्या : ७०९५)
वाक्यम् १: अग्ने कविर्वेधा असि होता पावक यक्ष्यः।
पदानि : अग्ने। कविः। वेधाः। असि। होता। पावक। यक्ष्यः
वाक्यम् २: मन्द्रो यजिष्ठो अध्वरेष्वीड्यो विप्रेभिः शुक्र मन्मभिः॥
पदानि : मन्द्रः। यजिष्ठः। अध्वरेषु। ईड्यः। विप्रेभिः। शुक्र। मन्मऽभिः

११५. मण्डलम् ८, सूक्तम् ६०, मन्त्रः ११ (ऋक्सङ्ख्या : ७१०३)
वाक्यम् १: आ नो अग्ने वयोवृधं रयिं पावक शंस्यम्।
पदानि : आ। नः। अग्ने। वयःऽवृधम्। रयिम्। पावक। शंस्यम्
वाक्यम् २: रास्वा च न उपमाते पुरुस्पृहं सुनीती स्वयशस्तरम्॥
पदानि : रास्व। च। नः। उपऽमाते। पुरुऽस्पृहम्। सुऽनीती। स्वयशःऽतरम्

११६. मण्डलम् ८, सूक्तम् ६६, मन्त्रः ११ (ऋक्सङ्ख्या : ७१८९)
वयं घा ते अपूर्व्येन्द्र ब्रह्माणि वृत्रहन्।
पदानि : वयम्। घ। ते। अपूर्व्या। इन्द्र। ब्रह्माणि। वृत्रऽहन्
वाक्यम् २: पुरूतमासः पुरुहूत वज्रिवो भूतिं न प्र भरामसि॥
पदानि : पुरुऽतमासः। पुरुऽहूत। वज्रिऽवः। भूतिम्। न। प्र। भरामसि

११७. मण्डलम् ८, सूक्तम् ६९, मन्त्रः १५ (ऋक्सङ्ख्या : ७२४८)
वाक्यम् १: अर्भको न कुमारकोऽधिं तिष्ठन्नवं रथम्।
पदानि : अर्भकः। न। कुमारकः। अधिं। तिष्ठत्। नवम्। रथम्
वाक्यम् २: स पक्षन्महिषं मृगं पित्रे मात्रे विभुक्रतुम्॥
पदानि : सः। पक्षत्। महिषम्। मृगम्। पित्रे। मात्रे। विभुऽक्रतुम्

११८. मण्डलम् ८, सूक्तम् ६९, मन्त्रः १६ (ऋक्सङ्ख्या : ७२४९)
वाक्यम् १: आ तू सुशिप्र दंपते रथं तिष्ठा हिरण्ययम्।
पदानि : आ। तु। सुऽशिप्र। दम्ऽपते। रथम्। तिष्ठ। हिरण्ययम्
वाक्यम् २: अधं द्युक्षं सचेवहि सहस्रपादमरुषं स्वस्तिगामनेहसम्॥
पदानि : अधं। द्युक्षम्। सचेवहि। सहस्रऽपादम्। अरुषम्। स्वस्तिऽगाम्। अनेहसम्

११९. मण्डलम् ८, सूक्तम् ७०, मन्त्रः ४ (ऋक्सङ्ख्या : ७२५५)
वाक्यम् १: अषाळ्हमुग्रं पृतनासु सासहिं यस्मिन्महीरुरुज्रयः।
पदानि : अषाळ्हम्। उग्रम्। पृतनासु। ससहिम्। यस्मिन्। महीः। उरुऽज्रयः
वाक्यम् २: सं धेनवो जायमाने अनोनवुर्द्यावः क्षामो अनोनवुः॥
पदानि : सम्। धेनवः। जायमाने। अनोनवुः। द्यावः। क्षामः। अनोनवुः

१२०. मण्डलम् ८, सूक्तम् ७४, मन्त्रः १५ (ऋक्सङ्ख्या : ७३३२)
वाक्यम् १: सत्यमित्त्वा महेनदि परुष्ण्यवं देदिशम्।
पदानि : सत्यम्। इत्। त्वा। महेऽनदि। परुष्णि। अवं। देदिशम्
वाक्यम् २: नेमापो अश्वदातरः शविष्ठादस्ति मर्त्यः॥
पदानि : न। ईम्। आपः। अश्वऽदातरः। शविष्ठात्। अस्ति। मर्त्यः

१२१. मण्डलम् ८, सूक्तम् ८८, मन्त्रः २ (ऋक्सङ्ख्या : ७४५८)
वाक्यम् १: द्युक्षं सुदानुं तविषीभिरावृतं गिरिं न पुरुभोजसम्।
पदानि : द्युक्षम्। सुऽदानुम्। तविषीभिः। आऽवृतम्। गिरिम्। न। पुरुऽभोजसम्
वाक्यम् २: क्षुमन्तं वाजं शतिनं सहस्रिणं मक्षू गोमन्तमीमहे॥
पदानि : क्षुऽमन्तम्। वाजम्। शतिनम्। सहस्रिणम्। मक्षु। गोऽमन्तम्। ईमहे

१२२. मण्डलम् ८, सूक्तम् ९५, मन्त्रः ३ (ऋक्सङ्ख्या : ७५६४)
वाक्यम् १: पिबा सोमं मदाय कमिन्द्र श्येनाभृतं सुतम्।
पदानि : पिब। सोमम्। मदाय। कम्। इन्द्र। श्येनऽआभृतम्। सुतम्
वाक्यम् २: त्वं हि शश्वतीनां पती राजा विशामसि॥
पदानि : त्वम्। हि। शश्वतीनाम्। पतिः। राजा। विशाम्। असि

१२३. मण्डलम् ८, सूक्तम् ९९, मन्त्रः ५ (ऋक्सङ्ख्या : ७६२३)
वाक्यम् १: त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः।
पदानि : त्वम्। इन्द्र। प्रऽतूर्तिषु। अभि। विश्वाः। असि। स्पृधः
वाक्यम् २: अशस्तिहा जनिता विश्वतूरसि त्वं तूर्य तरुष्यतः॥
पदानि : अशस्तिऽहा। जनिता। विश्वऽतूः। असि। त्वम्। तूर्य। तरुष्यतः

१२४. मण्डलम् ८, सूक्तम् १०१, मन्त्रः ८ (ऋक्सङ्ख्या : ७६४६)
वाक्यम् १: रातिं यद्वामरक्षसं हवामहे युवाभ्यां वाजिनीवसू।
पदानि : रातिम्। यत्। वाम्। अरक्षसम्। हवामहे। युवाभ्याम्। वाजिनीवसू इतिं वाजिनीऽवसू
वाक्यम् २: प्राचीं होत्रां प्रतिरन्तावितं नरा गृणाना जमदग्निना॥
पदानि : प्राचीम्। होत्राम्। प्रऽतिरन्तौ। इतम्। नरा। गृणाना। जमत्ऽअग्निना

१२५. मण्डलम् ८, सूक्तम् १०१, मन्त्रः १३ (ऋक्सङ्ख्या : ७६५१)
वाक्यम् १: इयं या नीच्यर्किणी रूपा रोहिण्या कृता।
पदानि : इयम्। या। नीची। अर्किणी। रूपा। रोहिण्या। कृता
वाक्यम् २: चित्रेव प्रत्यदर्शायत्यन्तर्दशसु बाहुषु॥
पदानि : चित्राऽइव। प्रति। अदर्शि। आऽयती। अन्तः। दशऽसु। बाहुषु

१२६. मण्डलम् ९, सूक्तम् ८५, मन्त्रः ६ (ऋक्सङ्ख्या : ८४२२)
वाक्यम् १: स्वादुः पवस्व दिव्याय जन्मने स्वादुरिन्द्राय सुहवीतुनाम्ने।
पदानि : स्वादुः। पवस्व। दिव्याय। जन्मने। स्वादुः। इन्द्राय। सुहवीतुऽनाम्ने

वाक्यम् २: स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमाँ अदाभ्यः ॥
पदानि : स्वादुः । मित्राय । वरुणाय । वायवे । बृहस्पतये । मधुऽमान् । अदाभ्यः

१२७. मण्डलम् ९, सूक्तम् ९०, मन्त्रः ३ (ऋक्सङ्ख्या : ८५०३)
वाक्यम् १: शूरग्रामः सर्ववीरः सहावाञ्जेता पवस्व सनिता धनानि ।
पदानि : शूरऽग्रामः । सर्वऽवीरः । सहावान् । जेता । पवस्व । सनिता । धनानि
वाक्यम् २: तिग्मायुधः क्षिप्रधन्वा समत्स्वषाळ्हः साह्वान्पृतनासु शत्रून् ॥
पदानि : तिग्मऽआयुधः । क्षिप्रऽधन्वा । समत्ऽसु । अषाळ्हः । सह्वान् । पृतनासु । शत्रून्

१२८. मण्डलम् ९, सूक्तम् ९७, मन्त्रः १४ (ऋक्सङ्ख्या : ८५७१)
वाक्यम् १: रसाय्यः पयसा पिन्वमान ईरयन्नेषि मधुमन्तमंशुम् ।
पदानि : रसाय्यः । पयसा । पिन्वमानः । ईरयन् । एषि । मधुऽमन्तम् । अंशुम्
वाक्यम् २: पवमानः संतनिमेषि कृण्वन्निन्द्राय सोम परिषिच्यमानः ॥
पदानि : पवमानः । सम्ऽतनिम् । एषि । कृण्वन् । इन्द्राय । सोम । परिऽसिच्यमानः

१२९. मण्डलम् ९, सूक्तम् ९७, मन्त्रः २६ (ऋक्सङ्ख्या : ८५८३)
वाक्यम् १: देवाव्यो नः परिषिच्यमानाः क्षयं सुवीरं धन्वन्तु सोमाः ।
पदानि : देवऽअव्यः । नः । परिऽसिच्यमानाः । क्षयम् । सुऽवीरम् । धन्वन्तु । सोमाः
वाक्यम् २: आयज्यवः सुमतिं विश्ववारा होतारो न दिविजो मन्द्रतमाः ॥
पदानि : आऽयज्यवः । सुऽमतिम् । विश्वऽवाराः । होतारः । न । दिविऽजः । मन्द्रऽतमाः

१३०. मण्डलम् ९, सूक्तम् १००, मन्त्रः ३ (ऋक्सङ्ख्या : ८६३८)
वाक्यम् १: त्वं धियं मनोयुजं सृजा वृष्टिं न तन्यतुः ।
पदानि : त्वम् । धियम् । मनःऽयुजम् । सृज । वृष्टिम् । न । तन्यतुः
वाक्यम् २: त्वं वसूनि पार्थिवा दिव्या च सोम पुष्यसि ॥
पदानि : त्वम् । वसूनि । पार्थिवा । दिव्या । च । सोम । पुष्यसि

१३१. मण्डलम् ९, सूक्तम् १०१, मन्त्रः ७ (ऋक्सङ्ख्या : ८६५१)
वाक्यम् १: अयं पूषा रयिर्भगः सोमः पुनानो अर्षति ।
पदानि : अयम् । पूषा । रयिः । भगः । सोमः । पुनानः । अर्षति
वाक्यम् २: पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥
पदानि : पतिः । विश्वस्य । भूमनः । वि । अख्यत् । रोदसी इति । उभे इति

१३२. मण्डलम् ९, सूक्तम् १०१, मन्त्रः ९ (ऋक्सङ्ख्या : ८६५३)
वाक्यम् १: य ओजिष्ठस्तमा भर पवमान श्रवाय्यम् ।
पदानि : यः । ओजिष्ठः । तम् । आ । भर । पवमान । श्रवाय्यम्
वाक्यम् २: यः पञ्च चर्षणीरभि रयिं येन वनामहै ॥
पदानि : यः । पञ्च । चर्षणीः । अभि । रयिम् । येन । वनामहै

१३३. मण्डलम् ९, सूक्तम् १०१, मन्त्रः १५ (ऋक्सङ्ख्या : ८६५९)

वाक्यम् १: स वीरो दक्षसाधनो वि यस्तस्तम्भ रोदसी ।
पदानि : सः । वीरः । दक्षऽसाधनः । वि । यः । तस्तम्भ । रोदसी इति
वाक्यम् २: हरिः पवित्रे अव्यत वेधा न योनिमासदम् ॥
पदानि : हरिः । पवित्रे । अव्यत । वेधाः । न । योनिम् । आऽसदम्

१३४. मण्डलम् ९, सूक्तम् १०१, मन्त्रः १६ (ऋक्सङ्ख्या : ८६६०)
वाक्यम् १: अव्यो वारेभिः पवते सोमो गव्ये अधि त्वचि ।
पदानि : अव्यः । वारेभिः । पवते । सोमः । गव्ये । अधि । त्वचि
वाक्यम् २: कनिक्रदद्वृषा हरिरिन्द्रस्याभ्येति निष्कृतम् ॥
पदानि : कनिक्रदत् । वृषा । हरिः । इन्द्रस्य । अभि । एति । निःऽकृतम्

१३५. मण्डलम् ९, सूक्तम् १०७, मन्त्रः ८ (ऋक्सङ्ख्या : ८७०८)
वाक्यम् १: सोम उ षुवाणः सोतृभिरधि ष्णुभिरवीनाम् ।
पदानि : सोमः । ऊँ इति । सुवानः । सोतृऽभिः । अधि । स्नुऽभिः । अवीनाम्
वाक्यम् २: अश्वयेव हरिता याति धारया मन्द्रया याति धारया ॥
पदानि : अश्वयाऽइव । हरिता । याति । धारया । मन्द्रया । याति । धारया

१३६. मण्डलम् ९, सूक्तम् १०७, मन्त्रः ९ (ऋक्सङ्ख्या : ८७०९)
वाक्यम् १: अनूपे गोमान्गोभिरक्षाः सोमो दुग्धाभिरक्षाः ।
पदानि : अनूपे । गोऽमान् । गोभिः । अक्षारिति । सोमः । दुग्धाभिः । अक्षारिति
वाक्यम् २: समुद्रं न संवरणान्यग्मन्मन्दी मदाय तोशते ॥
पदानि : समुद्रम् । न । सम्ऽवरणानि । अग्मन् । मन्दी । मदाय । तोशते

१३७. मण्डलम् ९, सूक्तम् १०८, मन्त्रः ४ (ऋक्सङ्ख्या : ८७३०)
वाक्यम् १: येना नवग्वो दध्यङ्ङपोर्णुते येन विप्रास आपिरे ।
पदानि : येन । नवऽग्वः । दध्यङ् । अपऽऊर्णुते । येन । विप्रासः । आपिरे
वाक्यम् २: देवानां सुम्ने अमृतस्य चारुणो येन श्रवांस्यानशुः ॥
पदानि : देवानाम् । सुम्ने । अमृतस्य । चारुणः । येन । श्रवांसि । आनशुः

१३८. मण्डलम् ९, सूक्तम् १०८, मन्त्रः १६ (ऋक्सङ्ख्या : ८७४२)
वाक्यम् १: इन्द्रस्य हार्दि सोमधानमा विश समुद्रमिव सिन्धवः ।
पदानि : इन्द्रस्य । हार्दि । सोमऽधानम् । आ । विश । समुद्रम्ऽइव । सिन्धवः
वाक्यम् २: जुष्टो मित्राय वरुणाय वायवे दिवो विष्टम्भ उत्तमः ॥
पदानि : जुष्टः । मित्राय । वरुणाय । वायवे । दिवः । विष्टम्भः । उत्ऽतमः

१३९. मण्डलम् १०, सूक्तम् १४, मन्त्रः १ (ऋक्सङ्ख्या : ८९०३)
वाक्यम् १: परेयिवांसं प्रवतो महीरनु बहुभ्यः पन्थामनुपस्पशानम् ।
पदानि : परेयिऽवांसम् । प्रऽवतः । महीः । अनु । बहुऽभ्यः । पन्थाम् । अनुऽपस्पशानम्
वाक्यम् २: वैवस्वतं संगमनं जनानां यमं राजानं हविषा दुवस्य ॥
पदानि : वैवस्वतम् । सम्ऽगमनम् । जनानाम् । यमम् । राजानम् । हविषा । दुवस्य

१४०. मण्डलम् १०, सूक्तम् १४, मन्त्रः १६ (ऋक्सङ्ख्या : ८९१८)
वाक्यम् १: त्रिकंद्रुकेभिः पतति षळुर्वीरेकमिद्बृहत्।
पदानि : त्रिऽकंद्रुकेभिः। पतति। षट्। उर्वीः। एकम्। इत्। बृहत्
वाक्यम् २: त्रिष्टुब्गायत्री छन्दांसि सर्वा ता यम आहिता॥
पदानि : त्रिऽस्तुप्। गायत्री। छन्दांसि। सर्वा। ता। यमे। आऽहिता

१४१. मण्डलम् १०, सूक्तम् १६, मन्त्रः १२ (ऋक्सङ्ख्या : ८९४४)
वाक्यम् १: उशन्तस्त्वा नि धीमह्युशन्तः समिधीमहि।
पदानि : उशन्तः। त्वा। नि। धीमहि। उशन्तः। सम्। इधीमहि
वाक्यम् २: उशन्नुशत आ वह पितॄन्हविषे अत्तवे॥
पदानि : उशन्। उशतः। आ। वह। पितॄन्। हविषे। अत्तवे

१४२. मण्डलम् १०, सूक्तम् २०, मन्त्रः २ (ऋक्सङ्ख्या : ८९८४)
वाक्यम् १: अग्निमीळे भुजां यविष्ठं शासा मित्रं दुर्धरीतुम्।
पदानि : अग्निम्। ईळे। भुजाम्। यविष्ठम्। शासा। मित्रम्। दुःऽधरीतुम्
वाक्यम् २: यस्य धर्मन्त्स्वरेनीः सपर्यन्ति मातुरूधः॥
पदानि : यस्य। धर्मन्। स्वः। एनीः। सपर्यन्ति। मातुः। ऊधः

१४३. मण्डलम् १०, सूक्तम् २६, मन्त्रः ३ (ऋक्सङ्ख्या : ९०४२)
वाक्यम् १: स वेद सुष्टुतीनामिन्दुर्न पूषा वृषा।
पदानि : सः। वेद। सुऽस्तुतीनाम्। इन्दुः। न। पूषा। वृषा
वाक्यम् २: अभि प्सुरः प्रुषायति व्रजं न आ प्रुषायति॥
पदानि : अभि। प्सुरः। प्रुषायति। व्रजम्। नः। आ। प्रुषायति

१४४. मण्डलम् १०, सूक्तम् ३४, मन्त्रः १ (ऋक्सङ्ख्या : ९१३७)
वाक्यम् १: प्रावेपा मा बृहतो मादयन्ति प्रवातेजा इरिणे ववृतानाः।
पदानि : प्रावेपाः। मा। बृहतः। मादयन्ति। प्रवातेऽजाः। इरिणे। ववृतानाः
वाक्यम् २: सोमस्येव मौजवतस्य भक्षो विभीदको जागृविर्मह्यमच्छान्॥
पदानि : सोमस्यऽइव। मौजऽवतस्य। भक्षः। विऽभीदकः। जागृविः। मह्यम्। अच्छान्

१४५. मण्डलम् १०, सूक्तम् ३४, मन्त्रः ७ (ऋक्सङ्ख्या : ९१४३)
वाक्यम् १: अक्षास इदङ्कुशिनो नितोदिनो निकृत्वानस्तपनास्तापयिष्णवः।
पदानि : अक्षासः। इत्। अङ्कुशिनः। निऽतोदिनः। निऽकृत्वानः। तपनाः। तापयिष्णवः
वाक्यम् २: कुमारदेष्णा जयतः पुनर्हणो मध्वा संपृक्ताः कितवस्य बर्हणा॥
पदानि : कुमारऽदेष्णाः। जयतः। पुनःऽहनः। मध्वा। सम्ऽपृक्ताः। कितवस्य। बर्हणा

१४६. मण्डलम् १०, सूक्तम् ४६, मन्त्रः ७ (ऋक्सङ्ख्या : ९२७८)
वाक्यम् १: अस्याजरासो दमामरित्रा अर्चद्धूमासो अग्नयः पावकाः।
पदानि : अस्य। अजरासः। दमाम्। अरित्राः। अर्चत्ऽधूमासः। अग्नयः। पावकाः
वाक्यम् २: श्वितीचयः श्वात्रासो भुरण्यवो वनर्षदो वायवो न सोमाः॥

पदानि : श्वि॒ती॒चयः॑ । श्वा॒त्रासः॑ । भु॒र॒ण्यवः॑ । व॒न॒ऽसदः॑ । वा॒यवः॑ । न । सोमाः॑

१४७. मण्डलम् १०, सूक्तम् ५८, मन्त्रः १ (ऋक्सङ्ख्या : ९३७२)
वाक्यम् १: यत्ते॒ य॒मं वै॑वस्व॒तं मनो॑ जगाम॑ दूर॒कम् ।
पदानि : यत् । ते॒ । य॒मम् । वै॒व॒स्व॒तम् । मनः॑ । ज॒गाम॑ । दू॒र॒कम्
वाक्यम् २: तत्त॒ आ व॑र्तयामसीह क्षया॑य जी॒वसे॑ ॥
पदानि : तत् । ते॒ । आ । व॒र्त॒या॒म॒सि॒ । इ॒ह । क्षया॑य । जी॒वसे॑

१४८. मण्डलम् १०, सूक्तम् ६०, मन्त्रः ११ (ऋक्सङ्ख्या : ९४०४)
वाक्यम् १: न्य१॑ग्वातोऽव॑ वाति॒ न्य॑क्तपति॒ सूर्यः॑ ।
पदानि : न्य॑क् । वातः॑ । अव॑ । वा॒ति॒ । न्य॑क् । त॒प॒ति॒ । सूर्यः॑
वाक्यम् २: नी॒चीन॑मघ्या दु॒हे॒ न्य॑ग्भवतु ते॒ रपः॑ ॥
पदानि : नी॒चीन॑म् । अ॒घ्या । दु॒हे॒ । न्य॑क् । भ॒व॒तु॒ । ते॒ । रपः॑

१४९. मण्डलम् १०, सूक्तम् ६२, मन्त्रः ६ (ऋक्सङ्ख्या : ९४३८)
वाक्यम् १: ये अ॒ग्नेः परि॑ जज्ञि॒रे विरू॑पासो दि॒वस्परि॑ ।
पदानि : ये । अ॒ग्नेः । परि॑ । ज॒ज्ञि॒रे । विऽरू॑पासः । दि॒वः । परि॑
वाक्यम् २: नव॑ग्वो नु दश॑ग्वो अङ्गि॒रस्तम॒: सचा॑ दे॒वेषु॑ मंहते ॥
पदानि : नव॑ऽग्वः । नु । दश॑ऽग्वः । अङ्गि॒रः॒ऽतमः । सचा॑ । दे॒वेषु॑ । मं॒ह॒ते॒

१५०. मण्डलम् १०, सूक्तम् ६३, मन्त्रः ४ (ऋक्सङ्ख्या : ९४४७)
वाक्यम् १: नृ॒चक्ष॑सो॒ अनि॑मिषन्तो अ॒र्हणा॑ बृ॒हद्दे॒वासो॑ अमृत॒त्वमा॑नशुः ।
पदानि : नृ॒ऽचक्ष॑सः । अनि॑ऽमिषन्तः । अ॒र्हणा॑ । बृ॒हत् । दे॒वासः॑ । अ॒मृ॒त॒ऽत्वम् । आ॒न॒शुः॒
वाक्यम् २: ज्योती॑र॒था अहि॑माया॒ अना॑गसो दि॒वो व॒र्ष्माण॑ं वसते स्व॒स्तये ॥
पदानि : ज्योतिः॑ऽर॒थाः । अहि॑ऽमायाः । अना॑गसः । दि॒वः । व॒र्ष्माण॑म् । व॒स॒ते॒ । स्व॒स्तये॑

१५१. मण्डलम् १०, सूक्तम् ६५, मन्त्रः ४ (ऋक्सङ्ख्या : ९४८१)
वाक्यम् १: स्व॑र्णरम॒न्तरि॑क्षाणि रोच॒ना द्यावा॒भूमी॑ पृथि॒वीं स्क॑म्भुरोज॒सा ।
पदानि : स्वः॑ऽनरम् । अ॒न्तरि॑क्षाणि । रो॒च॒ना । द्यावा॒भूमी॒ इति॑ । पृ॒थि॒वीम् । स्क॒म्भुः॒ । ओज॑सा
वाक्यम् २: पृ॒क्षा इ॑व म॒हय॑न्तः सु॒रा॒तयो॑ दे॒वाः स्त॑वन्ते॒ मनु॑षाय सू॒रयः॑ ॥
पदानि : पृ॒क्षाः॒ऽइ॑व । म॒हय॑न्तः । सु॒ऽरा॒तयः॑ । दे॒वाः । स्त॒व॒न्ते॒ । मनु॑षाय । सू॒रयः॑

१५२. मण्डलम् १०, सूक्तम् ६५, मन्त्रः ८ (ऋक्सङ्ख्या : ९४८५)
वाक्यम् १: प॒रि॒क्षिता॑ पि॒तरा॑ पू॒र्वजा॑वरी ऋ॒तस्य॒ योना॑ क्षयतः॒ समो॑कसा ।
पदानि : प॒रि॒ऽक्षिता॑ । पि॒तरा॑ । पू॒र्वजा॑वरी॒ इति॑ पू॒र्व॒ऽजा॑वरी । ऋ॒तस्य॑ । योना॑ । क्ष॒य॒तः॒ । सम्ऽओ॑कसा
वाक्यम् २: द्यावा॑पृथि॒वी वरु॑णाय॒ सव्र॑ते घृ॒तव॒त्पयो॑ महि॒षाय॑ पिन्वतः ॥
पदानि : द्यावा॑पृथि॒वी इति॑ । वरु॑णाय । सऽव्र॑ते । इति॒ सऽव्र॑ते । घृ॒तऽव॑त् । पयः॑ । म॒हि॒षाय॑ । पि॒न्व॒तः॒

१५३. मण्डलम् १०, सूक्तम् ६६, मन्त्रः १ (ऋक्सङ्ख्या : ९४९३)
वाक्यम् १: दे॒वान्हु॑वे बृ॒हच्छ्र॑वसः स्व॒स्तये॒ ज्योति॒ष्कृतो॑ अध्व॒रस्य॒ प्रचे॑तसः ।

पदानि : देवान्। हुवे। बृहत्ऽश्रवसः। स्वस्तये। ज्योतिःऽकृतः। अध्वरस्य। प्रऽचेतसः
वाक्यम् २: ये वावृधुः प्रतरं विश्ववेदस इन्द्रज्येष्ठासो अमृता ऋतावृधः॥
पदानि : ये। ववृधुः। प्रऽतरम्। विश्वऽवेदसः। इन्द्रऽज्येष्ठासः। अमृताः। ऋतऽवृधः

१५४. मण्डलम् १०, सूक्तम् ६७, मन्त्रः ९ (ऋक्सङ्ख्या : ९५१६)
वाक्यम् १: तं वर्धयन्तो मतिभिः शिवाभिः सिंहमिव नानदतं सधस्थे।
पदानि : तम्। वर्धयन्तः। मतिऽभिः। शिवाभिः। सिंहम्ऽइव। नानदतम्। सधऽस्थे
वाक्यम् २: बृहस्पतिं वृषणं शूरसातौ भरेभरे अनु मदेम जिष्णुम्॥
पदानि : बृहस्पतिम्। वृषणम्। शूरऽसातौ। भरेऽभरे। अनु। मदेम। जिष्णुम्

१५५. मण्डलम् १०, सूक्तम् ६९, मन्त्रः ७ (ऋक्सङ्ख्या : ९५३८)
वाक्यम् १: दीर्घतन्तुर्बृहदुक्षायमग्निः सहस्रस्तरीः शतनीथ ऋभ्वा।
पदानि : दीर्घऽतन्तुः। बृहत्ऽउक्षा। अयम्। अग्निः। सहस्रऽस्तरीः। शतऽनीथः। ऋभ्वा
वाक्यम् २: द्युमान्द्युमत्सु नृभिर्मृज्यमानः सुमित्रेषु दीदयो देवयत्सु॥
पदानि : द्युऽमान्। द्युमत्ऽसु। नृऽभिः। मृज्यमानः। सुऽमित्रेषु। दीदयः। देवयत्ऽसु

१५६. मण्डलम् १०, सूक्तम् ६९, मन्त्रः ८ (ऋक्सङ्ख्या : ९५३९)
वाक्यम् १: त्वे धेनुः सुदुघा जातवेदोऽसश्चतेव समना संबर्धुक्।
पदानि : त्वे इति। धेनुः। सुऽदुघा। जातऽवेदः। असश्चताऽइव। समना। सबःऽधुक्
वाक्यम् २: त्वं नृभिर्दक्षिणावद्भिरग्ने सुमित्रेभिरिध्यसे देवयद्भिः॥
पदानि : त्वम्। नृऽभिः। दक्षिणावत्ऽभिः। अग्ने। सुऽमित्रेभिः। इध्यसे। देवयत्ऽभिः

१५७. मण्डलम् १०, सूक्तम् ८३, मन्त्रः ४ (ऋक्सङ्ख्या : ९६५६)
वाक्यम् १: त्वं हि मन्यो अभिभूत्योजाः स्वयंभूर्भामो अभिमातिषाहः।
पदानि : त्वम्। हि। मन्यो इति। अभिभूतिऽओजाः। स्वयम्ऽभूः। भामः। अभिमातिऽसहः
वाक्यम् २: विश्वचर्षणिः सहुरिः सहावान्स्मास्वोजः पृतनासु धेहि॥
पदानि : विश्वऽचर्षणिः। सहुरिः। सहावान्। अस्मासु। ओजः। पृतनासु। धेहि

१५८. मण्डलम् १०, सूक्तम् ८५, मन्त्रः ९ (ऋक्सङ्ख्या : ९६७५)
वाक्यम् १: सोमो वधूयुरभवदश्विनास्तामुभा वरा।
पदानि : सोमः। वधूऽयुः। अभवत्। अश्विना। आस्ताम्। उभा। वरा
वाक्यम् २: सूर्यां यत्पत्ये शंसन्तीं मनसा सवितादंदात्॥
पदानि : सूर्याम्। यत्। पत्ये। शंसन्तीम्। मनसा। सविता। अदंदात्

१५९. मण्डलम् १०, सूक्तम् ८५, मन्त्रः १२ (ऋक्सङ्ख्या : ९६७८)
वाक्यम् १: शुचीं ते चक्रे यात्या व्यानो अक्ष आहतः।
पदानि : शुची इति। ते। चक्रे इति। यात्याः। विऽआनः। अक्षः। आऽहतः
वाक्यम् २: अनो मनस्मयं सूर्यारोहत्प्रयती पतिम्॥
पदानि : अनः। मनस्मयम्। सूर्या। आ। अरोहत्। प्रऽयती। पतिम्

१६०. मण्डलम् १०, सूक्तम् ८५, मन्त्रः ३८ (ऋक्सङ्ख्या : ९७०४)
वाक्यम् १: तुभ्यमग्रे पर्यवहन्त्सूर्यां वहतुना सह।
पदानि : तुभ्यम्। अग्रे। परि। अवहन्। सूर्याम्। वहतुना। सह
वाक्यम् २: पुनः पतिभ्यो जायां दा अग्ने प्रजया सह॥
पदानि : पुनरिति। पतिऽभ्यः। जायाम्। दाः। अग्ने। प्रऽजया। सह

१६१. मण्डलम् १०, सूक्तम् ८५, मन्त्रः ३९ (ऋक्सङ्ख्या : ९७०५)
वाक्यम् १: पुनः पत्नीमग्निरदादायुषा सह वर्चसा।
पदानि : पुनरिति। पत्नीम्। अग्निः। अदात्। आयुषा। सह। वर्चसा
वाक्यम् २: दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम्॥
पदानि : दीर्घऽआयुः। अस्याः। यः। पतिः। जीवाति। शरदः। शतम्

१६२. मण्डलम् १०, सूक्तम् ९०, मन्त्रः १० (ऋक्सङ्ख्या : ९८०८)
वाक्यम् १: तस्मादश्वा अजायन्त ये के चोभयादतः।
पदानि : तस्मात्। अश्वाः। अजायन्त। ये। के। च। उभयादतः
वाक्यम् २: गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः॥
पदानि : गावः। ह। जज्ञिरे। तस्मात्। तस्मात्। जाताः। अजावयः

१६३. मण्डलम् १०, सूक्तम् ९०, मन्त्रः १४ (ऋक्सङ्ख्या : ९८१२)
वाक्यम् १: नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।
पदानि : नाभ्याः। आसीत्। अन्तरिक्षम्। शीर्ष्णः। द्यौः। सम्। अवर्तत
वाक्यम् २: पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन्॥
पदानि : पत्ऽभ्याम्। भूमिः। दिशः। श्रोत्रात्। तथा। लोकान्। अकल्पयन्

१६४. मण्डलम् १०, सूक्तम् ९७, मन्त्रः ५ (ऋक्सङ्ख्या : ९९०९)
वाक्यम् १: अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता।
पदानि : अश्वत्थे। वः। निऽसदनम्। पर्णे। वः। वसतिः। कृता
वाक्यम् २: गोभाज इत्किलासथ यत्सनवथ पूरुषम्॥
पदानि : गोऽभाजः। इत्। किल। असथ। यत्। सनवथ। पुरुषम्

१६५. मण्डलम् १०, सूक्तम् ९७, मन्त्रः २३ (ऋक्सङ्ख्या : ९९२७)
वाक्यम् १: त्वमुत्तमास्योषधे तव वृक्षा उपस्तयः।
पदानि : त्वम्। उत्ऽतमा। असि। ओषधे। तव। वृक्षाः। उपस्तयः
वाक्यम् २: उपस्तिरस्तु सोऽस्माकं यो अस्माँ अभिदासति॥
पदानि : उपस्तिः। अस्तु। सः। अस्माकम्। यः। अस्मान्। अभिऽदासति

१६६. मण्डलम् १०, सूक्तम् १०२, मन्त्रः १ (ऋक्सङ्ख्या : ९९७६)
वाक्यम् १: प्र ते रथं मिथूकृतमिन्द्रोऽवतु धृष्णुया।
पदानि : प्र। ते। रथम्। मिथुऽकृतम्। इन्द्रः। अवतु। धृष्णुऽया
वाक्यम् २: अस्मिन्नाजौ पुरुहूत श्रवाय्ये धनभक्षेषु नोऽव॥
पदानि : अस्मिन्। आजौ। पुरुऽहूत। श्रवाय्ये। धनऽभक्षेषु। नः। अव

१६७. मण्डलम् १०, सूक्तम् १०६, मन्त्रः १० (ऋक्सङ्ख्या : १००३२)
वाक्यम् १: आरङ्गरेव मध्वेरयेथे सारघेव गविं नीचीनबारे।
पदानि : आरङ्गराऽइव। मधु। आ। ईरयेथे इतिं। सारघाऽइव। गविं। नीचीनऽबारे
वाक्यम् २: कीनारेव स्वेदमासिष्विदाना क्षामेवोर्जा सूयवसात्सचेथे॥
पदानि : कीनाराऽइव। स्वेदम्। आऽसिस्विदाना। क्षामऽइव। ऊर्जा। सुयवसऽअत्। सचेथे इतिं

१६८. मण्डलम् १०, सूक्तम् ११२, मन्त्रः ३ (ऋक्सङ्ख्या : १००८६)
वाक्यम् १: हरिंत्वता वर्चसा सूर्यस्य श्रेष्ठै रूपैस्तन्वं स्पर्शयस्व।
पदानि : हरिंत्वता। वर्चसा। सूर्यस्य। श्रेष्ठैः। रूपैः। तन्वंम्। स्पर्शयस्व
वाक्यम् २: अस्माभिंरिन्द्र सखिंभिर्हुवानः संध्रीचीनो मांदयस्वा निषद्य॥
पदानि : अस्माभिः। इन्द्र। सखिंऽभिः। हुवानः। सध्रीचीनः। मादयस्व। निऽसद्य

१६९. मण्डलम् १०, सूक्तम् १३६, मन्त्रः ७ (ऋक्सङ्ख्या : १०२९५)
वाक्यम् १: वायुरस्मा उपांमन्थत्पिनष्टिं स्मा कुनन्नमा।
पदानि : वायुः। अस्मै। उपं। अमन्थत्। पिनष्टिं। स्म। कुनन्नमा
वाक्यम् २: केशी विषस्य पात्रेणं यद्रुद्रेणापिंबत्सह॥
पदानि : केशी। विषस्यं। पात्रेण। यत्। रुद्रेणं। अपिंबत्। सह

१७०. मण्डलम् १०, सूक्तम् १३७, मन्त्रः १ (ऋक्सङ्ख्या : १०२९६)
वाक्यम् १: उत देवा अवंहितं देवा उन्नयथा पुनः।
पदानि : उत। देवाः। अवंऽहितम्। देवाः। उत्। नयथ। पुनरितिं
वाक्यम् २: उतागंश्चक्रुषं देवा देवां जीवयंथा पुनः॥
पदानि : उत। आगः। चक्रुषंम्। देवाः। देवाः। जीवयंथ। पुनरितिं

१७१. मण्डलम् १०, सूक्तम् १३७, मन्त्रः ६ (ऋक्सङ्ख्या : १०३०१)
वाक्यम् १: आप इद्वा उं भेषजीरापों अमीवचातंनीः।
पदानि : आपः। इत्। वै। ऊँ इतिं। भेषजीः। आपः। अमीवऽचातंनीः
वाक्यम् २: आपः सर्वस्य भेषजीस्तास्ते कृण्वन्तु भेषजम्॥
पदानि : आपः। सर्वस्य। भेषजीः। ताः। ते। कृण्वन्तु। भेषजम्

१७२. मण्डलम् १०, सूक्तम् १४०, मन्त्रः ३ (ऋक्सङ्ख्या : १०३१७)
वाक्यम् १: ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व धीतिभिर्हितः।
पदानि : ऊर्जः। नपात्। जातऽवेदः। सुशस्तिऽभिः। मन्दस्व। धीतिऽभिः। हितः
वाक्यम् २: त्वे इषः सं दधुर्भूरिंवर्पसश्चित्रोतयो वामजाताः॥
पदानि : त्वे इतिं। इषः। सम्। दधुः। भूरिंऽवर्पसः। चित्रऽऊतयः। वामऽजाताः

१७३. मण्डलम् १०, सूक्तम् १५२, मन्त्रः ५ (ऋक्सङ्ख्या : १०३८८)
वाक्यम् १: अपेन्द्र द्विषतो मनोऽप जिज्यासतो वधम्।
पदानि : अपं। इन्द्र। द्विषतः। मनः। अपं। जिज्यासतः। वधम्

वाक्यम् २: वि म॒न्योः शर्म॑ यच्छ॒ वरी॑यो यवया व॒धम् ॥
पदानि : वि । म॒न्योः । शर्म॑ । य॒च्छ॒ । वरी॑यः । य॒व॒य॒ । व॒धम्

१७४. मण्डलम् १०, सूक्तम् १५५, मन्त्रः ३ (ऋक्सङ्ख्या : १०४०१)
वाक्यम् १: अ॒दो यद्दारु॒ प्लव॑ते॒ सिन्धोः॑ पा॒रे अ॑पू॒रुष॑म् ।
पदानि : अ॒दः॑ । यत् । दारु॑ । प्लव॑ते । सिन्धोः॑ । पा॒रे । अ॒पु॒रु॒षम्
वाक्यम् २: तदा र॑भस्व दुर्हणो॒ तेन॑ गच्छ परस्त॒रम् ॥
पदानि : तत् । आ । र॒भ॒स्व॒ । दु॒र्ह॒नो॒ इति॑ दुः॒ऽह॒नो॒ । तेन॑ । ग॒च्छ॒ । प॒रः॒ऽत॒रम्

१७५. मण्डलम् १०, सूक्तम् १५५, मन्त्रः ५ (ऋक्सङ्ख्या : १०४०३)
वाक्यम् १: परी॒मे गाम॑नेषत॒ पर्य॒ग्निम॑हृषत ।
पदानि : परि॑ । इ॒मे । गाम् । अ॒ने॒ष॒त॒ । परि॑ । अ॒ग्निम् । अ॒हृ॒ष॒त॒
वाक्यम् २: दे॒वेष्व॑क्रत॒ श्रवः॒ क इ॒माँ आ द॑धर्षति ॥
पदानि : दे॒वेषु॑ । अ॒क्र॒त॒ । श्रवः॑ । कः । इ॒मान् । आ । द॒ध॒र्ष॒ति

१७६. मण्डलम् १०, सूक्तम् १५९, मन्त्रः २ (ऋक्सङ्ख्या : १०४२०)
वाक्यम् १: अ॒हं के॒तुर॒हं मू॒र्धाहमु॒ग्रा वि॒वाच॑नी ।
पदानि : अ॒हम् । के॒तुः । अ॒हम् । मू॒र्धा । अ॒हम् । उ॒ग्रा । वि॒ऽवाच॑नी
वाक्यम् २: ममेदनु क्रतुं॑ पतिः॑ से॒हाना॑या॒ उपा॑चरेत् ॥
पदानि : मम॑ । इत् । अनु॑ । क्रतु॑म् । पतिः॑ । से॒हा॒नायाः॑ । उ॒प॒ऽआ॑चरेत्

१७७. मण्डलम् १०, सूक्तम् १५९, मन्त्रः ४ (ऋक्सङ्ख्या : १०४२२)
वाक्यम् १: येने॒न्द्रो ह॒विषा॑ कृ॒त्व्यभ॑वद्द्यु॒म्न्यु॑त्त॒मः ।
पदानि : येन॑ । इन्द्रः॑ । ह॒विषा॑ । कृ॒त्वी । अभ॑वत् । द्यु॒म्नी । उ॒त्ऽत॒मः
वाक्यम् २: इ॒दं तद॑क्रि देवा असप॒त्ना किला॑भुवम् ॥
पदानि : इ॒दम् । तत् । अ॒क्रि॒ । दे॒वाः॒ । अ॒स॒प॒त्ना । किल॑ । अ॒भु॒व॒म्

१७८. मण्डलम् १०, सूक्तम् १६२, मन्त्रः २ (ऋक्सङ्ख्या : १०४३६)
वाक्यम् १: यस्ते॒ गर्भ॑ममी॑वा दु॒र्णामा॒ योनि॑मा॒शये॑ ।
पदानि : यः । ते॒ । गर्भ॑म् । अमी॑वा । दुः॒ऽनामा॑ । योनि॑म् । आ॒ऽशये॑
वाक्यम् २: अ॒ग्निष्टं ब्रह्म॑णा स॒ह निष्क्र॒व्याद॑मनीनशत् ॥
पदानि : अ॒ग्निः । तम् । ब्रह्म॑णा । स॒ह । निः । क्र॒व्य॒ऽअद॑म् । अ॒नी॒न॒श॒त्

१७९. मण्डलम् १०, सूक्तम् १६२, मन्त्रः ३ (ऋक्सङ्ख्या : १०४३७)
वाक्यम् १: यस्ते॒ हन्ति॑ प॒तय॑न्तं नि॒षत्स्नु॑ यः स॑री॒सृप॑म् ।
पदानि : यः । ते॒ । हन्ति॑ । प॒तय॑न्तम् । नि॒ऽस॒त्स्नु॑म् । यः । स॒री॒सृप॑म्
वाक्यम् २: जा॒तं यस्ते॒ जिघाँ॑सति॒ तमि॒तो ना॑शयामसि ॥
पदानि : जा॒तम् । यः । ते॒ । जिघाँ॑सति । तम् । इ॒तः । ना॒श॒या॒म॒सि॒

१८०. मण्डलम् १०, सूक्तम् १६२, मन्त्रः ४ (ऋक्सङ्ख्या : १०४३८)

वाक्यम् १: यस्तं ऊरू विहरत्यन्तरा दंपती शये।
पदानि : यः। ते। ऊरू इति। विऽहरति। अन्तरा। दंपती इति दम्ऽपती। शये
वाक्यम् २: योनिं यो अन्तरारेळ्हि तमितो नाशयामसि॥
पदानि : योनिम्। यः। अन्तः। आऽरेळ्हि। तम्। इतः। नाशयामसि

१८१. मण्डलम् १०, सूक्तम् १७४, मन्त्रः ३ (ऋक्सङ्ख्या : १०४९४)
वाक्यम् १: अभि त्वा देवः सविताभि सोमो अवीवृतत्।
पदानि : अभि। त्वा। देवः। सविता। अभि। सोमः। अवीवृतत्
वाक्यम् २: अभि त्वा विश्वा भूतान्यभीवर्तो यथाससि॥
पदानि : अभि। त्वा। विश्वा। भूतानि। अभिऽवर्तः। यथा। अससि

अष्टपदवाक्यकाः मन्त्राः
(३३५ मन्त्राः)

१. मण्डलम् १, सूक्तम् १०, मन्त्रः ६ (ऋक्सङ्ख्या : ९६)
वाक्यम् १: तमित्सखित्व ईमहे तं राये तं सुवीर्ये।
पदानि : तम्। इत्। सखिऽत्वे। ईमहे। तम्। राये। तम्। सुऽवीर्ये
वाक्यम् २: स शक्र उत नः शकदिन्द्रो वसु दयमानः॥
पदानि : सः। शक्रः। उत। नः। शकत्। इन्द्रः। वसु। दयमानः

२. मण्डलम् १, सूक्तम् १०, मन्त्रः ९ (ऋक्सङ्ख्या : ९९)
वाक्यम् १: आश्रुत्कर्ण श्रुधी हवं नू चिद्दधिष्व मे गिरः।
पदानि : आश्रुत्ऽकर्ण। श्रुधि। हवम्। नु। चित्। दधिष्व। मे। गिरः
वाक्यम् २: इन्द्र स्तोमंमिमं ममं कृष्वा युजश्चिदन्तरम्॥
पदानि : इन्द्र। स्तोमम्। इमम्। ममं। कृष्व। युजः। चित्। अन्तरम्

३. मण्डलम् १, सूक्तम् १०, मन्त्रः ११ (ऋक्सङ्ख्या : १०१)
वाक्यम् १: आ तू न इन्द्र कौशिक मन्दसानः सुतं पिब।
पदानि : आ। तु। नः। इन्द्र। कौशिक। मन्दसानः। सुतम्। पिब
वाक्यम् २: नव्यमायुः प्र सू तिर कृधी सहस्रसामृषिम्॥
पदानि : नव्यम्। आयुः। प्र। सु। तिर। कृधि। सहस्रऽसाम्। ऋषिम्

४. मण्डलम् १, सूक्तम् ३५, मन्त्रः १ (ऋक्सङ्ख्या : ४११)
वाक्यम् १: ह्वयाम्यग्निं प्रथमं स्वस्तये ह्वयामि मित्रावरुणाविहावसे।
पदानि : ह्वयामि। अग्निम्। प्रथमम्। स्वस्तये। ह्वयामि। मित्रावरुणौ। इह। अवसे
वाक्यम् २: ह्वयामि रात्रीं जगतो निवेशनीं ह्वयामि देवं सवितारमूतये॥
पदानि : ह्वयामि। रात्रीम्। जगतः। निऽवेशनीम्। ह्वयामि। देवम्। सवितारम्। ऊतये

५. मण्डलम् १, सूक्तम् ३५, मन्त्रः २ (ऋक्सङ्ख्या : ४१२)
वाक्यम् १: आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च।

पदानि : आ। कृष्णेन। रजसा। वर्तमानः। निऽवेशयन्। अमृतम्। मर्त्यम्। च
वाक्यम् २: हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥
पदानि : हिरण्ययेन। सविता। रथेन। आ। देवः। याति। भुवनानि। पश्यन्

६. मण्डलम् १, सूक्तम् ३५, मन्त्रः ५ (ऋक्सङ्ख्या : ४१५)
वाक्यम् १: वि जनाञ्छ्यावाः शितिपादो अख्यन्रथं हिरण्यप्रउगं वहन्तः।
पदानि : वि। जनान्। श्यावाः। शितिऽपादः। अख्यन्। रथम्। हिरण्यऽप्रउगम्। वहन्तः
वाक्यम् २: शश्वद्विशः सवितुर्दैव्यस्योपस्थे विश्वा भुवनानि तस्थुः॥
पदानि : शश्वत्। विशः। सवितुः। दैव्यस्य। उपऽस्थे। विश्वा। भुवनानि। तस्थुः

७. मण्डलम् १, सूक्तम् ३६, मन्त्रः ७ (ऋक्सङ्ख्या : ४२८)
वाक्यम् १: तं घेमित्था नमस्विन उप स्वराजमासते।
पदानि : तम्। घ। ईम्। इत्था। नमस्विनः। उप। स्वऽराजम्। आसते
वाक्यम् २: होत्राभिरग्निं मनुषः समिन्धते तितिर्वांसो अति स्रिधः॥
पदानि : होत्राभिः। अग्निम्। मनुषः। सम्। इन्धते। तितिर्वांसः। अति। स्रिधः

८. मण्डलम् १, सूक्तम् ३६, मन्त्रः ८ (ऋक्सङ्ख्या : ४२९)
वाक्यम् १: घ्नन्तो वृत्रमतरन्रोदसी अप उरु क्षयाय चक्रिरे।
पदानि : घ्नन्तः। वृत्रम्। अतरन्। रोदसी इति। अपः। उरु। क्षयाय। चक्रिरे
वाक्यम् २: भुवत्कण्वे वृषा द्युम्न्याहुतः क्रन्ददश्वो गविष्टिषु॥
पदानि : भुवत्। कण्वे। वृषा। द्युम्नी। आऽहुतः। क्रन्दत्। अश्वः। गोऽइष्टिषु

९. मण्डलम् १, सूक्तम् ३६, मन्त्रः १० (ऋक्सङ्ख्या : ४३१)
वाक्यम् १: यं त्वा देवासो मनवे दधुरिह यजिष्ठं हव्यवाहन।
पदानि : यम्। त्वा। देवासः। मनवे। दधुः। इह। यजिष्ठम्। हव्यऽवाहन
वाक्यम् २: यं कण्वो मेध्यातिथिर्धनस्पृतं यं वृषा यमुपस्तुतः॥
पदानि : यम्। कण्वः। मेध्यऽअतिथिः। धनऽस्पृतम्। यम्। वृषा। यम्। उपऽस्तुतः

१०. मण्डलम् १, सूक्तम् ४०, मन्त्रः ३ (ऋक्सङ्ख्या : ४८४)
वाक्यम् १: प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता।
पदानि : प्र। एतु। ब्रह्मणः। पतिः। प्र। देवी। एतु। सूनृता
वाक्यम् २: अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः॥
पदानि : अच्छ। वीरम्। नर्यम्। पङ्क्तिऽराधसम्। देवाः। यज्ञम्। नयन्तु। नः

११. मण्डलम् १, सूक्तम् ४४, मन्त्रः २ (ऋक्सङ्ख्या : ५१९)
वाक्यम् १: जुष्टो हि दूतो असि हव्यवाहनोऽग्ने रथीरध्वराणाम्।
पदानि : जुष्टः। हि। दूतः। असि। हव्यऽवाहनः। अग्ने। रथीः। अध्वराणाम्
वाक्यम् २: सजूरश्विभ्यामुषसा सुवीर्यमस्मे धेहि श्रवो बृहत्॥
पदानि : सऽजूः। अश्विऽभ्याम्। उषसा। सुऽवीर्यम्। अस्मे इति। धेहि। श्रवः। बृहत्

१२. मण्डलम् १, सूक्तम् ४७, मन्त्रः ८ (ऋक्सङ्ख्या : ५६४)
वाक्यम् १: अ॒र्वाञ्चा॑ वां सप्त॒योऽध्व॑र॒श्रियो॒ वह॑न्तु सव॒नेदुप॑ ।
पदानि : अ॒र्वाञ्चा॑ । वा॒म् । स॒प्त॒यः । अ॒ध्व॑र॒ऽश्रियः॑ । वह॑न्तु । सव॑ना । इत् । उप॑
वाक्यम् २: इष॑ꣳ पृञ्चन्ता॑ सु॒कृते सु॒दान॑व॒ आ ब॒र्हिः सी॑दतं नरा ॥
पदानि : इष॑म् । पृ॒ञ्च॒न्ता॒ । सु॒ऽकृते । सु॒ऽदान॑वे । आ । ब॒र्हिः । सी॒द॒त॒म् । न॒रा॒

१३. मण्डलम् १, सूक्तम् ५३, मन्त्रः ८ (ऋक्सङ्ख्या : ६३७)
वाक्यम् १: त्वं कर॑ञ्जमुत प॒र्णयं॑ वधी॒स्तेजि॑ष्ठयातिथि॒ग्वस्य॑ वर्त॒नी ।
पदानि : त्वम् । कर॑ञ्जम् । उ॒त । प॒र्णय॑म् । व॒धीः॒ । तेजि॑ष्ठया । अ॒ति॒थि॒ऽग्वस्य॑ । व॒र्त॒नी
वाक्यम् २: त्वं श॒ता व॑ङ्गृ॒दस्याभिन॒त्पुरो॑ऽनानुदः परि॑षूता ऋ॒जिश्व॑ना ॥
पदानि : त्वम् । श॒ता । व॒ङ्गृ॒दस्य । अ॒भि॒न॒त् । पुरः॑ । अ॒न॒नु॒ऽदः॒ । परि॑ऽसूताः । ऋ॒जिश्व॑ना

१४. मण्डलम् १, सूक्तम् ५३, मन्त्रः ११ (ऋक्सङ्ख्या : ६४०)
वाक्यम् १: य उ॒दृचीन्द्र दे॒वगो॑पाः॒ सखा॑यस्ते शि॒वत॑मा॒ असा॑म ।
पदानि : ये । उ॒त्ऽऋचि॑ । इ॒न्द्र॒ । दे॒वऽगो॑पाः । सखा॑यः । ते॒ । शि॒वऽत॑माः । असा॑म
वाक्यम् २: त्वां स्तोषा॑म॒ त्वया॑ सु॒वीरा॒ द्राघी॑य॒ आयुः॑ प्रत॒रं दधा॑नाः ॥
पदानि : त्वाम् । स्तो॒षा॒म॒ । त्वया॑ । सु॒ऽवीराः॑ । द्राघी॑यः । आयुः॑ । प्र॒ऽत॒रम् । दधा॑नाः

१५. मण्डलम् १, सूक्तम् ५७, मन्त्रः १ (ऋक्सङ्ख्या : ६६६)
वाक्यम् १: प्र मं॑हि॒ष्ठाय बृ॒हते बृ॒हद्र॑ये स॒त्यशु॑ष्माय त॒वसे॒ म॒तिं भ॑रे ।
पदानि : प्र । मं॒हि॒ष्ठाय । बृ॒हते॑ । बृ॒हत्ऽर॑ये । स॒त्यऽशु॑ष्माय । त॒वसे॑ । म॒तिम् । भ॒रे॒
वाक्यम् २: अ॒पामि॑व प्रव॒णे यस्य॑ दु॒र्धरं॒ राधो॑ वि॒श्वायु॒ शव॑से॒ अपा॑वृतम् ॥
पदानि : अ॒पाम्ऽइ॑व । प्र॒व॒णे । यस्य॑ । दुः॒ऽधर॑म् । राधः॑ । वि॒श्वऽआ॑यु । शव॑से । अप॑ऽवृतम्

१६. मण्डलम् १, सूक्तम् ५८, मन्त्रः ७ (ऋक्सङ्ख्या : ६७८)
वाक्यम् १: होता॑रं स॒प्त जु॒ह्वो॒३॒॑ यजि॑ष्ठं॒ यं वा॒घतो॑ वृ॒णते अ॑ध्व॒रेषु॑ ।
पदानि : होता॑रम् । स॒प्त । जु॒ह्वः॑ । यजि॑ष्ठम् । यम् । वा॒घतः॑ । वृ॒णते । अ॒ध्व॒रेषु॑
वाक्यम् २: अ॒ग्निं विश्वे॑षाम॒रतिं॑ वसू॒नां स॒प॒र्यामि॒ प्रय॑सा॒ यामि॑ रत्न॒म् ॥
पदानि : अ॒ग्निम् । विश्वे॑षाम् । अ॒र॒तिम् । वसू॑नाम् । स॒प॒र्यामि॑ । प्रय॑सा । यामि॑ । र॒त्न॒म्

१७. मण्डलम् १, सूक्तम् ५८, मन्त्रः ९ (ऋक्सङ्ख्या : ६८०)
वाक्यम् १: भवा॒ वरू॑थं गृणते विभा॒वो भवा॑ मघवन्मघव॒द्भ्यः॒ शर्म॑ ।
पदानि : भव॑ । वरू॑थम् । गृ॒ण॒ते । वि॒ऽभा॒ऽवः॒ । भव॑ । म॒घ॒ऽव॒न् । म॒घव॑त्ऽभ्यः । शर्म॑
वाक्यम् २: उ॒रु॒ष्याग्ने॒ अंह॑सो गृणन्त॑ं प्रा॒तर्म॑क्षू धि॒याव॑सुर्जगम्यात् ॥
पदानि : उ॒रु॒ष्य । अ॒ग्ने॒ । अंह॑सः । गृ॒ण॒न्त॒म् । प्रा॒तः । म॒क्षु । धि॒याऽव॑सुः । ज॒ग॒म्या॒त्

१८. मण्डलम् १, सूक्तम् ६०, मन्त्रः ४ (ऋक्सङ्ख्या : ६९१)
वाक्यम् १: उ॒शिक्पा॑व॒को वसु॑र्मानु॒षेषु॒ वरे॑ण्यो होता॑धायि वि॒क्षु ।
पदानि : उ॒शिक् । पा॒व॒कः । वसुः॑ । मा॒नु॒षेषु । वरे॑ण्यः । होता॑ । अ॒धा॒यि॒ । वि॒क्षु
वाक्यम् २: दम॑ूना गृ॒हप॑तिर्दम॒ आँ अ॒ग्निर्भु॑वद्र॒यिप॑ती रयी॒णाम् ॥
पदानि : दम॑ूनाः । गृ॒हऽप॑तिः । दमे॑ । आ । अ॒ग्निः । भु॒व॒त् । र॒यिऽप॑तिः । र॒यी॒णाम्

१९. मण्डलम् १, सूक्तम् ६२, मन्त्रः ७ (ऋक्सङ्ख्या : ७१५)
वाक्यम् १: द्विता वि वव्रे सनजा सनीळे अयास्यः स्तवमानेभिरर्कैः ।
पदानि : द्विता । वि । वव्रे । सनऽजा । सनीळे इति सऽनीळे । अयास्यः । स्तवमानेभिः । अर्कैः
वाक्यम् २: भगो न मेने परमे व्योमन्नधारयद्रोदसी सुदंसाः ॥
पदानि : भगः । न । मेने इतिं । परमे । विऽओमन् । अधारयत् । रोदसी इतिं । सुऽदंसाः

२०. मण्डलम् १, सूक्तम् ६२, मन्त्रः १० (ऋक्सङ्ख्या : ७१८)
वाक्यम् १: सनात्सनीळा अवनीरवाता व्रता रक्षन्ते अमृताः सहोभिः ।
पदानि : सनात् । सऽनीळाः । अवनीः । अवाताः । व्रता । रक्षन्ते । अमृताः । सहःऽभिः
वाक्यम् २: पुरू सहस्रा जनयो न पत्नीर्दुवस्यन्ति स्वसारो अह्रयाणम् ॥
पदानि : पुरु । सहस्रा । जनयः । न । पत्नीः । दुवस्यन्ति । स्वसारः । अह्रयाणम्

२१. मण्डलम् १, सूक्तम् ६४, मन्त्रः १२ (ऋक्सङ्ख्या : ७४२)
वाक्यम् १: घृषुं पावकं वनिनं विचर्षणिं रुद्रस्य सूनुं हवसा गृणीमसि ।
पदानि : घृषुम् । पावकम् । वनिनम् । विऽचर्षणिम् । रुद्रस्य । सूनुम् । हवसा । गृणीमसि
वाक्यम् २: रजस्तुरं तवसं मारुतं गणमृजीषिणं वृषणं सश्चत श्रिये ॥
पदानि : रजःऽतुरम् । तवसम् । मारुतम् । गणम् । ऋजीषिणम् । वृषणम् । सश्चत । श्रिये

२२. मण्डलम् १, सूक्तम् ६४, मन्त्रः १४ (ऋक्सङ्ख्या : ७४४)
वाक्यम् १: चर्कृत्यं मरुतः पृत्सु दुष्टरं द्युमन्तं शुष्मं मघवत्सु धत्तन ।
पदानि : चर्कृत्यम् । मरुतः । पृत्ऽसु । दुस्तरम् । द्युऽमन्तम् । शुष्मम् । मघवत्ऽसु । धत्तन
वाक्यम् २: धनस्पृतमुक्थ्यं विश्वचर्षणिं तोकं पुष्येम तनयं शतं हिमाः ॥
पदानि : धनऽस्पृतम् । उक्थ्यम् । विश्वऽचर्षणिम् । तोकम् । पुष्येम । तनयम् । शतम् । हिमाः

२३. मण्डलम् १, सूक्तम् ७२, मन्त्रः ४ (ऋक्सङ्ख्या : ८२०)
वाक्यम् १: आ रोदसी बृहती वेविदानाः प्र रुद्रिया जभ्रिरे यज्ञियासः ।
पदानि : आ । रोदसी इतिं । बृहती इतिं । वेविदानाः । प्र । रुद्रिया । जभ्रिरे । यज्ञियासः
वाक्यम् २: विदन्मर्तो नेमधिता चिकित्वानग्निं पदे परमे तस्थिवांसम् ॥
पदानि : विदत् । मर्तः । नेमऽधिता । चिकित्वान् । अग्निम् । पदे । परमे । तस्थिऽवांसम्

२४. मण्डलम् १, सूक्तम् ८४, मन्त्रः १ (ऋक्सङ्ख्या : ९१५)
वाक्यम् १: असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि ।
पदानि : असावि । सोमः । इन्द्र । ते । शविष्ठ । धृष्णो इतिं । आ । गहि
वाक्यम् २: आ त्वा पृणक्त्विन्द्रियं रजः सूर्यो न रश्मिभिः ॥
पदानि : आ । त्वा । पृणक्तु । इन्द्रियम् । रजः । सूर्यः । न । रश्मिऽभिः

२५. मण्डलम् १, सूक्तम् ८८, मन्त्रः १ (ऋक्सङ्ख्या : ९६३)
वाक्यम् १: आ विद्युन्मद्भिर्मरुतः स्वर्कै रथेभिर्यात ऋष्टिमद्भिरश्वपर्णैः ।
पदानि : आ । विद्युन्मत्ऽभिः । मरुतः । सुऽअर्कैः । रथेभिः । यात । ऋष्टिमत्ऽभिः । अश्वऽपर्णैः

वाक्यम् २: आ वर्षिष्ठया न इषा वयो न पप्तता सुमायाः ॥
पदानि : आ । वर्षिष्ठया । नः । इषा । वयः । न । पप्तत । सुऽमायाः

२६. मण्डलम् १, सूक्तम् ८९, मन्त्रः ६ (ऋक्सङ्ख्या : ९७४)
वाक्यम् १: स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
पदानि : स्वस्ति । नः । इन्द्रः । वृद्धऽश्रवाः । स्वस्ति । नः । पूषा । विश्वऽवेदाः
वाक्यम् २: स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥
पदानि : स्वस्ति । नः । तार्क्ष्यः । अरिष्टऽनेमिः । स्वस्ति । नः । बृहस्पतिः । दधातु

२७. मण्डलम् १, सूक्तम् ९१, मन्त्रः २१ (ऋक्सङ्ख्या : १००८)
वाक्यम् १: अषाळ्हं युत्सु पृतनासु पप्रिं स्वर्षामप्सां वृजनस्य गोपाम् ।
पदानि : अषाळ्हम् । युत्ऽसु । पृतनासु । पप्रिम् । स्वःऽसाम् । अप्साम् । वृजनस्य । गोपाम्
वाक्यम् २: भरेषुजां सुक्षितिं सुश्रवसं जयन्तं त्वामनु मदेम सोम ॥
पदानि : भरेषुऽजाम् । सुऽक्षितिम् । सुऽश्रवसम् । जयन्तम् । त्वाम् । अनु । मदेम । सोम

२८. मण्डलम् १, सूक्तम् ९२, मन्त्रः ६ (ऋक्सङ्ख्या : १०१६)
वाक्यम् १: अतारिष्म तमसस्पारमस्योषा उच्छन्ती वयुना कृणोति ।
पदानि : अतारिष्म । तमसः । पारम् । अस्य । उषाः । उच्छन्ती । वयुना । कृणोति
वाक्यम् २: श्रिये छन्दो न स्मयते विभाती सुप्रतीका सौमनसायाजीगः ॥
पदानि : श्रिये । छन्दः । न । स्मयते । विऽभाती । सुऽप्रतीका । सौमनसाय । अजीगरितिं

२९. मण्डलम् १, सूक्तम् ९२, मन्त्रः ११ (ऋक्सङ्ख्या : १०२१)
वाक्यम् १: व्यूर्ण्वती दिवो अन्ताँ अबोध्यप स्वसारं सनुतर्युयोति ।
पदानि : विऽऊर्ण्वती । दिवः । अन्तान् । अबोधि । अप । स्वसारम् । सनुतः । युयोति
वाक्यम् २: प्रमिनती मनुष्या युगानि योषा जारस्य चक्षसा वि भाति ॥
पदानि : प्रऽमिनती । मनुष्या । युगानि । योषा । जारस्य । चक्षसा । वि । भाति

३०. मण्डलम् १, सूक्तम् ९३, मन्त्रः १२ (ऋक्सङ्ख्या : १०४०)
वाक्यम् १: अग्नीषोमा पिपृतमर्वतो न आ प्यायन्तामुस्रिया हव्यसूदः ।
पदानि : अग्नीषोमा । पिपृतम् । अर्वतः । नः । आ । प्यायन्ताम् । उस्रियाः । हव्यऽसूदः
वाक्यम् २: अस्मे बलानि मघवत्सु धत्तं कृणुतं नो अध्वरं श्रुष्टिमन्तम् ॥
पदानि : अस्मे इतिं । बलानि । मघवत्ऽसु । धत्तम् । कृणुतम् । नः । अध्वरम् । श्रुष्टिऽमन्तम्

३१. मण्डलम् १, सूक्तम् ९५, मन्त्रः १ (ऋक्सङ्ख्या : १०५७)
वाक्यम् १: द्वे विरूपे चरतः स्वर्थे अन्यान्या वत्समुप धापयेते ।
पदानि : द्वे इतिं । विरूपे इति विऽरूपे । चरतः । स्वर्थे इतिं सुऽअर्थे । अन्याऽअन्या । वत्सम् । उप । धापयेते इतिं
वाक्यम् २: हरिरन्यस्यां भवति स्वधावाञ्छुक्रो अन्यस्यां ददृशे सुवर्चाः ॥
पदानि : हरिः । अन्यस्याम् । भवति । स्वधाऽवान् । शुक्रः । अन्यस्याम् । ददृशे । सुऽवर्चाः

३२. मण्डलम् १, सूक्तम् ९५, मन्त्रः ५ (ऋक्सङ्ख्या : १०६१)

वाक्यम् १: आविष्ट्यो वर्धते चारुरासु जिह्मानामूर्ध्वः स्वयशा उपस्थे ।
पदानि : आविःऽत्यः । वर्धते । चारुः । आसु । जिह्मानाम् । ऊर्ध्वः । स्वऽयशाः । उपऽस्थे
वाक्यम् २: उभे त्वष्टुर्बिभ्यतुर्जायमानात्प्रतीची सिंहं प्रति जोषयेते ॥
पदानि : उभे इति । त्वष्टुः । बिभ्यतुः । जायमानात् । प्रतीची इति । सिंहम् । प्रति । जोषयेते इति

३३. मण्डलम् १, सूक्तम् ११३, मन्त्रः ३ (ऋक्सङ्ख्या : १२३८)
वाक्यम् १: समानो अध्वा स्वस्रोरनन्तस्तमन्यान्या चरतो देवशिष्टे ।
पदानि : समानः । अध्वा । स्वस्रोः । अनन्तः । तम् । अन्याऽअन्या । चरतः । देवशिष्टे इति देवऽशिष्टे
वाक्यम् २: न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे ॥
पदानि : न । मेथेते इति । न । तस्थतुः । सुमेके इति सुऽमेके । नक्तोषसा । सऽमनसा । विरूपे इति विऽरूपे

३४. मण्डलम् १, सूक्तम् ११६, मन्त्रः ८ (ऋक्सङ्ख्या : १२८०)
वाक्यम् १: हिमेनाग्निं घ्रंसमवारयेथां पितुमतीमूर्जमस्मा अधत्तम् ।
पदानि : हिमेन । अग्निम् । घ्रंसम् । अवारयेथाम् । पितुऽमतीम् । ऊर्जम् । अस्मै । अधत्तम्
वाक्यम् २: ऋबीसे अत्रिमश्विनावनीतमुन्निन्यथुः सर्वगणं स्वस्ति ॥
पदानि : ऋबीसे । अत्रिम् । अश्विना । अवऽनीतम् । उत् । निन्यथुः । सर्वऽगणम् । स्वस्ति

३५. मण्डलम् १, सूक्तम् ११६, मन्त्रः १४ (ऋक्सङ्ख्या : १२८६)
वाक्यम् १: आस्नो वृकस्य वर्तिकामभीके युवं नरा नासत्यामुमुक्तम् ।
पदानि : आस्नः । वृकस्य । वर्तिकाम् । अभीके । युवम् । नरा । नासत्या । अमुमुक्तम्
वाक्यम् २: उतो कविं पुरुभुजा युवं ह कृपमाणमकृणुतं विचक्षे ॥
पदानि : उतो इति । कविम् । पुरुऽभुजा । युवम् । ह । कृपमाणम् । अकृणुतम् । विऽचक्षे

३६. मण्डलम् १, सूक्तम् ११७, मन्त्रः ६ (ऋक्सङ्ख्या : १३०३)
वाक्यम् १: तद्वां नरा शंस्यं पज्रियेण कक्षीवता नासत्या परिज्मन् ।
पदानि : तत् । वाम् । नरा । शंस्यम् । पज्रियेण । कक्षीवता । नासत्या । परिऽज्मन्
वाक्यम् २: शफादश्वस्य वाजिनो जनाय शतं कुम्भाँ असिञ्चतं मधूनाम् ॥
पदानि : शफात् । अश्वस्य । वाजिनः । जनाय । शतम् । कुम्भान् । असिञ्चतम् । मधूनाम्

३७. मण्डलम् १, सूक्तम् ११७, मन्त्रः १२ (ऋक्सङ्ख्या : १३०९)
वाक्यम् १: कुह यान्ता सुष्टुतिं काव्यस्य दिवो नपाता वृषणा शयुत्रा ।
पदानि : कुह । यान्ता । सुऽस्तुतिम् । काव्यस्य । दिवः । नपाता । वृषणा । शयुऽत्रा
वाक्यम् २: हिरण्यस्येव कलशं निखातमुदूपथुर्दशमे अश्विनाहन् ॥
पदानि : हिरण्यस्यऽइव । कलशम् । निऽखातम् । उत् । ऊपथुः । दशमे । अश्विना । अहन्

३८. मण्डलम् १, सूक्तम् ११७, मन्त्रः १३ (ऋक्सङ्ख्या : १३१०)
वाक्यम् १: युवं च्यवानमश्विना जरन्तं पुनर्युवानं चक्रथुः शचीभिः ।
पदानि : युवम् । च्यवानम् । अश्विना । जरन्तम् । पुनः । युवानम् । चक्रथुः । शचीभिः
वाक्यम् २: युवो रथँ दुहिता सूर्यस्य सह श्रिया नासत्यावृणीत ॥
पदानि : युवोः । रथम् । दुहिता । सूर्यस्य । सह । श्रिया । नासत्या । अवृणीत

३९. मण्डलम् १, सूक्तम् ११७, मन्त्रः १५ (ऋक्सङ्ख्या : १३१२)
वाक्यम् १: अजोऽहवीदश्विना तौग्र्यो वां प्रोळ्हः समुद्रमव्यथिर्जगन्वान्।
पदानि : अजोऽहवीत्। अश्विना। तौग्र्यः। वाम्। प्रऽऊळ्हः। समुद्रम्। अव्यथिः। जगन्वान्
वाक्यम् २: निष्टमूहथुः सुयुजा रथेन मनोजवसा वृषणा स्वस्ति॥
पदानि : निः। तम्। ऊहथुः। सुऽयुजा। रथेन। मनःऽजवसा। वृषणा। स्वस्ति

४०. मण्डलम् १, सूक्तम् ११७, मन्त्रः २० (ऋक्सङ्ख्या : १३१७)
वाक्यम् १: अधेनुं दस्रा स्तर्यं१ विषक्तामपिन्वतं शयवे अश्विना गाम्।
पदानि : अधेनुम्। दस्रा। स्तर्यम्। विऽसक्ताम्। अपिन्वतम्। शयवे। अश्विना। गाम्
वाक्यम् २: युवं शचीभिर्विमदाय जायां न्यूहथुः पुरुमित्रस्य योषाम्॥
पदानि : युवम्। शचीभिः। विऽमदाय। जायाम्। नि। ऊहथुः। पुरुऽमित्रस्य। योषाम्

४१. मण्डलम् १, सूक्तम् ११७, मन्त्रः २१ (ऋक्सङ्ख्या : १३१८)
वाक्यम् १: यवं वृकेणाश्विना वपन्तेषं दुहन्ता मनुषाय दस्रा।
पदानि : यवम्। वृकेण। अश्विन। वपन्ता। इषम्। दुहन्ता। मनुषाय। दस्रा
वाक्यम् २: अभि दस्युं बकुरेणा धमन्तोरु ज्योतिश्चक्रथुरार्याय॥
पदानि : अभि। दस्युम्। बकुरेण। धमन्ता। उरु। ज्योतिः। चक्रथुः। आर्याय

४२. मण्डलम् १, सूक्तम् ११७, मन्त्रः २५ (ऋक्सङ्ख्या : १३२२)
वाक्यम् १: एतानिं वामश्विना वीर्याणि प्र पूर्व्याण्यायवोऽवोचन्।
पदानि : एतानि। वाम्। अश्विना। वीर्याणि। प्र। पूर्व्याणि। आयवः। अवोचन्
वाक्यम् २: ब्रह्म कृण्वन्तो वृषणा युवभ्यां सुवीरासो विदथमा वदेम॥
पदानि : ब्रह्म। कृण्वन्तः। वृषणा। युवऽभ्याम्। सुऽवीरासः। विदथम्। आ। वदेम

४३. मण्डलम् १, सूक्तम् ११८, मन्त्रः ७ (ऋक्सङ्ख्या : १३२९)
वाक्यम् १: युवमत्रयेऽवनीताय तप्तमूर्जमोमानमश्विनावधत्तम्।
पदानि : युवम्। अत्रये। अवऽनीताय। तप्तम्। ऊर्जम्। ओमानम्। अश्विनौ। अधत्तम्
वाक्यम् २: युवं कण्वायापिरिप्राय चक्षुः प्रत्यधत्तं सुष्टुतिं जुजुषाणा॥
पदानि : युवम्। कण्वाय। अपिऽरिप्राय। चक्षुः। प्रतिं। अधत्तम्। सुऽस्तुतिम्। जुजुषाणा

४४. मण्डलम् १, सूक्तम् ११८, मन्त्रः ११ (ऋक्सङ्ख्या : १३३३)
वाक्यम् १: आ श्येनस्य जवसा नूतनेनास्मे यातं नासत्या सजोषाः।
पदानि : आ। श्येनस्य। जवसा। नूतनेन। अस्मे इति। यातम्। नासत्या। सजोषाः
वाक्यम् २: हवे हि वामश्विना रातहव्यः शश्वत्तमाया उषसो व्युष्टौ॥
पदानि : हवे। हि। वाम्। अश्विना। रातऽहव्यः। शश्वत्ऽतमायाः। उषसः। विऽउष्टौ

४५. मण्डलम् १, सूक्तम् १२२, मन्त्रः ८ (ऋक्सङ्ख्या : १३७८)
वाक्यम् १: अस्य स्तुषे महिमघस्य राधः सचा सनेम नहुषः सुवीराः।
पदानि : अस्य। स्तुषे। महिऽमघस्य। राधः। सचा। सनेम। नहुषः। सुऽवीराः
वाक्यम् २: जनो यः पज्रेभ्यो वाजिनीवानश्वावतो रथिनो मह्यं सूरिः॥

पदानि : जनः । यः । पञ्चेभ्यः । वाजिनीऽवान् । अश्वऽवतः । रथिनः । मह्यम् । सूरिः

४६. मण्डलम् १, सूक्तम् १२२, मन्त्रः १५ (ऋक्सङ्ख्या : १३८५)
वाक्यम् १: चत्वारो मा मशर्शारस्य शिश्वस्त्रयो राज्ञ आयवसस्य जिष्णोः ।
पदानि : चत्वारः । मा । मशर्शारस्य । शिश्वः । त्रयः । राज्ञः । आयवसस्य । जिष्णोः
वाक्यम् २: रथो वां मित्रावरुणा दीर्घाप्साः स्यूमगभस्तिः सूरो नाद्यौत् ॥
पदानि : रथः । वाम् । मित्रावरुणा । दीर्घऽअप्साः । स्यूमऽगभस्तिः । सूरः । न । अद्यौत्

४७. मण्डलम् १, सूक्तम् १२३, मन्त्रः ९ (ऋक्सङ्ख्या : १३९४)
वाक्यम् १: जानत्यह्नः प्रथमस्य नाम शुक्रा कृष्णादजनिष्ट श्वितीची ।
पदानि : जानती । अह्नः । प्रथमस्य । नाम । शुक्रा । कृष्णात् । अजनिष्ट । श्वितीची
वाक्यम् २: ऋतस्य योषा न मिनाति धामाहरहर्निष्कृतमाचरन्ती ॥
पदानि : ऋतस्य । योषा । न । मिनाति । धाम । अहःऽअहः । निःऽकृतम् । आऽचरन्ती

४८. मण्डलम् १, सूक्तम् १२४, मन्त्रः १० (ऋक्सङ्ख्या : १४०८)
वाक्यम् १: प्र बोधयोषः पृणतो मघोन्यबुध्यमानाः पणयः ससन्तु ।
पदानि : प्र । बोधय । उषः । पृणतः । मघोनि । अबुध्यमानाः । पणयः । ससन्तु
वाक्यम् २: रेवदुच्छ मघवद्भ्यो मघोनि रेवत्स्तोत्रे सूनृते जारयन्ती ॥
पदानि : रेवत् । उच्छ । मघवत्ऽभ्यः । मघोनि । रेवत् । स्तोत्रे । सूनृते । जरयन्ती

४९. मण्डलम् १, सूक्तम् १४२, मन्त्रः ४ (ऋक्सङ्ख्या : १५५५)
वाक्यम् १: ईळितो अग्न आ वहेन्द्रं चित्रमिह प्रियम् ।
पदानि : ईळितः । अग्ने । आ । वह । इन्द्रम् । चित्रम् । इह । प्रियम्
वाक्यम् २: इयं हि त्वा मतिर्ममाच्छा सुजिह्व वच्यते ॥
पदानि : इयम् । हि । त्वा । मतिः । मम । अच्छ । सुऽजिह्व । वच्यते

५०. मण्डलम् १, सूक्तम् १४३, मन्त्रः ८ (ऋक्सङ्ख्या : १५७२)
वाक्यम् १: अप्रयुच्छन्नप्रयुच्छद्भिरग्ने शिवेभिर्नः पायुभिः पाहि शग्मैः ।
पदानि : अप्रऽयुच्छन् । अप्रयुच्छत्ऽभिः । अग्ने । शिवेभिः । नः । पायुऽभिः । पाहि । शग्मैः
वाक्यम् २: अदब्धेभिरदृपितेभिरिष्टेऽनिमिषद्भिः परि पाहि नो जाः ॥
पदानि : अदब्धेभिः । अदृपितेभिः । इष्टे । अनिमिषत्ऽभिः । परि । पाहि । नः । जाः

५१. मण्डलम् १, सूक्तम् १५२, मन्त्रः ६ (ऋक्सङ्ख्या : १६२२)
वाक्यम् १: आ धेनवो मामतेयमवन्तीर्ब्रह्मप्रियं पीपयन्त्सस्मिन्नूधन् ।
पदानि : आ । धेनवः । मामतेयम् । अवन्तीः । ब्रह्मऽप्रियम् । पीपयन् । सस्मिन् । ऊधन्
वाक्यम् २: पित्वो भिक्षेत वयुनानि विद्वानासाविवासन्नदितिमुरुष्येत् ॥
पदानि : पित्वः । भिक्षेत । वयुनानि । विद्वान् । आसा । आऽविवासन् । अदितिम् । उरुष्येत्

५२. मण्डलम् १, सूक्तम् १५२, मन्त्रः ७ (ऋक्सङ्ख्या : १६२३)
वाक्यम् १: आ वां मित्रावरुणा हव्यजुष्टिं नमसा देवाववसा ववृत्याम् ।

पदानि : आ। वाम्। मित्रावरुणा। हव्यऽजुष्टिम्। नमसा। देवौ। अवसा। ववृत्याम्
वाक्यम् २: अस्माकं ब्रह्म पृतनासु सह्या अस्माकं वृष्टिर्दिव्या सुपारा ॥
पदानि : अस्माकम्। ब्रह्म। पृतनासु। सह्याः। अस्माकम्। वृष्टिः। दिव्या। सुऽपारा

५३. मण्डलम् १, सूक्तम् १५५, मन्त्रः २ (ऋक्सङ्ख्या : १६३५)
वाक्यम् १: त्वेषमित्था समरणं शिमीवतोरिन्द्राविष्णू सुतपा वामुरुष्यति।
पदानि : त्वेषम्। इत्था। सम्ऽअरणम्। शिमीऽवतोः। इन्द्राविष्णू इति। सुतऽपाः। वाम्। उरुष्यति
वाक्यम् २: या मर्त्याय प्रतिधीयमानमित्कृशानोरस्तुरसनामुरुष्यथः ॥
पदानि : या। मर्त्याय। प्रतिऽधीयमानम्। इत्। कृशानोः। अस्तुः। असनाम्। उरुष्यथः

५४. मण्डलम् १, सूक्तम् १६२, मन्त्रः १३ (ऋक्सङ्ख्या : १६९३)
वाक्यम् १: यन्नीक्षणं माँस्पचन्या उखाया या पात्राणि यूष्ण आसेचनानि।
पदानि : यत्। निऽईक्षणम्। माँस्पचन्याः। उखायाः। या। पात्राणि। यूष्णः। आऽसेचनानि
वाक्यम् २: ऊष्मण्यापिधानाचरूणामङ्काः सूनाः परि भूषन्त्यश्वम् ॥
पदानि : ऊष्मण्या। अपिऽधानाः। चरूणाम्। अङ्काः। सूनाः। परि। भूषन्ति। अश्वम्

५५. मण्डलम् १, सूक्तम् १६२, मन्त्रः १८ (ऋक्सङ्ख्या : १६९८)
वाक्यम् १: चतुस्त्रिंशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिः समेति।
पदानि : चतुःऽत्रिंशत्। वाजिनः। देवऽबन्धोः। वङ्क्रीः। अश्वस्य। स्वऽधितिः। सम्। एति
वाक्यम् २: अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या वि शस्त ॥
पदानि : अच्छिद्रा। गात्रा। वयुना। कृणोत। परुःऽपरुः। अनुऽघुष्य। वि। शस्त

५६. मण्डलम् १, सूक्तम् १६४, मन्त्रः २४ (ऋक्सङ्ख्या : १७३९)
वाक्यम् १: गायत्रेण प्रति मिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम्।
पदानि : गायत्रेण। प्रति। मिमीते। अर्कम्। अर्केण। साम। त्रैस्तुभेन। वाकम्
वाक्यम् २: वाकेन वाकं द्विपदा चतुष्पदाक्षरेण मिमते सप्त वाणीः ॥
पदानि : वाकेन। वाकम्। द्विऽपदा। चतुःऽपदा। अक्षरेण। मिमते। सप्त। वाणीः

५७. मण्डलम् १, सूक्तम् १६४, मन्त्रः ४० (ऋक्सङ्ख्या : १७५५)
वाक्यम् १: सूयवसाद्भगवती हि भूया अथो वयं भगवन्तः स्याम।
पदानि : सुयवसऽअत्। भगऽवती। हि। भूयाः। अथो इति। वयम्। भगऽवन्तः। स्याम
वाक्यम् २: अद्धि तृणमघ्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती ॥
पदानि : अद्धि। तृणम्। अघ्ये। विश्वऽदानीम्। पिब। शुद्धम्। उदकम्। आऽचरन्ती

५८. मण्डलम् १, सूक्तम् १६४, मन्त्रः ४३ (ऋक्सङ्ख्या : १७५८)
वाक्यम् १: शकमयं धूममारादपश्यं विषूवता पर एनावरेण।
पदानि : शकऽमयम्। धूमम्। आरात्। अपश्यम्। विषुऽवता। परः। एना। अवरेण
वाक्यम् २: उक्षाणं पृश्निमपचन्त वीरास्तानि धर्माणि प्रथमान्यासन् ॥
पदानि : उक्षाणम्। पृश्निम्। अपचन्त। वीराः। तानि। धर्माणि। प्रथमानि। आसन्

५९. मण्डलम् १, सूक्तम् १६५, मन्त्रः ८ (ऋक्सङ्ख्या : १७७५)
वाक्यम् १: वधीं॑ वृ॒त्रं म॑रुत इन्द्रि॒येण॒ स्वेन॒ भामेन तवि॒षो ब॑भू॒वान्।
पदानि : वधी॑म्। वृ॒त्रम्। म॒रु॒तः॒। इ॒न्द्रि॒येण॑। स्वेन॑। भामेन। त॒वि॒षः। ब॒भू॒वान्
वाक्यम् २: अ॒हमे॒ता मन॑वे वि॒श्वश्च॑न्द्राः सु॒गा अ॒पश्च॑कर॒ वज्र॑बाहुः॥
पदानि : अ॒हम्। ए॒ताः। मन॑वे। वि॒श्वऽच॑न्द्राः। सु॒ऽगाः। अ॒पः। च॒क्र॒। वज्र॑ऽबाहुः

६०. मण्डलम् १, सूक्तम् १६६, मन्त्रः ११ (ऋक्सङ्ख्या : १७९३)
वाक्यम् १: म॒हान्तो॑ म॒ह्ना वि॒भ्वो॒३॑ विभू॑तयो दू॒रेदृ॑शो ये दि॒व्या इ॑व॒ स्तृभिः॑।
पदानि : म॒हान्तः॑। म॒ह्ना। वि॒ऽभ्वः॑। विऽभू॑तयः। दू॒रेऽदृ॑शः॑। ये। दि॒व्याःऽइ॑व। स्तृऽभिः॑
वाक्यम् २: म॒न्द्राः सु॑जि॒ह्वाः स्वरि॑तार आ॒सभि॒: संमि॑श्ला इन्द्रे म॒रुतः॑ परि॒ष्टु॒भः॑॥
पदानि : म॒न्द्राः। सु॒ऽजि॒ह्वाः। स्वरि॑तारः। आ॒सऽभिः॑। सम्ऽमि॑श्लाः। इ॒न्द्रे॒। म॒रुतः॑। प॒रि॒ऽस्तु॒भः॑

६१. मण्डलम् १, सूक्तम् १६८, मन्त्रः ८ (ऋक्सङ्ख्या : १८१६)
वाक्यम् १: प्रति॑ ष्टो॒भन्ति॒ सिन्ध॑वः प॒विभ्यो॒ यदु॒भ्रिया॑ वाच॑मु॒दीर॑यन्ति।
पदानि : प्रति॑। स्तो॒भ॒न्ति॒। सिन्ध॑वः। प॒विऽभ्यः॑। यत्। अ॒भ्रिया॑म्। वाच॑म्। उ॒त्ऽई॑रयन्ति
वाक्यम् २: अव॑ स्मयन्त वि॒द्युतः॑ पृथि॒व्यां यदी॑ घृ॒तं म॒रुतः॑ प्रु॒ष्णु॒वन्ति॑॥
पदानि : अव॑। स्म॒य॒न्त॒। वि॒ऽद्युतः॑। पृ॒थि॒व्याम्। यदि॑। घृ॒तम्। म॒रुतः॑। प्रु॒ष्णु॒वन्ति॑

६२. मण्डलम् १, सूक्तम् १६९, मन्त्रः ७ (ऋक्सङ्ख्या : १८२५)
वाक्यम् १: प्रति॑ घो॒राणा॒मेता॑नाम॒यासा॑ म॒रुता॑ शृण्व आय॒ता॒मु॒प॒ब्दिः।
पदानि : प्रति॑। घो॒राणा॑म्। एता॑नाम्। अ॒यासा॑म्। म॒रुता॑म्। शृ॒ण्वे॒। आ॒ऽय॒ता॒म्। उ॒प॒ब्दिः
वाक्यम् २: ये मर्त्यं॑ पृतना॒यन्त॒मूमै॑र्ऋ॒णा॒वान॑ं न प॒तय॑न्त॒ सर्गैः॑॥
पदानि : ये। मर्त्य॑म्। पृ॒त॒ना॒ऽयन्त॑म्। ऊमैः॑। ऋ॒ण॒ऽवान॑म्। न। प॒तय॑न्त। सर्गैः॑

६३. मण्डलम् १, सूक्तम् १७३, मन्त्रः १० (ऋक्सङ्ख्या : १८५०)
वाक्यम् १: विष्प॑र्धसो न॒रां न शंसै॒रस्माक॑ास॒दिन्द्रो॑ वज्रहस्तः।
पदानि : विऽस्प॑र्धसः। न॒रा॑म्। न। शंसैः॑। अ॒स्माक॑म्। अ॒स॒त्। इन्द्रः॑। वज्र॑ऽहस्तः
वाक्यम् २: मि॒त्रा॒युवो॒ न पूर्प॑तिं सु॒शि॑ष्टौ मध्या॒युव॒ उप॑ शिक्षन्ति य॒ज्ञैः॑॥
पदानि : मि॒त्र॒ऽयुवः॑। न। पूः॒ऽप॑तिम्। सु॒ऽशि॑ष्टौ। म॒ध्य॒ऽयुवः॑। उप॑। शि॒क्ष॒न्ति॒। य॒ज्ञैः॑

६४. मण्डलम् १, सूक्तम् १८१, मन्त्रः २ (ऋक्सङ्ख्या : १९०३)
वाक्यम् १: आ वा॒मश्वा॑सः॒ शुच॑यः पय॒स्पा वात॑रंहसो दि॒व्यासो॒ अत्याः॑।
पदानि : आ। वा॒म्। अश्वा॑सः। शुच॑यः। प॒यः॒ऽपाः। वात॑ऽरंहसः। दि॒व्यासः॑। अत्याः॑
वाक्यम् २: म॒नो॒जुवो॒ वृष॑णो वी॒तपृ॑ष्ठा॒ एह स्व॒राजो॑ अ॒श्विना॑ वहन्तु॥
पदानि : म॒नः॒ऽजुवः॑। वृष॑णः। वी॒तऽपृ॑ष्ठाः। आ। इ॒ह। स्व॒ऽराजः॑। अ॒श्विना॑। व॒ह॒न्तु॒

६५. मण्डलम् १, सूक्तम् १८४, मन्त्रः ५ (ऋक्सङ्ख्या : १९२९)
वाक्यम् १: ए॒ष वां॑ स्तो॒मो॑ अश्विनावका॒रि॒ मानेभिर्मघवाना सुवृ॒क्ति।
पदानि : ए॒षः। वा॒म्। स्तो॒मः॑। अ॒श्वि॒नौ॒। अ॒का॒रि॒। मानेभिः। म॒घ॒ऽवा॒ना॒। सु॒ऽवृ॒क्ति
वाक्यम् २: या॒तं व॒र्तिस्तन॑याय॒ त्मने॒ चा॒गस्त्ये नासत्या॒ मद॑न्ता॥
पदानि : या॒तम्। व॒र्तिः। तन॑याय। त्मने॑। च॒। अ॒गस्त्ये॑। नास॒त्या॒। मद॑न्ता

६६. मण्डलम् १, सूक्तम् १९०, मन्त्रः ६ (ऋक्सङ्ख्या : १९८८)
वाक्यम् १: सुप्रैतुः सूयवसो न पन्था दुर्नियन्तुः परिप्रीतो न मित्रः ।
पदानि : सुऽप्रैतुः । सुऽयवसः । न । पन्थाः । दुःऽनियन्तुः । परिऽप्रीतः । न । मित्रः
वाक्यम् २: अनर्वाणो अभि ये चक्षते नोऽपीवृता अपोर्णुवन्तो अस्थुः ॥
पदानि : अनर्वाणः । अभि । ये । चक्षते । नः । अपिऽवृताः । अपऽऊर्णुवन्तः । अस्थुः

६७. मण्डलम् २, सूक्तम् ३, मन्त्रः ५ (ऋक्सङ्ख्या : २०४०)
वाक्यम् १: वि श्रयन्तामुर्विया हूयमाना द्वारो देवीः सुप्रायणा नमोभिः ।
पदानि : वि । श्रयन्ताम् । उर्विया । हूयमानाः । द्वारः । देवीः । सुप्रऽअयनाः । नमःऽभिः
वाक्यम् २: व्यचस्वतीर्वि प्रथन्तामजुर्या वर्णं पुनाना यशसं सुवीरम् ॥
पदानि : व्यचस्वतीः । वि । प्रथन्ताम् । अजुर्याः । वर्णम् । पुनानाः । यशसम् । सुऽवीरम्

६८. मण्डलम् २, सूक्तम् ३, मन्त्रः ६ (ऋक्सङ्ख्या : २०४१)
वाक्यम् १: साध्वपांसि सनता न उक्षिते उषासानक्ता वय्येव रण्विते ।
पदानि : साधु । अपांसि । सनता । नः । उक्षिते इति । उषसानक्ता । वय्या ऽइव । रण्विते इति
वाक्यम् २: तन्तुं ततं संवयन्ती समीची यज्ञस्य पेशः सुदुघे पयस्वती ॥
पदानि : तन्तुम् । ततम् । संवयन्ती इति सम्ऽवयन्ती । समीची इति सम्ऽईची । यज्ञस्य । पेशः । सुदुघे इति सुऽदुघे । पयस्वती इति

६९. मण्डलम् २, सूक्तम् ४, मन्त्रः १ (ऋक्सङ्ख्या : २०४७)
वाक्यम् १: हुवे वः सुद्योत्मानं सुवृक्तिं विशामग्निमतिथिं सुप्रयसम् ।
पदानि : हुवे । वः । सुऽद्योत्मानम् । सुऽवृक्तिम् । विशाम् । अग्निम् । अतिथिम् । सुऽप्रयसम्
वाक्यम् २: मित्र इव यो दिधिषाय्यो भूद्देव आदेवे जने जातवेदाः ॥
पदानि : मित्रःऽइव । यः । दिधिषाय्यः । भूत् । देवः । आऽदेवे । जने । जातऽवेदाः

७०. मण्डलम् २, सूक्तम् ९, मन्त्रः ५ (ऋक्सङ्ख्या : २०८८)
वाक्यम् १: उभयं ते न क्षीयते वसव्यं दिवेदिवे जायमानस्य दस्म ।
पदानि : उभयम् । ते । न । क्षीयते । वसव्यम् । दिवेऽदिवे । जायमानस्य । दस्म
वाक्यम् २: कृधि क्षुमन्तं जरितारमग्ने कृधि पतिं स्वपत्यस्य रायः ॥
पदानि : कृधि । क्षुऽमन्तम् । जरितारम् । अग्ने । कृधि । पतिम् । सुऽअपत्यस्य । रायः

७१. मण्डलम् २, सूक्तम् ११, मन्त्रः ५ (ऋक्सङ्ख्या : २१००)
वाक्यम् १: गुहा हितं गुह्यं गूळ्हमप्स्वपीवृतं मायिनं क्षियन्तम् ।
पदानि : गुहा । हितम् । गुह्यम् । गूळ्हम् । अप्ऽसु । अपिऽवृतम् । मायिनम् । क्षियन्तम्
वाक्यम् २: उतो अपो द्यां तस्तभ्वांसमहन्नहिं शूर वीर्येण ॥
पदानि : उतो इति । अपः । द्याम् । तस्तभ्वांसम् । अहन् । अहिम् । शूर । वीर्येण

७२. मण्डलम् २, सूक्तम् ११, मन्त्रः ७ (ऋक्सङ्ख्या : २१०२)
वाक्यम् १: हरी नु ते इन्द्र वाजयन्ता घृतश्चुतं स्वारमंस्वार्ष्टाम् ।

पदानि : हरी॑ इति॑ । नु । ते॒ । इ॒न्द्र॒ । वा॒जय॑न्ता । घृ॒त॒ऽश्चु॒त॑म् । स्वा॒र॑म् । अ॒स्वा॒र्ष्टा॒म्
वाक्यम् २: वि सम॒ना भूमि॑रप्रथि॒ष्टार॑स्त॒ पर्वत॒श्चित्स॑रि॒ष्यन् ॥
पदानि : वि । स॒म॒ना । भूमिः॑ । अ॒प्र॒थि॒ष्ट॒ । अर॑स्त । पर्व॑तः । चि॒त् । स॒रि॒ष्यन्

७३. मण्डलम् २, सूक्तम् ११, मन्त्रः ८ (ऋक्सङ्ख्या : २१०३)
वाक्यम् १: नि पर्व॑तः सा॒द्यप्र॑युच्छ॒न्त्सं मा॒तृभि॑र्वावशा॒नो अ॑क्रान् ।
पदानि : नि । पर्व॑तः । सा॒दि॒ । अप्र॑ऽयुच्छन् । सम् । मा॒तृऽभिः॑ । वा॒व॒शा॒नः । अ॒क्रा॒न्
वाक्यम् २: दू॒रे पा॒रे वाणी॑ं वर्धय॑न्त इन्द्रे॒षितां॑ ध॒मनि॑ं पप्रथ॒न्नि ॥
पदानि : दू॒रे । पा॒रे । वाणी॑म् । व॒र्ध॒य॑न्तः । इ॒न्द्र॒ऽइ॒षिता॑म् । ध॒मनि॑म् । प॒प्र॒थ॒न् । नि

७४. मण्डलम् २, सूक्तम् ११, मन्त्रः २० (ऋक्सङ्ख्या : २११५)
वाक्यम् १: अ॒स्य सु॑वा॒नस्य॑ मन्दि॒नस्त्रि॒तस्य॒ न्यर्बुदं॑ वावृधा॒नो अ॑स्तः ।
पदानि : अ॒स्य । सु॒वा॒नस्य॑ । म॒न्दि॒नः॑ । त्रि॒तस्य॑ । नि । अर्बु॑दम् । व॒वृ॒धा॒नः । अ॒स्त॒रित्य॑स्तः
वाक्यम् २: अव॑र्तयत्सू॒र्यो न च॒क्रं भि॒नद्बलमिन्द्रो॒ अङ्गि॑रस्वान् ॥
पदानि : अव॑र्तयत् । सू॒र्यः॑ । न । च॒क्रम् । भि॒नत् । व॒लम् । इन्द्रः॑ । अङ्गि॑रस्वान्

७५. मण्डलम् २, सूक्तम् १६, मन्त्रः ५ (ऋक्सङ्ख्या : २१७१)
वाक्यम् १: वृष्णः॒ कोशः॑ पवते॒ मध्व॑ ऊ॒र्मिर्वृ॑ष॒भान्नाय॑ वृष॒भाय॒ पात॑वे ।
पदानि : वृष्णः॒ । कोशः॑ । प॒व॒ते॒ । मध्वः॑ । ऊ॒र्मिः । वृ॒ष॒भऽअ॑न्नाय । वृ॒ष॒भाय॑ । पात॑वे
वाक्यम् २: वृष॑णाध्व॒र्यू वृ॑ष॒भासो॒ अद्र॑यो॒ वृष॑णं॒ सोमं॑ वृष॒भाय॑ सुष्वति ॥
पदानि : वृष॑णा । अ॒ध्व॒र्यू इति॑ । वृ॒ष॒भासः॑ । अद्र॑यः । वृष॑णम् । सोम॑म् । वृ॒ष॒भाय॑ । सु॒स्व॒ति

७६. मण्डलम् २, सूक्तम् १८, मन्त्रः १ (ऋक्सङ्ख्या : २१८५)
वाक्यम् १: प्रा॒ता रथो॒ नवो॑ योजि॒ सस्मि॒श्चतु॑र्युगस्त्रिकु॒शः स॒प्तर॑श्मिः ।
पदानि : प्रा॒तरिति॑ । रथः॑ । नवः॑ । योजि॒ । सस्मि॑न् । चतुः॑ऽयुगः । त्रि॒ऽकु॒शः । स॒प्त॒ऽर॑श्मिः
वाक्यम् २: दशा॑रित्रो मनु॒ष्यः॑ स्व॒र्षाः स इ॒ष्टिभि॑र्म॒तिभी॒ रंह्यो॑ भूत् ॥
पदानि : दश॑ऽअरित्रः । म॒नु॒ष्यः॑ । स्वः॒ऽसाः । सः । इ॒ष्टिऽभिः॑ । म॒तिऽभिः॑ । रंह्यः॑ । भूत्

७७. मण्डलम् २, सूक्तम् २१, मन्त्रः ५ (ऋक्सङ्ख्या : २२१६)
वाक्यम् १: य॒ज्ञेन॑ गा॒तुम॒प्तुरो॑ विविद्रि॒रे धियो॑ हिन्वा॒ना उ॒शिजो॑ मनी॒षिणः॑ ।
पदानि : य॒ज्ञेन॑ । गा॒तुम् । अ॒प्ऽतुरः॑ । वि॒वि॒द्रि॒रे । धियः॑ । हि॒न्वा॒नाः । उ॒शिजः॑ । म॒नी॒षिणः॑
वाक्यम् २: अ॒भि॒स्वरा॑ नि॒षदा॒ गा अ॑व॒स्यव॒ इन्द्रे॑ हिन्वा॒ना द्रवि॑णान्याशत ॥
पदानि : अ॒भि॒ऽस्वरा॑ । नि॒ऽसदा॑ । गाः । अ॒व॒स्यवः॑ । इन्द्रे॑ । हि॒न्वा॒नाः । द्रवि॑णानि । आ॒श॒त

७८. मण्डलम् २, सूक्तम् २१, मन्त्रः ६ (ऋक्सङ्ख्या : २२१७)
वाक्यम् १: इन्द्र॒ श्रेष्ठा॑नि॒ द्रवि॑णानि धेहि॒ चित्ति॑ं दक्ष॑स्य सुभग॒त्वम॒स्मे ।
पदानि : इन्द्र॑ । श्रेष्ठा॑नि । द्रवि॑णानि । धे॒हि॒ । चित्ति॑म् । दक्ष॑स्य । सु॒भ॒ग॒ऽत्वम् । अ॒स्मे इति॑
वाक्यम् २: पोष॑ं रयी॒णामरि॑ष्टिं त॒नूना॑ं स्वा॒द्मान॑ं वा॒चः सु॑दि॒नत्वमह्ना॑म् ॥
पदानि : पोष॑म् । र॒यी॒णाम् । अरि॑ष्टिम् । त॒नूना॑म् । स्वा॒द्मान॑म् । वा॒चः । सु॒दि॒नऽत्वम् । अह्ना॑म्

७९. मण्डलम् २, सूक्तम् २७, मन्त्रः ७ (ऋक्सङ्ख्या : २२७२)
वाक्यम् १: पिपर्तु नो अदितीं राजपुत्रातिं द्वेषांस्यर्यमा सुगेभिः ।
पदानि : पिपर्तु । नः । अदितिः । राजऽपुत्रा । अतिं । द्वेषांसि । अर्यमा । सुऽगेभिः
वाक्यम् २: बृहन्मित्रस्य वरुणस्य शर्मोप स्याम पुरुवीरा अरिष्टाः ॥
पदानि : बृहत् । मित्रस्य । वरुणस्य । शर्म । उप । स्याम । पुरुऽवीराः । अरिष्टाः

८०. मण्डलम् २, सूक्तम् ३०, मन्त्रः ८ (ऋक्सङ्ख्या : २३०८)
वाक्यम् १: सरस्वति त्वमस्माँ अविड्ढि मरुत्वती धृषती जेषि शत्रून् ।
पदानि : सरस्वति । त्वम् । अस्मान् । अविड्ढि । मरुत्वती । धृषती । जेषि । शत्रून्
वाक्यम् २: त्यं चिच्छर्धन्तं तविषीयमाणमिन्द्रो हन्ति वृषभं शण्डिकानाम् ॥
पदानि : त्यम् । चित् । शर्धन्तम् । तविषीऽयमाणम् । इन्द्रः । हन्ति । वृषभम् । शण्डिकानाम्

८१. मण्डलम् २, सूक्तम् ३३, मन्त्रः ६ (ऋक्सङ्ख्या : २३३२)
वाक्यम् १: उन्मा ममन्द वृषभो मरुत्वान्त्वक्षीयसा वयसा नाधमानम् ।
पदानि : उत् । मा । ममन्दु । वृषभः । मरुत्वान् । त्वक्षीयसा । वयसा । नाधमानम्
वाक्यम् २: घृणीव च्छायामरपा अशीया विवासेयं रुद्रस्य सुम्नम् ॥
पदानि : घृणिऽइव । छायाम् । अरपाः । अशीय । आ । विवासेयम् । रुद्रस्य । सुम्नम्

८२. मण्डलम् २, सूक्तम् ३८, मन्त्रः १० (ऋक्सङ्ख्या : २३९३)
वाक्यम् १: भगं धियं वाजयन्तः पुरंधिं नराशंसो ग्नास्पतिर्नो अव्याः ।
पदानि : भगम् । धियम् । वाजयन्तः । पुरम्ऽधिम् । नराशंसः । ग्नाःपतिः । नः । अव्याः
वाक्यम् २: आये वामस्य संगथे रयीणां प्रिया देवस्य सवितुः स्याम ॥
पदानि : आऽअये । वामस्य । सम्ऽगथे । रयीणाम् । प्रियाः । देवस्य । सवितुः । स्याम

८३. मण्डलम् २, सूक्तम् ३९, मन्त्रः ३ (ऋक्सङ्ख्या : २३९७)
वाक्यम् १: शृङ्गेव नः प्रथमा गन्तमर्वाक्छफाविव जर्भुराणा तरोभिः ।
पदानि : शृङ्गाऽइव । नः । प्रथमा । गन्तम् । अर्वाक् । शफौऽइव । जर्भुराणा । तरःऽभिः
वाक्यम् २: चक्रवाकेव प्रति वस्तोरुस्रावार्वाञ्चा यातं रथ्येव शक्रा ॥
पदानि : चक्रवाकाऽइव । प्रति । वस्तोः । उस्रा । अर्वाञ्चा । यातम् । रथ्याऽइव । शक्रा

८४. मण्डलम् २, सूक्तम् ३९, मन्त्रः ४ (ऋक्सङ्ख्या : २३९८)
नावेवं नः पारयतं युगेव नभ्येव न उपधीवं प्रधीवं ।
पदानि : नावाऽइव । नः । पारयतम् । युगाऽइव । नभ्याऽइव । नः । उपधी इवेत्युपधीऽइव । प्रधी इवेति प्रधीऽइव
वाक्यम् २: श्वानेव नो अरिषण्या तनूनां खृगलेव विस्रसः पातमस्मान् ॥
पदानि : श्वानाऽइव । नः । अरिषण्या । तनूनाम् । खृगलाऽइव । विऽस्रसः । पातम् । अस्मान्

८५. मण्डलम् २, सूक्तम् ३९, मन्त्रः ६ (ऋक्सङ्ख्या : २४००)
वाक्यम् १: ओष्ठाविव मध्वास्ने वदन्ता स्तनाविव पिप्यतं जीवसे नः ।
पदानि : ओष्ठौऽइव । मधु । आस्ने । वदन्ता । स्तनौऽइव । पिप्यतम् । जीवसे । नः
वाक्यम् २: नासेव नस्तन्वो रक्षितारा कर्णाविव सुश्रुता भूतमस्मे ॥
पदानि : नासाऽइव । नः । तन्वः । रक्षितारा । कर्णौऽइव । सुऽश्रुता । भूतम् । अस्मे इति

८६. मण्डलम् २, सूक्तम् ४०, मन्त्रः २ (ऋक्सङ्ख्या : २४०४)
वाक्यम् १: इ॒मौ दे॒वौ जाय॑मानौ जुषन्ते॒मौ तमाँ॑सि गूहत॒ामजु॑ष्टा।
पदानि : इ॒मौ। दे॒वौ। जाय॑मानौ। जुष॒न्त॒। इ॒मौ। तमाँ॑सि। गूहता॑म्। अजु॑ष्टा
वाक्यम् २: आ॒भ्यामिन्द्र॑: प॒क्वमा॒मास्व॒न्तः सोमापूषभ्यां॑ जनदु॒स्रिया॑सु॥
पदानि : आ॒भ्याम्। इन्द्र॑:। प॒क्वम्। आ॒मासु॑। अ॒न्तरिति॑। सोमा॒पूष॑भ्याम्। ज॒न॒त्। उ॒स्रिया॑सु

८७. मण्डलम् २, सूक्तम् ४०, मन्त्रः ५ (ऋक्सङ्ख्या : २४०७)
वाक्यम् १: विश्वा॑न्य॒न्यो भुव॑ना ज॒जान॒ विश्व॑म॒न्यो अ॑भि॒चक्षा॑ण एति।
पदानि : विश्वा॑नि। अ॒न्यः। भुव॑ना। ज॒जान॑। विश्व॑म्। अ॒न्यः। अ॒भि॒ऽचक्षा॑णः। एति॒
वाक्यम् २: सोमा॑पूषणा॒ववं॑तं॒ धियं॑ मे युवा॒भ्यां॒ विश्वा॒: पृत॑ना जयेम॥
पदानि : सोमा॑पूषणौ। अव॑तम्। धिय॑म्। मे॒। यु॒वा॒भ्या॒म्। विश्वा॑:। पृत॑नाः। ज॒येम॒

८८. मण्डलम् ३, सूक्तम् १, मन्त्रः ७ (ऋक्सङ्ख्या : २४४२)
वाक्यम् १: स्ती॒र्णा अ॑स्य सं॒हतो॑ वि॒श्वरू॑पा घृ॒तस्य॒ योनौ॑ स्र॒वथे॒ मधू॑नाम्।
पदानि : स्ती॒र्णाः। अ॒स्य॒। स॒म्ऽहत॑:। वि॒श्वऽरू॑पाः। घृ॒तस्य॑। योनौ॑। स्र॒वथे॑। मधू॑नाम्
वाक्यम् २: अस्थु॒रत्रं॒ धे॒नव॒: पिन्व॑माना म॒ही दु॒स्मस्य॑ मा॒तरा॑ सम॒ीची॥
पदानि : अस्थु॑:। अत्र॑। धे॒नव॑:। पिन्व॑मानाः। म॒ही इति॑। दु॒स्मस्य॑। मा॒तरा॑। स॒म॒ीची इति॑ स॒म्ऽई॒ची

८९. मण्डलम् ३, सूक्तम् १, मन्त्रः १८ (ऋक्सङ्ख्या : २४५३)
वाक्यम् १: नि दु॑रो॒णे अ॒मृतो॒ मर्त्या॑नां॒ राजा॑ ससाद वि॒दथा॑नि॒ साध॑न्।
पदानि : नि। दु॒रो॒णे। अ॒मृत॑:। मर्त्या॑नाम्। राजा॑। स॒सा॒द॒। वि॒दथा॑नि। साध॑न्
वाक्यम् २: घृ॒तप्र॑तीक उर्वि॒या व्य॑द्यौदु॒ग्निर्विश्वा॑नि॒ काव्या॑नि वि॒द्वान्॥
पदानि : घृ॒तऽप्र॑तीकः। उ॒र्वि॒या। वि। अ॒द्यौ॒त्। अ॒ग्निः। विश्वा॑नि। काव्या॑नि। वि॒द्वान्

९०. मण्डलम् ३, सूक्तम् २, मन्त्रः ४ (ऋक्सङ्ख्या : २४६२)
वाक्यम् १: आ म॒न्द्रस्य॑ सनि॒ष्यन्तो॒ वरे॑ण्यं॒ वृणी॒महे॒ अह्र॑यं॒ वाज॑मृ॒ग्मिय॑म्।
पदानि : आ। म॒न्द्रस्य॑। स॒नि॒ष्यन्त॑:। वरे॑ण्यम्। वृ॒णी॒महे॑। अह्र॑यम्। वाज॑म्। ऋ॒ग्मिय॑म्
वाक्यम् २: रा॒तिं भृगू॑णामुशिजं॑ क॒विक्र॑तुम॒ग्निं राज॑न्तं॒ दिव्ये॑न॒ शो॒चिषा॑॥
पदानि : रा॒तिम्। भृगू॑णाम्। उ॒शिज॑म्। क॒विऽक्र॑तुम्। अ॒ग्निम्। राज॑न्तम्। दि॒व्ये॑न। शो॒चिषा॑

९१. मण्डलम् ३, सूक्तम् ५, मन्त्रः १ (ऋक्सङ्ख्या : २४९६)
वाक्यम् १: प्र॒त्य॒ग्निरु॒षस॒श्चेकि॑ता॒नोऽबो॑धि॒ विप्र॑: पद॒वीः क॑वी॒नाम्।
पदानि : प्रति॑। अ॒ग्निः। उ॒षस॑:। चेकि॑तानः। अबो॑धि। विप्र॑:। प॒दु॒ऽवीः। क॒वी॒नाम्
वाक्यम् २: पृ॒थु॒पाजा॑ देव॒यद्भि॒: सम्इद्धो॑ऽप॒ द्वारा॒ तम॑सो वह्नि॒रावः॥
पदानि : पृ॒थु॒ऽपाजा॑:। दे॒व॒यत्ऽभि॑:। सम्ऽइ॑द्धः। अप॑। द्वारा॑। तम॑सः। व॒ह्नि॒:। आ॒व॒रित्या॑वः

९२. मण्डलम् ३, सूक्तम् ५, मन्त्रः ७ (ऋक्सङ्ख्या : २५०२)
वाक्यम् १: आ योनिं॑म॒ग्निर्घृ॒तव॑न्तमस्था॒त्पृथु॒प्रगा॑णमु॒शन्त॑मु॒शा॒नः।
पदानि : आ। योनि॑म्। अ॒ग्निः। घृ॒तऽव॑न्तम्। अ॒स्था॒त्। पृ॒थु॒ऽप्रगा॑नम्। उ॒शन्त॑म्। उ॒शा॒नः

वाक्यम् २: दीद्यानः शुचिर्ऋष्वः पावकः पुनःपुनर्मातरा नव्यसी कः ॥
पदानि : दीद्यानः । शुचिः । ऋष्वः । पावकः । पुनःऽपुनः । मातरा । नव्यसी इति । करिति कः

९३. मण्डलम् ३, सूक्तम् ७, मन्त्रः ५ (ऋक्सङ्ख्या : २५२२)
वाक्यम् १: जानन्ति वृष्णो अरुषस्य शेवमुत ब्रध्नस्य शासने रणन्ति ।
पदानि : जानन्ति । वृष्णः । अरुषस्य । शेवम् । उत । ब्रध्नस्य । शासने । रणन्ति
वाक्यम् २: दिवोरुचः सुरुचो रोचमाना इळा येषां गण्या माहिना गीः ॥
पदानि : दिवःऽरुचः । सुऽरुचः । रोचमानाः । इळा । येषाम् । गण्या । माहिना । गीः

९४. मण्डलम् ३, सूक्तम् ८, मन्त्रः ११ (ऋक्सङ्ख्या : २५३९)
वाक्यम् १: वनस्पते शतवल्शो वि रोह सहस्रवल्शा वि वयं रुहेम ।
पदानि : वनस्पते । शतऽवल्शः । वि । रोह । सहस्रऽवल्शाः । वि । वयम् । रुहेम
वाक्यम् २: यं त्वामयं स्वधितिस्तेजमानः प्रणिनाय महते सौभगाय ॥
पदानि : यम् । त्वाम् । अयम् । स्वऽधितिः । तेजमानः । प्रऽनिनाय । महते । सौभगाय

९५. मण्डलम् ३, सूक्तम् १५, मन्त्रः १ (ऋक्सङ्ख्या : २५९०)
वाक्यम् १: वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः ।
पदानि : वि । पाजसा । पृथुना । शोशुचानः । बाधस्व । द्विषः । रक्षसः । अमीवाः
वाक्यम् २: सुशर्मणो बृहतः शर्मणि स्यामग्नेरहं सुहवस्य प्रणीतौ ॥
पदानि : सुऽशर्मणः । बृहतः । शर्मणि । स्याम् । अग्नेः । अहम् । सुऽहवस्य । प्रऽनीतौ

९६. मण्डलम् ३, सूक्तम् १६, मन्त्रः २ (ऋक्सङ्ख्या : २५९८)
वाक्यम् १: इमं नरो मरुतः सश्चता वृधं यस्मिन्रायः शेवृधासः ।
पदानि : इमम् । नरः । मरुतः । सश्चत । वृधम् । यस्मिन् । रायः । शेऽवृधासः
वाक्यम् २: अभि ये सन्ति पृतनासु दूढ्यो विश्वाहा शत्रुमादभुः ॥
पदानि : अभि । ये । सन्ति । पृतनासु । दुःऽध्यः । विश्वाहा । शत्रुम् । आऽदभुः

९७. मण्डलम् ३, सूक्तम् १७, मन्त्रः ४ (ऋक्सङ्ख्या : २६०६)
वाक्यम् १: अग्निं सुदीतिं सुदृशं गृणन्तो नमस्यामस्त्वेड्यं जातवेदः ।
पदानि : अग्निम् । सुऽदीतिम् । सुऽदृशम् । गृणन्तः । नमस्यामः । त्वा । ईड्यम् । जातऽवेदः
वाक्यम् २: त्वां दूतमरतिं हव्यवाहं देवा अकृण्वन्नमृतस्य नाभिम् ॥
पदानि : त्वाम् । दूतम् । अरतिम् । हव्यऽवाहम् । देवाः । अकृण्वन् । अमृतस्य । नाभिम्

९८. मण्डलम् ३, सूक्तम् १८, मन्त्रः ३ (ऋक्सङ्ख्या : २६१०)
वाक्यम् १: इध्मेनाग्न इच्छमानो घृतेन जुहोमि हव्यं तरसे बलाय ।
पदानि : इध्मेन । अग्ने । इच्छमानः । घृतेन । जुहोमि । हव्यम् । तरसे । बलाय
वाक्यम् २: यावदीशे ब्रह्मणा वन्दमान इमां धियं शतसेयाय देवीम् ॥
पदानि : यावत् । ईशे । ब्रह्मणा । वन्दमानः । इमाम् । धियम् । शतऽसेयाय । देवीम्

९९. मण्डलम् ३, सूक्तम् २१, मन्त्रः ४ (ऋक्सङ्ख्या : २६२६)

वाक्यम् १: तुभ्यँ श्चोतन्त्यध्रिगो शचीवः स्तोकासो॑ अग्ने मेद॑सो घृतस्य॑ ।
पदानि : तुभ्य॑म् । श्चोत॒न्ति॒ । अ॒ध्रि॒गो॒ इत्य॑ध्रिऽगो । श॒ची॒ऽव॒: । स्तो॒कास॑: । अ॒ग्ने॒ । मेद॑स: । घृ॒तस्य॑

वाक्यम् २: क॒वि॒ऽश॒स्तो बृ॑हता भा॒नुना॑गा॑ ह॒व्या जु॑षस्व मेधिर ॥
पदानि : क॒वि॒ऽश॒स्त॒: । बृ॒ह॒ता । भा॒नुना॑ । आ । अ॒गा॒: । ह॒व्या । जु॒ष॒स्व॒ । मे॒धि॒र॒

१००. मण्डलम् ३, सूक्तम् २३, मन्त्रः १ (ऋक्सङ्ख्या : २६३३)

वाक्यम् १: निर्म॑थित॒: सुधि॑त॒ आ स॒धस्थे॒ युवा॑ क॒विर॑ध्व॒रस्य॑ प्रणे॒ता ।
पदानि : नि॒:ऽम॑थित॒: । सु॒ऽधि॒त॒: । आ । स॒धऽस्थे॑ । युवा॑ । क॒वि॒: । अ॒ध्व॒रस्य॑ । प्र॒ऽने॒ता

वाक्यम् २: जूर्य॑त्स्व॒ग्नि॒र॒जरो॒ वने॒ष्वत्रा॑ दधे अ॒मृत॑ं जा॒तवे॑दाः ॥
पदानि : जूर्य॑त्ऽसु । अ॒ग्नि॒: । अ॒जर॑: । वने॑षु । अत्र॑ । दु॒धे॒ । अ॒मृत॑म् । जा॒तऽवे॑दा॒: ।

१०१. मण्डलम् ३, सूक्तम् २३, मन्त्रः ३ (ऋक्सङ्ख्या : २६३५)

वाक्यम् १: दश॒ क्षिप॑: पू॒र्व्यं सी॑मजीजन॒न्त्सुजा॑तं मा॒तृषु॑ प्रि॒यम् ।
पदानि : दश॑ । क्षिप॑: । पू॒र्व्यम् । सी॒म् । अ॒जी॒ज॒न॒न् । सु॒ऽजा॑तम् । मा॒तृषु॑ । प्रि॒यम्

वाक्यम् २: अ॒ग्निं स्तु॑हि दैव॒वा॑तं देवश्रव॒ो यो जना॑ना॒मस॑द्वशी ॥
पदानि : अ॒ग्निम् । स्तु॒हि॒ । दै॒व॒ऽवा॒तम् । दे॒व॒ऽश्र॒व॒: । य॒: । जना॑नाम् । अस॑त् । व॒शी

१०२. मण्डलम् ३, सूक्तम् २९, मन्त्रः ३ (ऋक्सङ्ख्या : २६८०)

वाक्यम् १: उ॒त्ता॒नाया॒मव॑ भरा चिकि॒त्वान्त्सद्यः प्रवी॑ता॒ वृष॑णं जजान ।
पदानि : उ॒त्ता॒नाया॑म् । अव॑ । भ॒र॒ । चि॒कि॒त्वान् । स॒द्य॒: । प्र॒ऽवी॑ता । वृष॑णम् । ज॒जा॒न॒

वाक्यम् २: अ॒रु॒षस्तू॑पो॒ रुश॑दस्य॒ पाज॒ इळा॑यास्पु॒त्रो व॒युने॑ऽजनिष्ट ॥
पदानि : अ॒रु॒षऽस्तू॑प: । रुश॑त् । अ॒स्य॒ । पाज॑: । इळा॑या: । पु॒त्र: । व॒युने॑ । अ॒ज॒नि॒ष्ट॒

१०३. मण्डलम् ३, सूक्तम् २९, मन्त्रः ९ (ऋक्सङ्ख्या : २६८६)

वाक्यम् १: कृ॒णोत॑ धू॒मं वृष॑णं सखा॒योऽस्ने॑धन्त इतन॒ वाज॒मच्छ॑ ।
पदानि : कृ॒णोत॑ । धू॒मम् । वृष॑णम् । स॒खा॒य॒: । अस्ने॑धन्त॒: । इ॒त॒न॒ । वाज॑म् । अच्छ॑

वाक्यम् २: अ॒यम॒ग्निः पृ॑तना॒षाट् सु॒वीरो॒ येन॑ दे॒वासो॒ अस॑हन्त दस्यू॑न् ॥
पदानि : अ॒यम् । अ॒ग्नि॒: । पृ॒त॒ना॒षाट् । सु॒ऽवीर॑: । येन॑ । दे॒वास॑: । अस॑हन्त । दस्यू॑न्

१०४. मण्डलम् ३, सूक्तम् २९, मन्त्रः ११ (ऋक्सङ्ख्या : २६८८)

वाक्यम् १: तनू॒नपा॑दुच्यते॒ गर्भ आसु॒रो नरा॒शंसो॑ भवति॒ यद्वि॒जाय॑ते ।
पदानि : तनू॑ऽनपात् । उ॒च्य॒ते॒ । गर्भ॑: । आ॒सु॒र॒: । नरा॒शंस॑: । भ॒व॒ति॒ । यत् । वि॒ऽजाय॑ते

वाक्यम् २: मा॒त॒रिश्वा॒ यदमि॑मीत मा॒तरि॒ वात॑स्य॒ सर्गो॑ अभव॒त्सरी॑मणि ॥
पदानि : मा॒त॒रिश्वा॑ । यत् । अमि॑मीत । मा॒तरि॑ । वात॑स्य । सर्ग॑: । अ॒भ॒व॒त् । सरी॑मणि

१०५. मण्डलम् ३, सूक्तम् ३०, मन्त्रः ८ (ऋक्सङ्ख्या : २७०१)

वाक्यम् १: स॒हदा॑नुं पुरुहूत क्षि॒यन्त॑महस्तमिन्द्र सं पि॑ण॒क्कुणा॑रुम् ।
पदानि : स॒हऽदा॑नुम् । पु॒रु॒ऽहू॒त॒ । क्षि॒यन्त॑म् । अ॒ह॒स्त॒म् । इ॒न्द्र॒ । सम् । पि॒ण॒क् । कुणा॑रुम्

वाक्यम् २: अ॒भि वृ॒त्रं वर्ध॑मानं॒ पिया॑रुमपा॒दम॑न्द्र त॒वसा॑ जघन्थ ॥
पदानि : अ॒भि । वृ॒त्रम् । वर्ध॑मानम् । पिया॑रुम् । अ॒पा॒दम् । इ॒न्द्र॒ । त॒वसा॑ । ज॒घ॒न्थ॒

१०६. मण्डलम् ३, सूक्तम् ३०, मन्त्रः २२ (ऋक्सङ्ख्या : २७१५)
वाक्यम् १: शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
पदानि : शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् । वाजऽसातौ
वाक्यम् २: शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥
पदानि : शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् । वृत्राणि । सम्ऽजितम् । धनानाम्

१०७. मण्डलम् ३, सूक्तम् ३१, मन्त्रः १३ (ऋक्सङ्ख्या : २७२८)
वाक्यम् १: मही यदि धिषणा शिश्नथे धात्सद्योवृधं विभ्वं१ रोदस्योः ।
पदानि : मही । यदि । धिषणा । शिश्नथे । धात् । सद्यःऽवृधम् । विऽभ्वम् । रोदस्योः
वाक्यम् २: गिरो यस्मिन्ननवद्याः समीचीर्विश्वा इन्द्राय तविषीरनुत्ताः ॥
पदानि : गिरः । यस्मिन् । अनवद्याः । सम्ऽईचीः । विश्वाः । इन्द्राय । तविषीः । अनुत्ताः

१०८. मण्डलम् ३, सूक्तम् ३३, मन्त्रः ४ (ऋक्सङ्ख्या : २७५८)
वाक्यम् १: एना वयं पयसा पिन्वमाना अनु योनिं देवकृतं चरन्तीः ।
पदानि : एना । वयम् । पयसा । पिन्वमानाः । अनु । योनिम् । देवऽकृतम् । चरन्तीः
वाक्यम् २: न वर्तवे प्रसवः सर्गतक्तः किंयुर्विप्रो नद्यो जोहवीति ॥
पदानि : न । वर्तवे । प्रऽसवः । सर्गऽतक्तः । किम्ऽयुः । विप्रः । नद्यः । जोहवीति

१०९. मण्डलम् ३, सूक्तम् ३४, मन्त्रः ३ (ऋक्सङ्ख्या : २७७०)
वाक्यम् १: इन्द्रो वृत्रमवृणोच्छर्धनीतिः प्र मायिनाममिनाद्वर्पणीतिः ।
पदानि : इन्द्रः । वृत्रम् । अवृणोत् । शर्धऽनीतिः । प्र । मायिनाम् । अमिनात् । वर्पऽनीतिः
वाक्यम् २: अहन्व्यंसमुशधग्वनेष्वाविर्धेना अकृणोद्राम्याणाम् ॥
पदानि : अहन् । विऽअंसम् । उशधक् । वनेषु । आविः । धेनाः । अकृणोत् । राम्याणाम्

११०. मण्डलम् ३, सूक्तम् ३४, मन्त्रः ७ (ऋक्सङ्ख्या : २७७४)
वाक्यम् १: युधेन्द्रो मह्ना वरिवश्चकार देवेभ्यः सत्पतिश्चर्षणिप्राः ।
पदानि : युधा । इन्द्रः । मह्ना । वरिवः । चकार । देवेभ्यः । सत्ऽपतिः । चर्षणिऽप्राः
वाक्यम् २: विवस्वतः सदने अस्य तानि विप्रा उक्थेभिः कवयो गृणन्ति ॥
पदानि : विवस्वतः । सदने । अस्य । तानि । विप्राः । उक्थेभिः । कवयः । गृणन्ति

१११. मण्डलम् ३, सूक्तम् ३६, मन्त्रः २ (ऋक्सङ्ख्या : २७९१)
वाक्यम् १: इन्द्राय सोमाः प्रदिवो विदाना ऋभुर्येभिर्वृषपर्वा विहायाः ।
पदानि : इन्द्राय । सोमाः । प्रऽदिवः । विदानाः । ऋभुः । येभिः । वृषऽपर्वा । विऽहायाः
वाक्यम् २: प्रयम्यमानान्प्रति षू गृभायेन्द्र पिब वृषधूतस्य वृष्णः ॥
पदानि : प्रऽयम्यमानान् । प्रति । सु । गृभाय । इन्द्र । पिब । वृषऽधूतस्य । वृष्णः

११२. मण्डलम् ३, सूक्तम् ३८, मन्त्रः ६ (ऋक्सङ्ख्या : २८१७)
वाक्यम् १: त्रीणि राजाना विदथे पुरूणि परि विश्वानि भूषथः सदांसि ।
पदानि : त्रीणि । राजाना । विदथे । पुरूणि । परि । विश्वानि । भूषथः । सदांसि
वाक्यम् २: अपश्यमत्र मनसा जगन्वान्व्रते गन्धर्वाँ अपि वायुकेशान् ॥

पदानि : अप॑श्यम्। अत्र॑। मन॑सा। ज॒ग॒न्वान्। व्र॒ते। ग॒न्ध॒र्वान्। अपि॑। वा॒युऽके॑शान्

११३. मण्डलम् ३, सूक्तम् ३९, मन्त्रः ७ (ऋक्सङ्ख्या : २८२८)
वाक्यम् १: ज्योति॑र्वृणीत॒ तम॑सो विजा॒नन्नारे स्या॑म दुरि॒तादभी॑के।
पदानि : ज्योतिः॑। वृ॒णी॒त॒। तम॑सः। वि॒ऽज॒ान॒न्। आ॒रे। स्या॒म॒। दुः॒ऽइ॒तात्। अ॒भी॑के
वाक्यम् २: इ॒मा गिर॑: सोमपाः सोमवृद्ध जुषस्वेन्द्र पुरुत॒मस्य॑ का॒रोः॥
पदानि : इ॒माः। गिरः॑। सो॒म॒ऽपाः॒। सो॒म॒ऽवृ॒द्ध॒। जु॒ष॒स्व॒। इ॒न्द्र॒। पु॒रु॒ऽत॒मस्य॑। का॒रोः

११४. मण्डलम् ३, सूक्तम् ४५, मन्त्रः ४ (ऋक्सङ्ख्या : २८७४)
वाक्यम् १: आ न॒स्तुजं॑ र॒यिं भ॒रांशं॒ न प्र॑तिजान॒ते।
पदानि : आ। नः॒। तुज॑म्। र॒यिम्। भ॒र॒। अंश॑म्। न। प्र॒ति॒ऽज॒ा॒न॒ते
वाक्यम् २: वृ॒क्षं प॒क्वं फल॑म॒ङ्कीव॑ धूनुहीन्द्र॒ सं॒पार॑णं॒ वसु॑॥
पदानि : वृ॒क्षम्। प॒क्वम्। फल॑म्। अ॒ङ्कीऽइ॑व। धू॒नु॒हि॒। इ॒न्द्र॒। स॒म्ऽपार॑णम्। वसु॑

११५. मण्डलम् ३, सूक्तम् ५१, मन्त्रः ३ (ऋक्सङ्ख्या : २९०३)
वाक्यम् १: आ॒क॒रे वसो॑र्जरि॒ता प॑नस्यतेऽने॒हसः॒ स्तुभ॒ इन्द्रो॑ दुवस्यति।
पदानि : आ॒ऽक॒रे। वसोः॑। ज॒रि॒ता। प॒न॒स्य॒ते॒। अ॒ने॒हसः॑। स्तुभः॑। इन्द्रः॑। दु॒व॒स्य॒ति॒
वाक्यम् २: वि॒वस्व॑तः॒ सद॑न॒ आ हि पिं॑प्रि॒ये स॑त्रा॒साह॑मभिमाति॒हनं॑ स्तुहि॥
पदानि : वि॒वस्व॑तः। सद॑ने। आ। हि। पि॒प्रि॒ये। स॒त्रा॒ऽसह॑म्। अ॒भि॒मा॒ति॒ऽहन॑म्। स्तु॒हि॒

११६. मण्डलम् ३, सूक्तम् ५२, मन्त्रः ६ (ऋक्सङ्ख्या : २९१८)
वाक्यम् १: तृ॒तीये॑ धा॒नाः सव॑ने पुरुष्टुत पुरो॒ळाश॒माहु॑तं मामहस्व नः।
पदानि : तृ॒तीये॑। धा॒नाः। सव॑ने। पु॒रु॒ऽस्तु॒त॒। पु॒रो॒ळाश॑म्। आऽहु॑तम्। म॒म॒ह॒स्व॒। नः॒
वाक्यम् २: ऋ॒भुम॑न्तं॒ वाज॑वन्तं त्वा कवे॒ प्रय॑स्वन्त॒ उप॑ शिक्षेम धी॒तिभिः॑॥
पदानि : ऋ॒भु॒ऽम॑न्तम्। वाज॑ऽवन्तम्। त्वा॒। क॒वे॒। प्रय॑स्वन्तः। उप॑। शि॒क्षे॒म॒। धी॒तिऽभिः॑

११७. मण्डलम् ३, सूक्तम् ५२, मन्त्रः ८ (ऋक्सङ्ख्या : २९२०)
वाक्यम् १: प्रति॑ धा॒ना भ॑रत॒ तूय॑मस्मै पुरो॒ळाश॑ं वी॒रत॑माय नृ॒णाम्।
पदानि : प्रति॑। धा॒नाः। भ॒र॒त॒। तूय॑म्। अ॒स्मै॒। पु॒रो॒ळाश॑म्। वी॒रऽत॑माय। नृ॒णाम्
वाक्यम् २: दि॒वेदि॑वे सदृ॒शीरि॑न्द्र तुभ्यं॒ वर्ध॑न्तु त्वा सोम॒पेया॑य धृष्णो॥
पदानि : दि॒वेऽदि॑वे। स॒ऽदृ॒शीः॑। इ॒न्द्र॒। तु॒भ्य॑म्। वर्ध॑न्तु। त्वा॒। सो॒म॒ऽपेया॑य। धृ॒ष्णो॒ इति॑

११८. मण्डलम् ३, सूक्तम् ५३, मन्त्रः १ (ऋक्सङ्ख्या : २९२१)
वाक्यम् १: इन्द्रा॑पर्वता बृह॒ता रथे॑न वा॒मीरि॑ष॒ आ व॑हतं सु॒वीराः॑।
पदानि : इन्द्रा॑पर्वता। बृ॒ह॒ता। रथे॑न। वा॒मीः। इ॒षः॑। आ। व॒ह॒त॒म्। सु॒ऽवीराः॑
वाक्यम् २: वी॒तं ह॒व्यान्य॑ध्व॒रेषु॑ देवा॒ वर्धे॑थां गी॒र्भिरि॑ळ॑या मद॑न्ता॥
पदानि : वी॒तम्। ह॒व्यानि॑। अ॒ध्व॒रेषु॑। दे॒वा॒। वर्धे॑थाम्। गीः॒ऽभिः। इळ॑या। मद॑न्ता

११९. मण्डलम् ३, सूक्तम् ५३, मन्त्रः १८ (ऋक्सङ्ख्या : २९३८)
वाक्यम् १: बल॑ं धेहि त॒नूषु॑ नो॒ बल॑मिन्द्रान॒ळुत्सु॑ नः।

पदानि : बलम्। धेहि। तनूषु। नः। बलम्। इन्द्र। अनळुत्ऽसु। नः
वाक्यम् २: बलं तोकाय तनयाय जीवसे त्वं हि बलदा असि॥
पदानि : बलम्। तोकाय। तनयाय। जीवसे। त्वम्। हि। बलऽदाः। असि

१२०. मण्डलम् ३, सूक्तम् ५४, मन्त्रः ४ (ऋक्सङ्ख्या : २९४८)
वाक्यम् १: उतो हि वां पूर्व्या आविविद्र ऋतावरी रोदसी सत्यवाचः।
पदानि : उतो इति। हि। वाम्। पूर्व्याः। आऽविविद्रे। ऋतवरी इत्यृतऽवरी। रोदसी इति। सत्यऽवाचः
वाक्यम् २: नरश्चिद्वां समिथे शूरसातौ ववन्दिरे पृथिवि वेविदानाः॥
पदानि : नरः। चित्। वाम्। सम्ऽइथे। शूरऽसातौ। ववन्दिरे। पृथिवि। वेविदानाः

१२१. मण्डलम् ३, सूक्तम् ५४, मन्त्रः १४ (ऋक्सङ्ख्या : २९५८)
वाक्यम् १: विष्णुं स्तोमासः पुरुदस्ममर्का भगस्येव कारिणो यामनि ग्मन्।
पदानि : विष्णुम्। स्तोमासः। पुरुऽदस्मम्। अर्काः। भगस्यऽइव। कारिणः। यामनि। ग्मन्
वाक्यम् २: उरुक्रमः ककुहो यस्य पूर्वीर्न मर्धन्ति युवतयो जनित्रीः॥
पदानि : उरुऽक्रमः। ककुहः। यस्य। पूर्वीः। न। मर्धन्ति। युवतयः। जनित्रीः

१२२. मण्डलम् ३, सूक्तम् ५८, मन्त्रः १ (ऋक्सङ्ख्या : ३००३)
वाक्यम् १: धेनुः प्रत्नस्य काम्यं दुहानान्तः पुत्रश्चरति दक्षिणायाः।
पदानि : धेनुः। प्रत्नस्य। काम्यम्। दुहाना। अन्तरिति। पुत्रः। चरति। दक्षिणायाः
वाक्यम् २: आ द्योतनिं वहति शुभ्रयामोषसः स्तोमो अश्विनावजीगः॥
पदानि : आ। द्योतनिम्। वहति। शुभ्रऽयामा। उषसः। स्तोमः। अश्विनौ। अजीगरिति

१२३. मण्डलम् ३, सूक्तम् ६१, मन्त्रः १ (ऋक्सङ्ख्या : ३०२८)
वाक्यम् १: उषो वाजेन वाजिनि प्रचेताः स्तोमं जुषस्व गृणतो मघोनि।
पदानि : उषः। वाजेन। वाजिनि। प्रऽचेताः। स्तोमम्। जुषस्व। गृणतः। मघोनि
वाक्यम् २: पुराणी देवि युवतिः पुरंधिरनु व्रतं चरसि विश्ववारे॥
पदानि : पुराणी। देवि। युवतिः। पुरम्ऽधिः। अनु। व्रतम्। चरसि। विश्वऽवारे

१२४. मण्डलम् ३, सूक्तम् ६१, मन्त्रः २ (ऋक्सङ्ख्या : ३०२९)
वाक्यम् १: उषो देव्यमर्त्या वि भाहि चन्द्ररथा सूनृता ईरयन्ती।
पदानि : उषः। देवि। अमर्त्या। वि। भाहि। चन्द्रऽरथा। सूनृताः। ईरयन्ती
वाक्यम् २: आ त्वा वहन्तु सुयमासो अश्वा हिरण्यवर्णां पृथुपाजसो ये॥
पदानि : आ। त्वा। वहन्तु। सुऽयमासः। अश्वाः। हिरण्यऽवर्णाम्। पृथुऽपाजसः। ये

१२५. मण्डलम् ३, सूक्तम् ६२, मन्त्रः २ (ऋक्सङ्ख्या : ३०३६)
वाक्यम् १: अयमु वां पुरुतमो रयीयञ्छश्वत्तममवसे जोहवीति।
पदानि : अयम्। ऊँ इति। वाम्। पुरुऽतमः। रयिऽयन्। शश्वत्ऽतमम्। अवसे। जोहवीति
वाक्यम् २: सजोषाविन्द्रावरुणा मरुद्भिर्दिवा पृथिव्या शृणुतं हवं मे॥
पदानि : सऽजोषौ। इन्द्रावरुणा। मरुत्ऽभिः। दिवा। पृथिव्या। शृणुतम्। हवम्। मे

१२६. मण्डलम् ४, सूक्तम् २, मन्त्रः १ (ऋक्सङ्ख्या : ३०७३)
वाक्यम् १: यो मर्त्येष्वमृत ऋतावा देवो देवेष्वरतिर्निधायि ।
पदानि : यः । मर्त्येषु । अमृतः । ऋतऽवा । देवः । देवेषु । अरतिः । निऽधायि
वाक्यम् २: होता यजिष्ठो मह्ना शुचध्यै हव्यैरग्निर्मनुष ईरयध्यै ॥
पदानि : होता । यजिष्ठः । मह्ना । शुचध्यै । हव्यैः । अग्निः । मनुषः । ईरयध्यै

१२७. मण्डलम् ४, सूक्तम् २, मन्त्रः १७ (ऋक्सङ्ख्या : ३०८९)
वाक्यम् १: सुकर्माणः सुरुचो देवयन्तोऽयो न देवा जनिमा धमन्तः ।
पदानि : सुऽकर्माणः । सुऽरुचः । देवऽयन्तः । अयः । न । देवाः । जनिम । धमन्तः
वाक्यम् २: शुचन्तो अग्निं ववृधन्त इन्द्रमूर्वं गव्यं परिषदन्तो अग्मन् ॥
पदानि : शुचन्तः । अग्निम् । ववृधन्तः । इन्द्रम् । ऊर्वम् । गव्यम् । परिऽसदन्तः । अग्मन्

१२८. मण्डलम् ४, सूक्तम् २, मन्त्रः १९ (ऋक्सङ्ख्या : ३०९१)
वाक्यम् १: अकर्म ते स्वपसो अभूम ऋतमवस्रन्नुषसो विभातीः ।
पदानि : अकर्म । ते । सुऽअपसः । अभूम । ऋतम् । अवस्रन् । उषसः । विऽभातीः
वाक्यम् २: अनूनमग्निं पुरुधा सुश्चन्द्रं देवस्य मर्मृजतश्चारु चक्षुः ॥
पदानि : अनूनम् । अग्निम् । पुरुधा । सुऽचन्द्रम् । देवस्य । मर्मृजतः । चारु । चक्षुः

१२९. मण्डलम् ४, सूक्तम् ३, मन्त्रः ६ (ऋक्सङ्ख्या : ३०९८)
वाक्यम् १: कद्विष्यासु वृधसानो अग्ने कद्वातायं प्रतवसे शुभ्ये ।
पदानि : कत् । धिष्यासु । वृधसानः । अग्ने । कत् । वाताय । प्रऽतवसे । शुभम्ऽये
वाक्यम् २: परिज्मने नासत्याय क्षे ब्रवः कदग्ने रुद्राय नृघ्ने ॥
पदानि : परिऽज्मने । नासत्याय । क्षे । ब्रवः । कत् । अग्ने । रुद्राय । नृऽघ्ने

१३०. मण्डलम् ४, सूक्तम् ३, मन्त्रः ८ (ऋक्सङ्ख्या : ३१००)
वाक्यम् १: कथा शर्धाय मरुतामृताय कथा सूरे बृहते पृच्छ्यमानः ।
पदानि : कथा । शर्धाय । मरुताम् । ऋताय । कथा । सूरे । बृहते । पृच्छ्यमानः
वाक्यम् २: प्रति ब्रवोऽदितये तुराय साधा दिवो जातवेदश्चिकित्वान् ॥
पदानि : प्रति । ब्रवः । अदितये । तुराय । साध । दिवः । जातऽवेदः । चिकित्वान्

१३१. मण्डलम् ४, सूक्तम् ५, मन्त्रः १ (ऋक्सङ्ख्या : ३१२४)
वाक्यम् १: वैश्वानराय मीळ्हुषे सजोषाः कथा दाशेमाग्नये बृहद्भाः ।
पदानि : वैश्वानराय । मीळ्हुषे । सऽजोषाः । कथा । दाशेम । अग्नये । बृहत् । भाः
वाक्यम् २: अनूनेन बृहता वक्षथेनोप स्तभायदुपमिन्न रोधः ॥
पदानि : अनूनेन । बृहता । वक्षथेन । उप । स्तभायत् । उपऽमित् । न । रोधः

१३२. मण्डलम् ४, सूक्तम् ५, मन्त्रः ५ (ऋक्सङ्ख्या : ३१२८)
वाक्यम् १: अभ्रातरो न योषणो व्यन्तः पतिरिपो न जनयो दुरेवाः ।
पदानि : अभ्रातरः । न । योषणः । व्यन्तः । पतिऽरिपः । न । जनयः । दुःऽएवाः
वाक्यम् २: पापासः सन्तो अनृता असत्या इदं पदमजनता गभीरम् ॥
पदानि : पापासः । सन्तः । अनृताः । असत्याः । इदम् । पदम् । अजनत । गभीरम्

१३३. मण्डलम् ४, सूक्तम् १२, मन्त्रः ३ (ऋक्सङ्ख्या : ३१९३)
वाक्यम् १: अग्निरीशे बृहतः क्षत्रियस्याग्निर्वाजस्य परमस्य रायः ।
पदानि : अग्निः । ईशे । बृहतः । क्षत्रियस्य । अग्निः । वाजस्य । परमस्य । रायः
वाक्यम् २: दधाति रत्नं विधते यविष्ठो व्यानुषङ्मर्त्याय स्वधावान् ॥
पदानि : दधाति । रत्नम् । विधते । यविष्ठः । वि । आनुषक् । मर्त्याय । स्वधाऽवान्

१३४. मण्डलम् ४, सूक्तम् १६, मन्त्रः १५ (ऋक्सङ्ख्या : ३२३१)
वाक्यम् १: इन्द्रं कामा वसूयन्तो अग्मन्त्स्वर्मीळ्हे न सवने चकानाः ।
पदानि : इन्द्रम् । कामाः । वसुऽयन्तः । अग्मन् । स्वःऽमीळ्हे । न । सवने । चकानाः
वाक्यम् २: श्रवस्यवः शशमानासः उक्थैरोको न रण्वा सुदृशीव पुष्टिः ॥
पदानि : श्रवस्यवः । शशमानासः । उक्थैः । ओकः । न । रण्वा । सुदृशीऽइव । पुष्टिः

१३५. मण्डलम् ४, सूक्तम् १७, मन्त्रः ३ (ऋक्सङ्ख्या : ३२४०)
वाक्यम् १: भिनद्गिरिं शवसा वज्रमिष्णन्नाविष्कृण्वानः सहसान ओजः ।
पदानि : भिनत् । गिरिम् । शवसा । वज्रम् । इष्णन् । आविःऽकृण्वानः । सहसानः । ओजः
वाक्यम् २: वधीद्वृत्रं वज्रेण मन्द्रसानः सरन्नापो जवसा हतवृष्णीः ॥
पदानि : वधीत् । वृत्रम् । वज्रेण । मन्द्रसानः । सरन् । आपः । जवसा । हतऽवृष्णीः

१३६. मण्डलम् ४, सूक्तम् १७, मन्त्रः १३ (ऋक्सङ्ख्या : ३२५०)
वाक्यम् १: क्षियन्तं त्वमक्षियन्तं कृणोतीयर्ति रेणु मघवा समोहम् ।
पदानि : क्षियन्तम् । त्वम् । अक्षियन्तम् । कृणोति । इयर्ति । रेणुम् । मघऽवा । सम्ऽओहम् ।
वाक्यम् २: विभञ्जनुरशनिमाँ इव द्यौरुत स्तोतारं मघवा वसौ धात् ॥
पदानि : विऽभञ्जनुः । अशनिमान्ऽइव । द्यौः । उत । स्तोतारम् । मघऽवा । वसौ । धात्

१३७. मण्डलम् ४, सूक्तम् १८, मन्त्रः १० (ऋक्सङ्ख्या : ३२६८)
वाक्यम् १: गृष्टिः ससूव स्थविरं तवागामनाधृष्यं वृषभं तुम्रमिन्द्रम् ।
पदानि : गृष्टिः । ससूव । स्थविरम् । तवागाम् । अनाधृष्यम् । वृषभम् । तुम्रम् । इन्द्रम्
वाक्यम् २: अरीळ्हं वत्सं चरथाय माता स्वयं गातुं तन्वे इच्छमानम् ॥
पदानि : अरीळ्हम् । वत्सम् । चरथाय । माता । स्वयम् । गातुम् । तन्वे । इच्छमानम्

१३८. मण्डलम् ४, सूक्तम् २२, मन्त्रः २ (ऋक्सङ्ख्या : ३३०६)
वाक्यम् १: वृषा वृषन्धिं चतुरश्रिमस्यन्नुग्रो बाहुभ्यां नृतमः शचीवान् ।
पदानि : वृषा । वृषन्धिम् । चतुःऽअश्रिम् । अस्यन् । उग्रः । बाहुऽभ्याम् । नृऽतमः । शचीऽवान् ।
वाक्यम् २: श्रिये परुष्णीमुषमाण ऊर्णां यस्याः पर्वाणि सरव्याय विव्ये ॥
पदानि : श्रिये । परुष्णीम् । उषमाणः । ऊर्णाम् । यस्याः । पर्वाणि । सरव्याय । विव्ये

१३९. मण्डलम् ४, सूक्तम् २२, मन्त्रः ९ (ऋक्सङ्ख्या : ३३१३)
वाक्यम् १: अस्मे वर्षिष्ठा कृणुहि ज्येष्ठा नृम्णानि सत्रा सहुरे सहांसि ।
पदानि : अस्मे इति । वर्षिष्ठा । कृणुहि । ज्येष्ठा । नृम्णानि । सत्रा । सहुरे । सहांसि

वाक्यम् २: अस्मभ्यँ वृत्रा सुहनांनि रन्धि जहि वधंर्वनुषो मर्त्यस्य ॥
पदानि : अस्मभ्यम्। वृत्रा। सुऽहनांनि। रन्धि। जहि। वधः। वनुषः। मर्त्यस्य

१४०. मण्डलम् ४, सूक्तम् २५, मन्त्रः ८ (ऋक्सङ्ख्या : ३३४५)
वाक्यम् १: इन्द्रं परेऽवरे मध्यमास इन्द्रं यान्तोऽवंसितास इन्द्रम्।
पदानि : इन्द्रम्। परे। अवरे। मध्यमासः। इन्द्रम्। यान्तः। अवंऽसितासः। इन्द्रम्
वाक्यम् २: इन्द्रं क्षियन्त उत युध्यमाना इन्द्रं नरो वाजयन्तो हवन्ते ॥
पदानि : इन्द्रम्। क्षियन्तः। उत। युध्यमानाः। इन्द्रम्। नरः। वाजऽयन्तः। हवन्ते

१४१. मण्डलम् ४, सूक्तम् २६, मन्त्रः ६ (ऋक्सङ्ख्या : ३३५१)
वाक्यम् १: ऋजीपी श्येनो ददमानो अंशुं परावतः शकुनो मन्द्रं मदम्।
पदानि : ऋजीपी। श्येनः। ददमानः। अंशुम्। पराऽवतः। शकुनः। मन्द्रम्। मदम्
वाक्यम् २: सोमँ भरद्बृहाणो देवावान्दिवो अमुष्मादुत्तरादादायं ॥
पदानि : सोमम्। भरत्। दृहाणः। देवऽवान्। दिवः। अमुष्मात्। उत्ऽतरात्। आऽदायं

१४२. मण्डलम् ४, सूक्तम् ३९, मन्त्रः ३ (ऋक्सङ्ख्या : ३४९१)
वाक्यम् १: यो अश्वस्य दधिक्राव्णो अकारीत्समिद्धे अग्ना उषसो व्युष्टौ।
पदानि : यः। अश्वस्य। दधिऽक्राव्णः। अकारीत्। सम्ऽइद्धे। अग्नौ। उषसः। विऽउष्टौ
वाक्यम् २: अनागसं तमदितिः कृणोतु स मित्रेण वरुणेना सजोषाः ॥
पदानि : अनागसम्। तम्। अदितिः। कृणोतु। सः। मित्रेण। वरुणेन। सऽजोषाः

१४३. मण्डलम् ४, सूक्तम् ३९, मन्त्रः ५ (ऋक्सङ्ख्या : ३४९३)
वाक्यम् १: इन्द्रमिवेदुभये वि ह्वयन्त उदीराणा यज्ञमुपप्रयन्तः।
पदानि : इन्द्रम्ऽइव। इत्। उभये। वि। ह्वयन्ते। उत्ऽईराणाः। यज्ञम्। उपऽप्रयन्तः
वाक्यम् २: दधिक्रामु सूदनं मर्त्याय ददथुर्मित्रावरुणा नो अश्वम् ॥
पदानि : दधिऽक्राम्। ऊँ इति। सूदनम्। मर्त्याय। ददथुः। मित्रावरुणा। नः। अश्वम्

१४४. मण्डलम् ४, सूक्तम् ४१, मन्त्रः १० (ऋक्सङ्ख्या : ३५०९)
वाक्यम् १: अश्व्यस्य त्मना रथ्यस्य पुष्टेर्नित्यस्य रायः पतयः स्याम।
पदानि : अश्व्यस्य। त्मना। रथ्यस्य। पुष्टेः। नित्यस्य। रायः। पतयः। स्याम
वाक्यम् २: ता चक्राणा ऊतिभिर्नव्यसीभिरस्मत्रा रायो नियुतः सचन्ताम् ॥
पदानि : ता। चक्राणौ। ऊतिऽभिः। नव्यसीभिः। अस्मऽत्रा। रायः। निऽयुतः। सचन्ताम्

१४५. मण्डलम् ४, सूक्तम् ४२, मन्त्रः ५ (ऋक्सङ्ख्या : ३५१५)
वाक्यम् १: मां नरः स्वश्वा वाजयन्तो मां वृताः समरणे हवन्ते।
पदानि : माम्। नरः। सुऽअश्वाः। वाजयन्तः। माम्। वृताः। सम्ऽअरणे। हवन्ते
वाक्यम् २: कृणोम्याजिं मघवाहमिन्द्र इयर्मि रेणुमभिभूत्योजाः ॥
पदानि : कृणोमि। आजिम्। मघऽवा। अहम्। इन्द्रः। इयर्मि। रेणुम्। अभिभूतिऽओजाः

१४६. मण्डलम् ४, सूक्तम् ४२, मन्त्रः १० (ऋक्सङ्ख्या : ३५२०)

वाक्यम् १: रा॒या व॒यं स॑स॒वांसो॑ मदेम ह॒व्येन॑ दे॒वा यव॑सेन॒ गावः॑ ।
पदानि : रा॒या । व॒यम् । स॒स॒ऽवांसः॑ । म॒दे॒म॒ । ह॒व्येन॑ । दे॒वाः । यव॑सेन । गावः॑
वाक्यम् २: तां धे॒नुमिन्द्रावरुणा युवं नो॑ वि॒श्वाहा॑ धत्तमनपस्फुरन्तीम् ॥
पदानि : ताम् । धे॒नुम् । इ॒न्द्रा॒व॒रु॒णा । युव॑म् । नः॒ । वि॒श्वाहा॑ । ध॒त्त॒म् । अन॑पऽस्फुरन्तीम्

१४७. मण्डलम् ४, सूक्तम् ४४, मन्त्रः ४ (ऋक्सङ्ख्या : ३५३१)
वाक्यम् १: हि॒र॒ण्ययेन पुरुभू॒ रथे॑ने॒मं य॒ज्ञं नास॑त्योप॑ यातम् ।
पदानि : हि॒र॒ण्ययेन । पु॒रु॒भू॒ इति॑ पुरुऽभू । रथे॑न । इ॒मम् । य॒ज्ञम् । नास॑त्या । उप॑ । या॒त॒म् ।
वाक्यम् २: पिबा॑थ इन्मधु॒नः सो॒म्यस्य॒ दध॑थो॒ रत्नं॑ विधते॒ जना॑य ॥
पदानि : पिबा॑थः । इत् । मधु॑नः । सो॒म्यस्य॑ । दध॑थः । रत्न॑म् । वि॒ध॒ते । जना॑य

१४८. मण्डलम् ४, सूक्तम् ४५, मन्त्रः ४ (ऋक्सङ्ख्या : ३५३८)
वाक्यम् १: हं॒सासो॒ ये वां॑ मधु॒मन्तो॑ अस्रिधो॒ हिर॑ण्यपर्णा उ॒हुव॑ उष॒र्बुधः॑ ।
पदानि : हं॒सासः॑ । ये । वा॒म् । मधु॑ऽमन्तः । अ॒स्रि॒धः॑ । हिर॑ण्यऽपर्णाः । उ॒हुवः॑ । उ॒षः॒ऽबुधः॑
वाक्यम् २: उ॒द॒प्रुतो॑ म॒न्दिनो॑ मन्दि॒नि॒स्पृशो॒ मध्वो॒ न मक्षः॒ सव॑नानि गच्छथः ॥
पदानि : उ॒द॒ऽप्रुतः॑ । म॒न्दिनः॑ । म॒न्दि॒ऽनि॒स्पृशः॑ । मध्वः॑ । न । मक्षः॑ । सव॑नानि । ग॒च्छ॒थः॒

१४९. मण्डलम् ४, सूक्तम् ४५, मन्त्रः ५ (ऋक्सङ्ख्या : ३५३९)
वाक्यम् १: स्व॒ध्व॒रासो॒ मधु॑मन्तो अ॒ग्नय॑ उ॒स्रा ज॑रन्ते॒ प्रति॒ वस्तो॑र॒श्विना॑ ।
पदानि : सु॒ऽअ॒ध्व॒रासः॑ । मधु॑ऽमन्तः । अ॒ग्नयः॑ । उ॒स्रा । ज॒र॒न्ते॒ । प्रति॑ । वस्तोः॑ । अ॒श्विना॑
वाक्यम् २: यन्नि॒क्तह॑स्तस्त॒रणि॑र्विचक्ष॒णः सोम॑ꣳ सु॒षाव॒ मधु॑मन्तमद्रि॒भिः ॥
पदानि : यत् । नि॒क्तऽह॑स्तः । त॒रणिः॑ । वि॒ऽच॒क्ष॒णः । सोम॑म् । सु॒साव॑ । मधु॑ऽमन्तम् । अ॒द्रि॒ऽभिः

१५०. मण्डलम् ४, सूक्तम् ५०, मन्त्रः २ (ऋक्सङ्ख्या : ३५६५)
वाक्यम् १: धु॒नेत॑यः सु॒प्रके॒तं मद॑न्तो बृह॒स्पते॒ अ॒भि ये नर॑स्तत॒स्रे ।
पदानि : धु॒नऽइ॑तयः । सु॒ऽप्रके॒तम् । मद॑न्तः । बृ॒ह॒स्पते॑ । अ॒भि । ये । नः॒ । त॒त॒स्रे
वाक्यम् २: पृष॑न्तं सृ॒प्रमद॑ब्धमू॒र्वं बृ॑ह॒स्पते॒ रक्ष॑तादस्य॒ योनि॑म् ॥
पदानि : पृष॑न्तम् । सृ॒प्रम् । अद॑ब्धम् । ऊ॒र्वम् । बृ॒ह॒स्पते॑ । रक्ष॑तात् । अ॒स्य॒ । योनि॑म्

१५१. मण्डलम् ४, सूक्तम् ५५, मन्त्रः ६ (ऋक्सङ्ख्या : ३६११)
वाक्यम् १: नू रो॑दसी॒ अहि॑ना बु॒ध्ने॒न स्तु॒वी॒त॒ देवी॒ अप्ये॑भिरि॒ष्टैः ।
पदानि : नु । रो॒द॒सी॒ इति॑ । अहि॑ना । बु॒ध्ने॒न । स्तु॒वी॒त॒ । देवी॒ इति॑ । अप्ये॑भिः । इ॒ष्टैः
वाक्यम् २: स॒मु॒द्रं न सं॒चर॑णे सनि॒ष्यवो॑ घ॒र्मस्व॑रसो॒ नद्यो॒३॑ अप॑ व्रन् ॥
पदानि : स॒मु॒द्रम् । न । स॒म्ऽचर॑णे । स॒नि॒ष्यवः॑ । घ॒र्मऽस्व॑रसः । नद्यः॑ । अप॑ । व्र॒न्

१५२. मण्डलम् ४, सूक्तम् ५८, मन्त्रः ५ (ऋक्सङ्ख्या : ३६३५)
वाक्यम् १: ए॒ता अ॑र्षन्ति हृ॒द्या॑त्समु॒द्राच्छ॒तव्र॑जा रि॒पुणा॒ नाव॒चक्षे॑ ।
पदानि : ए॒ताः । अ॒र्ष॒न्ति॒ । हृ॒द्या॑त् । स॒मु॒द्रात् । श॒तऽव्र॑जाः । रि॒पुणा॑ । न । अ॒व॒ऽचक्षे॑
वाक्यम् २: घृ॒तस्य॒ धारा॑ अ॒भि चा॑कशीमि॒ हिर॒ण्ययो॑ वे॒त॒सो मध्य॑ आसाम् ॥
पदानि : घृ॒तस्य॑ । धाराः॑ । अ॒भि । चा॒क॒शी॒मि॒ । हि॒र॒ण्ययः॑ । वे॒त॒सः । मध्ये॑ । आ॒सा॒म्

१५३. मण्डलम् ५, सूक्तम् २, मन्त्रः ६ (ऋक्सङ्ख्या : ३६५९)
वाक्यम् १: वसां राजानं वसतिं जनानामरातयो नि दधुर्मर्त्येषु ।
पदानि : वसाम् । राजानम् । वसतिम् । जनानाम् । अरातयः । नि । दधुः । मर्त्येषु
वाक्यम् २: ब्रह्माण्यत्रेरव तं सृजन्तु निन्दितारो निन्द्यासो भवन्तु ॥
पदानि : ब्रह्माणि । अत्रेः । अव । तम् । सृजन्तु । निन्दितारः । निन्द्यासः । भवन्तु

१५४. मण्डलम् ५, सूक्तम् ४, मन्त्रः ३ (ऋक्सङ्ख्या : ३६८०)
वाक्यम् १: विशां कविं विश्पतिं मानुषीणां शुचिं पावकं घृतपृष्ठमग्निम् ।
पदानि : विशाम् । कविम् । विश्पतिम् । मानुषीणाम् । शुचिम् । पावकम् । घृतऽपृष्ठम् । अग्निम्
वाक्यम् २: नि होतारं विश्वविदं दधिध्वे स देवेषु वनते वार्याणि ॥
पदानि : नि । होतारम् । विश्वऽविदम् । दधिध्वे । सः । देवेषु । वनते । वार्याणि

१५५. मण्डलम् ५, सूक्तम् ४, मन्त्रः ८ (ऋक्सङ्ख्या : ३६८५)
वाक्यम् १: अस्माकमग्ने अध्वरं जुषस्व सहसः सूनो त्रिषधस्थ हव्यम् ।
पदानि : अस्माकम् । अग्ने । अध्वरम् । जुषस्व । सहसः । सूनो इति । त्रिऽसधस्थ । हव्यम्
वाक्यम् २: वयं देवेषु सुकृतः स्याम शर्मणा नस्त्रिवरूथेन पाहि ॥
पदानि : वयम् । देवेषु । सुऽकृतः । स्याम । शर्मणा । नः । त्रिऽवरूथेन । पाहि

१५६. मण्डलम् ५, सूक्तम् ४, मन्त्रः १० (ऋक्सङ्ख्या : ३६८७)
वाक्यम् १: यस्त्वा हृदा कीरिणा मन्यमानोऽमर्त्यं मर्त्यो जोहवीमि ।
पदानि : यः । त्वा । हृदा । कीरिणा । मन्यमानः । अमर्त्यम् । मर्त्यः । जोहवीमि
वाक्यम् २: जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्याम् ॥
पदानि : जातऽवेदः । यशः । अस्मासु । धेहि । प्रऽजाभिः । अग्ने । अमृतऽत्वम् । अश्याम्

१५७. मण्डलम् ५, सूक्तम् ११, मन्त्रः १ (ऋक्सङ्ख्या : ३७४१)
वाक्यम् १: जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे ।
पदानि : जनस्य । गोपाः । अजनिष्ट । जागृविः । अग्निः । सुऽदक्षः । सुविताय । नव्यसे
वाक्यम् २: घृतप्रतीको बृहता दिविस्पृशा द्युमद्वि भाति भरतेभ्यः शुचिः ॥
पदानि : घृतऽप्रतीकः । बृहता । दिविऽस्पृशा । द्युऽमत् । वि । भाति । भरतेभ्यः । शुचिः

१५८. मण्डलम् ५, सूक्तम् १५, मन्त्रः १ (ऋक्सङ्ख्या : ३७६५)
वाक्यम् १: प्र वेधसे कवये वेद्याय गिरं भरे यशसे पूर्व्यायं ।
पदानि : प्र । वेधसे । कवये । वेद्याय । गिरम् । भरे । यशसे । पूर्व्याय
वाक्यम् २: घृतप्रसत्तो असुरः सुशेवो रायो धर्ता धरुणो वस्वो अग्निः ॥
पदानि : घृतऽप्रसत्तः । असुरः । सुऽशेवः । रायः । धर्ता । धरुणः । वस्वः । अग्निः

१५९. मण्डलम् ५, सूक्तम् १५, मन्त्रः ४ (ऋक्सङ्ख्या : ३७६८)
वाक्यम् १: मातेव यद्भरसे पप्रथानो जनंजनं धायसे चक्षसे च ।
पदानि : माताऽइव । यत् । भरसे । पप्रथानः । जनम्ऽजनम् । धायसे । चक्षसे । च
वाक्यम् २: वयोवयो जरसे यद्दधानः परि त्मना विषुरूपो जिगासि ॥

पदानि : वयःऽवयः । जरसे । यत् । दधानः । परि । त्मना । विषुऽरूपः । जिगासि

१६०. मण्डलम् ५, सूक्तम् ३०, मन्त्रः ११ (ऋक्सङ्ख्या : ३८६५)
वाक्यम् १: यदीं सोमा बभ्रुधूता अमन्दन्नरोरवीद्वृषभः सादनेषु ।
पदानि : यत् । ईम् । सोमाः । बभ्रुऽधूताः । अमन्दन् । अरोरवीत् । वृषभः । सदनेषु
वाक्यम् २: पुरंदरः पपिवाँ इन्द्रो अस्य पुनर्गवामददादुस्रियाणाम् ॥
पदानि : पुरम्ऽदरः । पपिऽवान् । इन्द्रः । अस्य । पुनः । गवाम् । अददात् । उस्रियाणाम्

१६१. मण्डलम् ५, सूक्तम् ३६, मन्त्रः ६ (ऋक्सङ्ख्या : ३९२७)
वाक्यम् १: यो रोहितौ वाजिनौ वाजिनीवान्त्रिभिः शतैः सचमानावदिष्ट ।
पदानि : यः । रोहितौ । वाजिनौ । वाजिनीऽवान् । त्रिऽभिः । शतैः । सचमानौ । अदिष्ट
वाक्यम् २: यूने समस्मै क्षितयो नमन्तां श्रुतरथाय मरुतो दुवोया ॥
पदानि : यूने । सम् । अस्मै । क्षितयः । नमन्ताम् । श्रुतऽरथाय । मरुतः । दुवःऽया

१६२. मण्डलम् ५, सूक्तम् ३९, मन्त्रः ३ (ऋक्सङ्ख्या : ३९४०)
वाक्यम् १: यत्ते दित्सु प्रराध्यं मनो अस्ति श्रुतं बृहत् ।
पदानि : यत् । ते । दित्सु । प्रऽराध्यम् । मनः । अस्ति । श्रुतम् । बृहत्
वाक्यम् २: तेन दृळ्हा चिदद्रिव आ वाजं दर्षि सातये ॥
पदानि : तेन । दृळ्हा । चित् । अद्रिऽवः । आ । वाजम् । दर्षि । सातये

१६३. मण्डलम् ५, सूक्तम् ४३, मन्त्रः २ (ऋक्सङ्ख्या : ३९९१)
वाक्यम् १: आ सुष्टुती नमसा वर्तयध्यै द्यावा वाजाय पृथिवी अमृध्रे ।
पदानि : आ । सुऽस्तुती । नमसा । वर्तयध्यै । द्यावा । वाजाय । पृथिवी इति । अमृध्रे इति
वाक्यम् २: पिता माता मधुवचाः सुहस्ता भरेभरे नो यशसावविष्टाम् ॥
पदानि : पिता । माता । मधुऽवचाः । सुऽहस्ता । भरेऽभरे । नः । यशसौ । अविष्टाम्

१६४. मण्डलम् ५, सूक्तम् ४४, मन्त्रः १० (ऋक्सङ्ख्या : ४०१६)
वाक्यम् १: स हि क्षत्रस्य मनसस्य चित्तिभिरेवावदस्यं यजतस्य सध्रेः ।
पदानि : सः । हि । क्षत्रस्य । मनसस्य । चित्तिऽभिः । एवऽवदस्य । यजतस्य । सध्रेः
वाक्यम् २: अवत्सारस्य स्पृणवाम रण्वभिः शविष्ठं वाजं विदुषा चिदर्ध्यम् ॥
पदानि : अवऽत्सारस्य । स्पृणवाम । रण्वऽभिः । शविष्ठम् । वाजम् । विदुषा । चित् । अर्ध्यम्

१६५. मण्डलम् ५, सूक्तम् ५३, मन्त्रः २ (ऋक्सङ्ख्या : ४०९६)
वाक्यम् १: ऐतान्रथेषु तस्थुषः कः शुश्राव कथा ययुः ।
पदानि : आ । एतान् । रथेषु । तस्थुषः । कः । शुश्राव । कथा । ययुः
वाक्यम् २: कस्मै सस्रुः सुदासे अन्वापय इळाभिर्वृष्टयः सह ॥
पदानि : कस्मै । सस्रुः । सुऽदासे । अनु । आपयः । इळाभिः । वृष्टयः । सह

१६६. मण्डलम् ५, सूक्तम् ५३, मन्त्रः ६ (ऋक्सङ्ख्या : ४१००)
वाक्यम् १: आ यं नरः सुदानवो ददाशुषे दिवः कोशमचुच्यवुः ।

पदानि : आ। यम्। नरः। सुऽदानवः। ददाशुषे। दिवः। कोशम्। अचुच्यवुः
वाक्यम् २: वि पर्जन्यँ सृजन्ति रोदसी अनु धन्वना यन्ति वृष्टयः॥
पदानि : वि। पर्जन्यम्। सृजन्ति। रोदसी इति। अनु। धन्वना। यन्ति। वृष्टयः

१६७. मण्डलम् ५, सूक्तम् ५३, मन्त्रः ७ (ऋक्सङ्ख्या : ४१०१)
वाक्यम् १: ततृदानाः सिन्धवः क्षोदसा रजः प्र सस्रुर्धेनवो यथा।
पदानि : ततृदानाः। सिन्धवः। क्षोदसा। रजः। प्र। सस्रुः। धेनवः। यथा
वाक्यम् २: स्यन्ना अश्वा इवाध्वनो विमोचने वि यद्वर्तन्त एन्यः॥
पदानि : स्यन्नाः। अश्वाःऽइव। अध्वनः। विऽमोचने। वि। यत्। वर्तन्ते। एन्यः

१६८. मण्डलम् ५, सूक्तम् ५४, मन्त्रः १ (ऋक्सङ्ख्या : ४१११)
वाक्यम् १: प्र शर्धाय मारुताय स्वभानव इमां वाचमनजा पर्वतच्युते।
पदानि : प्र। शर्धाय। मारुताय। स्वऽभानवे। इमाम्। वाचम्। अनज। पर्वतऽच्युते
वाक्यम् २: घर्मस्तुभे दिव आ पृष्ठयज्वने द्युम्नश्रवसे महि नृम्णमर्चत॥
पदानि : घर्मऽस्तुभे। दिवः। आ। पृष्ठऽयज्वने। द्युम्नऽश्रवसे। महि। नृम्णम्। अर्चत

१६९. मण्डलम् ५, सूक्तम् ५४, मन्त्रः १४ (ऋक्सङ्ख्या : ४१२४)
वाक्यम् १: यूयं रयिं मरुतः स्पार्हवीरं यूयमृषिमवथ सामविप्रम्।
पदानि : यूयम्। रयिम्। मरुतः। स्पार्हऽवीरम्। यूयम्। ऋषिम्। अवथ। सामऽविप्रम्
वाक्यम् २: यूयमर्वन्तं भरताय वाजं यूयं धत्थ राजानं श्रुष्टिमन्तम्॥
पदानि : यूयम्। अर्वन्तम्। भरताय। वाजम्। यूयम्। धत्थ। राजानम्। श्रुष्टिऽमन्तम्

१७०. मण्डलम् ५, सूक्तम् ६०, मन्त्रः ४ (ऋक्सङ्ख्या : ४१७२)
वाक्यम् १: वरा इवेद्रैवतासो हिरण्यैरभि स्वधाभिस्तन्वः पिपिश्रे।
पदानि : वराःऽइव। इत्। रैवतासः। हिरण्यैः। अभि। स्वधाभिः। तन्वः। पिपिश्रे
वाक्यम् २: श्रिये श्रेयाँसस्तवसो रथेषु सत्रा महाँसि चक्रिरे तनूषु॥
पदानि : श्रिये। श्रेयाँसः। तवसः। रथेषु। सत्रा। महाँसि। चक्रिरे। तनूषु

१७१. मण्डलम् ५, सूक्तम् ६२, मन्त्रः ७ (ऋक्सङ्ख्या : ४२०२)
वाक्यम् १: हिरण्यनिर्णिगयो अस्य स्थूणा वि भ्राजते दिव्य१श्वाजनीव।
पदानि : हिरण्यऽनिर्निक्। अयः। अस्य। स्थूणा। वि। भ्राजते। दिवि। अश्वाजनीऽइव
वाक्यम् २: भद्रे क्षेत्रे निमिता तिल्विले वा सनेम मध्वो अधिगर्त्यस्य॥
पदानि : भद्रे। क्षेत्रे। निऽमिता। तिल्विले। वा। सनेम। मध्वः। अधिऽगर्त्यस्य

१७२. मण्डलम् ५, सूक्तम् ७४, मन्त्रः २ (ऋक्सङ्ख्या : ४२६६)
वाक्यम् १: कुह त्या कुह नु श्रुता दिवि देवा नासत्या।
पदानि : कुह। त्या। कुह। नु। श्रुता। दिवि। देवा। नासत्या
वाक्यम् २: कस्मिन्ना यतथो जने को वां नदीनां सचा॥
पदानि : कस्मिन्। आ। यतथः। जने। कः। वाम्। नदीनाम्। सचा

१७३. मण्डलम् ५, सूक्तम् ७८, मन्त्रः ४ (ऋक्सङ्ख्या : ४२९७)
वाक्यम् १: अत्रिर्यद्ध्रामवरोहन्नृबीसमजोहवीन्नाधमानेव योषा।
पदानि : अत्रिः। यत्। वाम्। अवऽरोहन्। ऋबीसम्। अजोहवीत्। नाधमानाऽइव। योषा
वाक्यम् २: श्येनस्य चिज्जवसा नूतनेनागच्छतमश्विना शंतमेन॥
पदानि : श्येनस्य। चित्। जवसा। नूतनेन। आ। अगच्छतम्। अश्विना। शम्ऽतमेन

१७४. मण्डलम् ५, सूक्तम् ८०, मन्त्रः ३ (ऋक्सङ्ख्या : ४३१५)
वाक्यम् १: एषा गोभिररुणेभिर्युजानास्रेधन्ती रयिमप्रायु चक्रे।
पदानि : एषा। गोभिः। अरुणेभिः। युजाना। अस्रेधन्ती। रयिम्। अप्रऽआयु। चक्रे
वाक्यम् २: पथो रदन्ती सुवितायं देवी पुरुष्टुता विश्ववारा वि भाति॥
पदानि : पथः। रदन्ती। सुवितायं। देवी। पुरुऽस्तुता। विश्वऽवारा। वि। भाति

१७५. मण्डलम् ६, सूक्तम् २, मन्त्रः ६ (ऋक्सङ्ख्या : ४३८७)
वाक्यम् १: त्वेषस्ते धूम ऋण्वति दिवि षञ्छुक्र आततः।
पदानि : त्वेषः। ते। धूमः। ऋण्वति। दिवि। सन्। शुक्रः। आऽततः
वाक्यम् २: सूरो न हि द्युता त्वं कृपा पावक रोचसे॥
पदानि : सूरः। न। हि। द्युता। त्वम्। कृपा। पावक। रोचसे

१७६. मण्डलम् ६, सूक्तम् २, मन्त्रः ९ (ऋक्सङ्ख्या : ४३९०)
वाक्यम् १: त्वं त्या चिदच्युताग्ने पशुर्न यवसे।
पदानि : त्वम्। त्या। चित्। अच्युता। अग्ने। पशुः। न। यवसे
वाक्यम् २: धामा ह यत्ते अजर वना वृश्चन्ति शिक्वसः॥
पदानि : धाम। ह। यत्। ते। अजर। वना। वृश्चन्ति। शिक्वसः

१७७. मण्डलम् ६, सूक्तम् ६, मन्त्रः ७ (ऋक्सङ्ख्या : ४४२२)
वाक्यम् १: स चित्र चित्रं चितयन्तमस्मे चित्रक्षत्र चित्रतमं वयोधाम्।
पदानि : सः। चित्र। चित्रम्। चितयन्तम्। अस्मे इति। चित्रऽक्षत्र। चित्रऽतमम्। वयःऽधाम्
वाक्यम् २: चन्द्रं रयिं पुरुवीरं बृहन्तं चन्द्रं चन्द्राभिर्गृणते युवस्व॥
पदानि : चन्द्रम्। रयिम्। पुरुऽवीरम्। बृहन्तम्। चन्द्रं। चन्द्राभिः। गृणते। युवस्व

१७८. मण्डलम् ६, सूक्तम् ८, मन्त्रः २ (ऋक्सङ्ख्या : ४४३१)
वाक्यम् १: स जायमानः परमे व्योमनि व्रतान्यग्निर्व्रतपा अरक्षत।
पदानि : सः। जायमानः। परमे। विऽओमनि। व्रतानि। अग्निः। व्रतऽपाः। अरक्षत
वाक्यम् २: व्यन्तरिक्षममिमीत सुक्रतुर्वैश्वानरो महिना नाकमस्पृशत्॥
पदानि : वि। अन्तरिक्षम्। अमिमीत। सुऽक्रतुः। वैश्वानरः। महिना। नाकम्। अस्पृशत्

१७९. मण्डलम् ६, सूक्तम् ९, मन्त्रः ७ (ऋक्सङ्ख्या : ४४४३)
वाक्यम् १: विश्वे देवा अनमस्यन्भियानास्त्वामग्ने तमसि तस्थिवांसम्।
पदानि : विश्वे। देवाः। अनमस्यन्। भियानाः। त्वाम्। अग्ने। तमसि। तस्थिऽवांसम्
वाक्यम् २: वैश्वानरोऽवतूतये नोऽमर्त्योऽवतूतये नः॥
पदानि : वैश्वानरः। अवतु। ऊतये। नः। अमर्त्यः। अवतु। ऊतये। नः

१८०. मण्डलम् ६, सूक्तम् १५, मन्त्रः ४ (ऋक्सङ्ख्या : ४४७८)
वाक्यम् १: द्युतानं वो अतिथिं स्वर्णरमग्निं होतारं मनुषः स्वध्वरम्।
पदानि : द्युतानम्। वः। अतिथिम्। स्वःऽनरम्। अग्निम्। होतारम्। मनुषः। सुऽअध्वरम्
वाक्यम् २: विप्रं न द्युक्षवचसं सुवृक्तिभिर्हव्यवाहमरतिं देवमृञ्जसे॥
पदानि : विप्रम्। न। द्युक्षऽवचसम्। सुवृक्तिऽभिः। हव्यऽवाहम्। अरतिम्। देवम्। ऋञ्जसे

१८१. मण्डलम् ६, सूक्तम् २०, मन्त्रः ११ (ऋक्सङ्ख्या : ४५९५)
वाक्यम् १: त्वं वृध इन्द्र पूर्व्यो भूर्वरिवस्यन्नुशने काव्यायं।
पदानि : त्वम्। वृधः। इन्द्र। पूर्व्यः। भूः। वरिवस्यन्। उशने। काव्यायं
वाक्यम् २: परा नववास्त्वमनुदेयं महे पित्रे ददाथ स्वं नपातम्॥
पदानि : परा। नवऽवास्त्वम्। अनुऽदेयम्। महे। पित्रे। ददाथ। स्वम्। नपातम्

१८२. मण्डलम् ६, सूक्तम् २२, मन्त्रः १० (ऋक्सङ्ख्या : ४६१९)
वाक्यम् १: आ संयतमिन्द्र णः स्वस्तिं शत्रुतूर्याय बृहतीममृध्राम्।
पदानि : आ। सम्ऽयतम्। इन्द्र। नः। स्वस्तिम्। शत्रुऽतूर्याय। बृहतीम्। अमृध्राम्
वाक्यम् २: यया दासान्यार्याणि वृत्रा करो वज्रिन्त्सुतुका नाहुषाणि॥
पदानि : यया। दासानि। आर्याणि। वृत्रा। करः। वज्रिन्। सुऽतुका। नाहुषाणि

१८३. मण्डलम् ६, सूक्तम् २५, मन्त्रः ३ (ऋक्सङ्ख्या : ४६४३)
वाक्यम् १: इन्द्र जामयं उत येऽजामयोऽर्वाचीनासो वनुषो युयुज्रे।
पदानि : इन्द्र। जामयः। उत। ये। अजामयः। अर्वाचीनासः। वनुषः। युयुज्रे
वाक्यम् २: त्वमेषां विथुरा शवांसि जहि वृष्ण्यानि कृणुही परांचः॥
पदानि : त्वम्। एषाम्। विथुरा। शवांसि। जहि। वृष्ण्यानि। कृणुहि। परांचः

१८४. मण्डलम् ६, सूक्तम् ३५, मन्त्रः ४ (ऋक्सङ्ख्या : ४७०८)
वाक्यम् १: स गोमघा जरित्रे अश्वश्चन्द्रा वाजश्रवसो अधिं धेहि पृक्षः।
पदानि : सः। गोऽमघाः। जरित्रे। अश्वऽचन्द्राः। वाजऽश्रवसः। अधिं। धेहि। पृक्षः
वाक्यम् २: पीपिहीषः सुदुघामिन्द्र धेनुं भरद्वाजेषु सुरुचो रुरुच्याः॥
पदानि : पीपिहि। इषः। सुऽदुघाम्। इन्द्र। धेनुम्। भरत्ऽवाजेषु। सुऽरुचः। रुरुच्याः

१८५. मण्डलम् ६, सूक्तम् ३६, मन्त्रः ३ (ऋक्सङ्ख्या : ४७१२)
वाक्यम् १: तं सध्रीचीरूतयो वृष्ण्यानि पौंस्यानि नियुतः सश्चुरिन्द्रम्।
पदानि : तम्। सध्रीचीः। ऊतयः। वृष्ण्यानि। पौंस्यानि। निऽयुतः। सश्चुः। इन्द्रम्
वाक्यम् २: समुद्रं न सिन्धव उक्थशुष्मा उरुव्यचसं गिर आ विशन्ति॥
पदानि : समुद्रम्। न। सिन्धवः। उक्थऽशुष्माः। उरुऽव्यचसम्। गिरः। आ। विशन्ति

१८६. मण्डलम् ६, सूक्तम् ३८, मन्त्रः ५ (ऋक्सङ्ख्या : ४७२४)
वाक्यम् १: एवा जज्ञानं सहसे असामि वावृधानं राधसे च श्रुतायं।
पदानि : एव। जज्ञानम्। सहसे। असामि। वावृधानम्। राधसे। च। श्रुतायं

वाक्यम् २: मॅहामुग्रमवॅसे विप्र नूनमा विॅवासेम वृत्रॅतूर्येषु ॥
पदानि : मॅहाम्। उॅग्रम्। अवॅसे। विॅप्र। नूनम्। आ। विॅवासेॅम। वृॅत्रऽतूर्येषु

१८७. मण्डलम् ६, सूक्तम् ४४, मन्त्रः ९ (ऋक्सङ्ख्या : ४७५६)
वाक्यम् १: द्युमत्तॅमं दक्षं धेह्यॅस्मे सेधा जनाॅनां पूर्वीरराॅतीः ।
पदानि : द्युमत्ऽतॅमम्। दक्षॅम्। धेॅहि। अॅस्मे इॅति। सेध। जनाॅनाम्। पूर्वीः। अराॅतीः
वाक्यम् २: वर्षीॅयो वयः॑ कृणुहि शचीॅभिर्धनॅस्य सा॒तावॅस्माँ अॅविड्ढि ॥
पदानि : वर्षीॅयः। वयः॑। कृॅणुहि। शचीॅभिः। धनॅस्य। सा॒तौ। अॅस्मान्। अॅविड्ढि

१८८. मण्डलम् ६, सूक्तम् ४४, मन्त्रः २२ (ऋक्सङ्ख्या : ४७६९)
वाक्यम् १: अॅयं देॅवः सहॅसा जायॅमान॒ इन्द्रेॅण युॅजा॑ पॅणिमॅस्तभायत् ।
पदानि : अॅयम्। देॅवः। सहॅसा। जायॅमानः। इन्द्रेॅण। युॅजा। पॅणिम्। अॅस्तभायॅत्
वाक्यम् २: अॅयं स्वस्यॅ पितुरायुॅधानीन्दुॅरमुष्णा॒दशिॅवस्य मा॒यां ॥
पदानि : अॅयम्। स्वस्यॅ। पितुः। आयुॅधानि। इन्दुः॑। अॅमुष्णा॒त्। अशिॅवस्य। मा॒यां

१८९. मण्डलम् ६, सूक्तम् ४८, मन्त्रः २ (ऋक्सङ्ख्या : ४८५१)
वाक्यम् १: ऊॅर्जो नपाॅतं॒ स हि॒नायमॅस्मॅयुर्दाशेम हॅव्यदाॅतये ।
पदानि : ऊॅर्जः। नॅपाॅतम्। सः। हि॒न। अॅयम्। अॅस्मॅऽयुः। दाशेॅम। हॅव्यऽदाॅतये
वाक्यम् २: भुवॅद्वाजेष्वॅविता भुवॅद्वृधॅ उॅत त्रा॒ता तॅनूनाॅम् ॥
पदानि : भुवॅत्। वाजेषु। अॅविता। भुवॅत्। वृॅधः। उॅत। त्रा॒ता। तॅनूनाॅम्

१९०. मण्डलम् ६, सूक्तम् ५०, मन्त्रः ८ (ऋक्सङ्ख्या : ४८९४)
वाक्यम् १: आ नो॑ देॅवः सॅविता त्रायॅमाणो॒ हिरॅण्यपाणिर्यजॅतो जॅगम्यात् ।
पदानि : आ। नः॒। देॅवः। सॅविता। त्रायॅमाणः। हिरॅण्यऽपाणिः। यॅजॅतः। जॅगॅम्यात्
वाक्यम् २: यो दत्रॅवाँ उॅषसो॒ न प्रतीॅकं व्यूॅर्णुॅते दा॒शुषे॒ वार्याॅणि ॥
पदानि : यः। दत्रॅऽवान्। उॅषसः॑। न। प्रतीॅकम्। विॅऽऊॅर्णुॅते। दा॒शुषे॑। वार्याॅणि

१९१. मण्डलम् ६, सूक्तम् ५२, मन्त्रः ४ (ऋक्सङ्ख्या : ४९२१)
वाक्यम् १: अवॅन्तु मामुषसो॒ जायॅमाना॒ अवॅन्तु मा॒ सिन्धॅवः॒ पिन्वॅमानाः ।
पदानि : अवॅन्तु। माम्। उॅषसः॑। जायॅमानाः। अवॅन्तु। मा॒। सिन्धॅवः। पिन्वॅमानाः
वाक्यम् २: अवॅन्तु मा॒ पर्वता॒सो ध्रुवासोऽवॅन्तु मा पि॒तरो॑ देॅवहूॅतौ ॥
पदानि : अवॅन्तु। मा॒। पर्वतासः। ध्रुवासः॑। अवॅन्तु। मा॒। पि॒तरः॑। देॅवऽहूॅतौ

१९२. मण्डलम् ६, सूक्तम् ६१, मन्त्रः ३ (ऋक्सङ्ख्या : ५००४)
वाक्यम् १: सर॑स्वति देव॒निदो॒ नि ब॑र्हय प्र॒जां विश्व॑स्य बृस॒यस्य मा॒यिनः॑ ।
पदानि : सर॑स्वति। दे॒व॒ऽनिदः॑। नि। ब॒र्हय॒। प्र॒ऽजाम्। विश्व॑स्य। बृस॒यस्य। मा॒यिनः॑
वाक्यम् २: उ॒त क्षि॒तिभ्यो॒ऽवनी॑रविन्दो॒ विॅषमेभ्यो अस्रवो वाजिनीवति ॥
पदानि : उ॒त। क्षि॒तिऽभ्यः॑। अ॒वनीः॑। अ॒वि॒न्दः॒। विॅषम्। एॅभ्यः॒। अ॒स्र॒वः॒। वा॒जि॒नी॒ऽव॒ति

१९३. मण्डलम् ६, सूक्तम् ६६, मन्त्रः ९ (ऋक्सङ्ख्या : ५०५८)

वाक्यम् १: प्र चित्रमर्कं गृणते तुराय मारुताय स्वतवसे भरध्वम्।
पदानि : प्र। चित्रम्। अर्कम्। गृणते। तुराय। मारुताय। स्वऽतवसे। भरध्वम्
वाक्यम् २: ये सहांसि सहसा सहन्ते रेजते अग्ने पृथिवी मखेभ्यः ॥
पदानि : ये। सहांसि। सहसा। सहन्ते। रेजते। अग्ने। पृथिवी। मखेभ्यः

१९४. मण्डलम् ६, सूक्तम् ७२, मन्त्रः २ (ऋक्सङ्ख्या : ५१०४)
वाक्यम् १: इन्द्रासोमा वासयथ उषासमुत्सूर्यं नयथो ज्योतिषा सह।
पदानि : इन्द्रासोमा। वासयथः। उषसम्। उत्। सूर्यम्। नयथः। ज्योतिषा। सह
वाक्यम् २: उप द्यां स्कम्भथुः स्कम्भनेनाप्रथतं पृथिवीं मातरं वि ॥
पदानि : उप। द्याम्। स्कम्भथुः। स्कम्भनेन। अप्रथतम्। पृथिवीम्। मातरम्। वि

१९५. मण्डलम् ६, सूक्तम् ७४, मन्त्रः ४ (ऋक्सङ्ख्या : ५११४)
वाक्यम् १: तिग्मायुधौ तिग्महेती सुशेवौ सोमारुद्राविह सु मृळतं नः।
पदानि : तिग्मऽआयुधौ। तिग्महेती इति तिग्मऽहेती। सुऽशेवौ। सोमारुद्रौ। इह। सु। मृळतम्। नः
वाक्यम् २: प्र नो मुञ्चतं वरुणस्य पाशाद्गोपायतं नः सुमनस्यमाना ॥
पदानि : प्र। नः। मुञ्चतम्। वरुणस्य। पाशात्। गोपायतम्। नः। सुऽमनस्यमाना

१९६. मण्डलम् ६, सूक्तम् ७५, मन्त्रः ४ (ऋक्सङ्ख्या : ५११८)
वाक्यम् १: ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे।
पदानि : ते इति। आचरन्ती इत्याऽचरन्ती। समनाऽइव। योषा। माताऽइव। पुत्रम्। बिभृताम्। उपऽस्थे
वाक्यम् २: अप शत्रून्विध्यतां संविदाने आर्ली इमे विष्फुरन्ती अमित्रान् ॥
पदानि : अप। शत्रून्। विध्यताम्। संविदाने इति सम्ऽविदाने। आर्ली इति। इमे इति। विस्फुरन्ती इति विऽस्फुरन्ती। अमित्रान्

१९७. मण्डलम् ६, सूक्तम् ७५, मन्त्रः ६ (ऋक्सङ्ख्या : ५१२०)
वाक्यम् १: रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः।
पदानि : रथे। तिष्ठन्। नयति। वाजिनः। पुरः। यत्रऽयत्र। कामयते। सुऽसारथिः
वाक्यम् २: अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः ॥
पदानि : अभीशूनाम्। महिमानम्। पनायत। मनः। पश्चात्। अनु। यच्छन्ति। रश्मयः

१९८. मण्डलम् ६, सूक्तम् ७५, मन्त्रः १९ (ऋक्सङ्ख्या : ५१३३)
वाक्यम् १: यो नः स्वो अरणो यश्च निष्ट्यो जिघांसति।
पदानि : यः। नः। स्वः। अरणः। यः। च। निष्ट्यः। जिघांसति
वाक्यम् २: देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरम् ॥
पदानि : देवाः। तम्। सर्वे। धूर्वन्तु। ब्रह्म। वर्म। मम। अन्तरम्

१९९. मण्डलम् ७, सूक्तम् ५, मन्त्रः ३ (ऋक्सङ्ख्या : ५१९२)
वाक्यम् १: त्वद्भिया विशः आयन्नसिक्नीरसमना जहतीर्भोजनानि।
पदानि : त्वत्। भिया। विशः। आयन्। असिक्नीः। असमनाः। जहतीः। भोजनानि
वाक्यम् २: वैश्वानर पूरवे शोशुचानः पुरो यदग्ने दुरयन्नदीदेः ॥
पदानि : वैश्वानर। पूरवे। शोशुचानः। पुरः। यत्। अग्ने। दुरयन्। अदीदेः

२००. मण्डलम् ७, सूक्तम् ५, मन्त्रः ५ (ऋक्सङ्ख्या : ५१९४)
वाक्यम् १: त्वामग्ने हरितो वावशाना गिरः सचन्ते धुनयो घृताचीः ।
पदानि : त्वाम् । अग्ने । हरितः । वावशानाः । गिरः । सचन्ते । धुनयः । घृताचीः
वाक्यम् २: पतिं कृष्टीनां रथ्यं रयीणां वैश्वानरमुषसां केतुमह्नाम् ॥
पदानि : पतिम् । कृष्टीनाम् । रथ्यम् । रयीणाम् । वैश्वानरम् । उषसाम् । केतुम् । अह्नाम्

२०१. मण्डलम् ७, सूक्तम् ६, मन्त्रः ४ (ऋक्सङ्ख्या : ५२०२)
वाक्यम् १: यो अपाचीने तमसि मदन्तीः प्राचीश्चकार नृतमः शचीभिः ।
पदानि : यः । अपाचीने । तमसि । मदन्तीः । प्राचीः । चकार । नृऽतमः । शचीभिः
वाक्यम् २: तमीशानं वस्वो अग्निं गृणीषेऽनानतं दमयन्तं पृतन्यून् ॥
पदानि : तम् । ईशानम् । वस्वः । अग्निम् । गृणीषे । अनानतम् । दमयन्तम् । पृतन्यून्

२०२. मण्डलम् ७, सूक्तम् ७, मन्त्रः ४ (ऋक्सङ्ख्या : ५२०९)
वाक्यम् १: सद्यो अध्वरे रथिरं जनन्त मानुषासो विचेतसो य एषाम् ।
पदानि : सद्यः । अध्वरे । रथिरम् । जनन्त । मानुषासः । विऽचेतसः । यः । एषाम्
वाक्यम् २: विशामधायि विश्पतिर्दुरोणेऽग्निर्मन्द्रो मधुवचा ऋतावा ॥
पदानि : विशाम् । अधायि । विश्पतिः । दुरोणे । अग्निः । मन्द्रः । मधुऽवचाः । ऋतऽवा

२०३. मण्डलम् ७, सूक्तम् ९, मन्त्रः १ (ऋक्सङ्ख्या : ५२२०)
वाक्यम् १: अबोधि जार उषसामुपस्थाद्धोता मन्द्रः कवितमः पावकः ।
पदानि : अबोधि । जारः । उषसाम् । उपऽस्थात् । होता । मन्द्रः । कविऽतमः । पावकः
वाक्यम् २: दधाति केतुमुभयस्य जन्तोर्हव्या देवेषु द्रविणं सुकृत्सु ॥
पदानि : दधाति । केतुम् । उभयस्य । जन्तोः । हव्या । देवेषु । द्रविणम् । सुकृत्ऽसु

२०४. मण्डलम् ७, सूक्तम् १३, मन्त्रः १ (ऋक्सङ्ख्या : ५२३९)
वाक्यम् १: प्राग्नये विश्वशुचे धियंधेऽसुरघ्ने मन्म धीतिं भरध्वम् ।
पदानि : प्र । अग्नये । विश्वऽशुचे । धियम्ऽधे । असुरऽघ्ने । मन्म । धीतिम् । भरध्वम्
वाक्यम् २: भरे हविर्न बर्हिषि प्रीणानो वैश्वानराय यतये मतीनाम् ॥
पदानि : भरे । हविः । न । बर्हिषि । प्रीणानः । वैश्वानराय । यतये । मतीनाम्

२०५. मण्डलम् ७, सूक्तम् १६, मन्त्रः १० (ऋक्सङ्ख्या : ५२६९)
वाक्यम् १: ये राधांसि ददत्यश्व्या मघा कामेन श्रवसो महः ।
पदानि : ये । राधांसि । ददति । अश्व्या । मघा । कामेन । श्रवसः । महः
वाक्यम् २: ताँ अंहसः पिपृहि पर्तृभिष्ट्वं शतं पूर्भिर्यविष्ठ्य ॥
पदानि : तान् । अंहसः । पिपृहि । पर्तृऽभिः । त्वम् । शतम् । पूःऽभिः । यविष्ठ्य

२०६. मण्डलम् ७, सूक्तम् १८, मन्त्रः ५ (ऋक्सङ्ख्या : ५२८३)
वाक्यम् १: अर्णांसि चित्पप्रथाना सुदास इन्द्रो गाधान्यकृणोत्सुपारा ।
पदानि : अर्णांसि । चित् । पप्रथाना । सुऽदासे । इन्द्रः । गाधानि । अकृणोत् । सुऽपारा

वाक्यम् २: शर्धन्तं शिम्युमुचथस्य नव्यः शापं सिन्धूनामकृणोदशस्तीः ॥
पदानि : शर्धन्तम्। शिम्युम्। उचथस्य। नव्यः। शापम्। सिन्धूनाम्। अकृणोत्। अशस्तीः

२०७. मण्डलम् ७, सूक्तम् ३२, मन्त्रः ९ (ऋक्सङ्ख्या : ५४०७)
वाक्यम् १: मा स्रेधत सोमिनो दक्षता महे कृणुध्वं राय आतुजे।
पदानि : मा। स्रेधत। सोमिनः। दक्षत। महे। कृणुध्वम्। राये। आऽतुजे
वाक्यम् २: तरणिरिज्जयति क्षेति पुष्यति न देवासः कवत्नवे ॥
पदानि : तरणिः। इत्। जयति। क्षेति। पुष्यति। न। देवासः। कवत्नवे

२०८. मण्डलम् ७, सूक्तम् ३२, मन्त्रः १६ (ऋक्सङ्ख्या : ५४१४)
वाक्यम् १: तवेदिन्द्रावमं वसु त्वं पुष्यसि मध्यमम्।
पदानि : तव। इत्। इन्द्र। अवमम्। वसु। त्वम्। पुष्यसि। मध्यमम्
वाक्यम् २: सत्रा विश्वस्य परमस्य राजसि नकिष्ट्वा गोषु वृण्वते ॥
पदानि : सत्रा। विश्वस्य। परमस्य। राजसि। नकिः। त्वा। गोषु। वृण्वते

२०९. मण्डलम् ७, सूक्तम् ३२, मन्त्रः २४ (ऋक्सङ्ख्या : ५४२२)
वाक्यम् १: अभी षतस्तदा भरेन्द्र ज्यायः कनीयसः।
पदानि : अभि। सतः। तत्। आ। भर। इन्द्र। ज्यायः। कनीयसः
वाक्यम् २: पुरूवसुर्हि मघवन्त्सनादसि भरेभरे च हव्यः ॥
पदानि : पुरुऽवसुः। हि। मघऽवन्। सनात्। असि। भरेऽभरे। च। हव्यः

२१०. मण्डलम् ७, सूक्तम् ३२, मन्त्रः २६ (ऋक्सङ्ख्या : ५४२४)
वाक्यम् १: इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा।
पदानि : इन्द्र। क्रतुम्। नः। आ। भर। पिता। पुत्रेभ्यः। यथा
वाक्यम् २: शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥
पदानि : शिक्ष। नः। अस्मिन्। पुरुऽहूत। यामनि। जीवाः। ज्योतिः। अशीमहि

२११. मण्डलम् ७, सूक्तम् ३६, मन्त्रः ६ (ऋक्सङ्ख्या : ५४८५)
वाक्यम् १: आ यत्साकं यशसो वावशानाः सरस्वती सप्तथी सिन्धुमाता।
पदानि : आ। यत्। साकम्। यशसः। वावशानाः। सरस्वती। सप्तथी। सिन्धुऽमाता
वाक्यम् २: याः सुष्वयन्त सुदुघाः सुधारा अभि स्वेन पयसा पीप्यानाः ॥
पदानि : याः। सुस्वयन्त। सुऽदुघाः। सुऽधाराः। अभि। स्वेन। पयसा। पीप्यानाः

२१२. मण्डलम् ७, सूक्तम् ३८, मन्त्रः ७ (ऋक्सङ्ख्या : ५५०३)
वाक्यम् १: शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः।
पदानि : शम्। नः। भवन्तु। वाजिनः। हवेषु। देवऽताता। मितऽद्रवः। सुऽअर्काः
वाक्यम् २: जम्भयन्तोऽहिं वृकं रक्षांसि सनेम्यस्मद्युयवन्नमीवाः ॥
पदानि : जम्भयन्तः। अहिम्। वृकम्। रक्षांसि। सनेमि। अस्मत्। युयवन्। अमीवाः

२१३. मण्डलम् ७, सूक्तम् ३८, मन्त्रः ८ (ऋक्सङ्ख्या : ५५०४)

वाक्यम् १: वाजे॑वाजेऽवत वाजिनो नो॒ धने॑षु विप्रा॒ अमृता ऋतज्ञाः ।
पदानि : वाजे॑ऽवाजे । अव॑त । वा॒जि॒नः॒ । नः॒ । धने॑षु । विप्राः॒ । अ॒मृ॒ताः॒ । ऋ॒त॒ऽज्ञाः॒
वाक्यम् २: अ॒स्य मध्वः॑ पिबत मा॒दय॑ध्वं तृ॒प्ता या॑त प॒थिभि॑र्देव॒यानैः॑ ॥
पदानि : अ॒स्य । मध्वः॑ । पि॒ब॒त॒ । मा॒दय॑ध्वम् । तृ॒प्ताः॒ । या॒त॒ । प॒थिऽभिः॑ । दे॒व॒ऽयानैः॑

२१४. मण्डलम् ७, सूक्तम् ३९, मन्त्रः ६ (ऋक्सङ्ख्या : ५५१०)
वाक्यम् १: र॒रे ह॒व्यं म॒तिभि॑र्य॒ज्ञिया॑नां नक्ष॒त्कामं॒ मर्त्या॑नामसि॑न्वन् ।
पदानि : र॒रे । ह॒व्यम् । म॒तिऽभिः॑ । य॒ज्ञिया॑नाम् । नक्ष॑त् । काम॑म् । मर्त्या॑नाम् । असि॑न्वन्
वाक्यम् २: धाता॑ र॒यिमवि॑दु॒स्यं स॑दा॒सां स॑क्षी॒महि॒ युज्ये॑भि॒र्नु दे॒वैः ॥
पदानि : धाता॑ । र॒यिम् । अवि॑ऽदुस्यम् । स॒दा॒ऽसाम् । स॒क्षी॒महि॑ । युज्ये॑भिः । नु । दे॒वैः

२१५. मण्डलम् ७, सूक्तम् ४२, मन्त्रः १ (ऋक्सङ्ख्या : ५५२६)
वाक्यम् १: प्र ब्र॒ह्माणो॒ अङ्गि॑रसो नक्षन्त॒ प्र क्रन्द॒नुर्न॑भन्य॑स्य वेतु ।
पदानि : प्र । ब्र॒ह्माणः॑ । अङ्गि॑रसः । न॒क्ष॒न्त॒ । प्र । क्र॒न्द॒नुः॑ । न॒भ॒न्य॑स्य । वे॒तु॒
वाक्यम् २: प्र धे॒नव॑ उद॒प्रुतो॑ नवन्त युज्यात॒ामद्री॑ अध्व॒रस्य॒ पेशः॑ ॥
पदानि : प्र । धे॒नवः॑ । उ॒द॒ऽप्रुतः॑ । न॒व॒न्त॒ । यु॒ज्या॒ता॒म् । अद्री॒ इति॑ । अ॒ध्व॒रस्य॑ । पेशः॑

२१६. मण्डलम् ७, सूक्तम् ५७, मन्त्रः ६ (ऋक्सङ्ख्या : ५६१६)
वाक्यम् १: उ॒त स्तु॒तासो॑ म॒रुतो॑ व्यन्तु॒ विश्वे॑भि॒र्नाम॑भि॒र्नरो॑ ह॒वींषि॑ ।
पदानि : उ॒त । स्तु॒तासः॑ । म॒रुतः॑ । व्य॒न्तु॒ । विश्वे॑भिः । नाम॑ऽभिः । नरः॑ । ह॒वींषि॑
वाक्यम् २: ददा॑त नो अ॒मृत॑स्य प्र॒जाये॑ जिगृ॒त रा॒यः सू॒नृता॑ म॒घानि॑ ॥
पदानि : ददा॑त । नः॒ । अ॒मृत॑स्य । प्र॒ऽजाये॑ । जि॒गृ॒त । रा॒यः । सू॒नृता॑ । म॒घानि॑

२१७. मण्डलम् ७, सूक्तम् ५८, मन्त्रः १ (ऋक्सङ्ख्या : ५६१८)
वाक्यम् १: प्र सा॑कमु॒क्षे अ॑र्चता ग॒णाय॒ यो दैव्य॑स्य॒ धाम्नस्तुवि॑ष्मान् ।
पदानि : प्र । सा॒क॒म्ऽउ॒क्षे । अ॒र्च॒त॒ । ग॒णाय॑ । यः । दैव्य॑स्य । धाम्नः॑ । तुवि॑ष्मान्
वाक्यम् २: उ॒त क्षो॑दन्ति रोद॑सी महि॒त्वा न॑क्षन्ते॒ नाकं॒ निर्ऋ॑तेरव॒शात् ॥
पदानि : उ॒त । क्षो॒द॒न्ति॒ । रोद॑सी॒ इति॑ । म॒हि॒ऽत्वा । न॒क्ष॒न्ते॒ । नाक॑म् । निःऽऋ॑तेः । अ॒व॒ऽशात्

२१८. मण्डलम् ७, सूक्तम् ६०, मन्त्रः ११ (ऋक्सङ्ख्या : ५६४६)
वाक्यम् १: यो ब्र॒ह्मणे सु॒म॒तिमा॒यजा॑ते॒ वाज॑स्य सा॒तौ प॑र॒मस्य॑ रा॒यः ।
पदानि : यः । ब्र॒ह्मणे । सु॒ऽम॒तिम् । आ॒ऽयजा॑ते । वाज॑स्य । सा॒तौ । प॒र॒मस्य॑ । रा॒यः
वाक्यम् २: सीक्ष॑न्त म॒न्युं म॒घवा॑नो अ॒र्य उ॒रु क्षया॑य चक्रिरे सु॒धातु॑ ॥
पदानि : सीक्ष॑न्त । म॒न्युम् । म॒घऽवा॑नः । अ॒र्यः । उ॒रु । क्षया॑य । च॒क्रि॒रे॒ । सु॒ऽधातु॑

२१९. मण्डलम् ७, सूक्तम् ६१, मन्त्रः ४ (ऋक्सङ्ख्या : ५६५१)
वाक्यम् १: शंसा॑ मि॒त्रस्य॒ वरु॑णस्य॒ धाम॒ शुष्मो॒ रोद॑सी बद्बधे महि॒त्वा ।
पदानि : शंस॑ । मि॒त्रस्य॑ । वरु॑णस्य । धाम॑ । शुष्मः॑ । रोद॑सी॒ इति॑ । ब॒द्ब॒धे॒ । म॒हि॒ऽत्वा
वाक्यम् २: अय॒न्मासा॒ अय॑ज्वनाम॒वीराः॒ प्र य॒ज्ञम॑न्मा वृ॒जनं॑ तिराते ॥
पदानि : अय॑न् । मासाः॑ । अय॑ज्वनाम् । अ॒वीराः॑ । प्र । य॒ज्ञऽम॑न्मा । वृ॒जन॑म् । ति॒रा॒ते

२२०. मण्डलम् ७, सूक्तम् ६३, मन्त्रः १ (ऋक्सङ्ख्या : ५६६१)
वाक्यम् १: उद्वेति सुभगो विश्वचक्षाः साधारणः सूर्यो मानुषाणाम्।
पदानि : उत्। ऊँ इति। एति। सुऽभगः। विश्वऽचक्षाः। साधारणः। सूर्यः। मानुषाणाम्
वाक्यम् २: चक्षुर्मित्रस्य वरुणस्य देवश्चर्मेव यः समविव्यक्तमांसि॥
पदानि : चक्षुः। मित्रस्य। वरुणस्य। देवः। चर्मऽइव। यः। सम्ऽअविव्यक्। तमांसि

२२१. मण्डलम् ७, सूक्तम् ६३, मन्त्रः ४ (ऋक्सङ्ख्या : ५६६४)
वाक्यम् १: दिवो रुक्म उरुचक्षा उदेति दूरेअर्थस्तरणिर्भ्राजमानः।
पदानि : दिवः। रुक्मः। उरुऽचक्षाः। उत्। एति। दूरेऽअर्थः। तरणिः। भ्राजमानः
वाक्यम् २: नूनं जनाः सूर्येण प्रसूता अयन्नर्थानि कृणवन्नपांसि॥
पदानि : नूनम्। जनाः। सूर्येण। प्रऽसूताः। अयन्। अर्थानि। कृणवन्। अपांसि

२२२. मण्डलम् ७, सूक्तम् ७०, मन्त्रः ३ (ऋक्सङ्ख्या : ५७२५)
वाक्यम् १: यानि स्थानान्यश्विना दधाथे दिवो यह्वीष्वोषधीषु विक्षु।
पदानि : यानि। स्थानानि। अश्विना। दधाथे इति। दिवः। यह्वीषु। ओषधीषु। विक्षु
वाक्यम् २: नि पर्वतस्य मूर्धनि सदन्तेषं जनाय दाशुषे वहन्ता॥
पदानि : नि। पर्वतस्य। मूर्धनि। सदन्ता। इषम्। जनाय। दाशुषे। वहन्ता

२२३. मण्डलम् ७, सूक्तम् ७३, मन्त्रः ३ (ऋक्सङ्ख्या : ५७४३)
वाक्यम् १: अहेम यज्ञं पथामुराणा इमां सुवृक्तिं वृषणा जुषेथाम्।
पदानि : अहेम। यज्ञम्। पथाम्। उराणाः। इमाम्। सुऽवृक्तिम्। वृषणा। जुषेथाम्
वाक्यम् २: श्रुष्टीवेव प्रेषितो वामबोधि प्रति स्तोमैर्जरमाणो वसिष्ठः॥
पदानि : श्रुष्टीवाऽइव। प्रऽइषितः। वाम्। अबोधि। प्रति। स्तोमैः। जरमाणः। वसिष्ठः

२२४. मण्डलम् ७, सूक्तम् ७५, मन्त्रः ६ (ऋक्सङ्ख्या : ५७५७)
वाक्यम् १: प्रति द्युतानामरुषासो अश्वाश्चित्रा अदृश्रन्नुषसं वहन्तः।
पदानि : प्रति। द्युतानाम्। अरुषासः। अश्वाः। चित्राः। अदृश्रन्। उषसम्। वहन्तः
वाक्यम् २: याति शुभ्रा विश्वपिशा रथेन दधाति रत्नं विधते जनाय॥
पदानि : याति। शुभ्रा। विश्वऽपिशा। रथेन। दधाति। रत्नम्। विधते। जनाय

२२५. मण्डलम् ७, सूक्तम् ७५, मन्त्रः ७ (ऋक्सङ्ख्या : ५७५८)
वाक्यम् १: सत्या सत्येभिर्महती महद्भिर्देवी देवेभिर्यजता यजत्रैः।
पदानि : सत्या। सत्येभिः। महती। महत्ऽभिः। देवी। देवेभिः। यजता। यजत्रैः
वाक्यम् २: रुजद्दृळ्हानि दददुस्रियाणां प्रति गाव उषसं वावशन्त॥
पदानि : रुजत्। दृळ्हानि। ददत्। उस्रियाणाम्। प्रति। गावः। उषसम्। वावशन्त

२२६. मण्डलम् ७, सूक्तम् ७६, मन्त्रः ४ (ऋक्सङ्ख्या : ५७६३)
वाक्यम् १: त इद्देवानां सधमाद आसन्नृतावानः कवयः पूर्व्यासः।
पदानि : ते। इत्। देवानाम्। सधऽमादः। आसन्। ऋतऽवानः। कवयः। पूर्व्यासः
वाक्यम् २: गूळ्हं ज्योतिः पितरो अन्वविन्दन्सत्यमन्त्रा अजनयन्नुषासम्॥

पदानि : गूळ्हम्। ज्योतिः। पितरः। अनु। अविन्दन्। सत्यऽमन्त्राः। अजनयन्। उषसम्

२२७. मण्डलम् ७, सूक्तम् ७७, मन्त्रः ३ (ऋक्सङ्ख्या : ५७६९)
वाक्यम् १: देवानां चक्षुः सुभगा वहन्ती श्वेतं नयन्ती सुदृशीकमश्वम्।
पदानि : देवानाम्। चक्षुः। सुऽभगा। वहन्ती। श्वेतम्। नयन्ती। सुऽदृशीकम्। अश्वम्
वाक्यम् २: उषा अदर्शि रश्मिभिर्व्यक्ता चित्रामघा विश्वमनु प्रभूता॥
पदानि : उषाः। अदर्शि। रश्मिऽभिः। विऽअक्ता। चित्रऽमघा। विश्वम्। अनु। प्रऽभूता

२२८. मण्डलम् ७, सूक्तम् ८१, मन्त्रः ५ (ऋक्सङ्ख्या : ५७९०)
वाक्यम् १: तच्चित्रं राध आ भरोषो यद्दीर्घश्रुत्तमम्।
पदानि : तत्। चित्रम्। राधः। आ। भर। उषः। यत्। दीर्घश्रुत्ऽतमम्
वाक्यम् २: यत्ते दिवो दुहितर्मर्तभोजनं तद्रास्व भुनजामहै॥
पदानि : यत्। ते। दिवः। दुहितः। मर्तऽभोजनम्। तत्। रास्व। भुनजामहै

२२९. मण्डलम् ७, सूक्तम् ८३, मन्त्रः ४ (ऋक्सङ्ख्या : ५८०५)
वाक्यम् १: इन्द्रावरुणा वधनाभिरप्रति भेदं वन्वन्ता प्र सुदासमावतम्।
पदानि : इन्द्रावरुणा। वधनाभिः। अप्रति। भेदम्। वन्वन्ता। प्र। सुऽदासम्। आवतम्
वाक्यम् २: ब्रह्माण्येषां शृणुतं हवीमनि सत्या तृत्सूनामभवत्पुरोहितिः॥
पदानि : ब्रह्माणि। एषाम्। शृणुतम्। हवीमनि। सत्या। तृत्सूनाम्। अभवत्। पुरःऽहितिः

२३०. मण्डलम् ७, सूक्तम् ८३, मन्त्रः ७ (ऋक्सङ्ख्या : ५८०८)
वाक्यम् १: दश राजानः समिता अयज्यवः सुदासमिन्द्रावरुणा न युयुधुः।
पदानि : दश। राजानः। सम्ऽइताः। अयज्यवः। सुऽदासम्। इन्द्रावरुणा। न। युयुधुः
वाक्यम् २: सत्या नृणामद्मसदामुपस्तुतिर्देवा एषामभवन्देवहूतिषु॥
पदानि : सत्या। नृणाम्। अद्मऽसदाम्। उपऽस्तुतिः। देवाः। एषाम्। अभवन्। देवऽहूतिषु

२३१. मण्डलम् ७, सूक्तम् ८८, मन्त्रः १ (ऋक्सङ्ख्या : ५८३७)
वाक्यम् १: प्र शुन्ध्युवं वरुणाय प्रेष्ठां मतिं वसिष्ठ मीळ्हुषे भरस्व।
पदानि : प्र। शुन्ध्युवम्। वरुणाय। प्रेष्ठाम्। मतिम्। वसिष्ठ। मीळ्हुषे। भरस्व
वाक्यम् २: य ईमर्वाञ्चं करते यजत्रं सहस्रामघं वृषणं बृहन्तम्॥
पदानि : यः। ईम्। अर्वाञ्चम्। करते। यजत्रम्। सहस्रऽमघम्। वृषणम्। बृहन्तम्

२३२. मण्डलम् ७, सूक्तम् ९०, मन्त्रः ५ (ऋक्सङ्ख्या : ५८५३)
वाक्यम् १: ते सत्येन मनसा दीध्यानाः स्वेन युक्तासः क्रतुना वहन्ति।
पदानि : ते। सत्येन। मनसा। दीध्यानाः। स्वेन। युक्तासः। क्रतुना। वहन्ति
वाक्यम् २: इन्द्रवायू वीरवाहं रथं वामीशानयोरभि पृक्षः सचन्ते॥
पदानि : इन्द्रवायू इति। वीरऽवाहम्। रथम्। वाम्। ईशानयोः। अभि। पृक्षः। सचन्ते

२३३. मण्डलम् ७, सूक्तम् ९३, मन्त्रः २ (ऋक्सङ्ख्या : ५८६९)
वाक्यम् १: ता सानसी शवसाना हि भूतं साकंवृधा शवसा शूशुवांसा।

पदानि : ता । सानसी इति । शवसाना । हि । भूतम् । साकम्ऽवृधा । शवसा । शूशुऽवांसा
वाक्यम् २: क्षयन्तौ रायो यवसस्य भूरेः पृङ्क्तं वाजस्य स्थविरस्य घृष्वेः ॥
पदानि : क्षयन्तौ । रायः । यवसस्य । भूरेः । पृङ्क्तम् । वाजस्य । स्थविरस्य । घृष्वेः

२३४. मण्डलम् ७, सूक्तम् ९३, मन्त्रः ४ (ऋक्सङ्ख्या : ५८७१)
वाक्यम् १: गीर्भिर्विप्रः प्रमतिमिच्छमान ईट्टे रयिं यशसं पूर्वभाजम् ।
पदानि : गीःऽभिः । विप्रः । प्रऽमतिम् । इच्छमानः । ईट्टे । रयिम् । यशसम् । पूर्वऽभाजम्
वाक्यम् २: इन्द्राग्नी वृत्रहणा सुवज्रा प्र नो नव्येभिस्तिरतं देष्णैः ॥
पदानि : इन्द्राग्नी इति । वृत्रऽहना । सुऽवज्रा । प्र । नः । नव्येभिः । तिरतम् । देष्णैः

२३५. मण्डलम् ७, सूक्तम् ९५, मन्त्रः ३ (ऋक्सङ्ख्या : ५८९०)
वाक्यम् १: स वावृधे नर्यो योषणासु वृषा शिशुर्वृषभो यज्ञियासु ।
पदानि : सः । ववृधे । नर्यः । योषणासु । वृषा । शिशुः । वृषभः । यज्ञियासु
वाक्यम् २: स वाजिनं मघवद्भ्यो दधाति वि सातये तन्वं मामृजीत ॥
पदानि : सः । वाजिनम् । मघवत्ऽभ्यः । दधाति । वि । सातये । तन्वम् । ममृजीत

२३६. मण्डलम् ७, सूक्तम् ९६, मन्त्रः २ (ऋक्सङ्ख्या : ५८९५)
वाक्यम् १: उभे यत्ते महिना शुभ्रे अन्धसी अधिक्षियन्ति पूरवः ।
पदानि : उभे इति । यत् । ते । महिना । शुभ्रे । अन्धसी इति । अधिऽक्षियन्ति । पूरवः
वाक्यम् २: सा नो बोध्यवित्री मरुत्सखा चोदु राधो मघोनाम् ॥
पदानि : सा । नः । बोधि । अवित्री । मरुत्ऽसखा । चोद । राधः । मघोनाम्

२३७. मण्डलम् ७, सूक्तम् १००, मन्त्रः १ (ऋक्सङ्ख्या : ५९२४)
वाक्यम् १: नू मर्तो दयते सनिष्यन्यो विष्णव उरुगायाय दाशत् ।
पदानि : नु । मर्तः । दयते । सनिष्यन् । यः । विष्णवे । उरुऽगायाय । दाशत्
वाक्यम् २: प्र यः सत्राचा मनसा यजात एतावन्तं नर्यमाविवासात् ॥
पदानि : प्र । यः । सत्राचा । मनसा । यजाते । एतावन्तम् । नर्यम् । आऽविवासात्

२३८. मण्डलम् ७, सूक्तम् १००, मन्त्रः २ (ऋक्सङ्ख्या : ५९२५)
वाक्यम् १: त्वं विष्णो सुमतिं विश्वजन्यामप्रयुतामेवयावो मतिं दाः ।
पदानि : त्वम् । विष्णो इति । सुऽमतिम् । विश्वऽजन्याम् । अप्रऽयुताम् । एवऽयावः । मतिम् । दाः
वाक्यम् २: पर्चो यथा नः सुवितस्य भूरेरश्वावतः पुरुश्चन्द्रस्य रायः ॥
पदानि : पर्चः । यथा । नः । सुवितस्य । भूरेः । अश्वऽवतः । पुरुऽचन्द्रस्य । रायः

२३९. मण्डलम् ७, सूक्तम् १०४, मन्त्रः ४ (ऋक्सङ्ख्या : ५९५३)
वाक्यम् १: इन्द्रासोमा वर्तयतं दिवो वधं सं पृथिव्या अघशंसाय तर्हणम् ।
पदानि : इन्द्रासोमा । वर्तयतम् । दिवः । वधम् । सम् । पृथिव्याः । अघऽशंसाय । तर्हणम्
वाक्यम् २: उत्तक्षतं स्वर्यं१ पर्वतेभ्यो येन रक्षो वावृधानं निजूर्वथः ॥
पदानि : उत् । तक्षतम् । स्वर्यम् । पर्वतेभ्यः । येन । रक्षः । ववृधानम् । निऽजूर्वथः

२४०. मण्डलम् ७, सूक्तम् १०४, मन्त्रः ८ (ऋक्सङ्ख्या : ५९५७)
वाक्यम् १: यो मा पाकेन मनसा चरन्तमभिचष्टे अनृतेभिर्वचोभिः ।
पदानि : यः । मा । पाकेन । मनसा । चरन्तम् । अभि ऽचष्टे । अनृतेभिः । वचः ऽभिः
वाक्यम् २: आप इव काशिना संगृभीता असन्नस्त्वासत इन्द्र वक्ता ॥
पदानि : आपः ऽइव । काशिना । सम् ऽगृभीताः । असन् । अस्तु । असतः । इन्द्र । वक्ता

२४१. मण्डलम् ७, सूक्तम् १०४, मन्त्रः २४ (ऋक्सङ्ख्या : ५९७३)
वाक्यम् १: इन्द्र जहि पुमांसं यातुधानमुत स्त्रियं मायया शाशदानाम् ।
पदानि : इन्द्र । जहि । पुमांसम् । यातुऽधानम् । उत । स्त्रियम् । मायया । शाशदानाम्
वाक्यम् २: विग्रीवासो मूरदेवा ऋदन्तु मा ते दृशन्त्सूर्यमुच्चरन्तम् ॥
पदानि : विऽग्रीवासः । मूरऽदेवाः । ऋदन्तु । मा । ते । दृशन् । सूर्यम् । उत्ऽचरन्तम्

२४२. मण्डलम् ८, सूक्तम् १, मन्त्रः ६ (ऋक्सङ्ख्या : ५९८०)
वाक्यम् १: वस्याँ इन्द्रासि मे पितुरुत भ्रातुरभुञ्जतः ।
पदानि : वस्यान् । इन्द्र । असि । मे । पितुः । उत । भ्रातुः । अभुञ्जतः
वाक्यम् २: माता च मे छदयथः समा वसो वसुत्वनाय राधसे ॥
पदानि : माता । च । मे । छदयथः । समा । वसो इति । वसुऽत्वनाय । राधसे

२४३. मण्डलम् ८, सूक्तम् १, मन्त्रः ३१ (ऋक्सङ्ख्या : ६००५)
वाक्यम् १: आ यदश्वान्वनन्वतः श्रद्धयाहं रथे रुहम् ।
पदानि : आ । यत् । अश्वान् । वनन्ऽवतः । श्रद्धया । अहम् । रथे । रुहम्
वाक्यम् २: उत वामस्य वसुनश्चिकेतति यो अस्ति याद्वः पशुः ॥
पदानि : उत । वामस्य । वसुनः । चिकेतति । यः । अस्ति । याद्वः । पशुः

२४४. मण्डलम् ८, सूक्तम् १, मन्त्रः ३४ (ऋक्सङ्ख्या : ६००८)
वाक्यम् १: अन्वस्य स्थूरं ददृशे पुरस्तादनस्थ ऊरुरवरम्बमाणः ।
पदानि : अनु । अस्य । स्थूरम् । ददृशे । पुरस्तात् । अनस्थः । ऊरुः । अवऽरम्बमाणः
वाक्यम् २: शश्वती नार्यभिचक्ष्याह सुभद्रमर्य भोजनं बिभर्षि ॥
पदानि : शश्वती । नारी । अभिऽचक्ष्य । आह । सुऽभद्रम् । अर्य । भोजनम् । बिभर्षि

२४५. मण्डलम् ८, सूक्तम् ३, मन्त्रः ६ (ऋक्सङ्ख्या : ६०५६)
वाक्यम् १: इन्द्रो मह्ना रोदसी पप्रथच्छव इन्द्रः सूर्यमरोचयत् ।
पदानि : इन्द्रः । मह्ना । रोदसी इति । पप्रथत् । शवः । इन्द्रः । सूर्यम् । अरोचयत्
वाक्यम् २: इन्द्रे ह विश्वा भुवनानि येमिर इन्द्रे सुवानास इन्दवः ॥
पदानि : इन्द्रे । ह । विश्वा । भुवनानि । येमिरे । इन्द्रे । सुवानासः । इन्दवः

२४६. मण्डलम् ८, सूक्तम् ९, मन्त्रः १६ (ऋक्सङ्ख्या : ६२५७)
वाक्यम् १: अभुत्स्यु प्र देव्या साकं वाचाहमश्विनोः ।
पदानि : अभुत्सि । ऊँ इति । प्र । देव्या । साकम् । वाचा । अहम् । अश्विनोः
वाक्यम् २: व्यावर्देव्या मतिं वि रातिं मर्त्येभ्यः ॥
पदानि : वि । आवः । देवि । आ । मतिम् । वि । रातिम् । मर्त्येभ्यः

२४७. मण्डलम् ८, सूक्तम् १९, मन्त्रः ८ (ऋक्सङ्ख्या : ६४२९)
वाक्यम् १: प्रशंसमानो अतिथिर्न मित्रियोऽग्नी रथो न वेद्यः ।
पदानि : प्रऽशंसमानः । अतिथिः । न । मित्रियः । अग्निः । रथः । न । वेद्यः
वाक्यम् २: त्वे क्षेमासो अपि सन्ति साधवस्त्वं राजा रयीणाम् ॥
पदानि : त्वे इति । क्षेमासः । अपि । सन्ति । साधवः । त्वम् । राजा । रयीणाम्

२४८. मण्डलम् ८, सूक्तम् २०, मन्त्रः २० (ऋक्सङ्ख्या : ६४७८)
वाक्यम् १: साहा ये सन्ति मुष्टिहेव हव्यो विश्वासु पृत्सु होतृषु ।
पदानि : सहाः । ये । सन्ति । मुष्टिहाऽइव । हव्यः । विश्वासु । पृत्ऽसु । होतृषु
वाक्यम् २: वृष्णश्चन्द्रान्न सुश्रवस्तमान्गिरा वन्दस्व मरुतो अह ॥
पदानि : वृष्णः । चन्द्रान् । न । सुश्रवःऽतमान् । गिरा । वन्दस्व । मरुतः । अह

२४९. मण्डलम् ८, सूक्तम् २७, मन्त्रः २ (ऋक्सङ्ख्या : ६६३१)
वाक्यम् १: आ पशुं गासि पृथिवीं वनस्पतीनुषासा नक्तमोषधीः ।
पदानि : आ । पशुम् । गासि । पृथिवीम् । वनस्पतीन् । उषसा । नक्तम् । ओषधीः
वाक्यम् २: विश्वे च नो वसवो विश्ववेदसो धीनां भूत प्रावितारः ॥
पदानि : विश्वे । च । नः । वसवः । विश्वऽवेदसः । धीनाम् । भूत । प्रऽअवितारः

२५०. मण्डलम् ८, सूक्तम् २७, मन्त्रः १० (ऋक्सङ्ख्या : ६६३९)
वाक्यम् १: अस्ति हि वः सजात्यं रिशादसो देवासो अस्त्याप्यम् ।
पदानि : अस्ति । हि । वः । सऽजात्यम् । रिशादसः । देवासः । अस्ति । आप्यम्
वाक्यम् २: प्र णः पूर्वस्मै सुविताय वोचत मक्षू सुम्नाय नव्यसे ॥
पदानि : प्र । नः । पूर्वस्मै । सुविताय । वोचत । मक्षु । सुम्नाय । नव्यसे

२५१. मण्डलम् ८, सूक्तम् ३३, मन्त्रः १० (ऋक्सङ्ख्या : ६७२८)
वाक्यम् १: सत्यमित्था वृषेदसि वृषजूतिर्नोऽवृतः ।
पदानि : सत्यम् । इत्था । वृषा । इत् । असि । वृषऽजूतिः । नः । अवृतः
वाक्यम् २: वृषा ह्युग्र शृण्विषे परावति वृषो अर्वावति श्रुतः ॥
पदानि : वृषा । हि । उग्र । शृण्विषे । पराऽवति । वृषो इति । अर्वाऽवति । श्रुतः

२५२. मण्डलम् ८, सूक्तम् ३३, मन्त्रः १२ (ऋक्सङ्ख्या : ६७३०)
वाक्यम् १: वृषा सोता सुनोतु ते वृषन्नृजीपिन्ना भर ।
पदानि : वृषा । सोता । सुनोतु । ते । वृषन् । ऋजीपिन् । आ । भर
वाक्यम् २: वृषा दधन्वे वृषणं नदीष्वा तुभ्यं स्थातर्हरीणाम् ॥
पदानि : वृषा । दधन्वे । वृषणम् । नदीषु । आ । तुभ्यम् । स्थातः । हरीणाम्

२५३. मण्डलम् ८, सूक्तम् ४६, मन्त्रः २२ (ऋक्सङ्ख्या : ६९६८)
वाक्यम् १: षष्टिं सहस्राश्व्यस्यायुता सनमुष्ट्रानां विंशतिं शता ।
पदानि : षष्टिम् । सहस्रा । अश्व्यस्य । अयुता । असनम् । उष्ट्रानाम् । विंशतिम् । शता

वाक्यम् २: दश॒ श्यावी॑नां श॒ता दश॒ त्र्य॑रुषीणां॒ दश॒ गवा॑ सह॒स्रा॑ ॥
पदानि : दश॑। श्यावी॑नाम्। श॒ता। दश॑। त्रिऽअ॑रुषीणाम्। दश॑। गवा॑म्। स॒ह॒स्रा॑

२५४. मण्डलम् ८, सूक्तम् ४९, मन्त्रः ६ (ऋक्सङ्ख्या : ७०१८)
वाक्यम् १: उ॒ग्रं न वी॒रं नम॒सोप॑ सेदिम॒ विभू॑तिमक्षि॒तावसु॑म्।
पदानि : उ॒ग्रम्। न। वी॒रम्। नम॑सा। उप॑। से॒दि॒म॒। विऽभू॑तिम्। अक्षि॑तऽवसुम्
वाक्यम् २: उ॒द्रीव॑ वज्रिन्नव॒तो न सिञ्च॑ते क्षर॑न्तीन्द्र धी॒तयः॑ ॥
पदानि : उ॒द्रीऽइ॑व। व॒ज्रि॒न्। अ॒व॒तः। न। सिञ्च॑ते। क्षर॑न्ति। इ॒न्द्र॒। धी॒तयः॑

२५५. मण्डलम् ८, सूक्तम् ५०, मन्त्रः ५ (ऋक्सङ्ख्या : ७०२७)
वाक्यम् १: आ नः॑ सोमे स्व॒ध्व॑र इ॑या॒नो अत्यो॒ न तो॑शते।
पदानि : आ। नः॒। सोमे। सु॒ऽअ॒ध्व॒रे। इ॒या॒नः। अत्यः॑। न। तो॒श॒ते
वाक्यम् २: यं ते स्वदाव॒न्त्स्वद॑न्ति गू॒र्तयः॑ पौ॒रे छ॑न्दयसे॒ हव॑म् ॥
पदानि : यम्। ते॒। स्व॒दा॒ऽव॒न्। स्वद॑न्ति। गू॒र्तयः॑। पौ॒रे। छ॒न्द॒य॒से॒। हव॑म्

२५६. मण्डलम् ८, सूक्तम् ५१, मन्त्रः ५ (ऋक्सङ्ख्या : ७०३७)
वाक्यम् १: यो नो॑ दा॒ता वसू॑नामिन्द्रं॒ तं हू॑महे व॒यम्।
पदानि : यः। नः॒। दा॒ता। वसू॑नाम्। इन्द्र॑म्। तम्। हू॒म॒हे॒। व॒यम्
वाक्यम् २: वि॒द्मा ह्य॑स्य सुम॒तिं नवी॑यसीं ग॒मेम॒ गोम॑ति व्र॒जे ॥
पदानि : वि॒द्म। हि। अ॒स्य॒। सु॒ऽम॒तिम्। नवी॑यसीम्। ग॒मेम॑। गोऽम॑ति। व्र॒जे

२५७. मण्डलम् ८, सूक्तम् ५२, मन्त्रः ३ (ऋक्सङ्ख्या : ७०४५)
वाक्यम् १: य उ॒क्था केव॑ला दु॒धे यः सोम॑ धृषि॒तापि॑बत्।
पदानि : यः। उ॒क्था। केव॑ला। दु॒धे। यः। सोम॑म्। धृ॒षि॒ता। अपि॑बत्
वाक्यम् २: यस्मै॒ विष्णु॒स्त्रीणि॑ प॒दा वि॑चक्र॒म उप॑ मि॒त्रस्य॒ धर्म॑भिः ॥
पदानि : यस्मै॑। विष्णुः॑। त्रीणि॑। प॒दा। वि॒ऽच॒क्र॒मे। उप॑। मि॒त्रस्य॑। धर्म॑ऽभिः

२५८. मण्डलम् ८, सूक्तम् ५२, मन्त्रः ८ (ऋक्सङ्ख्या : ७०५०)
वाक्यम् १: यस्मै॒ त्वं म॑घवन्निन्द्र गिर्वणः॒ शिक्षो॒ शिक्ष॑सि दा॒शुषे॑।
पदानि : यस्मै॑। त्वम्। म॒घ॒ऽव॒न्। इ॒न्द्र॒। गि॒र्व॒णः॒। शिक्षो॑ इति॑। शिक्ष॑सि। दा॒शुषे॑
वाक्यम् २: अ॒स्माक॑ गिरं उ॒त सु॑ष्टु॒तिं व॑सो कण्व॒वच्छृ॑णुधी॒ हव॑म् ॥
पदानि : अ॒स्माक॑म्। गिरः॑। उ॒त। सु॒ऽस्तु॒तिम्। व॒सो॒ इति॑। क॒ण्व॒ऽवत्। शृ॒णु॒धि॒। हव॑म्

२५९. मण्डलम् ८, सूक्तम् ५४, मन्त्रः ८ (ऋक्सङ्ख्या : ७०६८)
वाक्यम् १: व॒यं त॑ इन्द्र स्तोमेभिर्वि॑धेम॒ त्वम॒स्माक॑ शतक्रतो।
पदानि : व॒यम्। ते॒। इ॒न्द्र॒। स्तोमेभिः। वि॒धे॒म॒। त्वम्। अ॒स्माक॑म्। श॒त॒क्र॒तो॒ इति॑ शतऽक्रतो
वाक्यम् २: महिं॑ स्थू॒रं श॑शयं राधो॒ अह्र॑यं॒ प्रस्क॑ण्वाय॒ नि तो॑शय ॥
पदानि : महि॑। स्थू॒रम्। श॒श॒यम्। राधः॑। अह्र॑यम्। प्रस्क॑ण्वाय। नि। तो॒श॒य॒

२६०. मण्डलम् ८, सूक्तम् ५७, मन्त्रः १ (ऋक्सङ्ख्या : ७०७९)

वाक्यम् १: युवं देवा क्रतुना पूर्व्येण युक्ता रथेन तविषं यजत्रा ।
पदानि : युवम् । देवा । क्रतुना । पूर्व्येण । युक्ताः । रथेन । तविषम् । यजत्रा
वाक्यम् २: आगच्छतं नासत्या शचीभिरिदं तृतीयं सवनं पिबाथः ॥
पदानि : आ । अगच्छतम् । नासत्या । शचीभिः । इदम् । तृतीयम् । सवनम् । पिबाथः

२६१. मण्डलम् ८, सूक्तम् ५७, मन्त्रः २ (ऋक्सङ्ख्या : ७०८०)
वाक्यम् १: युवां देवास्त्रयं एकादशासः सत्याः सत्यस्य दद्दशे पुरस्तात् ।
पदानि : युवाम् । देवाः । त्रयः । एकादशासः । सत्याः । सत्यस्य । दद्दशे । पुरस्तात्
वाक्यम् २: अस्माकं यज्ञं सवनं जुषाणा पातं सोममश्विना दीद्यग्नी ॥
पदानि : अस्माकम् । यज्ञम् । सवनम् । जुषाणा । पातम् । सोमम् । अश्विना । दीद्यग्नी इति दीदिऽअग्नी

२६२. मण्डलम् ८, सूक्तम् ६१, मन्त्रः १४ (ऋक्सङ्ख्या : ७१२६)
वाक्यम् १: त्वं हि राधस्पते राधसो महः क्षयस्यासि विधतः ।
पदानि : त्वम् । हि । राधःपते । राधसः । महः । क्षयस्य । असि । विधतः
वाक्यम् २: तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे ॥
पदानि : तम् । त्वा । वयम् । मघऽवन् । इन्द्र । गिर्वणः । सुतऽवन्तः । हवामहे

२६३. मण्डलम् ८, सूक्तम् ७०, मन्त्रः ६ (ऋक्सङ्ख्या : ७२५७)
वाक्यम् १: आ पप्राथ महिना वृष्ण्या वृषन्विश्वा शविष्ठ शवसा ।
पदानि : आ । पप्राथ । महिना । वृष्ण्या । वृषन् । विश्वा । शविष्ठ । शवसा
वाक्यम् २: अस्माँ अव मघवन्गोमति व्रजे वज्रिञ्चित्राभिरूतिभिः ॥
पदानि : अस्मान् । अव । मघऽवन् । गोऽमति । व्रजे । वज्रिन् । चित्राभिः । ऊतिऽभिः

२६४. मण्डलम् ८, सूक्तम् ७१, मन्त्रः १३ (ऋक्सङ्ख्या : ७२७९)
वाक्यम् १: अग्निरिषां सख्ये ददातु न ईशे यो वार्याणाम् ।
पदानि : अग्निः । इषाम् । सख्ये । ददातु । नः । ईशे । यः । वार्याणाम्
वाक्यम् २: अग्निं तोके तनये शश्वदीमहे वसुं सन्तं तनूपाम् ॥
पदानि : अग्निम् । तोके । तनये । शश्वत् । ईमहे । वसुम् । सन्तम् । तनूऽपाम्

२६५. मण्डलम् ८, सूक्तम् ९७, मन्त्रः २ (ऋक्सङ्ख्या : ७५९३)
वाक्यम् १: यमिन्द्र दधिषे त्वमश्वं गां भागमव्ययम् ।
पदानि : यम् । इन्द्र । दधिषे । त्वम् । अश्वम् । गाम् । भागम् । अव्ययम्
वाक्यम् २: यजमाने सुन्वति दक्षिणावति तस्मिन्तं धेहि मा पणौ ॥
पदानि : यजमाने । सुन्वति । दक्षिणाऽवति । तस्मिन् । तम् । धेहि । मा । पणौ

२६६. मण्डलम् ८, सूक्तम् ९७, मन्त्रः ५ (ऋक्सङ्ख्या : ७५९६)
वाक्यम् १: यद्वासि रोचने दिवः समुद्रस्याधि विष्टपि ।
पदानि : यत् । वा । असि । रोचने । दिवः । समुद्रस्य । अधि । विष्टपि
वाक्यम् २: यत्पार्थिवे सदने वृत्रहन्तम यदन्तरिक्ष आ गहि ॥
पदानि : यत् । पार्थिवे । सदने । वृत्रहन्ऽतम । यत् । अन्तरिक्षे । आ । गहि

२६७. मण्डलम् ८, सूक्तम् १०३, मन्त्रः ९ (ऋक्सङ्ख्या : ७६८५)
वाक्यम् १: आ वंसते मघवा वीरवद्यशः समिद्धो द्युम्न्याहुतः ।
पदानि : आ । वंसते । मघऽवा । वीरऽवत् । यशः । सम्ऽइद्धः । द्युम्नी । आऽहुतः
वाक्यम् २: कुविन्नो अस्य सुमतिर्नवीयस्यच्छा वाजेभिरागमत् ॥
पदानि : कुवित् । नः । अस्य । सुऽमतिः । नवीयसी । अच्छ । वाजेभिः । आऽगमत्

२६८. मण्डलम् ८, सूक्तम् १०३, मन्त्रः ११ (ऋक्सङ्ख्या : ७६८७)
वाक्यम् १: उदिता यो निदिता वेदिता वस्वा यज्ञियो ववर्तति ।
पदानि : उत्ऽइता । यः । निऽदिता । वेदिता । वसु । आ । यज्ञियः । ववर्तति
वाक्यम् २: दुष्टरा यस्य प्रवणे नोर्मयो धिया वाजं सिषासतः ॥
पदानि : दुस्तराः । यस्य । प्रवणे । न । ऊर्मयः । धिया । वाजम् । सिसासतः

२६९. मण्डलम् ९, सूक्तम् ६८, मन्त्रः १० (ऋक्सङ्ख्या : ८३१०)
वाक्यम् १: एवा नः सोम परिषिच्यमानो वयो दधच्चित्रतमं पवस्व ।
पदानि : एव । नः । सोम । परिऽसिच्यमानः । वयः । दधत् । चित्रऽतमम् । पवस्व
वाक्यम् २: अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरम् ॥
पदानि : अद्वेषे इति । द्यावापृथिवी इति । हुवेम । देवाः । धत्त । रयिम् । अस्मे इति । सुऽवीरम्

२७०. मण्डलम् ९, सूक्तम् ६९, मन्त्रः ५ (ऋक्सङ्ख्या : ८३१५)
वाक्यम् १: अमृक्तेन रुशता वाससा हरिरमर्त्यो निर्णिजानः परि व्यत ।
पदानि : अमृक्तेन । रुशता । वाससा । हरिः । अमर्त्यः । निःऽनिजानः । परि । व्यत
वाक्यम् २: दिवस्पृष्ठं बर्हणा निर्णिजे कृतोप स्तरणं चम्वोर्नभस्मयम् ॥
पदानि : दिवः । पृष्ठम् । बर्हणा । निःऽनिजे । कृत । उपऽस्तरणम् । चम्वोः । नभस्मयम्

२७१. मण्डलम् ९, सूक्तम् ७३, मन्त्रः ७ (ऋक्सङ्ख्या : ८३५५)
वाक्यम् १: सहस्रधारे वितते पवित्र आ वाचं पुनन्ति कवयो मनीषिणः ।
पदानि : सहस्रऽधारे । विऽतते । पवित्रे । आ । वाचम् । पुनन्ति । कवयः । मनीषिणः
वाक्यम् २: रुद्रास एषामिषिरासो अद्रुहः स्पशः स्वञ्चः सुदृशो नृचक्षसः ॥
पदानि : रुद्रासः । एषाम् । इषिरासः । अद्रुहः । स्पशः । सुऽअञ्चः । सुऽदृशः । नृऽचक्षसः

२७२. मण्डलम् ९, सूक्तम् ८६, मन्त्रः ११ (ऋक्सङ्ख्या : ८४३९)
वाक्यम् १: अभिक्रन्दन्कलशं वाज्यर्षति पतिर्दिवः शतधारो विचक्षणः ।
पदानि : अभिऽक्रन्दन् । कलशम् । वाजी । अर्षति । पतिः । दिवः । शतऽधारः । विऽचक्षणः
वाक्यम् २: हरिर्मित्रस्य सदनेषु सीदति मर्मृजानोऽविभिः सिन्धुभिर्वृषा ॥
पदानि : हरिः । मित्रस्य । सदनेषु । सीदति । मर्मृजानः । अविऽभिः । सिन्धुऽभिः । वृषा

२७३. मण्डलम् ९, सूक्तम् ८६, मन्त्रः ४५ (ऋक्सङ्ख्या : ८४७३)
वाक्यम् १: अग्रेगो राजाप्यस्तविष्यते विमानो अह्नां भुवनेष्वर्पितः ।
पदानि : अग्रेऽगः । राजा । अप्यः । तविष्यते । विऽमानः । अह्नाम् । भुवनेषु । अर्पितः
वाक्यम् २: हरिर्घृतस्नुः सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः ॥

पदानि : हरिः । घृतऽस्नुः । सुऽदृशीकः । अर्णवः । ज्योतिःऽरथः । पवते । राये । ओक्यः

२७४. मण्डलम् ९, सूक्तम् ९६, मन्त्रः ९ (ऋक्सङ्ख्या : ८५४२)
वाक्यम् १: परिं प्रियः कलशे देववांत इन्द्रांय सोमो रण्यो मदांय ।
पदानि : परिं । प्रियः । कलशे । देवऽवांतः । इन्द्रांय । सोमः । रण्यः । मदांय
वाक्यम् २: सहस्रंधारः शतवांज इन्दुर्वाजी न सप्तिः समंना जिगाति ॥
पदानि : सहस्रंऽधारः । शतऽवांजः । इन्दुः । वाजी । न । सप्तिः । समंना । जिगाति

२७५. मण्डलम् ९, सूक्तम् ९६, मन्त्रः १९ (ऋक्सङ्ख्या : ८५५२)
वाक्यम् १: चमूषच्छ्येनः शंकुनो विभृत्वां गोविन्दुर्द्रप्स आयुंधानि बिभ्रत् ।
पदानि : चमूऽसत् । श्येनः । शकुनः । विऽभृत्वां । गोऽविन्दुः । द्रप्सः । आयुंधानि । बिभ्रत्
वाक्यम् २: अपामूर्मिं सचंमानः समुद्रं तुरीयं धामं महिषो विवक्ति ॥
पदानि : अपाम् । ऊर्मिम् । सचंमानः । समुद्रम् । तुरीयम् । धामं । महिषः । विवक्ति

२७६. मण्डलम् ९, सूक्तम् ९७, मन्त्रः ७ (ऋक्सङ्ख्या : ८५६४)
वाक्यम् १: प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
पदानि : प्र । काव्यम् । उशनांऽइव । ब्रुवाणः । देवः । देवानाम् । जनिम । विवक्ति
वाक्यम् २: महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ॥
पदानि : महिऽव्रतः । शुचिऽबन्धुः । पावकः । पदा । वराहः । अभि । एति । रेभन्

२७७. मण्डलम् ९, सूक्तम् ९७, मन्त्रः ११ (ऋक्सङ्ख्या : ८५६८)
वाक्यम् १: अध धारया मध्वा पृचानस्तिरो रोमं पवते अद्रिदुग्धः ।
पदानि : अधं । धारया । मध्वा । पृचानः । तिरः । रोमं । पवते । अद्रिऽदुग्धः
वाक्यम् २: इन्दुरिन्द्रस्य सख्यं जुषाणो देवो देवस्यं मत्सरो मदांय ॥
पदानि : इन्दुः । इन्द्रस्य । सख्यम् । जुषाणः । देवः । देवस्यं । मत्सरः । मदांय

२७८. मण्डलम् ९, सूक्तम् ९७, मन्त्रः ४७ (ऋक्सङ्ख्या : ८६०४)
वाक्यम् १: एष प्रत्नेन वयसा पुनानस्तिरो वपांसि दुहितुर्दधानः ।
पदानि : एषः । प्रत्नेनं । वयसा । पुनानः । तिरः । वपांसि । दुहितुः । दधानः
वाक्यम् २: वसानः शर्म त्रिवरूंथमप्सु होतेव याति समंनेषु रेभन् ॥
पदानि : वसानः । शर्म । त्रिऽवरूंथम् । अप्ऽसु । होताऽइव । याति । समंनेषु । रेभन्

२७९. मण्डलम् ९, सूक्तम् ९७, मन्त्रः ४९ (ऋक्सङ्ख्या : ८६०६)
वाक्यम् १: अभि वायुं वीत्यर्षा गृणानोऽभि मित्रावरुणा पूयमानः ।
पदानि : अभि । वायुम् । वीती । अर्ष । गृणानः । अभि । मित्रावरुणा । पूयमानः
वाक्यम् २: अभी नरं धीजवनं रथेष्ठामभीन्द्रं वृषणं वज्रबाहुम् ॥
पदानि : अभि । नरम् । धीऽजवनम् । रथेऽस्थाम् । अभि । इन्द्रम् । वृषणम् । वज्रऽबाहुम्

२८०. मण्डलम् ९, सूक्तम् १०१, मन्त्रः १४ (ऋक्सङ्ख्या : ८६५८)
वाक्यम् १: आ जामिरत्के अव्यत भुजे न पुत्र ओण्योः ।

पदानि : आ । जामिः । अत्के । अव्यत । भुजे । न । पुत्रः । ओण्योः
वाक्यम् २: सरज्जारो न योषणां वरो न योनिमासदम् ॥
पदानि : सरत् । जारः । न । योषणाम् । वरः । न । योनिम् । आऽसदम्

२८१. मण्डलम् ९, सूक्तम् १०७, मन्त्रः १५ (ऋक्सङ्ख्या : ८७१५)
वाक्यम् १: तरत्समुद्रं पवमान ऊर्मिणा राजा देव ऋतं बृहत् ।
पदानि : तरत् । समुद्रम् । पवमानः । ऊर्मिणा । राजा । देवः । ऋतम् । बृहत्
वाक्यम् २: अर्षन्मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहत् ॥
पदानि : अर्षत् । मित्रस्य । वरुणस्य । धर्मणा । प्र । हिन्वानः । ऋतम् । बृहत्

२८२. मण्डलम् ९, सूक्तम् १०७, मन्त्रः १८ (ऋक्सङ्ख्या : ८७१८)
वाक्यम् १: पुनानश्चमू जनयन्मतिं कविः सोमो देवेषु रण्यति ।
पदानि : पुनानः । चमू इति । जनयन् । मतिम् । कविः । सोमः । देवेषु । रण्यति
वाक्यम् २: अपो वसानः परि गोभिरुत्तरः सीदन्वनेष्वव्यत ॥
पदानि : अपः । वसानः । परि । गोभिः । उत्ऽतरः । सीदन् । वनेषु । अव्यत

२८३. मण्डलम् ९, सूक्तम् १०८, मन्त्रः १२ (ऋक्सङ्ख्या : ८७३८)
वाक्यम् १: वृषा वि जज्ञे जनयन्नमर्त्यः प्रतपञ्ज्योतिषा तमः ।
पदानि : वृषा । वि । जज्ञे । जनयन् । अमर्त्यः । प्रऽतपन् । ज्योतिषा । तमः
वाक्यम् २: स सुष्टुतः कविभिर्निर्णिजं दधे त्रिधात्वस्य दंससा ॥
पदानि : सः । सुऽस्तुतः । कविऽभिः । निःऽनिजम् । दधे । त्रिऽधातु । अस्य । दंससा

२८४. मण्डलम् १०, सूक्तम् ३, मन्त्रः ५ (ऋक्सङ्ख्या : ८८१७)
वाक्यम् १: स्वना न यस्य भामासः पवन्ते रोचमानस्य बृहतः सुदिवः ।
पदानि : स्वनाः । न । यस्य । भामासः । पवन्ते । रोचमानस्य । बृहतः । सुऽदिवः
वाक्यम् २: ज्येष्ठेभिर्यस्तेजिष्ठैः क्रीळुमद्भिर्वर्षिष्ठेभिर्भानुभिर्नक्षति द्याम् ॥
पदानि : ज्येष्ठेभिः । यः । तेजिष्ठैः । क्रीळुमत्ऽभिः । वर्षिष्ठेभिः । भानुऽभिः । नक्षति । द्याम्

२८५. मण्डलम् १०, सूक्तम् ४, मन्त्रः ३ (ऋक्सङ्ख्या : ८८२२)
वाक्यम् १: शिशुं न त्वा जेन्यं वर्धयन्ती माता बिभर्ति सचनस्यमाना ।
पदानि : शिशुम् । न । त्वा । जेन्यम् । वर्धयन्ती । माता । बिभर्ति । सचनस्यमाना
वाक्यम् २: धनोरधिं प्रवता यासि हर्यञ्जिगीषसे पशुरिवावसृष्टः ॥
पदानि : धनोः । अधिं । प्रऽवता । यासि । हर्यन् । जिगीषसे । पशुःऽइव । अवऽसृष्टः

२८६. मण्डलम् १०, सूक्तम् ६, मन्त्रः ३ (ऋक्सङ्ख्या : ८८३६)
वाक्यम् १: ईशे यो विश्वस्या देववीतेरीशे विश्वायुरुषसो व्युष्टौ ।
पदानि : ईशे । यः । विश्वस्याः । देवऽवीतेः । ईशे । विश्वऽआयुः । उषसः । विऽउष्टौ
वाक्यम् २: आ यस्मिन्मना हवींष्यग्नावरिष्टरथः स्क्रभ्नाति शूषैः ॥
पदानि : आ । यस्मिन् । मना । हवींषि । अग्नौ । अरिष्टऽरथः । स्क्रभ्नाति । शूषैः

२८७. मण्डलम् १०, सूक्तम् ७, मन्त्रः ५ (ऋक्सङ्ख्या : ८८४५)
वाक्यम् १: द्युभिर्हितं मित्रमिव प्रयोगं प्रत्नमृत्विजमध्वरस्य जारम्।
पदानि : द्युऽभिः। हितम्। मित्रम्ऽइव। प्रऽयोगम्। प्रत्नम्। ऋत्विजम्। अध्वरस्य। जारम्
वाक्यम् २: बाहुभ्यामग्निमायवोऽजनन्त विक्षु होतारं न्यसादयन्त॥
पदानि : बाहुऽभ्याम्। अग्निम्। आयवः। अजनन्त। विक्षु। होतारम्। नि। असादयन्त

२८८. मण्डलम् १०, सूक्तम् ८, मन्त्रः २ (ऋक्सङ्ख्या : ८८४९)
वाक्यम् १: मुमोद गर्भो वृषभः ककुद्मानस्रेमा वत्सः शिमीवाँ अरावीत्।
पदानि : मुमोद। गर्भः। वृषभः। ककुत्ऽमान्। अस्रेमा। वत्सः। शिमीऽवान्। अरावीत्
वाक्यम् २: स देवतात्युद्यतानि कृण्वन्त्स्वेषु क्षयेषु प्रथमो जिगाति॥
पदानि : सः। देवऽतांति। उत्ऽयंतानि। कृण्वन्। स्वेषु। क्षयेषु। प्रथमः। जिगाति

२८९. मण्डलम् १०, सूक्तम् १५, मन्त्रः ८ (ऋक्सङ्ख्या : ८९२६)
वाक्यम् १: ये नः पूर्वे पितरः सोम्यासोऽनूहिरे सोमपीथं वसिष्ठाः।
पदानि : ये। नः। पूर्वे। पितरः। सोम्यासः। अनुऽऊहिरे। सोमऽपीथम्। वसिष्ठाः
वाक्यम् २: तेभिर्यमः संरराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु॥
पदानि : तेभिः। यमः। सम्ऽरराणः। हवींषि। उशन्। उशत्ऽभिः। प्रतिऽकामम्। अत्तु

२९०. मण्डलम् १०, सूक्तम् १५, मन्त्रः ११ (ऋक्सङ्ख्या : ८९२९)
वाक्यम् १: अग्निष्वात्ताः पितर एह गच्छत सदःसदः सदत सुप्रणीतयः।
पदानि : अग्निऽस्वात्ताः। पितरः। आ। इह। गच्छत। सदःऽसदः। सदत। सुऽप्रनीतयः
वाक्यम् २: अत्ता हवींषि प्रयतानि बर्हिष्यथा रयिं सर्ववीरं दधातन॥
पदानि : अत्त। हवींषि। प्रऽयतानि। बर्हिषि। अथ। रयिम्। सर्वऽवीरम्। दधातन

२९१. मण्डलम् १०, सूक्तम् १८, मन्त्रः ७ (ऋक्सङ्ख्या : ८९६७)
वाक्यम् १: इमा नारीरविधवाः सुपत्नीराञ्जनेन सर्पिषा सं विशन्तु।
पदानि : इमाः। नारीः। अविधवाः। सुऽपत्नीः। आऽअञ्जनेन। सर्पिषा। सम्। विशन्तु
वाक्यम् २: अनश्रवोऽनमीवाः सुरत्ना आ रोहन्तु जनयो योनिमग्रे॥
पदानि : अनश्रवः। अनमीवाः। सुऽरत्नाः। आ। रोहन्तु। जनयः। योनिम्। अग्रे

२९२. मण्डलम् १०, सूक्तम् १८, मन्त्रः १० (ऋक्सङ्ख्या : ८९७०)
वाक्यम् १: उप सर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीं सुशेवाम्।
पदानि : उप। सर्प। मातरम्। भूमिम्। एताम्। उरुऽव्यचसम्। पृथिवीम्। सुऽशेवाम्
वाक्यम् २: ऊर्णम्रदा युवतिर्दक्षिणावत एषा त्वा पातु निर्ऋतेरुपस्थात्॥
पदानि : ऊर्णऽम्रदाः। युवतिः। दक्षिणाऽवते। एषा। त्वा। पातु। निःऽऋतेः। उपऽस्थात्

२९३. मण्डलम् १०, सूक्तम् ३०, मन्त्रः १० (ऋक्सङ्ख्या : ९१०२)
वाक्यम् १: आववृत्तदीरध नु द्विधारा गोषुयुधो न नियवं चरन्तीः।
पदानि : आऽववृततीः। अध। नु। द्विऽधाराः। गोषुऽयुधः। न। निऽयवम्। चरन्तीः
वाक्यम् २: ऋषे जनित्रीर्भुवनस्य पत्नीरपो वन्दस्व सवृधः सयोनीः॥
पदानि : ऋषे। जनित्रीः। भुवनस्य। पत्नीः। अपः। वन्दस्व। सऽवृधः। सऽयोनीः

२९४. मण्डलम् १०, सूक्तम् ३०, मन्त्रः १४ (ऋक्सङ्ख्या : ९१०६)
वाक्यम् १: एमा अ॑ग्मन्रे॒वतीर्जी॒वध॑न्या अध्व॒र्यव॑: सा॒दय॑ता सखायः ।
पदानि : आ । इ॒माः । अ॒ग्म॒न् । रे॒वतीः॑ । जी॒वऽध॑न्याः । अ॒ध्व॒र्यवः॑ । सा॒दय॑त । स॒ख॒यः॒
वाक्यम् २: नि ब॒र्हिषि॑ धत्तन सोम्यासो॒ऽपां नप्ता॑ संविदा॒नास॑ एनाः ॥
पदानि : नि । ब॒र्हिषि॑ । ध॒त्त॒न॒ । सो॒म्या॒सः॒ । अ॒पाम् । नप्ता॑ । स॒म्ऽवि॒दा॒नासः॑ । ए॒नाः॒

२९५. मण्डलम् १०, सूक्तम् ३९, मन्त्रः ७ (ऋक्सङ्ख्या : ९२०२)
वाक्यम् १: युवं रथेन॑ विम॒दाय॑ शुन्ध्यु॒वं॒ न्यू॑हथुः पुरुमि॒त्रस्य॒ योष॑णाम् ।
पदानि : यु॒वम् । रथे॑न । वि॒ऽम॒दाय॑ । शु॒न्ध्यु॒वम् । नि । ऊ॒ह॒थुः॒ । पु॒रु॒ऽमि॒त्रस्य॑ । योष॑णाम्
वाक्यम् २: युवं हवं॑ वध्रिम॒त्या अ॑गच्छत॒ युवं॑ सुषु॒तिं च॑क्रथुः पुर॑न्धये ॥
पदानि : यु॒वम् । हव॑म् । व॒ध्रि॒ऽम॒त्याः । अ॒ग॒च्छ॒त॒म् । युवम् । सु॒ऽसु॒तिम् । च॒क्र॒थुः॒ । पु॒र॑म्ऽधये

२९६. मण्डलम् १०, सूक्तम् ४४, मन्त्रः ३ (ऋक्सङ्ख्या : ९२५१)
वाक्यम् १: एन्द्र॒वाहो॑ नृ॒पति॑ं वज्र॒बाहु॑मु॒ग्रमु॒ग्रास॑स्तवि॒षास॑ एनम् ।
पदानि : आ । इ॒न्द्र॒ऽवाहः॑ । नृ॒ऽपति॑म् । व॒ज्र॒ऽबाहु॑म् । उ॒ग्र॒म् । उ॒ग्रासः॑ । त॒वि॒षासः॑ । ए॒न॒म्
वाक्यम् २: प्रत्व॑क्षसं वृष॒भं स॒त्यशु॑ष्म॒मेम॑स्म॒त्रा स॑धमादो॑ वहन्तु ॥
पदानि : प्रऽत्व॑क्षसम् । वृ॒ष॒भम् । स॒त्यऽशु॑ष्मम् । आ । ई॒म् । अ॒स्म॒ऽत्रा । स॒ध॒ऽमादः॑ । व॒ह॒न्तु॒

२९७. मण्डलम् १०, सूक्तम् ४६, मन्त्रः ६ (ऋक्सङ्ख्या : ९२७७)
वाक्यम् १: नि प॒स्त्या॑सु त्रि॒तः स्त॑भूयन्परि॑वीतो॒ योनौ॑ सीददु॒न्तः ।
पदानि : नि । प॒स्त्या॑सु । त्रि॒तः । स्त॒भु॒ऽयन् । परि॑ऽवीतः । योनौ॑ । सी॒द॒त् । अ॒न्तरिति॑
वाक्यम् २: अतः॑ सं॒गृभ्या॑ वि॒शां दम्ना॑ विध॑र्मणाय॒न्त्रैरी॑यते॒ नॄन् ॥
पदानि : अतः॑ । स॒म्ऽगृभ्य॑ । वि॒शाम् । दम्ना॑ । विऽध॑र्मणा । अ॒य॒न्त्रैः । ई॒य॒ते॒ । नॄन्

२९८. मण्डलम् १०, सूक्तम् ४८, मन्त्रः ११ (ऋक्सङ्ख्या : ९३००)
वाक्यम् १: आ॒दि॒त्याना॑ं वसू॑नां रु॒द्रिया॑णां दे॒वो दे॒वाना॑ं न मि॑नामि॒ धाम॑ ।
पदानि : आ॒दि॒त्याना॑म् । वसू॑नाम् । रु॒द्रिया॑णाम् । दे॒वः । दे॒वाना॑म् । न । मि॒ना॒मि॒ । धाम॑
वाक्यम् २: ते मा॑ भ॒द्राय॒ शव॑से ततक्षुरप॑राजित॒मस्तृ॑त॒मषा॑ळ्हम् ॥
पदानि : ते । मा॒ । भ॒द्राय॑ । शव॑से । त॒त॒क्षुः॒ । अप॑ऽराजितम् । अस्तृ॑तम् । अषा॑ळ्हम्

२९९. मण्डलम् १०, सूक्तम् ६०, मन्त्रः ७ (ऋक्सङ्ख्या : ९४००)
वाक्यम् १: अ॒यं मा॒तायं पि॒तायं जी॒वातु॒रा॑गमत् ।
पदानि : अ॒यम् । मा॒ता । अ॒यम् । पि॒ता । अ॒यम् । जी॒वातुः॑ । आ । अ॒ग॒म॒त्
वाक्यम् २: इ॒दं तव॑ प्र॒सर्प॑णं सु॒ब॑न्धु॒वेहि॒ नि रि॑हि ॥
पदानि : इ॒दम् । तव॑ । प्र॒ऽसर्प॑णम् । सु॒ऽब॑न्धो इति॒ सु॒ऽब॑न्धो । आ । इ॒हि॒ । निः । इ॒हि॒

३००. मण्डलम् १०, सूक्तम् ६१, मन्त्रः १७ (ऋक्सङ्ख्या : ९४२२)
वाक्यम् १: स द्वि॒बन्धु॒र्वैत॑रणो यष्टा॑ सब॒र्धुं धे॒नुम॒स्वं॑ दुहध्यै ।
पदानि : सः । द्वि॒ऽब॒न्धुः॑ । वै॒त॒र॒णः । यष्टा॑ । स॒ब॒ऽर्धुम् । धे॒नुम् । अ॒स्व॑म् । दु॒ह॒ध्यै॑

वाक्यम् २: सं यन्मित्रावरुणा वृञ्ज उक्थैर्ज्येष्ठेभिरर्यमणं वरूथैः ॥
पदानि : सम्। यत्। मित्रावरुणा। वृञ्जे। उक्थैः। ज्येष्ठेभिः। अर्यमणम्। वरूथैः

३०१. मण्डलम् १०, सूक्तम् ६३, मन्त्रः ९ (ऋक्सङ्ख्या : ९४५२)
वाक्यम् १: भरेष्विन्द्रं सुहवं हवामहेंऽहोमुचं सुकृतं दैव्यं जनम्।
पदानि : भरेषु। इन्द्रम्। सुऽहवम्। हवामहे। अंहःऽमुचम्। सुऽकृतम्। दैव्यम्। जनम्
वाक्यम् २: अग्निं मित्रं वरुणं सातये भगं द्यावापृथिवी मरुतः स्वस्तये ॥
पदानि : अग्निम्। मित्रम्। वरुणम्। सातये। भगम्। द्यावापृथिवी इति। मरुतः। स्वस्तये

३०२. मण्डलम् १०, सूक्तम् ६३, मन्त्रः १५ (ऋक्सङ्ख्या : ९४५८)
वाक्यम् १: स्वस्ति नः पथ्यासु धन्वसु स्वस्त्य१प्सु वृजने स्वर्वति।
पदानि : स्वस्ति। नः। पथ्यासु। धन्वऽसु। स्वस्ति। अप्ऽसु। वृजने। स्वःऽवति
वाक्यम् २: स्वस्ति नः पुत्रकृथेषु योनिषु स्वस्ति राये मरुतो दधातन ॥
पदानि : स्वस्ति। नः। पुत्रऽकृथेषु। योनिषु। स्वस्ति। राये। मरुतः। दधातन

३०३. मण्डलम् १०, सूक्तम् ६४, मन्त्रः ४ (ऋक्सङ्ख्या : ९४६४)
वाक्यम् १: कथा कविस्तुवीरवान्कया गिरा बृहस्पतिर्वावृधते सुवृक्तिभिः।
पदानि : कथा। कविः। तुविऽरवान्। कया। गिरा। बृहस्पतिः। ववृधते। सुवृक्तिऽभिः
वाक्यम् २: अज एकपात्सुहवेभिर्ऋक्वभिरहिः शृणोतु बुध्न्यो३ हवीमनि ॥
पदानि : अजः। एकऽपात्। सुऽहवेभिः। ऋक्वऽभिः। अहिः। शृणोतु। बुध्न्यः। हवीमनि

३०४. मण्डलम् १०, सूक्तम् ६६, मन्त्रः ४ (ऋक्सङ्ख्या : ९४९६)
वाक्यम् १: अदितिर्द्यावापृथिवी ऋतं महदिन्द्राविष्णू मरुतः स्वर्बृहत्।
पदानि : अदितिः। द्यावापृथिवी इति। ऋतम्। महत्। इन्द्राविष्णू इति। मरुतः। स्वः। बृहत्
वाक्यम् २: देवाँ आदित्याँ अवसे हवामहे वसून्रुद्रान्त्सवितारं सुदंससम् ॥
पदानि : देवान्। आदित्यान्। अवसे। हवामहे। वसून्। रुद्रान्। सवितारम्। सुऽदंससम्

३०५. मण्डलम् १०, सूक्तम् ६७, मन्त्रः १ (ऋक्सङ्ख्या : ९५०८)
वाक्यम् १: इमां धियं सप्तशीर्ष्णीं पिता न ऋतप्रजातां बृहतीमविन्दत्।
पदानि : इमाम्। धियम्। सप्तऽशीर्ष्णीम्। पिता। नः। ऋतऽप्रजाताम्। बृहतीम्। अविन्दत्
वाक्यम् २: तुरीयं स्विज्जनयद्विश्वजन्योऽयास्य उक्थमिन्द्राय शंसन् ॥
पदानि : तुरीयम्। स्वित्। जनयत्। विश्वऽजन्यः। अयास्यः। उक्थम्। इन्द्राय। शंसन्

३०६. मण्डलम् १०, सूक्तम् ६७, मन्त्रः ६ (ऋक्सङ्ख्या : ९५१३)
वाक्यम् १: इन्द्रो वलं रक्षितारं दुघानां करेणेव वि चकर्ता रवेण।
पदानि : इन्द्रः। वलम्। रक्षितारम्। दुघानाम्। करेणऽइव। वि। चकर्त। रवेण
वाक्यम् २: स्वेदाञ्जिभिरा शिरमिच्छमानोऽरोदयत्पणिमा गा अमुष्णात् ॥
पदानि : स्वेदाञ्जिऽभिः। आऽशिरम्। इच्छमानः। अरोदयत्। पणिम्। आ। गाः। अमुष्णात्

३०७. मण्डलम् १०, सूक्तम् ७०, मन्त्रः १० (ऋक्सङ्ख्या : ९५५३)

वाक्यम् १: वनस्पते रशनया नियूया देवानां पाथ उप वक्षि विद्वान्।
पदानि : वनस्पते। रशनया। निऽयूय। देवानाम्। पाथः। उप। वक्षि। विद्वान्
वाक्यम् २: स्वदाति देवः कृणवद्धवींष्यवतां द्यावापृथिवी हवं मे ॥
पदानि : स्वदाति। देवः। कृणवत्। हवींषि। अवताम्। द्यावापृथिवी इति। हवम्। मे

३०८. मण्डलम् १०, सूक्तम् ७३, मन्त्रः ७ (ऋक्सङ्ख्या : ९५८१)
वाक्यम् १: त्वं जघन्थ नमुचिं मखस्यु दासं कृण्वान ऋषये विमायम्।
पदानि : त्वम्। जघन्थ। नमुचिम्। मखस्युम्। दासम्। कृण्वानः। ऋषये। विऽमायम्
वाक्यम् २: त्वं चकर्थ मनवे स्योनान्पथो देवत्राञ्जसेव यानान् ॥
पदानि : त्वम्। चकर्थ। मनवे। स्योनान्। पथः। देवऽत्रा। अञ्जसाऽइव। यानान्

३०९. मण्डलम् १०, सूक्तम् ७६, मन्त्रः ५ (ऋक्सङ्ख्या : ९६०५)
वाक्यम् १: दिवश्चिदा वोऽमवत्तरेभ्यो विभ्वना चिदाश्वपस्तरेभ्यः।
पदानि : दिवः। चित्। आ। वः। अमवत्ऽतरेभ्यः। विऽभ्वना। चित्। आश्वपःऽतरेभ्यः
वाक्यम् २: वायोश्चिदा सोमरभस्तरेभ्योऽग्नेश्चिदर्च पितुकृत्तरेभ्यः ॥
पदानि : वायोः। चित्। आ। सोमरभःऽतरेभ्यः। अग्नेः। चित्। अर्च। पितुकृत्ऽतरेभ्यः

३१०. मण्डलम् १०, सूक्तम् ७८, मन्त्रः १ (ऋक्सङ्ख्या : ९६१७)
वाक्यम् १: विप्रासो न मन्मभिः स्वाध्यो देवाव्योऽ न यज्ञैः स्वप्नसः।
पदानि : विप्रासः। न। मन्मऽभिः। सुऽआध्यः। देवऽअव्यः। न। यज्ञैः। सुऽअप्नसः
वाक्यम् २: राजानो न चित्राः सुसंदृशः क्षितीनां न मर्या अरेपसः ॥
पदानि : राजानः। न। चित्राः। सुऽसंदृशः। क्षितीनाम्। न। मर्याः। अरेपसः

३११. मण्डलम् १०, सूक्तम् ८१, मन्त्रः ७ (ऋक्सङ्ख्या : ९६४५)
वाक्यम् १: वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम।
पदानि : वाचः। पतिम्। विश्वऽकर्माणम्। ऊतये। मनःऽजुवम्। वाजे। अद्य। हुवेम
वाक्यम् २: स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा ॥
पदानि : सः। नः। विश्वानि। हवनानि। जोषत्। विश्वऽशम्भूः। अवसे। साधुऽकर्मा

३१२. मण्डलम् १०, सूक्तम् ८८, मन्त्रः १ (ऋक्सङ्ख्या : ९७६२)
वाक्यम् १: हविष्मान्तमजरं स्वर्विदिं दिविस्पृश्याहुतं जुष्टमग्नौ।
पदानि : हविः। मान्तम्। अजरम्। स्वःऽविदिं। दिविऽस्पृशिं। आऽहुतम्। जुष्टम्। अग्नौ
वाक्यम् २: तस्य भर्मणे भुवनाय देवा धर्मणे कं स्वधया पप्रथन्त ॥
पदानि : तस्य। भर्मणे। भुवनाय। देवाः। धर्मणे। कम्। स्वधया। पप्रथन्त

३१३. मण्डलम् १०, सूक्तम् ८८, मन्त्रः १६ (ऋक्सङ्ख्या : ९७७७)
वाक्यम् १: द्वे संमीची बिभृतश्चरन्तं शीर्षतो जातं मनसा विमृष्टम्।
पदानि : द्वे इति। समीची इति सम्ऽईची। बिभृतः। चरन्तम्। शीर्षतः। जातम्। मनसा। विऽमृष्टम्
वाक्यम् २: स प्रत्यङ्विश्वा भुवनानि तस्थावप्रयुच्छन्तरणिर्भ्राजमानः ॥
पदानि : सः। प्रत्यङ्। विश्वा। भुवनानि। तस्थौ। अप्रऽयुच्छन्। तरणिः। भ्राजमानः

३१४. मण्डलम् १०, सूक्तम् ९१, मन्त्रः १४ (ऋक्सङ्ख्या : ९८२८)
वाक्यम् १: यस्मिन्नश्वास ऋषभास उक्षणो वशा मेषा अवसृष्टास आहुताः ।
पदानि : यस्मिन्। अश्वासः । ऋषभासः । उक्षणः । वशाः । मेषाः । अवऽसृष्टासः । आऽहुताः
वाक्यम् २: कीलालपे सोमपृष्ठाय वेधसे हृदा मतिं जनये चारुमग्नये ॥
पदानि : कीलालऽपे । सोमऽपृष्ठाय । वेधसे । हृदा । मतिम् । जनये । चारुम् । अग्नये

३१५. मण्डलम् १०, सूक्तम् ९२, मन्त्रः २ (ऋक्सङ्ख्या : ९८३१)
वाक्यम् १: इममञ्जस्पामुभये अकृण्वत धर्माणमग्निं विदथस्य साधनम् ।
पदानि : इमम्। अञ्जःऽपाम्। उभये। अकृण्वत। धर्माणम्। अग्निम्। विदथस्य। साधनम्
वाक्यम् २: अक्तुं न यह्वमुषसः पुरोहितं तनूनपातमरुषस्य निंसते ॥
पदानि : अक्तुम्। न। यह्वम्। उषसः। पुरःऽहितम्। तनूऽनपातम्। अरुषस्य। निंसते

३१६. मण्डलम् १०, सूक्तम् ९२, मन्त्रः ९ (ऋक्सङ्ख्या : ९८३८)
वाक्यम् १: स्तोमं वो अद्य रुद्राय शिक्वसे क्षयद्वीराय नमसा दिदिष्टन ।
पदानि : स्तोमम्। वः। अद्य। रुद्राय। शिक्वसे। क्षयत्ऽवीराय। नमसा। दिदिष्टन
वाक्यम् २: येभिः शिवः स्ववाँ एवयावभिर्दिवः सिषक्ति स्वयशा निकामभिः ॥
पदानि : येभिः। शिवः। स्वऽवान्। एवयावऽभिः। दिवः। सिसक्ति। स्वऽयशाः। निकामऽभिः

३१७. मण्डलम् १०, सूक्तम् ९४, मन्त्रः ६ (ऋक्सङ्ख्या : ९८६५)
वाक्यम् १: उग्रा इव प्रवहन्तः समायमुः साकं युक्ता वृषणो बिभ्रतो धुरः ।
पदानि : उग्राःऽइव। प्रऽवहन्तः। सम्ऽआयमुः। साकम्। युक्ताः। वृषणः। बिभ्रतः। धुरः
वाक्यम् २: यच्छ्वसन्तो जग्रसाना अराविषुः शृण्व एषां प्रोथथो अर्वतामिव ॥
पदानि : यत्। श्वसन्तः। जग्रसानाः। अराविषुः। शृण्वे। एषाम्। प्रोथथः। अर्वताम्ऽइव

३१८. मण्डलम् १०, सूक्तम् ९७, मन्त्रः १४ (ऋक्सङ्ख्या : ९९१८)
वाक्यम् १: अन्या वो अन्यामवत्वन्यान्यस्या उपावत ।
पदानि : अन्या। वः। अन्याम्। अवतु। अन्या। अन्यस्याः। उप। अवत
वाक्यम् २: ताः सर्वाः संविदाना इदं मे प्रावता वचः ॥
पदानि : ताः। सर्वाः। सम्ऽविदानाः। इदम्। मे। प्र। अवत। वचः

३१९. मण्डलम् १०, सूक्तम् १०२, मन्त्रः ५ (ऋक्सङ्ख्या : ९९८०)
वाक्यम् १: न्यक्रन्दयन्नुपयन्त एनममेहयन्वृषभं मध्य आजेः ।
पदानि : नि। अक्रन्दयन्। उपऽयन्तः। एनम्। अमेहयन्। वृषभम्। मध्ये। आजेः
वाक्यम् २: तेन सूभर्वं शतवत्सहस्रं गवां मुद्गलः प्रधने जिगाय ॥
पदानि : तेन। सूभर्वम्। शतऽवत्। सहस्रम्। गवाम्। मुद्गलः। प्रऽधने। जिगाय

३२०. मण्डलम् १०, सूक्तम् १०३, मन्त्रः १ (ऋक्सङ्ख्या : ९९८८)
वाक्यम् १: आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।
पदानि : आशुः। शिशानः। वृषभः। न। भीमः। घनाघनः। क्षोभणः। चर्षणीनाम्
वाक्यम् २: संक्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत्साकमिन्द्रः ॥

पदानि : सम्ऽक्रन्दनः । अनिऽमिषः । एकऽवीरः । शतम् । सेनाः । अजयत् । साकम् । इन्द्रः

३२१. मण्डलम् १०, सूक्तम् १०३, मन्त्रः ७ (ऋक्सङ्ख्या : ९९९४)
वाक्यम् १: अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः ।
पदानि : अभि । गोत्राणि । सहसा । गाहमानः । अदयः । वीरः । शतऽमन्युः । इन्द्रः
वाक्यम् २: दुश्च्यवनः पृतनाषाळयुध्योऽस्माकं सेना अवतु प्र युत्सु ॥
पदानि : दुःऽच्यवनः । पृतनाषाट् । अयुध्यः । अस्माकम् । सेनाः । अवतु । प्र । युत्ऽसु

३२२. मण्डलम् १०, सूक्तम् १०७, मन्त्रः ११ (ऋक्सङ्ख्या : १००४४)
वाक्यम् १: भोजमश्वाः सुष्ठुवाहो वहन्ति सुवृद्रथा वर्तते दक्षिणायाः ।
पदानि : भोजम् । अश्वाः । सुष्ठुऽवाहः । वहन्ति । सुऽवृत् । रथः । वर्तते । दक्षिणायाः
वाक्यम् २: भोजं देवासोऽवता भरेषु भोजः शत्रून्त्समनीकेषु जेता ॥
पदानि : भोजम् । देवासः । अवत । भरेषु । भोजः । शत्रून् । सम्ऽअनीकेषु । जेता

३२३. मण्डलम् १०, सूक्तम् १०९, मन्त्रः ४ (ऋक्सङ्ख्या : १००५९)
वाक्यम् १: देवा एतस्यामवदन्त पूर्वे सप्तऋषयस्तपसे ये निषेदुः ।
पदानि : देवाः । एतस्याम् । अवदन्त । पूर्वे । सप्तऽऋषयः । तपसे । ये । निऽसेदुः
वाक्यम् २: भीमा जाया ब्राह्मणस्योपनीता दुर्धां दधाति परमे व्योमन् ॥
पदानि : भीमा । जाया । ब्राह्मणस्य । उपऽनीता । दुःऽधाम् । दधाति । परमे । विऽओमन्

३२४. मण्डलम् १०, सूक्तम् ११४, मन्त्रः ५ (ऋक्सङ्ख्या : १०१०८)
वाक्यम् १: सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्ति ।
पदानि : सुऽपर्णम् । विप्राः । कवयः । वचःऽभिः । एकम् । सन्तम् । बहुधा । कल्पयन्ति
वाक्यम् २: छन्दांसि च दधतो अध्वरेषु ग्रहान्त्सोमस्य मिमते द्वादश ॥
पदानि : छन्दांसि । च । दधतः । अध्वरेषु । ग्रहान् । सोमस्य । मिमते । द्वादश

३२५. मण्डलम् १०, सूक्तम् ११४, मन्त्रः ६ (ऋक्सङ्ख्या : १०१०९)
वाक्यम् १: षट्त्रिंशाँश्च चतुरः कल्पयन्तश्छन्दांसि च दधत आद्वादशम् ।
पदानि : षट्ऽत्रिंशान् । च । चतुरः । कल्पयन्तः । छन्दांसि । च । दधतः । आऽद्वादशम्
वाक्यम् २: यज्ञं विमाय कवयो मनीष ऋक्सामाभ्यां प्र रथं वर्तयन्ति ॥
पदानि : यज्ञम् । विऽमाय । कवयः । मनीषा । ऋक्ऽसामाभ्याम् । प्र । रथम् । वर्तयन्ति

३२६. मण्डलम् १०, सूक्तम् ११४, मन्त्रः ८ (ऋक्सङ्ख्या : १०१११)
वाक्यम् १: सहस्रधा पञ्चदशान्युक्था यावद्द्यावापृथिवी तावदित्तत् ।
पदानि : सहस्रधा । पञ्चऽदशानि । उक्था । यावत् । द्यावापृथिवी इति । तावत् । इत् । तत्
वाक्यम् २: सहस्रधा महिमानः सहस्रं यावद्ब्रह्म विष्ठितं तावती वाक् ॥
पदानि : सहस्रधा । महिमानः । सहस्रम् । यावत् । ब्रह्म । विऽस्थितम् । तावती । वाक्

३२७. मण्डलम् १०, सूक्तम् १२२, मन्त्रः १ (ऋक्सङ्ख्या : १०१८२)
वाक्यम् १: वसुं न चित्रमहसं गृणीषे वामं शेवमतिथिमद्विषेण्यम् ।

पदानि : वसुंम्। न। चित्रऽमंहसम्। गृणीषे। वामम्। शेवंम्। अतिंथिम्। अद्विषेण्यम्
वाक्यम् २: स रांसते शुरुधों विश्वधांयसोऽग्निर्होतां गृहपंतिः सुवीर्यम्॥
पदानि : सः। रासते। शुरुधः। विश्वऽधांयसः। अग्निः। होता। गृहऽपंतिः। सुऽवीर्यम्

३२८. मण्डलम् १०, सूक्तम् १२४, मन्त्रः ९ (ऋक्सङ्ख्या : १०२०६)
वाक्यम् १: बीभत्सूनां सयुजं हंसमांहुरपां दिव्यानां सख्ये चरंन्तम्।
पदानि : बीभत्सूनाम्। सऽयुजम्। हंसम्। आहुः। अपाम्। दिव्यानाम्। सख्ये। चरंन्तम्
वाक्यम् २: अनुष्टुभमनु चर्चूर्यमांणमिन्द्रं नि चिक्युः कवयों मनीषा॥
पदानि : अनुऽस्तुभम्। अनु। चर्चूर्यमांणम्। इन्द्रम्। नि। चिक्युः। कवयः। मनीषा

३२९. मण्डलम् १०, सूक्तम् १२६, मन्त्रः १ (ऋक्सङ्ख्या : १०२१५)
वाक्यम् १: न तमंहो न दुंरितं देवांसो अष्टु मर्त्यम्।
पदानि : न। तम्। अंहः। न। दुःऽइतम्। देवांसः। अष्टु। मर्त्यम्
वाक्यम् २: सजोषंसो यमंर्यमा मित्रो नयंन्ति वरुंणो अति द्विषः॥
पदानि : सऽजोषंसः। यम्। अर्यमा। मित्रः। नयंन्ति। वरुंणः। अतिं। द्विषः

३३०. मण्डलम् १०, सूक्तम् १३०, मन्त्रः ४ (ऋक्सङ्ख्या : १०२५०)
वाक्यम् १: अग्नेर्गायत्र्यभवत्सयुग्वोष्णिहंया सविता सं बभूव।
पदानि : अग्नेः। गायत्री। अभवत्। सऽयुग्वा। उष्णिहंया। सविता। सम्। बभूव
वाक्यम् २: अनुष्टुभा सोमं उक्थैर्महंस्वान्बृहस्पतेर्बृहती वाचमावत्॥
पदानि : अनुऽस्तुभा। सोमः। उक्थैः। महंस्वान्। बृहस्पतेः। बृहती। वाचम्। आवत्

३३१. मण्डलम् १०, सूक्तम् १४२, मन्त्रः ५ (ऋक्सङ्ख्या : १०३३१)
वाक्यम् १: प्रत्यंस्य श्रेणंयो दृष्टश्र एकं नियानं बहवो रथांसः।
पदानि : प्रतिं। अस्य। श्रेणंयः। दृष्टऽश्रे। एकम्। निऽयानम्। बहवः। रथांसः
वाक्यम् २: बाहू यदंग्ने अनुमर्मृजानो न्यंङ्ङुत्तानामन्वेषि भूमिंम्॥
पदानि : बाहू इतिं। यत्। अग्ने। अनुऽमर्मृजानः। न्यंङ्। उत्तानाम्। अनुऽएषिं। भूमिंम्

३३२. मण्डलम् १०, सूक्तम् १४९, मन्त्रः १ (ऋक्सङ्ख्या : १०३६९)
वाक्यम् १: सविता यन्त्रैः पृथिवीमरम्णादस्कम्भने सविता द्यामंदृंहत्।
पदानि : सविता। यन्त्रैः। पृथिवीम्। अरम्णात्। अस्कम्भने। सविता। द्याम्। अदृंहत्
वाक्यम् २: अश्वंमिवाधुक्षद्धुनिंमन्तरिंक्षमतूर्ते बद्धं सविता समुद्रम्॥
पदानि : अश्वंम्ऽइव। अधुक्षत्। धुनिंम्। अन्तरिंक्षम्। अतूर्ते। बद्धम्। सविता। समुद्रम्

३३३. मण्डलम् १०, सूक्तम् १६४, मन्त्रः ३ (ऋक्सङ्ख्या : १०४४९)
वाक्यम् १: यदाशसा निःशसाभिशसोपारिम जाग्रतो यत्स्वपन्तः।
पदानि : यत्। आऽशसा। निःऽशसा। अभिऽशसा। उपऽआरिम। जाग्रतः। यत्। स्वपन्तः
वाक्यम् २: अग्निर्विश्वान्यप दुष्कृतान्यजुष्टान्यारे अस्मद्दधातु॥
पदानि : अग्निः। विश्वानि। अप। दुःऽकृतानि। अजुष्टानि। आरे। अस्मत्। दाधातु

३३४. मण्डलम् १०, सूक्तम् १७३, मन्त्रः २ (ऋक्सङ्ख्या : १०४८७)
वाक्यम् १: इहैवैधि माप च्योष्ठाः पर्वत इवाविचाचलिः ।
पदानि : इह । एव । एधि । मा । अप । च्योष्ठाः । पर्वतःऽइव । अविंऽचाचलिः
वाक्यम् २: इन्द्र इवेह ध्रुवस्तिष्ठेह राष्ट्रमु धारय ॥
पदानि : इन्द्रःऽइव । इह । ध्रुवः । तिष्ठ । इह । राष्ट्रम् । ऊँ इति । धारय

३३५. मण्डलम् १०, सूक्तम् १८३, मन्त्रः ३ (ऋक्सङ्ख्या : १०५२५)
वाक्यम् १: अहं गर्भमदधामोषधीष्वहं विश्वेषु भुवनेष्वन्तः ।
पदानि : अहम् । गर्भम् । अदधाम् । ओषधीषु । अहम् । विश्वेषु । भुवनेषु । अन्तरिति
वाक्यम् २: अहं प्रजा अजनयं पृथिव्यामहं जनिभ्यो अपरीषु पुत्रान् ॥
पदानि : अहम् । प्रऽजाः । अजनयम् । पृथिव्याम् । अहम् । जनिंऽभ्यः । अपरीषु । पुत्रान्

नवपदवाक्यकाः मन्त्राः
(४७३ मन्त्राः)

१. मण्डलम् १, सूक्तम् १०, मन्त्रः ४ (ऋक्सङ्ख्या : ९४)
वाक्यम् १: एहि स्तोमाँ अभि स्वराभि गृणीह्या रुव ।
पदानि : आ । इहि । स्तोमान् । अभि । स्वर । अभि । गृणीहि । आ । रुव
वाक्यम् २: ब्रह्म च नो वसो सचेन्द्र यज्ञं च वर्धय ॥
पदानि : ब्रह्म । च । नः । वसो इति । सचा । इन्द्र । यज्ञम् । च । वर्धय

२. मण्डलम् १, सूक्तम् २३, मन्त्रः २२ (ऋक्सङ्ख्या : २५१)
वाक्यम् १: इदमापः प्र वहत यत्किं च दुरितं मयि ।
पदानि : इदम् । आपः । प्र । वहत । यत् । किम् । च । दुःऽइतम् । मयि
वाक्यम् २: यद्वाहमभिदुद्रोह यद्वा शेप उतानृतम् ॥
पदानि : यत् । वा । अहम् । अभिऽदुद्रोह । यत् । वा । शेपे । उत । अनृतम्

३. मण्डलम् १, सूक्तम् ३१, मन्त्रः ८ (ऋक्सङ्ख्या : ३५८)
वाक्यम् १: त्वं नो अग्ने सनये धनानां यशसं कारुं कृणुहि स्तवानः ।
पदानि : त्वम् । नः । अग्ने । सनये । धनानाम् । यशसम् । कारुम् । कृणुहि । स्तवानः
वाक्यम् २: ऋध्याम कर्मापसा नवेन देवैर्द्यावापृथिवी प्रावतं नः ॥
पदानि : ऋध्याम । कर्म । अपसा । नवेन । देवैः । द्यावापृथिवी इति । प्र । अवतम् । नः

४. मण्डलम् १, सूक्तम् ३१, मन्त्रः ११ (ऋक्सङ्ख्या : ३६१)
वाक्यम् १: त्वामग्ने प्रथममायुमायवे देवा अकृण्वन्नहुषस्य विश्पतिम् ।
पदानि : त्वाम् । अग्ने । प्रथमम् । आयुम् । आयवे । देवाः । अकृण्वन् । नहुषस्य । विश्पतिम्
वाक्यम् २: इळामकृण्वन्मनुषस्य शासनीं पितुर्यत्पुत्रो ममकस्य जायते ॥
पदानि : इळाम् । अकृण्वन् । मनुषस्य । शासनीम् । पितुः । यत् । पुत्रः । ममकस्य । जायते

५. मण्डलम् १, सूक्तम् ३१, मन्त्रः १५ (ऋक्सङ्ख्या : ३६५)

वाक्यम् १: त्वमग्ने प्रयतदक्षिणं नरं वर्मेव स्यूतं परि पासि विश्वतः ।
पदानि : त्वम् । अग्ने । प्रयतऽदक्षिणम् । नरम् । वर्मऽइव । स्यूतम् । परि । पासि । विश्वतः
वाक्यम् २: स्वादुक्षद्मा यो वसतौ स्योनकृज्जीवयाजं यजते सोपमा दिवः ॥
पदानि : स्वादुऽक्षद्मा । यः । वसतौ । स्योनऽकृत् । जीवऽयाजम् । यजते । सः । उपऽमा । दिवः

६. मण्डलम् १, सूक्तम् ३२, मन्त्रः १ (ऋक्सङ्ख्या : ३६९)
वाक्यम् १: इन्द्रस्य नु वीर्याणि प्र वोचं यानि चकार प्रथमानि वज्री ।
पदानि : इन्द्रस्य । नु । वीर्याणि । प्र । वोचम् । यानि । चकार । प्रथमानि । वज्री
वाक्यम् २: अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत्पर्वतानाम् ॥
पदानि : अहन् । अहिम् । अनु । अपः । ततर्द । प्र । वक्षणाः । अभिनत् । पर्वतानाम्

७. मण्डलम् १, सूक्तम् ३३, मन्त्रः ११ (ऋक्सङ्ख्या : ३९४)
वाक्यम् १: अनु स्वधामक्षरन्नापो अस्यावर्धत मध्य आ नाव्यानाम् ।
पदानि : अनु । स्वधाम् । अक्षरन् । आपः । अस्य । अवर्धत । मध्ये । आ । नाव्यानाम्
वाक्यम् २: सध्रीचीनेन मनसा तमिन्द्र ओजिष्ठेन हन्मनाहन्नभि द्यून् ॥
पदानि : सध्रीचीनेन । मनसा । तम् । इन्द्रः । ओजिष्ठेन । हन्मना । अहन् । अभि । द्यून्

८. मण्डलम् १, सूक्तम् ३३, मन्त्रः १२ (ऋक्सङ्ख्या : ३९५)
वाक्यम् १: न्याविध्यदिलीबिशस्य दृळ्हा वि शृङ्गिणमभिनच्छुष्णमिन्द्रः ।
पदानि : नि । अविध्यत् । इलीबिशस्य । दृळ्हा । वि । शृङ्गिणम् । अभिनत् । शुष्णम् । इन्द्रः
वाक्यम् २: यावत्तरो मघवन्यावदोजो वज्रेण शत्रुमवधीः पृतन्युम् ॥
पदानि : यावत् । तरः । मघऽवन् । यावत् । ओजः । वज्रेण । शत्रुम् । अवधीः । पृतन्युम्

९. मण्डलम् १, सूक्तम् ३४, मन्त्रः १२ (ऋक्सङ्ख्या : ४१०)
वाक्यम् १: आ नो अश्विना त्रिवृता रथेनार्वाञ्चं रयिं वहतं सुवीरम् ।
पदानि : आ । नः । अश्विना । त्रिऽवृता । रथेन । अर्वाञ्चम् । रयिम् । वहतम् । सुऽवीरम्
वाक्यम् २: शृण्वन्ता वामवसे जोहवीमि वृधे च नो भवतं वाजसातौ ॥
पदानि : शृण्वन्ता । वाम् । अवसे । जोहवीमि । वृधे । च । नः । भवतम् । वाजऽसातौ

१०. मण्डलम् १, सूक्तम् ३५, मन्त्रः ३ (ऋक्सङ्ख्या : ४१३)
वाक्यम् १: यातिं देवः प्रवता यात्युद्वता यातिं शुभ्राभ्यां यजतो हरिभ्याम् ।
पदानि : यातिम् । देवः । प्रऽवता । यातिम् । उत्ऽवता । यातिम् । शुभ्राभ्याम् । यजतः । हरिऽभ्याम्
वाक्यम् २: आ देवो याति सविता परावतोऽप विश्वा दुरिता बाधमानः ॥
पदानि : आ । देवः । याति । सविता । पराऽवतः । अप । विश्वा । दुःऽइता । बाधमानः

११. मण्डलम् १, सूक्तम् ३६, मन्त्रः १२ (ऋक्सङ्ख्या : ४३३)
वाक्यम् १: रायस्पूर्धि स्वधावोऽस्ति हि तेऽग्ने देवेष्वाप्यम् ।
पदानि : रायः । पूर्धि । स्वधाऽवः । अस्ति । हि । ते । अग्ने । देवेषु । आप्यम्
वाक्यम् २: त्वं वाजस्य श्रुत्यस्य राजसि स नो मृळ महाँ असि ॥
पदानि : त्वम् । वाजस्य । श्रुत्यस्य । राजसि । सः । नः । मृळ । महान् । असि

१२. मण्डलम् १, सूक्तम् ४८, मन्त्रः ४ (ऋक्सङ्ख्या : ५७०)
वाक्यम् १: उषो॒ ये ते॒ प्र यामे॑षु यु॒ञ्जते॒ मनो॑ दा॒नाय॑ सू॒रयः॑ ।
पदानि : उषः॑ । ये । ते॒ । प्र । यामे॑षु । यु॒ञ्जते॑ । मनः॑ । दा॒नाय॑ । सू॒रयः॑
वाक्यम् २: अत्राह॒ तत्क॑ण्व॒ एषां॑ कण्व॒तमो॒ नाम॑ गृणाति नृ॒णाम् ॥
पदानि : अत्र॑ । अह॑ । तत् । क॒ण्वः॑ । एषा॑म् । क॒ण्व॒ऽतमः॑ । नाम॑ । गृ॒णा॒ति॒ । नृ॒णाम्

१३. मण्डलम् १, सूक्तम् ५१, मन्त्रः ३ (ऋक्सङ्ख्या : ६०२)
वाक्यम् १: त्वं गो॒त्रमङ्गि॑रोभ्योऽवृणो॒रपो॒तात्रये॑ श॒तदु॑रेषु गातु॒वित् ।
पदानि : त्वम् । गो॒त्रम् । अङ्गि॑रःऽभ्यः । अ॒वृ॒णोः॒ । अप॑ । उ॒त । अत्र॑ये । श॒तऽदु॑रेषु । गा॒तु॒ऽवित्
वाक्यम् २: स॒सेनं॑ चिद्बिभे॒दायाव॑हो॒ वस्वा॒जावद्रिं॑ वावसा॒नस्य॑ नर्तयन् ॥
पदानि : स॒सेन॑ । चि॒त् । बि॒ऽभे॒दाय॑ । अ॒व॒हः॒ । वसु॑ । आ॒जौ । अद्रि॑म् । व॒व॒सा॒नस्य॑ । न॒र्त॒य॒न्

१४. मण्डलम् १, सूक्तम् ५१, मन्त्रः १२ (ऋक्सङ्ख्या : ६११)
वाक्यम् १: आ स्मा॒ रथं॑ वृष॒पाणे॑षु तिष्ठसि शार्या॒तस्य॒ प्रभृ॑ता॒ येषु॑ मन्द॑से ।
पदानि : आ । स्म॒ । रथ॑म् । वृ॒ष॒ऽपाने॑षु । ति॒ष्ठ॒सि॒ । शा॒र्या॒तस्य॑ । प्रऽभृ॑ताः । येषु॑ । मन्द॑से
वाक्यम् २: इन्द्र॒ यथा॑ सुतसो॒मेषु॒ चाक॑नोऽनु॒र्वाणं॒ श्लोक॒मा रो॑हसे दि॒वि ॥
पदानि : इन्द्र॑ । यथा॑ । सु॒तऽसो॑मेषु । चाक॑नः । अ॒नु॒ऽर्वाण॑म् । श्लोक॑म् । आ । रो॒ह॒से॒ । दि॒वि

१५. मण्डलम् १, सूक्तम् ५१, मन्त्रः १४ (ऋक्सङ्ख्या : ६१३)
वाक्यम् १: इन्द्रो॑ अश्रायि सु॒ध्यो॑ निरे॒के प॒ज्रेषु॒ स्तोमो॒ दुर्यो॒ न यू॒पः॑ ।
पदानि : इन्द्रः॑ । अ॒श्रा॒यि॒ । सु॒ऽध्यः॑ । नि॒रे॒के । प॒ज्रेषु॑ । स्तोमः॑ । दुर्यः॑ । न । यू॒पः॑
वाक्यम् २: अ॒श्व॒युर्गव्यू॒ रथ॒युर्व॑सू॒युरि॑न्द्र इद्रा॒यः क्षय॑ति॒ प्रय॑न्ता ॥
पदानि : अ॒श्व॒ऽयुः॒ । गव्यु॑ः । रथ॑ऽयुः॒ । व॒सु॒ऽयुः॒ । इ॒न्द्रः॑ । इत् । रा॒यः । क्षय॑ति । प्रऽय॑न्ता

१६. मण्डलम् १, सूक्तम् ५२, मन्त्रः ५ (ऋक्सङ्ख्या : ६१९)
वाक्यम् १: अ॒भि स्ववृ॑ष्टिं॒ मदे॑ अस्य॒ युध्य॑तो र॒घ्वीरि॑व॒ प्रव॑णे स॒स्रुरू॒तयः॑ ।
पदानि : अ॒भि । स्वऽवृ॑ष्टिम् । मदे॑ । अ॒स्य॒ । युध्य॑तः । र॒घ्वीःऽइ॑व । प्र॒ऽव॒णे । स॒स्रुः॒ । ऊ॒तयः॑
वाक्यम् २: इन्द्रो॒ यद्व॒ज्री धृ॒षमा॑णो॒ अन्ध॑सा भि॒नद्बल॑स्य॒ परि॒धीँरि॑व॒ त्रि॒तः ॥
पदानि : इन्द्रः॑ । यत् । व॒ज्री । धृ॒षमा॑णः । अन्ध॑सा । भि॒नत् । व॒लस्य॑ । परि॒धीन्ऽइ॑व । त्रि॒तः

१७. मण्डलम् १, सूक्तम् ५२, मन्त्रः ८ (ऋक्सङ्ख्या : ६२२)
वाक्यम् १: ज॒घ॒न्वाँ उ॒ हरि॑भिः सम्भृतक्रत॒विन्द्रं॑ वृ॒त्रं मनु॑षे गातु॒यन्न॒पः ।
पदानि : ज॒घ॒न्वान् । ऊँ॒ इति॑ । हरि॑ऽभिः । स॒म्भृ॒त॒क्र॒तो॒ इति॑ सम्भृतऽक्रतो । इन्द्र॑ । वृ॒त्रम् । मनु॑षे । गा॒तु॒ऽयन् । अ॒पः
वाक्यम् २: अय॑च्छथा बा॒ह्वोर्व॒ज्रमा॑य॒समधा॑रयो दि॒व्या सूर्यं॑ दृ॒शे ॥
पदानि : अय॑च्छथाः । बा॒ह्वोः । व॒ज्रम् । आ॒य॒सम् । अधा॑रयः । दि॒वि । आ । सूर्य॑म् । दृ॒शे

१८. मण्डलम् १, सूक्तम् ५२, मन्त्रः ९ (ऋक्सङ्ख्या : ६२३)
वाक्यम् १: बृ॒हत्स्व॑श्चन्द्र॒मम॑व॒द्यदु॒क्थ्य१॑मकृ॑ण्वत भि॒यसा॒ रोह॑णं दि॒वः ।
पदानि : बृ॒हत् । स्वऽच॑न्द्रम् । अम॑ऽवत् । यत् । उ॒क्थ्य॑म् । अकृ॑ण्वत । भि॒यसा॑ । रोह॑णम् । दि॒वः
वाक्यम् २: यन्मानु॑षप्रधना॒ इन्द्र॑मू॒तय॒ः स्व॑र्नृ॒षाचो॑ म॒रुतोऽम॑दन्ननु ॥

पदानि : यत्। मानुषऽप्रधनाः। इन्द्रम्। ऊतयः। स्वः। नृऽसाचः। मरुतः। अमदन्। अनु

१९. मण्डलम् १, सूक्तम् ५३, मन्त्रः १० (ऋक्सङ्ख्या : ६३९)
वाक्यम् १: त्वमाविथ सुश्रवसं तवोतिभिस्तव त्रामभिरिन्द्र तूर्वयाणम्।
पदानि : त्वम्। आविथ। सुऽश्रवसम्। तव। ऊतिऽभिः। तव। त्रामऽभिः। इन्द्र। तूर्वयाणम्
वाक्यम् २: त्वमस्मै कुत्समतिथिग्वमायुं महे राज्ञे यूने अरन्धनायः॥
पदानि : त्वम्। अस्मै। कुत्सम्। अतिथिऽग्वम्। आयुम्। महे। राज्ञे। यूने। अरन्धनायः

२०. मण्डलम् १, सूक्तम् ५४, मन्त्रः २ (ऋक्सङ्ख्या : ६४२)
वाक्यम् १: अर्चा शक्राय शाकिने शचीवते शृण्वन्तमिन्द्रं महयन्नभि ष्टुहि।
पदानि : अर्च। शक्राय। शाकिने। शचीऽवते। शृण्वन्तम्। इन्द्रम्। महयन्। अभि। स्तुहि
वाक्यम् २: यो धृष्णुना शवसा रोदसी उभे वृषा वृषत्वा वृषभो न्यृञ्जते॥
पदानि : यः। धृष्णुना। शवसा। रोदसी इति। उभे इति। वृषा। वृषऽत्वा। वृषभः। निऽऋञ्जते

२१. मण्डलम् १, सूक्तम् ५५, मन्त्रः २ (ऋक्सङ्ख्या : ६५३)
वाक्यम् १: सो अर्णवो न नद्यः समुद्रियः प्रति गृभ्णाति विश्रिता वरीमभिः।
पदानि : सः। अर्णवः। न। नद्यः। समुद्रियः। प्रति। गृभ्णाति। विऽश्रिताः। वरीमऽभिः
वाक्यम् २: इन्द्रः सोमस्य पीतये वृषायते सनात्स युध्म ओजसा पनस्यते॥
पदानि : इन्द्रः। सोमस्य। पीतये। वृषऽयते। सनात्। सः। युध्मः। ओजसा। पनस्यते

२२. मण्डलम् १, सूक्तम् ५५, मन्त्रः ५ (ऋक्सङ्ख्या : ६५६)
वाक्यम् १: स इन्महानि समिथानि मज्मना कृणोति युध्म ओजसा जनेभ्यः।
पदानि : सः। इत्। महानि। सम्ऽइथानि। मज्मना। कृणोति। युध्मः। ओजसा। जनेभ्यः
वाक्यम् २: अधा चन श्रद्दधति त्विषीमत इन्द्राय वज्रं निघनिघ्नते वधम्॥
पदानि : अध। चन। श्रत्। दधति। त्विषिऽमते। इन्द्राय। वज्रम्। निऽघनिघ्नते। वधम्

२३. मण्डलम् १, सूक्तम् ५५, मन्त्रः ६ (ऋक्सङ्ख्या : ६५७)
वाक्यम् १: स हि श्रवस्युः सदनानि कृत्रिमा क्षमया वृधान ओजसा विनाशयन्।
पदानि : सः। हि। श्रवस्युः। सदनानि। कृत्रिमा। क्षमया। वृधानः। ओजसा। विऽनाशयन्
वाक्यम् २: ज्योतींषि कृण्वन्नवृकाणि यज्यवेऽव सुक्रतुः सर्तवा अपः सृजत्॥
पदानि : ज्योतींषि। कृण्वन्। अवृकाणि। यज्यवे। अव। सुऽक्रतुः। सर्तवै। अपः। सृजत्

२४. मण्डलम् १, सूक्तम् ५५, मन्त्रः ८ (ऋक्सङ्ख्या : ६५९)
वाक्यम् १: अप्रक्षितं वसु बिभर्षि हस्तयोरषाळ्हं सहस्तन्वि श्रुतो दधे।
पदानि : अप्रऽक्षितम्। वसु। बिभर्षि। हस्तयोः। अषाळ्हम्। सहः। तन्वि। श्रुतः। दधे
वाक्यम् २: आवृतासोऽवतासो न कर्तृभिस्तनूषु ते क्रतव इन्द्र भूरयः॥
पदानि : आऽवृतासः। अवतासः। न। कर्तृऽभिः। तनूषु। ते। क्रतवः। इन्द्र। भूरयः

२५. मण्डलम् १, सूक्तम् ५९, मन्त्रः २ (ऋक्सङ्ख्या : ६८२)
वाक्यम् १: मूर्धा दिवो नाभिरग्निः पृथिव्या अथाभवदरती रोदस्योः।

पदानि : मूर्धा । दिवः । नाभिः । अग्निः । पृथिव्याः । अथ । अभवत् । अरतिः । रोदस्योः
वाक्यम् २: तं त्वा देवासोऽजनयन्त देवं वैश्वानर ज्योतिरिदार्याय ॥
पदानि : तम् । त्वा । देवासः । अजनयन्त । देवम् । वैश्वानर । ज्योतिः । इत् । आर्याय

२६. मण्डलम् १, सूक्तम् ५९, मन्त्रः ३ (ऋक्सङ्ख्या : ६८३)
वाक्यम् १: आ सूर्ये न रश्मयो ध्रुवासो वैश्वानरे ददिरेऽग्ना वसूनि ।
पदानि : आ । सूर्ये । न । रश्मयः । ध्रुवासः । वैश्वानरे । दधिरे । अग्ना । वसूनि
वाक्यम् २: या पर्वतेष्वोषधीष्वप्सु या मानुषेष्वसि तस्य राजा ॥
पदानि : या । पर्वतेषु । ओषधीषु । अप्ऽसु । या । मानुषेषु । असि । तस्य । राजा

२७. मण्डलम् १, सूक्तम् ५९, मन्त्रः ६ (ऋक्सङ्ख्या : ६८६)
वाक्यम् १: प्र नू महित्वं वृषभस्य वोचं यं पूरवो वृत्रहणं सचन्ते ।
पदानि : प्र । नु । महिऽत्वम् । वृषभस्य । वोचम् । यम् । पूरवः । वृत्रऽहनम् । सचन्ते
वाक्यम् २: वैश्वानरो दस्युमग्निर्जघन्वाँ अधूनोत्काष्ठा अव शम्बरं भेत् ॥
पदानि : वैश्वानरः । दस्युम् । अग्निः । जघन्वान् । अधूनोत् । काष्ठाः । अव । शम्बरम् । भेत्

२८. मण्डलम् १, सूक्तम् ६२, मन्त्रः २ (ऋक्सङ्ख्या : ७१०)
वाक्यम् १: प्र वो महे महि नमो भरध्वमाङ्गूष्यं शवसानाय साम ।
पदानि : प्र । वः । महे । महि । नमः । भरध्वम् । आङ्गूष्यम् । शवसानाय । साम
वाक्यम् २: येना नः पूर्वे पितरः पदज्ञा अर्चन्तो अङ्गिरसो गा अविन्दन् ॥
पदानि : येन । नः । पूर्वे । पितरः । पदऽज्ञाः । अर्चन्तः । अङ्गिरसः । गाः । अविन्दन्

२९. मण्डलम् १, सूक्तम् ६२, मन्त्रः ५ (ऋक्सङ्ख्या : ७१३)
वाक्यम् १: गृणानो अङ्गिरोभिर्दस्म वि वरुषसा सूर्येण गोभिरन्धः ।
पदानि : गृणानः । अङ्गिरःऽभिः । दस्म । वि । वः । उषसा । सूर्येण । गोभिः । अन्धः
वाक्यम् २: वि भूम्या अप्रथय इन्द्र सानु दिवो रज उपरमस्तभायः ॥
पदानि : वि । भूम्याः । अप्रथयः । इन्द्र । सानु । दिवः । रजः । उपरम् । अस्तभायः

३०. मण्डलम् १, सूक्तम् ७३, मन्त्रः १ (ऋक्सङ्ख्या : ८२७)
वाक्यम् १: रयिर्न यः पितृवित्तो वयोधाः सुप्रणीतिश्चिकितुषो न शासुः ।
पदानि : रयिः । न । यः । पितृऽवित्तः । वयःऽधाः । सुऽप्रनीतिः । चिकितुषः । न । शासुः
वाक्यम् २: स्योनशीरतिथिर्न प्रीणानो होतेव सद्म विधतो वि तारीत् ॥
पदानि : स्योनऽशीः । अतिथिः । न । प्रीणानः । होताऽइव । सद्म । विधतः । वि । तारीत्

३१. मण्डलम् १, सूक्तम् ७६, मन्त्रः ३ (ऋक्सङ्ख्या : ८५३)
वाक्यम् १: प्र सु विश्वान्रक्षसो धक्ष्यग्ने भवा यज्ञानामभिशस्तिपावा ।
पदानि : प्र । सु । विश्वान् । रक्षसः । धक्षि । अग्ने । भव । यज्ञानाम् । अभिशस्तिऽपावा
वाक्यम् २: अथा वहु सोमपतिं हरिभ्यामातिथ्यमस्मै चकृमा सुदान्वे ॥
पदानि : अथ । आ । वह । सोमऽपतिम् । हरिऽभ्याम् । आतिथ्यम् । अस्मै । चकृम । सुऽदान्वे

३२. मण्डलम् १, सूक्तम् ७६, मन्त्रः ५ (ऋक्सङ्ख्या : ८५५)
वाक्यम् १: यथा विप्रस्य मनुषो हविर्भिर्देवाँ अयजः कविभिः कविः सन् ।
पदानि : यथा । विप्रस्य । मनुषः । हविःऽभिः । देवान् । अयजः । कविऽभिः । कविः । सन्
वाक्यम् २: एवा होतः सत्यतर त्वमद्याग्ने मन्द्रया जुह्वा यजस्व ॥
पदानि : एव । होतरिति । सत्यऽतर । त्वम् । अद्य । अग्ने । मन्द्रया । जुह्वा । यजस्व

३३. मण्डलम् १, सूक्तम् ७७, मन्त्रः १ (ऋक्सङ्ख्या : ८५६)
वाक्यम् १: कथा दाशेमाग्नये कास्मै देवजुष्टोच्यते भामिने गीः ।
पदानि : कथा । दाशेम । अग्नये । का । अस्मै । देवऽजुष्टा । उच्यते । भामिने । गीः
वाक्यम् २: यो मर्त्येष्वमृतं ऋतावा होता यजिष्ठ इत्कृणोति देवान् ॥
पदानि : यः । मर्त्येषु । अमृतः । ऋतऽवा । होता । यजिष्ठः । इत् । कृणोति । देवान्

३४. मण्डलम् १, सूक्तम् ८३, मन्त्रः ३ (ऋक्सङ्ख्या : ९११)
वाक्यम् १: अधि द्वयोरदधा उक्थ्यं१ वचो यतस्रुचा मिथुना या सपर्यतः ।
पदानि : अधि । द्वयोः । अदधाः । उक्थ्यम् । वचः । यतऽस्रुचा । मिथुना । या । सपर्यतः
वाक्यम् २: असंयत्तो व्रते ते क्षेति पुष्यति भद्रा शक्तिर्यजमानाय सुन्वते ॥
पदानि : असम्ऽयत्तः । व्रते । ते । क्षेति । पुष्यति । भद्रा । शक्तिः । यजमानाय । सुन्वते

३५. मण्डलम् १, सूक्तम् ८४, मन्त्रः १६ (ऋक्सङ्ख्या : ९३०)
वाक्यम् १: को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् ।
पदानि : कः । अद्य । युङ्क्ते । धुरि । गाः । ऋतस्य । शिमीऽवतः । भामिनः । दुःऽहृणायून्
वाक्यम् २: आसन्निषून्हृत्स्वसो मयोभून्य एषां भृत्यामृणधत्स जीवात् ॥
पदानि : आसन्ऽइषून् । हृत्ऽसु । असः । मयःऽभून् । यः । एषाम् । भृत्याम् । ऋणधत् । सः । जीवात्

३६. मण्डलम् १, सूक्तम् ८५, मन्त्रः ११ (ऋक्सङ्ख्या : ९४५)
वाक्यम् १: जिह्मं नुनुद्रेऽवतं तया दिशासिञ्चन्नुत्सं गोतमाय तृष्णजे ।
पदानि : जिह्मम् । नुनुद्रे । अवतम् । तया । दिशा । असिञ्चन् । उत्सम् । गोतमाय । तृष्णऽजे
वाक्यम् २: आ गच्छन्तीमवसा चित्रभानवः कामं विप्रस्य तर्पयन्त धामभिः ॥
पदानि : आ । गच्छन्ति । ईम् । अवसा । चित्रऽभानवः । कामम् । विप्रस्य । तर्पयन्त । धामऽभिः

३७. मण्डलम् १, सूक्तम् ९२, मन्त्रः ३ (ऋक्सङ्ख्या : १०१३)
वाक्यम् १: अर्चन्ति नारीरपसो न विष्टिभिः समानेन योजनेना परावतः ।
पदानि : अर्चन्ति । नारीः । अपसः । न । विष्टिऽभिः । समानेन । योजनेन । आ । पराऽवतः
वाक्यम् २: इषं वहन्तीः सुकृते सुदानवे विश्वेदह यजमानाय सुन्वते ॥
पदानि : इषम् । वहन्तीः । सुऽकृते । सुऽदानवे । विश्वा । इत् । अह । यजमानाय । सुन्वते

३८. मण्डलम् १, सूक्तम् ९५, मन्त्रः ७ (ऋक्सङ्ख्या : १०६३)
वाक्यम् १: उद्यंयमीति सवितेव बाहू उभे सिचौ यतते भीम ऋञ्जन् ।
पदानि : उत् । यंयमीति । सविताऽइव । बाहू इति । उभे इति । सिचौ । यतते । भीमः । ऋञ्जन्
वाक्यम् २: उच्छुक्रमत्कमजते सिमस्मान्नवा मातृभ्यो वसना जहाति ॥
पदानि : उत् । शुक्रम् । अत्कम् । अजते । सिमस्मात् । नवा । मातृऽभ्यः । वसना । जहाति

३९. मण्डलम् १, सूक्तम् ९५, मन्त्रः ८ (ऋक्सङ्ख्या : १०६४)
वाक्यम् १: त्वेषं रूपं कृणुत उत्तरं यत्संपृञ्चानः सदने गोभिरद्भिः ।
पदानि : त्वेषम् । रूपम् । कृणुते । उत्ऽतरम् । यत् । सम्ऽपृञ्चानः । सदने । गोभिः । अत्ऽभिः
वाक्यम् २: कविर्बुध्नं परि मर्मृज्यते धीः सा देवतातेा समितिर्बभूव ॥
पदानि : कविः । बुध्नम् । परि । मर्मृज्यते । धीः । सा । देवऽतातेा । सम्ऽइतिः । बभूव

४०. मण्डलम् १, सूक्तम् १०३, मन्त्रः ४ (ऋक्सङ्ख्या : ११३३)
वाक्यम् १: तदूचुषे मानुषेमा युगानि कीर्तेन्यं मघवा नाम बिभ्रत् ।
पदानि : तत् । ऊचुषे । मानुषा । इमा । युगानि । कीर्तेन्यम् । मघऽवा । नाम । बिभ्रत्
वाक्यम् २: उपप्रयन्दस्युहत्याय वज्री यद्ध सूनुः श्रवसे नाम दधे ॥
पदानि : उपऽप्रयन् । दस्युऽहत्याय । वज्री । यत् । ह । सूनुः । श्रवसे । नाम । दधे

४१. मण्डलम् १, सूक्तम् १०४, मन्त्रः ३ (ऋक्सङ्ख्या : ११४०)
वाक्यम् १: अव त्मना भरते केतवेदा अव त्मना भरते फेनमुदन् ।
पदानि : अव । त्मना । भरते । केतऽवेदाः । अव । त्मना । भरते । फेनम् । उदन्
वाक्यम् २: क्षीरेण स्नातः कुयवस्य योषे हते ते स्यातां प्रवणे शिफायाः ॥
पदानि : क्षीरेण । स्नातः । कुयवस्य । योषे इति । हते इति । ते इति । स्याताम् । प्रवणे । शिफायाः

४२. मण्डलम् १, सूक्तम् १०७, मन्त्रः २ (ऋक्सङ्ख्या : ११७४)
वाक्यम् १: उप नो देवा अवसा गमन्त्वङ्गिरसां सामभिः स्तूयमानाः ।
पदानि : उप । नः । देवाः । अवसा । आ । गमन्तु । अङ्गिरसाम् । सामऽभिः । स्तूयमानाः
वाक्यम् २: इन्द्र इन्द्रियैर्मरुतो मरुद्भिरादित्यैर्नो अदितिः शर्म यंसत् ॥
पदानि : इन्द्रः । इन्द्रियैः । मरुतः । मरुत्ऽभिः । आदित्यैः । नः । अदितिः । शर्म । यंसत्

४३. मण्डलम् १, सूक्तम् १०८, मन्त्रः १ (ऋक्सङ्ख्या : ११७६)
वाक्यम् १: य इन्द्राग्नी चित्रतमो रथो वामभि विश्वानि भुवनानि चष्टे ।
पदानि : यः । इन्द्राग्नी इति । चित्रऽतमः । रथः । वाम् । अभि । विश्वानि । भुवनानि । चष्टे
वाक्यम् २: तेना यातं सरथं तस्थिवांसाथा सोमस्य पिबतं सुतस्य ॥
पदानि : तेन । आ । यातम् । सऽरथम् । तस्थिऽवांसा । अथ । सोमस्य । पिबतम् । सुतस्य

४४. मण्डलम् १, सूक्तम् १०८, मन्त्रः ३ (ऋक्सङ्ख्या : ११७८)
वाक्यम् १: चक्राथे हि सध्र्यङ्नाम भद्रं सधीचीना वृत्रहणा उत स्थः ।
पदानि : चक्राथे इति । हि । सध्र्यक् । नाम । भद्रम् । सधीचीना । वृत्रऽहनौ । उत । स्थः
वाक्यम् २: ताविन्द्राग्नी सध्र्यञ्चा निषद्या वृष्णः सोमस्य वृषणा वृषेथाम् ॥
पदानि : तौ । इन्द्राग्नी इति । सध्र्यञ्चा । निऽसद्य । वृष्णः । सोमस्य । वृषणा । आ । वृषेथाम्

४५. मण्डलम् १, सूक्तम् ११४, मन्त्रः ५ (ऋक्सङ्ख्या : १२६०)
वाक्यम् १: दिवो वराहमरुषं कपर्दिनं त्वेषं रूपं नमसा नि ह्वयामहे ।
पदानि : दिवः । वराहम् । अरुषम् । कपर्दिनम् । त्वेषम् । रूपम् । नमसा । नि । ह्वयामहे

वाक्यम् २: हस्ते बिभ्रद्भेषजा वार्याणि शर्म वर्म च्छर्दिरस्मभ्यं यंसत् ॥
पदानि : हस्ते । बिभ्रत् । भेषजा । वार्याणि । शर्म । वर्म । छर्दिः । अस्मभ्यम् । यंसत्

४६. मण्डलम् १, सूक्तम् ११४, मन्त्रः ६ (ऋक्सङ्ख्या : १२६१)
वाक्यम् १: इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनम् ।
पदानि : इदम् । पित्रे । मरुताम् । उच्यते । वचः । स्वादोः । स्वादीयः । रुद्राय । वर्धनम्
वाक्यम् २: रास्वा च नो अमृत मर्तभोजनं त्मने तोकाय तनयाय मृळ ॥
पदानि : रास्व । च । नः । अमृत । मर्तऽभोजनम् । त्मने । तोकाय । तनयाय । मृळ

४७. मण्डलम् १, सूक्तम् ११५, मन्त्रः १ (ऋक्सङ्ख्या : १२६७)
वाक्यम् १: चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
पदानि : चित्रम् । देवानाम् । उत् । अगात् । अनीकम् । चक्षुः । मित्रस्य । वरुणस्य । अग्नेः
वाक्यम् २: आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥
पदानि : आ । अप्राः । द्यावापृथिवी इति । अन्तरिक्षम् । सूर्यः । आत्मा । जगतः । तस्थुषः । च

४८. मण्डलम् १, सूक्तम् ११६, मन्त्रः १६ (ऋक्सङ्ख्या : १२८८)
वाक्यम् १: शतं मेषान्वृक्ये चक्षदानमृज्राश्वं तं पितान्धं चकार ।
पदानि : शतम् । मेषान् । वृक्ये । चक्षदानम् । ऋज्रऽअश्वम् । तम् । पिता । अन्धम् । चकार
वाक्यम् २: तस्मा अक्षी नासत्या विचक्ष आधत्तं दस्रा भिषजावनर्वन् ॥
पदानि : तस्मै । अक्षी इति । नासत्या । विऽचक्षे । आ । अधत्तम् । दस्रा । भिषजौ । अनर्वन्

४९. मण्डलम् १, सूक्तम् ११७, मन्त्रः १ (ऋक्सङ्ख्या : १२९८)
वाक्यम् १: मध्वः सोमस्याश्विना मदाय प्रत्नो होता विवासते वाम् ।
पदानि : मध्वः । सोमस्य । अश्विना । मदाय । प्रत्नः । होता । आ । विवासते । वाम्
वाक्यम् २: बर्हिष्मती रातिर्विश्रिता गीरिषा यातं नासत्योप वाजैः ॥
पदानि : बर्हिष्मती । रातिः । विऽश्रिता । गीः । इषा । यातम् । नासत्या । उप । वाजैः

५०. मण्डलम् १, सूक्तम् ११७, मन्त्रः २ (ऋक्सङ्ख्या : १२९९)
वाक्यम् १: यो वामश्विना मनसो जवीयात्रथः स्वश्वो विशा आजिगाति ।
पदानि : यः । वाम् । अश्विना । मनसः । जवीयान् । रथः । सुऽअश्वः । विशः । आऽजिगाति
वाक्यम् २: येन गच्छथः सुकृतो दुरोणं तेन नरा वर्तिरस्मभ्यं यातम् ॥
पदानि : येन । गच्छथः । सुऽकृतः । दुरोणम् । तेन । नरा । वर्तिः । अस्मभ्यम् । यातम्

५१. मण्डलम् १, सूक्तम् ११७, मन्त्रः ५ (ऋक्सङ्ख्या : १३०२)
वाक्यम् १: सुषुप्वांसं न निर्ऋतेरुपस्थे सूर्यं न दस्रा तमसि क्षियन्तम् ।
पदानि : सुसुप्वांसम् । न । निःऽऋतेः । उपऽस्थे । सूर्यम् । न । दस्रा । तमसि । क्षियन्तम्
वाक्यम् २: शुभे रुक्मं न दर्शतं निखातमुदूपथुरश्विना वन्दनाय ॥
पदानि : शुभे । रुक्मम् । न । दर्शतम् । निऽखातम् । उत् । ऊपथुः । अश्विना । वन्दनाय

५२. मण्डलम् १, सूक्तम् ११७, मन्त्रः १६ (ऋक्सङ्ख्या : १३१३)

वाक्यम् १: अजोंहवीदश्विना वर्तिका वामास्नो यत्सीममुञ्चतं वृकस्य ।
पदानि : अजोंहवीत् । अश्विना । वर्तिका । वाम् । आस्नः । यत् । सीम् । अमुञ्चतम् । वृकस्य
वाक्यम् २: वि जयुषा ययथुः सान्वद्रेर्जातं विष्वाचो अहतं विषेण ॥
पदानि : वि । जयुषा । ययथुः । सानु । अद्रेः । जातम् । विष्वाचः । अहतम् । विषेण

५३. मण्डलम् १, सूक्तम् ११८, मन्त्रः ४ (ऋक्सङ्ख्या : १३२६)
वाक्यम् १: आ वां श्येनासो अश्विना वहन्तु रथे युक्तास आशवः पतंगाः ।
पदानि : आ । वाम् । श्येनासः । अश्विना । वहन्तु । रथे । युक्तासः । आशवः । पतङ्गाः
वाक्यम् २: ये अप्तुरो दिव्यासो न गृध्रा अभि प्रयो नासत्या वहन्ति ॥
पदानि : ये । अप्ऽतुरः । दिव्यासः । न । गृध्राः । अभि । प्रयः । नासत्या । वहन्ति

५४. मण्डलम् १, सूक्तम् ११८, मन्त्रः १० (ऋक्सङ्ख्या : १३३२)
वाक्यम् १: ता वां नरा स्ववसे सुजाता हवामहे अश्विना नाधमानाः ।
पदानि : ता । वाम् । नरा । सु । अवसे । सुऽजाता । हवामहे । अश्विना । नाधमानाः
वाक्यम् २: आ न उप वसुमता रथेन गिरो जुषाणा सुविताय यातम् ॥
पदानि : आ । नः । उप । वसुऽमता । रथेन । गिरः । जुषाणा । सुविताय । यातम्

५५. मण्डलम् १, सूक्तम् ११९, मन्त्रः ४ (ऋक्सङ्ख्या : १३३७)
वाक्यम् १: युवं भुज्युं भुरमाणं विभिर्गतं स्वयुक्तिभिर्निवहन्ता पितृभ्य आ ।
पदानि : युवम् । भुज्युम् । भुरमाणम् । विऽभिः । गतम् । स्वयुक्तिऽभिः । निऽवहन्ता । पितृऽभ्यः । आ
वाक्यम् २: यासिष्टं वर्तिर्वृषणा विजेन्यं दिवोदासाय महि चेति वामवः ॥
पदानि : यासिष्टम् । वर्तिः । वृषणा । विऽजेन्यम् । दिवःऽदासाय । महि । चेति । वाम् । अवः

५६. मण्डलम् १, सूक्तम् १२०, मन्त्रः ७ (ऋक्सङ्ख्या : १३५०)
वाक्यम् १: युवं ह्यास्तं महो रन्युवं वा यन्निरतंतंसतम् ।
पदानि : युवम् । हि । आस्तम् । महः । रन् । युवम् । वा । यत् । निःऽअतंतंसतम्
वाक्यम् २: ता नो वसू सुगोपा स्यातं पातं नो वृकादघायोः ॥
पदानि : ता । नः । वसू इति । सुऽगोपा । स्यातम् । पातम् । नः । वृकात् । अघऽयोः

५७. मण्डलम् १, सूक्तम् १२१, मन्त्रः ५ (ऋक्सङ्ख्या : १३६०)
वाक्यम् १: तुभ्यं पयो यत्पितरावनीतां राधः सुरेतस्तुरणे भुरण्यू ।
पदानि : तुभ्यम् । पयः । यत् । पितरौ । अनीताम् । राधः । सुऽरेतः । तुरणे । भुरण्यू इति
वाक्यम् २: शुचि यत्ते रेक्ण आयजन्त सबर्दुघायाः पयो उस्रियायाः ॥
पदानि : शुचि । यत् । ते । रेक्णः । आ । अयजन्त । सबः ऽदुघायाः । पयः । उस्रियायाः

५८. मण्डलम् १, सूक्तम् १२१, मन्त्रः ७ (ऋक्सङ्ख्या : १३६२)
वाक्यम् १: स्विध्मा यद्वनधितिरपस्यात्सूरो अध्वरे परि रोधना गोः ।
पदानि : सुऽइध्मा । यत् । वनऽधितिः । अपस्यात् । सूरः । अध्वरे । परि । रोधना । गोः
वाक्यम् २: यद्ध प्रभासि कृत्व्याँ अनु द्यूनन्विशे पश्विषे तुराय ॥
पदानि : यत् । ह । प्रऽभासि । कृत्व्यान् । अनु । द्यून् । अन्विशे । पशुऽइषे । तुराय

५९. मण्डलम् १, सूक्तम् १२१, मन्त्रः १४ (ऋक्सङ्ख्या : १३६९)
वाक्यम् १: त्वं नो अस्या इन्द्र दुर्हणायाः पाहि वज्रिवो दुरितादभीके ।
पदानि : त्वम् । नः । अस्याः । इन्द्र । दुःऽहनायाः । पाहि । वज्रिऽवः । दुःऽइतात् । अभीके
वाक्यम् २: प्र नो वाजान्रथ्यो३ अश्वबुध्यान्षे यन्धि श्रवसे सूनृतायै ॥
पदानि : प्र । नः । वाजान् । रथ्यः । अश्वऽबुध्यान् । इषे । यन्धि । श्रवसे । सूनृतायै

६०. मण्डलम् १, सूक्तम् १२२, मन्त्रः ४ (ऋक्सङ्ख्या : १३७४)
वाक्यम् १: उत त्या मे यशसा श्वेतनायै व्यन्ता पान्तौशिजो हुवध्यै ।
पदानि : उत । त्या । मे । यशसा । श्वेतनायै । व्यन्ता । पान्ता । औशिजः । हुवध्यै
वाक्यम् २: प्र वो नपातमपां कृणुध्वं प्र मातरा रास्पिनस्यायोः ॥
पदानि : प्र । वः । नपातम् । अपाम् । कृणुध्वम् । प्र । मातरा । रास्पिनस्य । आयोः

६१. मण्डलम् १, सूक्तम् १२२, मन्त्रः ५ (ऋक्सङ्ख्या : १३७५)
वाक्यम् १: आ वो रुवण्युमौशिजो हुवध्यै घोषेव शंसमर्जुनस्य नंशे ।
पदानि : आ । वः । रुवण्युम् । औशिजः । हुवध्यै । घोषाऽइव । शंसम् । अर्जुनस्य । नंशे
वाक्यम् २: प्र वः पूष्णे दावन आँ अच्छा वोचेय वसुतातिमग्नेः ॥
पदानि : प्र । वः । पूष्णे । दावने । आ । अच्छ । वोचेय । वसुऽतातिम् । अग्नेः

६२. मण्डलम् १, सूक्तम् १२४, मन्त्रः ४ (ऋक्सङ्ख्या : १४०२)
वाक्यम् १: उपो अदर्शि शुन्ध्युवो न वक्षो नोधा इवाविरकृत प्रियाणि ।
पदानि : उपो इति । अदर्शि । शुन्ध्युवः । न । वक्षः । नोधाःऽइव । आविः । अकृत । प्रियाणि
वाक्यम् २: अवसन्न ससतो बोधयन्ती शश्वत्तमागात्पुनरेयुषीणाम् ॥
पदानि : अवऽसत् । न । ससतः । बोधयन्ती । शश्वत्ऽतमा । आ । अगात् । पुनः । आऽईयुषीणाम्

६३. मण्डलम् १, सूक्तम् १२४, मन्त्रः ९ (ऋक्सङ्ख्या : १४०७)
वाक्यम् १: आसां पूर्वासामहसु स्वसॄणामपरा पूर्वामभ्येति पश्चात् ।
पदानि : आसाम् । पूर्वासाम् । अहऽसु । स्वसॄणाम् । अपरा । पूर्वाम् । अभि । एति । पश्चात्
वाक्यम् २: ताः प्रवन्नव्यसीर्नूनमस्मे रेवदुच्छन्तु सुदिना उषासः ॥
पदानि : ताः । प्रवऽवत् । नव्यसीः । नूनम् । अस्मे इति । रेवत् । उच्छन्तु । सुऽदिनाः । उषसः

६४. मण्डलम् १, सूक्तम् १२६, मन्त्रः १ (ऋक्सङ्ख्या : १४१९)
वाक्यम् १: अमन्दान्स्तोमान्प्र भरे मनीषा सिन्धावधि क्षियतो भाव्यस्य ।
पदानि : अमन्दान् । स्तोमान् । प्र । भरे । मनीषा । सिन्धौ । अधि । क्षियतः । भाव्यस्य
वाक्यम् २: यो मे सहस्रममिमीत सवानतूर्तो राजा श्रव इच्छमानः ॥
पदानि : यः । मे । सहस्रम् । अमिमीत । सवान् । अतूर्तः । राजा । श्रवः । इच्छमानः

६५. मण्डलम् १, सूक्तम् १२६, मन्त्रः २ (ऋक्सङ्ख्या : १४२०)
वाक्यम् १: शतं राज्ञो नाधमानस्य निष्काञ्छतमश्वान्प्रयतान्त्सद्य आदम् ।
पदानि : शतम् । राज्ञः । नाधमानस्य । निष्कान् । शतम् । अश्वान् । प्रऽयतान् । सद्यः । आदम्
वाक्यम् २: शतं कक्षीवाँ असुरस्य गोनां दिवि श्रवोऽजरमा ततान ॥

पदानि : शतम्। कक्षीवान्। असुरस्य। गोनाम्। दिवि। श्रवः। अजरम्। आ। ततान

६६. मण्डलम् १, सूक्तम् १३९, मन्त्रः ११ (ऋक्सङ्ख्या : १५२५)
वाक्यम् १: ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ।
पदानि : ये। देवासः। दिवि। एकादश। स्थ। पृथिव्याम्। अधि। एकादश। स्थ
वाक्यम् २: अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम्॥
पदानि : अप्सुऽक्षितः। महिना। एकादश। स्थ। ते। देवासः। यज्ञम्। इमम्। जुषध्वम्

६७. मण्डलम् १, सूक्तम् १४४, मन्त्रः ६ (ऋक्सङ्ख्या : १५७८)
वाक्यम् १: त्वं ह्यग्ने दिव्यस्य राजसि त्वं पार्थिवस्य पशुपा इव त्मना।
पदानि : त्वम्। हि। अग्ने। दिव्यस्य। राजसि। त्वम्। पार्थिवस्य। पशुपाःऽइव। त्मना
वाक्यम् २: एनी त एते बृहती अभिश्रियाँ हिरण्ययी वक्वरी बर्हिराशाते॥
पदानि : एनी इति। ते। एते इति। बृहती इति। अभिऽश्रियाँ। हिरण्ययी इति। वक्वरी इति। बर्हिः। आशाते इति

६८. मण्डलम् १, सूक्तम् १४६, मन्त्रः २ (ऋक्सङ्ख्या : १५८६)
वाक्यम् १: उक्षा महाँ अभि ववक्ष एने अजरस्तस्थावितऊतिर्ऋष्वः।
पदानि : उक्षा। महान्। अभि। ववक्षे। एने इति। अजरः। तस्थौ। इतःऽऊतिः। ऋष्वः
वाक्यम् २: उर्व्याः पदो नि दधाति सानौ रिहन्त्यूधो अरुषासो अस्य॥
पदानि : उर्व्याः। पदः। नि। दधाति। सानौ। रिहन्ति। ऊधः। अरुषासः। अस्य

६९. मण्डलम् १, सूक्तम् १४७, मन्त्रः ५ (ऋक्सङ्ख्या : १५९४)
वाक्यम् १: उत वा यः सहस्य प्रविद्वान्मर्तो मर्तं मर्चयति द्वयेन।
पदानि : उत। वा। यः। सहस्य। प्रऽविद्वान्। मर्तः। मर्तम्। मर्चयति। द्वयेन
वाक्यम् २: अतः पाहि स्तवमान स्तुवन्तमग्ने माकिर्नो दुरितायं धायीः॥
पदानि : अतः। पाहि। स्तवमान। स्तुवन्तम्। अग्ने। माकिः। नः। दुःऽइतायं। धायीः

७०. मण्डलम् १, सूक्तम् १४८, मन्त्रः ३ (ऋक्सङ्ख्या : १५९७)
वाक्यम् १: नित्ये चिन्नु यं सदने जगृभ्रे प्रशस्तिभिर्दधिरे यज्ञियासः।
पदानि : नित्ये। चित्। नु। यम्। सदने। जगृभ्रे। प्रशस्तिऽभिः। दधिरे। यज्ञियासः
वाक्यम् २: प्र सू नयन्त गृभयन्त इष्टावश्वासो न रथ्यो रारहाणाः॥
पदानि : प्र। सु। नयन्त। गृभयन्तः। इष्टौ। अश्वासः। न। रथ्यः। ररहाणाः

७१. मण्डलम् १, सूक्तम् १४८, मन्त्रः ५ (ऋक्सङ्ख्या : १५९९)
वाक्यम् १: न यं रिपवो न रिषण्यवो गर्भे सन्तं रेषणा रेषयन्ति।
पदानि : न। यम्। रिपवः। न। रिषण्यवः। गर्भे। सन्तम्। रेषणाः। रेषयन्ति
वाक्यम् २: अन्धा अपश्या न दभन्नभिख्या नित्यास ईं प्रेतारो अरक्षन्॥
पदानि : अन्धाः। अपश्याः। न। दभन्। अभिऽख्या। नित्यासः। ईम्। प्रेतारः। अरक्षन्

७२. मण्डलम् १, सूक्तम् १५१, मन्त्रः ८ (ऋक्सङ्ख्या : १६१५)
वाक्यम् १: युवां यज्ञैः प्रथमा गोभिरञ्जत ऋतावाना मनसो न प्रयुक्तिषु।

पदानि : युवाम्। यज्ञैः। प्रथमा। गोभिः। अञ्जते। ऋतऽवाना। मनसः। न। प्रऽयुक्तिषु
वाक्यम् २: भरन्ति वां मन्मना संयता गिरोऽदृप्यता मनसा रेवदाशाथे ॥
पदानि : भरन्ति। वाम्। मन्मना। सम्ऽयता। गिरः। अदृप्यता। मनसा। रेवत्। आशाथे इति

७३. मण्डलम् १, सूक्तम् १५५, मन्त्रः ४ (ऋक्सङ्ख्या : १६३७)
वाक्यम् १: तत्तदिदस्य पौंस्यं गृणीमसीनस्य त्रातुरवृकस्य मीळ्हुषः।
पदानि : तत्ऽतत्। इत्। अस्य। पौंस्यम्। गृणीमसि। इनस्य। त्रातुः। अवृकस्य। मीळ्हुषः
वाक्यम् २: यः पार्थिवानि त्रिभिरिद्विगामभिरुरु क्रमिष्टोरुगायाय जीवसे ॥
पदानि : यः। पार्थिवानि। त्रिऽभिः। इत्। विगामऽभिः। उरु। क्रमिष्ट। उरुऽगायाय। जीवसे

७४. मण्डलम् १, सूक्तम् १५६, मन्त्रः ५ (ऋक्सङ्ख्या : १६४४)
वाक्यम् १: आ यो विवाय सचथाय दैव्य इन्द्राय विष्णुः सुकृते सुकृत्तरः।
पदानि : आ। यः। विवाय। सचथाय। दैव्यः। इन्द्राय। विष्णुः। सुऽकृते। सुकृत्ऽतरः
वाक्यम् २: वेधा अजिन्वत्त्रिषधस्थ आर्यमृतस्य भागे यजमानमाभजत् ॥
पदानि : वेधाः। अजिन्वत्। त्रिऽसधस्थः। आर्यम्। ऋतस्य। भागे। यजमानम्। आ। अभजत्

७५. मण्डलम् १, सूक्तम् १५७, मन्त्रः ५ (ऋक्सङ्ख्या : १६४९)
वाक्यम् १: युवं ह गर्भं जगतीषु धत्थो युवं विश्वेषु भुवनेष्वन्तः।
पदानि : युवम्। ह। गर्भम्। जगतीषु। धत्थः। युवम्। विश्वेषु। भुवनेषु। अन्तरिति
वाक्यम् २: युवमग्निं च वृषणावपश्च वनस्पतीँरश्विनावैरयेथाम् ॥
पदानि : युवम्। अग्निम्। च। वृषणौ। अपः। च। वनस्पतीन्। अश्विनौ। ऐरयेथाम्

७६. मण्डलम् १, सूक्तम् १६१, मन्त्रः ६ (ऋक्सङ्ख्या : १६७२)
वाक्यम् १: इन्द्रो हरी युयुजे अश्विना रथं बृहस्पतिर्विश्वरूपामुपाजत।
पदानि : इन्द्रः। हरी इति। युयुजे। अश्विना। रथम्। बृहस्पतिः। विश्वऽरूपाम्। उप। आजत
वाक्यम् २: ऋभुर्विभ्वा वाजो देवाँ अगच्छत स्वपसो यज्ञियं भागमैतन ॥
पदानि : ऋभुः। विऽभ्वा। वाजः। देवान्। अगच्छत। सुऽअपसः। यज्ञियम्। भागम्। ऐतन

७७. मण्डलम् १, सूक्तम् १६१, मन्त्रः १३ (ऋक्सङ्ख्या : १६७९)
वाक्यम् १: सुषुप्वांस ऋभवस्तदपृच्छतागोह्य क इदं नो अबूबुधत्।
पदानि : सुसुप्वांसः। ऋभवः। तत्। अपृच्छत। अगोह्य। कः। इदम्। नः। अबूबुधत्
वाक्यम् २: श्वानं बस्तो बोधयितारमब्रवीत्संवत्सर इदमद्या व्यख्यत ॥
पदानि : श्वानम्। बस्तः। बोधयितारम्। अब्रवीत्। संवत्सरे। इदम्। अद्य। वि। अख्यत

७८. मण्डलम् १, सूक्तम् १६२, मन्त्रः ३ (ऋक्सङ्ख्या : १६८३)
वाक्यम् १: एष च्छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः।
पदानि : एषः। छागः। पुरः। अश्वेन। वाजिना। पूष्णः। भागः। नीयते। विश्वऽदेव्यः
वाक्यम् २: अभिप्रियं यत्पुरोळाशमर्वता त्वष्टेदेनं सौश्रवसाय जिन्वति ॥
पदानि : अभिऽप्रियम्। यत्। पुरोळाशम्। अर्वता। त्वष्टा। इत्। एनम्। सौश्रवसाय। जिन्वति

७९. मण्डलम् १, सूक्तम् १६२, मन्त्रः ४ (ऋक्सङ्ख्या : १६८४)
वाक्यम् १: यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति।
पदानि : यत्। हविष्यम्। ऋतुऽशः। देवऽयानम्। त्रिः। मानुषाः। परि। अश्वम्। नयन्ति
वाक्यम् २: अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः॥
पदानि : अत्र। पूष्णः। प्रथमः। भागः। एति। यज्ञम्। देवेभ्यः। प्रतिऽवेदयन्। अजः

८०. मण्डलम् १, सूक्तम् १६२, मन्त्रः २२ (ऋक्सङ्ख्या : १७०२)
वाक्यम् १: सुगव्यं नो वाजी स्वश्व्यं पुंसः पुत्राँ उत विश्वापुषं रयिम्।
पदानि : सुऽगव्यम्। नः। वाजी। सुऽअश्व्यम्। पुंसः। पुत्रान्। उत। विश्वऽपुषम्। रयिम्
वाक्यम् २: अनागास्त्वं नो अदितिः कृणोतु क्षत्रं नो अश्वो वनतां हविष्मान्॥
पदानि : अनागाःऽत्वम्। नः। अदितिः। कृणोतु। क्षत्रम्। नः। अश्वः। वनताम्। हविष्मान्

८१. मण्डलम् १, सूक्तम् १६३, मन्त्रः १ (ऋक्सङ्ख्या : १७०३)
वाक्यम् १: यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात्।
पदानि : यत्। अक्रन्दः। प्रथमम्। जायमानः। उत्ऽयन्। समुद्रात्। उत। वा। पुरीषात्
वाक्यम् २: श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन्॥
पदानि : श्येनस्य। पक्षा। हरिणस्य। बाहू इति। उपऽस्तुत्यम्। महि। जातम्। ते। अर्वन्

८२. मण्डलम् १, सूक्तम् १६३, मन्त्रः ३ (ऋक्सङ्ख्या : १७०५)
वाक्यम् १: असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन।
पदानि : असि। यमः। असि। आदित्यः। अर्वन्। असि। त्रितः। गुह्येन। व्रतेन
वाक्यम् २: असि सोमेन समया विपृक्त आहुस्ते त्रीणि दिवि बन्धनानि॥
पदानि : असि। सोमेन। समया। विऽपृक्तः। आहुः। ते। त्रीणि। दिवि। बन्धनानि

८३. मण्डलम् १, सूक्तम् १६४, मन्त्रः १४ (ऋक्सङ्ख्या : १७२९)
वाक्यम् १: सनेमि चक्रमजरं वि वावृत उत्तानायां दशं युक्ता वहन्ति।
पदानि : सऽनेमि। चक्रम्। अजरम्। वि। ववृते। उत्तानायाम्। दशं। युक्ताः। वहन्ति
वाक्यम् २: सूर्यस्य चक्षू रजसैत्यावृतं तस्मिन्नार्पिता भुवनानि विश्वा॥
पदानि : सूर्यस्य। चक्षुः। रजसा। एति। आऽवृतम्। तस्मिन्। आर्पिता। भुवनानि। विश्वा

८४. मण्डलम् १, सूक्तम् १६४, मन्त्रः २७ (ऋक्सङ्ख्या : १७४२)
वाक्यम् १: हिङ्कृण्वती वसुपत्नी वसूनां वत्समिच्छन्ती मनसाभ्यागात्।
पदानि : हिङ्ऽकृण्वती। वसुऽपत्नी। वसूनाम्। वत्सम्। इच्छन्ती। मनसा। अभि। आ। अगात्
वाक्यम् २: दुहामश्विभ्यां पयो अघ्येयं सा वर्धतां महते सौभगाय॥
पदानि : दुहाम्। अश्विऽभ्याम्। पयः। अघ्या। इयम्। सा। वर्धताम्। महते। सौभगाय

८५. मण्डलम् १, सूक्तम् १६४, मन्त्रः ३१ (ऋक्सङ्ख्या : १७४६)
वाक्यम् १: अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम्।
पदानि : अपश्यम्। गोपाम्। अनिऽपद्यमानम्। आ। च। परा। च। पथिऽभिः। चरन्तम्
वाक्यम् २: स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वन्तः॥
पदानि : सः। सध्रीचीः। सः। विषूचीः। वसानः। आ। वरीवर्ति। भुवनेषु। अन्तरिति

८६. मण्डलम् १, सूक्तम् १६४, मन्त्रः ३४ (ऋक्सङ्ख्या : १७४९)
वाक्यम् १: पृच्छामिं त्वा परमन्तं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः ।
पदानि : पृच्छामिं । त्वा । परम् । अन्तम् । पृथिव्याः । पृच्छामिं । यत्र । भुवनस्य । नाभिः
वाक्यम् २: पृच्छामिं त्वा वृष्णो अश्वस्य रेतः पृच्छामिं वाचः परमं व्योम ॥
पदानि : पृच्छामिं । त्वा । वृष्णः । अश्वस्य । रेतः । पृच्छामिं । वाचः । परमम् । विऽओम

८७. मण्डलम् १, सूक्तम् १६४, मन्त्रः ४५ (ऋक्सङ्ख्या : १७६०)
वाक्यम् १: चत्वारि वाक्परिमिता पदानि तानिं विदुर्ब्राह्मणा ये मनीषिणः ।
पदानि : चत्वारिं । वाक् । परिऽमिता । पदानिं । तानिं । विदुः । ब्राह्मणाः । ये । मनीषिणः
वाक्यम् २: गुहा त्रीणि निहिंता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥
पदानि : गुहा । त्रीणिं । निऽहिंता । न । इङ्गयन्ति । तुरीयम् । वाचः । मनुष्याः । वदन्ति

८८. मण्डलम् १, सूक्तम् १६५, मन्त्रः १५ (ऋक्सङ्ख्या : १७८२)
वाक्यम् १: एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।
पदानि : एषः । वः । स्तोमः । मरुतः । इयम् । गीः । मान्दार्यस्य । मान्यस्य । कारोः
वाक्यम् २: एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥
पदानि : आ । इषा । यासीष्ट । तन्वे । वयाम् । विद्याम । इषम् । वृजनम् । जीरऽदानुम्

८९. मण्डलम् १, सूक्तम् १६६, मन्त्रः ५ (ऋक्सङ्ख्या : १७८७)
वाक्यम् १: यत्त्वेषयामा नदयन्त पर्वतान्दिवो वा पृष्ठं नर्या अचुच्यवुः ।
पदानि : यत् । त्वेषऽयामाः । नदयन्त । पर्वतान् । दिवः । वा । पृष्ठम् । नर्याः । अचुच्यवुः
वाक्यम् २: विश्वो वो अज्मन्भयते वनस्पती रथीयन्तीव प्र जिहीत ओषधिः ॥
पदानि : विश्वः । वः । अज्मन् । भयते । वनस्पतिः । रथियन्तीऽइव । प्र । जिहीते । ओषधिः

९०. मण्डलम् १, सूक्तम् १६६, मन्त्रः ८ (ऋक्सङ्ख्या : १७९०)
वाक्यम् १: शतभुजिभिस्तमभिह्रुतेरघात्पूर्भी रक्षता मरुतो यमावत ।
पदानि : शतभुजिऽभिः । तम् । अभिऽह्रुतेः । अघात् । पूःऽभिः । रक्षत । मरुतः । यम् । आवत
वाक्यम् २: जनं यमुग्रास्तवसो विरप्शिनः पाथना शंसात्तनयस्य पुष्टिषु ॥
पदानि : जनम् । यम् । उग्राः । तवसः । विऽरप्शिनः । पाथनं । शंसात् । तनयस्य । पुष्टिषु

९१. मण्डलम् १, सूक्तम् १६८, मन्त्रः १ (ऋक्सङ्ख्या : १८०९)
वाक्यम् १: यज्ञायज्ञा वः समना तुतुर्वणिर्धियंधियं वो देवया उ दधिध्वे ।
पदानि : यज्ञाऽयज्ञा । वः । समना । तुतुर्वणिः । धियम्ऽधियम् । वः । देवऽयाः । ऊँ इति । दधिध्वे
वाक्यम् २: आ वोऽर्वाचः सुविताय रोदस्योर्महे ववृत्यामवसे सुवृक्तिभिः ॥
पदानि : आ । वः । अर्वाचः । सुविताय । रोदस्योः । महे । ववृत्याम् । अवसे । सुवृक्तिऽभिः

९२. मण्डलम् १, सूक्तम् १६८, मन्त्रः २ (ऋक्सङ्ख्या : १८१०)
वाक्यम् १: व्रासो न ये स्वजाः स्वतवस इषं स्वरभिजायन्त धूतयः ।
पदानि : व्रासः । न । ये । स्वऽजाः । स्वऽतवसः । इषम् । स्वः । अभिऽजायन्त । धूतयः

वाक्यम् २: सहस्रियासो अपां नोर्मयं आसा गावो वन्द्यासो नोक्षणः ॥
पदानि : सहस्रियासः । अपाम् । न । ऊर्मयः । आसा । गावः । वन्द्यासः । न । उक्षणः

९३. मण्डलम् १, सूक्तम् १६८, मन्त्रः ७ (ऋक्सङ्ख्या : १८१५)
वाक्यम् १: सातिर्न वोऽमवती स्वर्वती त्वेषा विपाका मरुतः पिपिंष्वती ।
पदानि : सातिः । न । वः । अमऽवती । स्वःऽवती । त्वेषा । विऽपाका । मरुतः । पिपिंष्वती
वाक्यम् २: भद्रा वो रातिः पृणतो न दक्षिणा पृथुज्रयी असुर्येव जञ्जती ॥
पदानि : भद्रा । वः । रातिः । पृणतः । न । दक्षिणा । पृथुऽज्रयी । असुर्याऽइव । जञ्जती

९४. मण्डलम् १, सूक्तम् १७३, मन्त्रः १ (ऋक्सङ्ख्या : १८४१)
वाक्यम् १: गायत्साम नभन्यं१ यथा वेरर्चाम तद्वावृधानं स्वर्वत् ।
पदानि : गायत् । साम । नभन्यम् । यथा । वेः । अर्चाम । तत् । ववृधानम् । स्वःऽवत्
वाक्यम् २: गावो धेनवो बर्हिष्यदब्धा आ यत्सद्मानं दिव्यं विवासान् ॥
पदानि : गावः । धेनवः । बर्हिषि । अदब्धाः । आ । यत् । सद्मानम् । दिव्यम् । विवासान्

९५. मण्डलम् १, सूक्तम् १७४, मन्त्रः ३ (ऋक्सङ्ख्या : १८५६)
वाक्यम् १: अजा वृतं इन्द्र शूरपत्नीर्द्यां च येभिः पुरुहूत नूनम् ।
पदानि : अज । वृतः । इन्द्र । शूरऽपत्नीः । द्याम् । च । येभिः । पुरुऽहूत । नूनम्
वाक्यम् २: रक्षो अग्निमशुषं तूर्वयाणं सिंहो न दमे अपांसि वस्तोः ॥
पदानि : रक्षो इति । अग्निम् । अशुषम् । तूर्वयाणम् । सिंहः । न । दमे । अपांसि । वस्तोः

९६. मण्डलम् १, सूक्तम् १७४, मन्त्रः ५ (ऋक्सङ्ख्या : १८५८)
वाक्यम् १: वह कुत्समिन्द्र यस्मिञ्चाकन्त्स्यूमन्यू ऋज्रा वातस्याश्वा ।
पदानि : वह । कुत्सम् । इन्द्र । यस्मिन् । चाकन् । स्यूमन्यू इति । ऋज्रा । वातस्य । अश्वा
वाक्यम् २: प्र सूरश्चक्रं वृहतादभीकेऽभि स्पृधो यासिषद्वज्रबाहुः ॥
पदानि : प्र । सूरः । चक्रम् । वृहतात् । अभीके । अभि । स्पृधः । यासिषत् । वज्रऽबाहुः

९७. मण्डलम् १, सूक्तम् १८१, मन्त्रः ५ (ऋक्सङ्ख्या : १९०६)
वाक्यम् १: प्र वां निचेरुः ककुहो वशाँ अनु पिशङ्गरूपः सदनानि गम्याः ।
पदानि : प्र । वाम् । निऽचेरुः । ककुहः । वशान् । अनु । पिशङ्गऽरूपः । सदनानि । गम्याः
वाक्यम् २: हरी अन्यस्य पीपयन्त वाजैर्मध्रा रजांस्यश्विना वि घोषैः ॥
पदानि : हरी इति । अन्यस्य । पीपयन्त । वाजैः । मध्रा । रजांसि । अश्विना । वि । घोषैः

९८. मण्डलम् १, सूक्तम् १८२, मन्त्रः ४ (ऋक्सङ्ख्या : १९१४)
वाक्यम् १: जम्भयंतमभितो रायतः शुनो हतं मृधो विदथुस्तान्यश्विना ।
पदानि : जम्भयंतम् । अभितः । रायतः । शुनः । हतम् । मृधः । विदथुः । तानि । अश्विना
वाक्यम् २: वाचंवाचं जरितू रत्निनीं कृतमुभा शंसं नासत्यावतं मम ॥
पदानि : वाचम्ऽवाचम् । जरितुः । रत्निनीम् । कृतम् । उभा । शंसम् । नासत्या । अवतम् । मम

९९. मण्डलम् १, सूक्तम् १८३, मन्त्रः १ (ऋक्सङ्ख्या : १९१९)

वाक्यम् १: तं युञ्जाथां मनसो यो जवीयान्त्रिवन्धुरो वृषणा यस्त्रिचक्रः ।
पदानि : तम् । युञ्जाथाम् । मनसः । यः । जवीयान् । त्रिऽवन्धुरः । वृषणा । यः । त्रिऽचक्रः
वाक्यम् २: येनोपयाथः सुकृतो दुरोणं त्रिधातुना पतथो विर्न पर्णैः ॥
पदानि : येन । उपऽयाथः । सुऽकृतः । दुरोणम् । त्रिऽधातुना । पतथः । विः । न । पर्णैः

१००. मण्डलम् १, सूक्तम् १८६, मन्त्रः १ (ऋक्सङ्ख्या : १९४२)
वाक्यम् १: आ न इळाभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु ।
पदानि : आ । नः । इळाभिः । विदथे । सुऽशस्ति । विश्वानरः । सविता । देवः । एतु
वाक्यम् २: अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा ॥
पदानि : अपि । यथा । युवानः । मत्सथ । नः । विश्वम् । जगत् । अभिऽपित्वे । मनीषा

१०१. मण्डलम् १, सूक्तम् १९०, मन्त्रः ५ (ऋक्सङ्ख्या : १९८७)
वाक्यम् १: ये त्वा देवोस्रिकं मन्यमानाः पापा भद्रमुपजीवन्ति पज्राः ।
पदानि : ये । त्वा । देव । उस्रिकम् । मन्यमानाः । पापाः । भद्रम् । उपऽजीवन्ति । पज्राः
वाक्यम् २: न दूढ्ये३ अनु ददासि वामं बृहस्पते चयस इत्पियारुम् ॥
पदानि : न । दुःऽध्ये । अनु । ददासि । वामम् । बृहस्पते । चयसे । इत् । पियारुम्

१०२. मण्डलम् २, सूक्तम् १, मन्त्रः ५ (ऋक्सङ्ख्या : २०११)
वाक्यम् १: त्वमग्ने त्वष्टा विधते सुवीर्यं तव ग्नावो मित्रमहः सजात्यम् ।
पदानि : त्वम् । अग्ने । त्वष्टा । विधते । सुऽवीर्यम् । तवं । ग्नावः । मित्रऽमहः । सऽजात्यम् ।
वाक्यम् २: त्वमाशुहेमा ररिषे स्वश्व्यं त्वं नरां शर्धो असि पुरूवसुः ॥
पदानि : त्वम् । आशुऽहेमा । ररिषे । सुऽअश्व्यम् । त्वम् । नराम् । शर्धः । असि । पुरुऽवसुः

१०३. मण्डलम् २, सूक्तम् १, मन्त्रः १३ (ऋक्सङ्ख्या : २०१९)
वाक्यम् १: त्वामग्न आदित्यास आस्यं१ त्वां जिह्वां शुचयश्चक्रिरे कवे ।
पदानि : त्वाम् । अग्ने । आदित्यासः । आस्यम् । त्वाम् । जिह्वाम् । शुचयः । चक्रिरे । कवे
वाक्यम् २: त्वां रातिषाचो अध्वरेषु सश्चिरे त्वे देवा हविरदन्त्याहुतम् ॥
पदानि : त्वाम् । रातिऽसाचः । अध्वरेषु । सश्चिरे । त्वे इतिं । देवाः । हविः । अदन्ति । आऽहुतम्

१०४. मण्डलम् २, सूक्तम् ३, मन्त्रः २ (ऋक्सङ्ख्या : २०३७)
वाक्यम् १: नराशंसः प्रति धामान्यञ्जन्तिस्रो दिवः प्रतिं मह्ना स्वर्चिः ।
पदानि : नराशंसः । प्रतिं । धामानि । अञ्जन् । तिस्रः । दिवः । प्रतिं । मह्ना । सुऽअर्चिः
वाक्यम् २: घृतप्रुषा मनसा हव्यमुन्दन्मूर्धन्यज्ञस्य समनक्तु देवान् ॥
पदानि : घृतऽप्रुषा । मनसा । हव्यम् । उन्दन् । मूर्धन् । यज्ञस्यं । सम् । अनक्तु । देवान्

१०५. मण्डलम् २, सूक्तम् ३, मन्त्रः ४ (ऋक्सङ्ख्या : २०३९)
वाक्यम् १: देवं बर्हिर्वर्धमानं सुवीरं स्तीर्णं राये सुभरं वेद्यस्याम् ।
पदानि : देवं । बर्हिः । वर्धमानम् । सुऽवीरम् । स्तीर्णम् । राये । सुऽभरम् । वेदी इतिं । अस्याम्
वाक्यम् २: घृतेनाक्तं वसवः सीदतेदं विश्वे देवा आदित्या यज्ञियासः ॥
पदानि : घृतेनं । अक्तम् । वसवः । सीदत । इदम् । विश्वे । देवाः । आदित्याः । यज्ञियासः

१०६. मण्डलम् २, सूक्तम् ३, मन्त्रः १० (ऋक्सङ्ख्या : २०४५)
वाक्यम् १: वनस्पतिरवसृजन्नुप स्थादग्निर्हविः सूदयाति प्र धीभिः ।
पदानि : वनस्पतिः । अव ऽसृजन् । उप । स्थात् । अग्निः । हविः । सूदयाति । प्र । धीभिः
वाक्यम् २: त्रिधा समक्तं नयतु प्रजानन्देवेभ्यो दैव्यः शमितोप हव्यम् ॥
पदानि : त्रिधा । सम् ऽअक्तम् । नयतु । प्र ऽजानन् । देवेभ्यः । दैव्यः । शमिता । उप । हव्यम्

१०७. मण्डलम् २, सूक्तम् ४, मन्त्रः २ (ऋक्सङ्ख्या : २०४८)
वाक्यम् १: इमं विधन्तो अपां सधस्थे द्विता दधुर्भृगवो विक्ष्वायोः ।
पदानि : इमम् । विधन्तः । अपाम् । सधऽस्थे । द्विता । अदधुः । भृगवः । विक्षु । आयोः
वाक्यम् २: एष विश्वान्यभ्यस्तु भूमा देवानामग्निररतिर्जीराश्वः ॥
पदानि : एषः । विश्वानि । अभि । अस्तु । भूम । देवानाम् । अग्निः । अरतिः । जीरऽअश्वः

१०८. मण्डलम् २, सूक्तम् ४, मन्त्रः ८ (ऋक्सङ्ख्या : २०५४)
वाक्यम् १: नू ते पूर्वस्यावसो अधीतौ तृतीये विदथे मन्म शंसि ।
पदानि : नु । ते । पूर्वस्य । अवसः । अधिऽइतौ । तृतीये । विदथे । मन्म । शंसि
वाक्यम् २: अस्मे अग्ने संयद्वीरं बृहन्तं क्षुमन्तं वाजं स्वपत्यं रयिं दाः ॥
पदानि : अस्मे इति । अग्ने । संयत्ऽवीरम् । बृहन्तम् । क्षुऽमन्तम् । वाजम् । सुऽअपत्यम् । रयिम् । दाः

१०९. मण्डलम् २, सूक्तम् ९, मन्त्रः ४ (ऋक्सङ्ख्या : २०८७)
वाक्यम् १: अग्ने यजस्व हविषा यजीयाञ्छुष्टी देष्णमभि गृणीहि राधः ।
पदानि : अग्ने । यजस्व । हविषा । यजीयान् । श्रुष्टी । देष्णम् । अभि । गृणीहि । राधः
वाक्यम् २: त्वं ह्यसि रयिपती रयीणां त्वं शुक्रस्य वचसो मनोता ॥
पदानि : त्वम् । हि । असि । रयिऽपतिः । रयीणाम् । त्वम् । शुक्रस्य । वचसः । मनोता

११०. मण्डलम् २, सूक्तम् ११, मन्त्रः १ (ऋक्सङ्ख्या : २०९६)
वाक्यम् १: श्रुधी हवमिन्द्र मा रिषण्यः स्याम ते दावने वसूनाम् ।
पदानि : श्रुधि । हवम् । इन्द्र । मा । रिषण्यः । स्याम । ते । दावने । वसूनाम्
वाक्यम् २: इमा हि त्वामूर्जो वर्धयन्ति वसूयवः सिन्धवो न क्षरन्तः ॥
पदानि : इमाः । हि । त्वाम् । ऊर्जः । वर्धयन्ति । वसुऽयवः । सिन्धवः । न । क्षरन्तः

१११. मण्डलम् २, सूक्तम् ११, मन्त्रः ४ (ऋक्सङ्ख्या : २०९९)
वाक्यम् १: शुभ्रं नु ते शुष्मं वर्धयन्तः शुभ्रं वज्रं बाह्वोर्दधानाः ।
पदानि : शुभ्रम् । नु । ते । शुष्मम् । वर्धयन्तः । शुभ्रम् । वज्रम् । बाह्वोः । दधानाः
वाक्यम् २: शुभ्रस्त्वमिन्द्र वावृधानो अस्मे दासीर्विशः सूर्येण सह्याः ॥
पदानि : शुभ्रः । त्वम् । इन्द्र । ववृधानः । अस्मे इति । दासीः । विशः । सूर्येण । सह्याः

११२. मण्डलम् २, सूक्तम् ११, मन्त्रः ११ (ऋक्सङ्ख्या : २१०६)
वाक्यम् १: पिबापिबेदिन्द्र शूर सोमं मन्दन्तु त्वा मन्दिनः सुतासः ।
पदानि : पिबऽपिब । इत् । इन्द्र । शूर । सोमम् । मन्दन्तु । त्वा । मन्दिनः । सुतासः
वाक्यम् २: पृणन्तस्ते कुक्षी वर्धयन्त्वित्था सुतः पौर इन्द्रमाव ॥

पदानि : पृणन्तः। ते। कुक्षी इति। वर्धयन्तु। इत्था। सुतः। पौरः। इन्द्रम्। आव

११३. मण्डलम् २, सूक्तम् १२, मन्त्रः १ (ऋक्सङ्ख्या : २११७)
वाक्यम् १: यो जात एव प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषत्।
पदानि : यः। जातः। एव। प्रथमः। मनस्वान्। देवः। देवान्। क्रतुना। परिऽअभूषत्
वाक्यम् २: यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः॥
पदानि : यस्य। शुष्मात्। रोदसी इति। अभ्यसेताम्। नृम्णस्य। मह्ना। सः। जनासः। इन्द्रः

११४. मण्डलम् २, सूक्तम् १४, मन्त्रः ९ (ऋक्सङ्ख्या : २१५३)
वाक्यम् १: अध्वर्यवः कर्तना श्रुष्टिमस्मै वने निपूतं वन उन्नयध्वम्।
पदानि : अध्वर्यवः। कर्तन। श्रुष्टिम्। अस्मै। वने। निऽपूतम्। वने। उत्। नयध्वम्
वाक्यम् २: जुषाणो हस्त्यमभि वावशे व इन्द्राय सोमं मदिरं जुहोत॥
पदानि : जुषाणः। हस्त्यम्। अभि। वावशे। वः। इन्द्राय। सोमम्। मदिरम्। जुहोत

११५. मण्डलम् २, सूक्तम् १६, मन्त्रः ४ (ऋक्सङ्ख्या : २१७०)
वाक्यम् १: विश्वे ह्यस्मै यजताय धृष्णवे क्रतुं भरन्ति वृषभाय सश्चते।
पदानि : विश्वे। हि। अस्मै। यजताय। धृष्णवे। क्रतुम्। भरन्ति। वृषभाय। सश्चते
वाक्यम् २: वृषा यजस्व हविषा विदुष्टरः पिबेन्द्र सोमं वृषभेण भानुना॥
पदानि : वृषा। यजस्व। हविषा। विदुःऽतरः। पिब। इन्द्र। सोमम्। वृषभेण। भानुना

११६. मण्डलम् २, सूक्तम् १८, मन्त्रः ६ (ऋक्सङ्ख्या : २१९०)
वाक्यम् १: आशीत्या नवत्या याह्यर्वाङा शतेन हरिभिरुह्यमानः।
पदानि : आ। अशीत्या। नवत्या। याहि। अर्वाङ्। आ। शतेन। हरिऽभिः। उह्यमानः
वाक्यम् २: अयं हि ते शुनहोत्रेषु सोम इन्द्र त्वाया परिषिक्तो मदाय॥
पदानि : अयम्। हि। ते। शुनऽहोत्रेषु। सोमः। इन्द्र। त्वाऽया। परिऽसिक्तः। मदाय

११७. मण्डलम् २, सूक्तम् १९, मन्त्रः ८ (ऋक्सङ्ख्या : २२०१)
वाक्यम् १: एवा ते गृत्समदाः शूर मन्मावस्यवो न वयुनानि तक्षुः।
पदानि : एव। ते। गृत्सऽमदाः। शूर। मन्म। अवस्यवः। न। वयुनानि। तक्षुः
वाक्यम् २: ब्रह्मण्यन्त इन्द्र ते नवीय इषमूर्जं सुक्षितिं सुम्नमश्युः॥
पदानि : ब्रह्मण्यन्तः। इन्द्र। ते। नवीयः। इषम्। ऊर्जम्। सुऽक्षितिम्। सुम्नम्। अश्युः

११८. मण्डलम् २, सूक्तम् २०, मन्त्रः २ (ऋक्सङ्ख्या : २२०४)
वाक्यम् १: त्वं न इन्द्र त्वाभिरूती त्वायतो अभिष्टिपासि जनान्।
पदानि : त्वम्। नः। इन्द्र। त्वाभिः। ऊती। त्वाऽयतः। अभिष्टिऽपा। असि। जनान्
वाक्यम् २: त्वमिनो दाशुषो वरूतेत्थाधीरभि यो नक्षति त्वा॥
पदानि : त्वम्। इनः। दाशुषः। वरूता। इत्थाऽधीः। अभि। यः। नक्षति। त्वा

११९. मण्डलम् २, सूक्तम् २३, मन्त्रः २ (ऋक्सङ्ख्या : २२२३)
वाक्यम् १: देवाश्चित्ते असुर्य प्रचेतसो बृहस्पते यज्ञियं भागमानशुः।

पदानि : देवाः । चित् । ते । असुर्य । प्रऽचेतसः । बृहस्पते । यज्ञियम् । भागम् । आनशुः
वाक्यम् २: उस्रा इव सूर्यो ज्योतिषा महो विश्वेषामिज्जनिता ब्रह्मणामसि ॥
पदानि : उस्राःऽइव । सूर्यः । ज्योतिषा । महः । विश्वेषाम् । इत् । जनिता । ब्रह्मणाम् । असि

१२०. मण्डलम् २, सूक्तम् २३, मन्त्रः १० (ऋक्सङ्ख्या : २२३१)
वाक्यम् १: त्वया वयमुत्तमं धीमहे वयो बृहस्पते पप्रिणा सस्निना युजा ।
पदानि : त्वया । वयम् । उत्ऽतमम् । धीमहे । वयः । बृहस्पते । पप्रिणा । सस्निना । युजा
वाक्यम् २: मा नो दुःशंसो अभिदिप्सुरीशत प्र सुशंसा मतिभिस्तारिषीमहि ॥
पदानि : मा । नः । दुःऽशंसः । अभिऽदिप्सुः । ईशत । प्र । सुऽशंसाः । मतिऽभिः । तारिषीमहि

१२१. मण्डलम् २, सूक्तम् २३, मन्त्रः १५ (ऋक्सङ्ख्या : २२३६)
वाक्यम् १: बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ।
पदानि : बृहस्पते । अति । यत् । अर्यः । अर्हात् । द्युऽमत् । विऽभाति । क्रतुऽमत् । जनेषु
वाक्यम् २: यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥
पदानि : यत् । दीदयत् । शवसा । ऋतऽप्रजात । तत् । अस्मासु । द्रविणम् । धेहि । चित्रम्

१२२. मण्डलम् २, सूक्तम् २८, मन्त्रः १ (ऋक्सङ्ख्या : २२८३)
वाक्यम् १: इदं कवेरादित्यस्य स्वराजो विश्वानि सान्त्यभ्यस्तु महा ।
पदानि : इदम् । कवेः । आदित्यस्य । स्वऽराजः । विश्वानि । सन्ति । अभि । अस्तु । महा
वाक्यम् २: अति यो मन्द्रो यजथाय देवः सुकीर्तिं भिक्षे वरुणस्य भूरेः ॥
पदानि : अति । यः । मन्द्रः । यजथाय । देवः । सुऽकीर्तिम् । भिक्षे । वरुणस्य । भूरेः

१२३. मण्डलम् २, सूक्तम् २९, मन्त्रः ६ (ऋक्सङ्ख्या : २२९९)
वाक्यम् १: अर्वाञ्चो अद्या भवता यजत्रा आ वो हार्दि भयमानो व्ययेयम् ।
पदानि : अर्वाञ्चः । अद्य । भवत । यजत्राः । आ । वः । हार्दि । भयमानः । व्ययेयम्
वाक्यम् २: त्राध्वं नो देवा निजुरो वृकस्य त्राध्वं कर्तादवपदो यजत्राः ॥
पदानि : त्राध्वम् । नः । देवाः । निऽजुरः । वृकस्य । त्राध्वम् । कर्तात् । अवऽपदः । यजत्राः

१२४. मण्डलम् २, सूक्तम् ३०, मन्त्रः १ (ऋक्सङ्ख्या : २३०१)
वाक्यम् १: ऋतं देवाय कृण्वते सवित्र इन्द्रायाहिघ्ने न रमन्त आपः ।
पदानि : ऋतम् । देवाय । कृण्वते । सवित्रे । इन्द्राय । अहिऽघ्ने । न । रमन्ते । आपः
वाक्यम् २: अहरहर्यात्यक्तुरपां कियात्या प्रथमः सर्ग आसाम् ॥
पदानि : अहःऽअहः । याति । अक्तुः । अपाम् । कियति । आ । प्रथमः । सर्गः । आसाम्

१२५. मण्डलम् २, सूक्तम् ३०, मन्त्रः ५ (ऋक्सङ्ख्या : २३०५)
वाक्यम् १: अव क्षिप दिवो अश्मानमुच्चा येन शत्रुं मन्दसानो निजूर्वाः ।
पदानि : अव । क्षिप । दिवः । अश्मानम् । उच्चा । येन । शत्रुम् । मन्दसानः । निऽजूर्वाः
वाक्यम् २: तोकस्य सातौ तनयस्य भूरेरस्माँ अर्धं कृणुतादिन्द्र गोनाम् ॥
पदानि : तोकस्य । सातौ । तनयस्य । भूरेः । अस्मान् । अर्धम् । कृणुतात् । इन्द्र । गोनाम्

१२६. मण्डलम् २, सूक्तम् ३०, मन्त्रः १० (ऋक्सङ्ख्या : २३१०)
वाक्यम् १: अस्माकेभिः सत्वभिः शूर शूरैर्वीर्या कृधि यानि ते कर्त्वानि ।
पदानि : अस्माकेभिः । सत्वऽभिः । शूर । शूरैः । वीर्या । कृधि । यानि । ते । कर्त्वानि
वाक्यम् २: ज्योगभूवन्ननुधूपितासो हुत्वी तेषामा भर नो वसूनि ॥
पदानि : ज्योक् । अभूवन् । अनुऽधूपितासः । हुत्वी । तेषाम् । आ । भर । नः । वसूनि

१२७. मण्डलम् २, सूक्तम् ३१, मन्त्रः ३ (ऋक्सङ्ख्या : २३१४)
वाक्यम् १: उत स्य न इन्द्रो विश्वचर्षणिर्दिवः शर्धेन मारुतेन सुक्रतुः ।
पदानि : उत । स्यः । नः । इन्द्रः । विश्वऽचर्षणिः । दिवः । शर्धेन । मारुतेन । सुऽक्रतुः
वाक्यम् २: अनु नु स्थात्यवृकाभिरूतिभी रथं महे सनये वाजसातये ॥
पदानि : अनु । नु । स्थाति । अवृकाभिः । ऊतिऽभिः । रथम् । महे । सनये । वाजऽसातये

१२८. मण्डलम् २, सूक्तम् ३१, मन्त्रः ७ (ऋक्सङ्ख्या : २३१८)
वाक्यम् १: एता वो वश्म्युद्यता यजत्रा अतक्षन्नायवो नव्यसे सम् ।
पदानि : एता । वः । वश्मि । उत्ऽयता । यजत्राः । अतक्षन् । आयवः । नव्यसे । सम्
वाक्यम् २: श्रवस्यवो वाजं चकानाः सप्तिर्न रथ्यो अहं धीतिमश्याः ॥
पदानि : श्रवस्यवः । वाजम् । चकानाः । सप्तिः । न । रथ्यः । अहं । धीतिम् । अश्याः

१२९. मण्डलम् २, सूक्तम् ३२, मन्त्रः ३ (ऋक्सङ्ख्या : २३२१)
वाक्यम् १: अहेळता मनसा शुष्टिमा वह दुहानां धेनुं पिप्युषीमसश्चतम् ।
पदानि : अहेळता । मनसा । शुष्टिम् । आ । वह । दुहानाम् । धेनुम् । पिप्युषीम् । असश्चतम्
वाक्यम् २: पद्याभिराशुं वचसा च वाजिनं त्वां हिनोमि पुरुहूत विश्वहा ॥
पदानि : पद्याभिः । आशुम् । वचसा । च । वाजिनम् । त्वाम् । हिनोमि । पुरुऽहूत । विश्वहा

१३०. मण्डलम् २, सूक्तम् ३४, मन्त्रः ८ (ऋक्सङ्ख्या : २३४९)
वाक्यम् १: यद्युञ्जते मरुतो रुक्मवक्षसोऽश्वान्रथेषु भग आ सुदानवः ।
पदानि : यत् । युञ्जते । मरुतः । रुक्मऽवक्षसः । अश्वान् । रथेषु । भगे । आ । सुऽदानवः
वाक्यम् २: धेनुर्न शिश्वे स्वसरेषु पिन्वते जनाय रातहविषे महीमिषम् ॥
पदानि : धेनुः । न । शिश्वे । स्वसरेषु । पिन्वते । जनाय । रातऽहविषे । महीम् । इषम्

१३१. मण्डलम् ३, सूक्तम् १, मन्त्रः १ (ऋक्सङ्ख्या : २४३६)
वाक्यम् १: सोमस्य मा तवसं वक्ष्यग्ने वह्निं चकर्थ विदथे यजध्यै ।
पदानि : सोमस्य । मा । तवसम् । वक्षि । अग्ने । वह्निम् । चकर्थ । विदथे । यजध्यै
वाक्यम् २: देवाँ अच्छा दीद्यद्युञ्जे अद्रिं शमाये अग्ने तन्वं जुषस्व ॥
पदानि : देवान् । अच्छ । दीद्यत् । युञ्जे । अद्रिम् । शम्ऽआये । अग्ने । तन्वम् । जुषस्व

१३२. मण्डलम् ३, सूक्तम् १, मन्त्रः २ (ऋक्सङ्ख्या : २४३७)
वाक्यम् १: प्राञ्चं यज्ञं चकृम वर्धतां गीः समिद्भिरग्निं नमसा दुवस्यन् ।
पदानि : प्राञ्चम् । यज्ञम् । चकृम । वर्धताम् । गीः । समित्ऽभिः । अग्निम् । नमसा । दुवस्यन्
वाक्यम् २: दिवः शशासुर्विदथा कवीनां गृत्साय चित्तवसे गातुमीषुः ॥
पदानि : दिवः । शशासुः । विदथा । कवीनाम् । गृत्साय । चित् । तवसे । गातुम् । ईषुः

१३३. मण्डलम् ३, सूक्तम् १, मन्त्रः १४ (ऋक्सङ्ख्या : २४४९)
वाक्यम् १: बृहन्त इद्भानवो भाऋजीकमग्निं संचन्त विद्युतो न शुक्राः ।
पदानि : बृहन्तः । इत् । भानवः । भाः ऽऋजीकम् । अग्निम् । संचन्त । विऽद्युतः । न । शुक्राः
वाक्यम् २: गुहेव वृद्धं सदसि स्वे अन्तरपार ऊर्वे अमृतं दुहानाः ॥
पदानि : गुहा ऽइव । वृद्धम् । सदसि । स्वे । अन्तः । अपारे । ऊर्वे । अमृतम् । दुहानाः

१३४. मण्डलम् ३, सूक्तम् १, मन्त्रः १७ (ऋक्सङ्ख्या : २४५२)
वाक्यम् १: आ देवानामभवः केतुरग्ने मन्द्रो विश्वानि काव्यानि विद्वान् ।
पदानि : आ । देवानाम् । अभवः । केतुः । अग्ने । मन्द्रः । विश्वानि । काव्यानि । विद्वान्
वाक्यम् २: प्रति मर्ताँ अवासयो दमूना अनु देवान्रथिरो यासि साधन् ॥
पदानि : प्रति । मर्तान् । अवासयः । दमूनाः । अनु । देवान् । रथिरः । यासि । साधन्

१३५. मण्डलम् ३, सूक्तम् १, मन्त्रः १९ (ऋक्सङ्ख्या : २४५४)
वाक्यम् १: आ नो गहि सख्येभिः शिवेभिर्महान्महीभिरूतिभिः सरण्यन् ।
पदानि : आ । नः । गहि । सख्येभिः । शिवेभिः । महान् । महीभिः । ऊतिऽभिः । सरण्यन्
वाक्यम् २: अस्मे रयिं बहुलं संतरुत्रं सुवाचं भागं यशसं कृधी नः ॥
पदानि : अस्मे इति । रयिम् । बहुलम् । सम्ऽतरुत्रम् । सुऽवाचम् । भागम् । यशसम् । कृधि । नः

१३६. मण्डलम् ३, सूक्तम् २, मन्त्रः ६ (ऋक्सङ्ख्या : २४६४)
वाक्यम् १: पावकशोचे तव हि क्षयं परि होतर्यज्ञेषु वृक्तबर्हिषो नरः ।
पदानि : पावकऽशोचे । तव । हि । क्षयम् । परि । होतः । यज्ञेषु । वृक्तऽबर्हिषः । नरः
वाक्यम् २: अग्ने दुवं इच्छमानास आप्यमुपासते द्रविणं धेहि तेभ्यः ॥
पदानि : अग्ने । दुवः । इच्छमानासः । आप्यम् । उप । आसते । द्रविणम् । धेहि । तेभ्यः

१३७. मण्डलम् ३, सूक्तम् २, मन्त्रः १४ (ऋक्सङ्ख्या : २४७२)
वाक्यम् १: शुचिं न यामन्निषिरं स्वर्दृशं केतुं दिवो रोचनस्थामुषर्बुधम् ।
पदानि : शुचिम् । न । यामन् । इषिरम् । स्वः ऽदृशम् । केतुम् । दिवः । रोचनऽस्थाम् । उषः ऽबुधम्
वाक्यम् २: अग्निं मूर्धानं दिवो अप्रतिष्कुतं तमीमहे नमसा वाजिनं बृहत् ॥
पदानि : अग्निम् । मूर्धानम् । दिवः । अप्रतिऽस्कुतम् । तम् । ईमहे । नमसा । वाजिनम् । बृहत्

१३८. मण्डलम् ३, सूक्तम् ३, मन्त्रः २ (ऋक्सङ्ख्या : २४७५)
वाक्यम् १: अन्तर्दूतो रोदसी दस्म ईयते होता निषत्तो मनुषः पुरोहितः ।
पदानि : अन्तः । दूतः । रोदसी इति । दस्मः । ईयते । होता । निऽसत्तः । मनुषः । पुरः ऽहितः
वाक्यम् २: क्षयं बृहन्तं परि भूषति द्युभिर्देवेभिरग्निरिषितो धियावसुः ॥
पदानि : क्षयम् । बृहन्तम् । परि । भूषति । द्युऽभिः । देवेभिः । अग्निः । इषितः । धियाऽवसुः

१३९. मण्डलम् ३, सूक्तम् ३, मन्त्रः ९ (ऋक्सङ्ख्या : २४८२)
वाक्यम् १: विभावा देवः सुरणः परि क्षितीरग्निर्बभूव शवसा सुमद्रथः ।
पदानि : विभाऽवा । देवः । सुऽरणः । परि । क्षितीः । अग्निः । बभूव । शवसा । सुमत्ऽरथः

वाक्यम् २: तस्यं व्रतानिं भूरिपोषिणो वयमुपं भूषेम दमं आ सुवृक्तिभिः ॥
पदानि : तस्यं । व्रतानिं । भूरिऽपोषिणः । वयम् । उपं । भूषेम । दमे । आ । सुवृक्तिऽभिः

१४०. मण्डलम् ३, सूक्तम् ४, मन्त्रः २ (ऋक्सङ्ख्या : २४८६)
वाक्यम् १: यं देवासस्त्रिरहन्नायजन्ते दिवेदिवे वरुणो मित्रो अग्निः ।
पदानि : यम् । देवासः । त्रिः । अहन् । आऽयजन्ते । दिवेऽदिवे । वरुणः । मित्रः । अग्निः
वाक्यम् २: सेमं यज्ञं मधुमन्तं कृधी नस्तनूनपाद्घृतयोनिं विधन्तम् ॥
पदानि : सः । इमम् । यज्ञम् । मधुऽमन्तम् । कृधि । नः । तनूऽनपात् । घृतऽयोनिम् । विधन्तम्

१४१. मण्डलम् ३, सूक्तम् ४, मन्त्रः ११ (ऋक्सङ्ख्या : २४९५)
वाक्यम् १: आ याह्यग्ने समिधानो अर्वाङिन्द्रेण देवैः सरथं तुरेभिः ।
पदानि : आ । याहि । अग्ने । सम्ऽइधानः । अर्वाङ् । इन्द्रेण । देवैः । सऽरथम् । तुरेभिः
वाक्यम् २: बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा देवा अमृता मादयन्ताम् ॥
पदानि : बर्हिः । नः । आस्ताम् । अदितिः । सुऽपुत्रा । स्वाहा । देवाः । अमृताः । मादयन्ताम्

१४२. मण्डलम् ३, सूक्तम् ७, मन्त्रः २ (ऋक्सङ्ख्या : २५१९)
वाक्यम् १: दिवक्षसो धेनवो वृष्णो अश्वा देवीरा तस्थौ मधुमद्वहन्तीः ।
पदानि : दिवक्षसः । धेनवः । वृष्णः । अश्वाः । देवीः । आ । तस्थौ । मधुऽमत् । वहन्तीः
वाक्यम् २: ऋतस्यं त्वा सदसि क्षेमयन्तं पर्येका चरति वर्तनिं गौः ॥
पदानि : ऋतस्यं । त्वा । सदसि । क्षेमऽयन्तम् । परिं । एका । चरति । वर्तनिम् । गौः

१४३. मण्डलम् ३, सूक्तम् १८, मन्त्रः २ (ऋक्सङ्ख्या : २६०९)
वाक्यम् १: तपो ष्वग्ने अन्तराँ अमित्रान्तपा शंसमरुषः परस्य ।
पदानि : तपो इति । सु । अग्ने । अन्तरान् । अमित्रान् । तप । शंसम् । अरुषः । परस्य
वाक्यम् २: तपो वसो चिकितानो अचित्तान्वि ते तिष्ठन्तामजरा अयासः ॥
पदानि : तपो इति । वसो इति । चिकितानः । अचित्तान् । वि । ते । तिष्ठन्ताम् । अजराः । अयासः

१४४. मण्डलम् ३, सूक्तम् १९, मन्त्रः १ (ऋक्सङ्ख्या : २६१३)
वाक्यम् १: अग्निं होतारं प्र वृणे मियेधे गृत्सं कविं विश्वविदममूरम् ।
पदानि : अग्निम् । होतारम् । प्र । वृणे । मियेधे । गृत्सम् । कविम् । विश्वऽविदम् । अमूरम्
वाक्यम् २: स नो यक्षद्देवतातां यजीयान्राये वाजाय वनते मघानि ॥
पदानि : सः । नः । यक्षत् । देवऽतातां । यजीयान् । राये । वाजाय । वनते । मघानि

१४५. मण्डलम् ३, सूक्तम् २०, मन्त्रः ५ (ऋक्सङ्ख्या : २६२२)
वाक्यम् १: दधिक्रामग्निमुषसं च देवीं बृहस्पतिं सवितारं च देवम् ।
पदानि : दधिऽक्राम् । अग्निम् । उषसम् । च । देवीम् । बृहस्पतिम् । सवितारम् । च । देवम्
वाक्यम् २: अश्विना मित्रावरुणा भगं च वसून्रुद्राँ आदित्याँ इह हुवे ॥
पदानि : अश्विना । मित्रावरुणा । भगम् । च । वसून् । रुद्रान् । आदित्यान् । इह । हुवे

१४६. मण्डलम् ३, सूक्तम् २१, मन्त्रः १ (ऋक्सङ्ख्या : २६२३)

वाक्यम् १: इमं नो यज्ञममृतेषु धेहीमा हव्या जातवेदो जुषस्व ।
पदानि : इमम् । नः । यज्ञम् । अमृतेषु । धेहि । इमा । हव्या । जातऽवेदः । जुषस्व
वाक्यम् २: स्तोकानामग्ने मेदसो घृतस्य होतः प्राशान प्रथमो निषद्य ॥
पदानि : स्तोकानाम् । अग्ने । मेदसः । घृतस्य । होतरितिं । प्र । अशान । प्रथमः । निऽसद्य

१४७. मण्डलम् ३, सूक्तम् २६, मन्त्रः ३ (ऋक्सङ्ख्या : २६५०)
वाक्यम् १: अश्वो न क्रन्दञ्जनिभिः समिध्यते वैश्वानरः कुशिकेभिर्युगेयुगे ।
पदानि : अश्वः । न । क्रन्दन् । जनिऽभिः । सम् । इध्यते । वैश्वानरः । कुशिकेभिः । युगेऽयुगे
वाक्यम् २: स नो अग्निः सुवीर्यं स्वश्व्यं दधातु रत्नमृतेषु जागृविः ॥
पदानि : सः । नः । अग्निः । सुऽवीर्यम् । सुऽअश्व्यम् । दधातु । रत्नम् । अमृतेषु । जागृविः

१४८. मण्डलम् ३, सूक्तम् २९, मन्त्रः १४ (ऋक्सङ्ख्या : २६९१)
वाक्यम् १: प्र सप्तहोता सनकादरोचत मातुरुपस्थे यदशोचदूधनि ।
पदानि : प्र । सप्तऽहोता । सनकात् । अरोचत । मातुः । उपऽस्थे । यत् । अशोचत् । ऊधनि
वाक्यम् २: न नि मिषति सुरणो दिवेदिवे यदसुरस्य जठरादजायत ॥
पदानि : न । नि । मिषति । सुऽरणः । दिवेऽदिवे । यत् । असुरस्य । जठरात् । अजायत

१४९. मण्डलम् ३, सूक्तम् ३०, मन्त्रः ९ (ऋक्सङ्ख्या : २७०२)
वाक्यम् १: नि सामनामिषिरामिन्द्र भूमिं महीमपारां सदने ससत्थ ।
पदानि : नि । सामनाम् । इषिराम् । इन्द्र । भूमिम् । महीम् । अपाराम् । सदने । ससत्थ
वाक्यम् २: अस्तभ्नाद्द्यां वृषभो अन्तरिक्षमर्षन्त्वापस्त्वयेह प्रसूताः ॥
पदानि : अस्तभ्नात् । द्याम् । वृषभः । अन्तरिक्षम् । अर्षन्तु । आपः । त्वया । इह । प्रऽसूताः

१५०. मण्डलम् ३, सूक्तम् ३०, मन्त्रः १४ (ऋक्सङ्ख्या : २७०७)
वाक्यम् १: महि ज्योतिर्निहितं वक्षणास्वामा पक्वं चरति बिभ्रती गौः ।
पदानि : महि । ज्योतिः । निऽहितम् । वक्षणासु । आमा । पक्वम् । चरति । बिभ्रती । गौः
वाक्यम् २: विश्वं स्वाद्म संभृतमुस्रियायां यत्सीमिन्द्रो अदधाद्भोजनाय ॥
पदानि : विश्वम् । स्वाद्म । सम्ऽभृतम् । उस्रियायाम् । यत् । सीम् । इन्द्रः । अदधात् । भोजनाय

१५१. मण्डलम् ३, सूक्तम् ३१, मन्त्रः १ (ऋक्सङ्ख्या : २७१६)
वाक्यम् १: शासद्वह्निर्दुहितुर्नप्त्यं गाद्विद्वाँ ऋतस्य दीधितिं सपर्यन् ।
पदानि : शासत् । वह्निः । दुहितुः । नप्त्यम् । गात् । विद्वान् । ऋतस्य । दीधितिम् । सपर्यन्
वाक्यम् २: पिता यत्र दुहितुः सेकमृञ्जन्त्सं शग्म्येन मनसा दधन्वे ॥
पदानि : पिता । यत्र । दुहितुः । सेकम् । ऋञ्जन् । सम् । शग्म्येन । मनसा । दधन्वे

१५२. मण्डलम् ३, सूक्तम् ३१, मन्त्रः २ (ऋक्सङ्ख्या : २७१७)
वाक्यम् १: न जामये तान्वो रिक्थमारैक्चकार गर्भं सनितुर्निधानम् ।
पदानि : न । जामये । तान्वः । रिक्थम् । अरैक् । चकार । गर्भम् । सनितुः । निऽधानम्
वाक्यम् २: यदीं मातरो जनयन्त वह्निमन्यः कर्ता सुकृतोरन्य ऋन्धन् ॥
पदानि : यदि । मातरः । जनयन्त । वह्निम् । अन्यः । कर्ता । सुऽकृतोः । अन्यः । ऋन्धन्

१५३. मण्डलम् ३, सूक्तम् ३२, मन्त्रः १० (ऋक्सङ्ख्या : २७४७)
वाक्यम् १: त्वं सद्यो अपिबो जात इन्द्र मदाय सोमं परमे व्योमन्।
पदानि : त्वम्। सद्यः। अपिबः। जातः। इन्द्र। मदाय। सोमम्। परमे। विऽओमन्
वाक्यम् २: यद्ध द्यावापृथिवी आविवेशीरथाभवः पूर्व्यः कारुधायाः॥
पदानि : यत्। ह। द्यावापृथिवी इति। आ। अविवेशीः। अथ। अभवः। पूर्व्यः। कारुऽधायाः

१५४. मण्डलम् ३, सूक्तम् ३३, मन्त्रः ६ (ऋक्सङ्ख्या : २७६०)
वाक्यम् १: इन्द्रो अस्माँ अरदद्वज्रबाहुरपाहन्वृत्रं परिधिं नदीनाम्।
पदानि : इन्द्रः। अस्मान्। अरदत्। वज्रऽबाहुः। अप। अहन्। वृत्रम्। परिऽधिम्। नदीनाम्
वाक्यम् २: देवोऽनयत्सविता सुपाणिस्तस्य वयं प्रसवे याम उर्वीः॥
पदानि : देवः। अनयत्। सविता। सुऽपाणिः। तस्य। वयम्। प्रऽसवे। यामः। उर्वीः

१५५. मण्डलम् ३, सूक्तम् ३३, मन्त्रः १० (ऋक्सङ्ख्या : २७६४)
वाक्यम् १: आ ते कारो शृणवाम वचांसि ययाथ दूरादनसा रथेन।
पदानि : आ। ते। कारो इति। शृणवाम। वचांसि। ययाथ। दूरात्। अनसा। रथेन
वाक्यम् २: नि ते नंसै पीप्यानेव योषा मर्यायेव कन्या शश्वचै ते॥
पदानि : नि। ते। नंसै। पीप्यानाऽइव। योषा। मर्यायऽइव। कन्या। शश्वचै। ते इतिते

१५६. मण्डलम् ३, सूक्तम् ३३, मन्त्रः ११ (ऋक्सङ्ख्या : २७६५)
वाक्यम् १: यदङ्ग त्वा भरताः संतरेयुर्गव्यन्ग्राम इषित इन्द्रजूतः।
पदानि : यत्। अङ्ग। त्वा। भरताः। सम्ऽतरेयुः। गव्यन्। ग्रामः। इषितः। इन्द्रऽजूतः
वाक्यम् २: अर्षादह प्रसवः सर्गतक्त आ वो वृणे सुमतिं यज्ञियानाम्॥
पदानि : अर्षात्। अह। प्रऽसवः। सर्गऽतक्तः। आ। वः। वृणे। सुऽमतिम्। यज्ञियानाम्

१५७. मण्डलम् ३, सूक्तम् ४३, मन्त्रः ६ (ऋक्सङ्ख्या : २८६३)
वाक्यम् १: आ त्वा बृहन्तो हरयो युजाना अर्वागिन्द्र सधमादो वहन्तु।
पदानि : आ। त्वा। बृहन्तः। हरयः। युजानाः। अर्वाक्। इन्द्र। सधऽमादः। वहन्तु
वाक्यम् २: प्र ये द्विता दिव ऋञ्जन्त्याताः सुसंमृष्टासो वृषभस्य मूराः॥
पदानि : प्र। ये। द्विता। दिवः। ऋञ्जन्ति। आताः। सुऽसंमृष्टासः। वृषभस्य। मूराः

१५८. मण्डलम् ३, सूक्तम् ४९, मन्त्रः २ (ऋक्सङ्ख्या : २८९२)
वाक्यम् १: यं नु नकिः पृतनासु स्वराजं द्विता तरति नृतमं हरिष्ठाम्।
पदानि : यम्। नु। नकिः। पृतनासु। स्वऽराजम्। द्विता। तरति। नृऽतमम्। हरिऽस्थाम्
वाक्यम् २: इनतमः सत्वभिर्यो ह शूषैः पृथुज्रया अमिनादायुर्दस्योः॥
पदानि : इनऽतमः। सत्वऽभिः। यः। ह। शूषैः। पृथुऽज्रयाः। अमिनात्। आयुः। दस्योः

१५९. मण्डलम् ३, सूक्तम् ५१, मन्त्रः ६ (ऋक्सङ्ख्या : २९०६)
वाक्यम् १: तुभ्यं ब्रह्माणि गिरं इन्द्र तुभ्यं सत्रा दधिरे हरिवो जुषस्व।
पदानि : तुभ्यम्। ब्रह्माणि। गिरः। इन्द्र। तुभ्यम्। सत्रा। दधिरे। हरिऽवः। जुषस्व
वाक्यम् २: बोध्याऽपिरवसो नूतनस्य सखे वसो जरितृभ्यो वयो धाः॥

पदानि : बोधि । आपिः । अवसः । नूतनस्य । सखे । वसो इति । जरितृऽभ्यः । वयः । धाः

१६०. मण्डलम् ३, सूक्तम् ५१, मन्त्रः ७ (ऋक्सङ्ख्या : २९०७)
वाक्यम् १: इन्द्र मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सुतस्य ।
पदानि : इन्द्र । मरुत्वः । इह । पाहि । सोमम् । यथा । शार्याते । अपिबः । सुतस्य
वाक्यम् २: तव प्रणीती तव शूर शर्मन्ना विवासन्ति कवयः सुयज्ञाः ॥
पदानि : तव । प्रऽनीती । तव । शूर । शर्मन् । आ । विवासन्ति । कवयः । सुऽयज्ञाः

१६१. मण्डलम् ३, सूक्तम् ५३, मन्त्रः १० (ऋक्सङ्ख्या : २९३०)
वाक्यम् १: हंसा इव कृणुथ श्लोकमद्रिभिर्मदन्तो गीर्भिरध्वरे सुते सचा ।
पदानि : हंसाःऽइव । कृणुथ । श्लोकम् । अद्रिऽभिः । मदन्तः । गीःऽभिः । अध्वरे । सुते । सचा
वाक्यम् २: देवेभिर्विप्रा ऋषयो नृचक्षसो वि पिबध्वं कुशिकाः सोम्यं मधु ॥
पदानि : देवेभिः । विप्राः । ऋषयः । नृऽचक्षसः । वि । पिबध्वम् । कुशिकाः । सोम्यम् । मधु

१६२. मण्डलम् ३, सूक्तम् ५४, मन्त्रः १५ (ऋक्सङ्ख्या : २९५९)
वाक्यम् १: इन्द्रो विश्वैर्वीर्यै३ः पत्यमान उभे आ पप्रौ रोदसी महित्वा ।
पदानि : इन्द्रः । विश्वैः । वीर्यैः । पत्यमानः । उभे इति । आ । पप्रौ । रोदसी इति । महिऽत्वा
वाक्यम् २: पुरंदरो वृत्रहा धृष्णुषेणः संगृभ्या न आ भरा भूरिं पश्वः ॥
पदानि : पुरम्ऽदरः । वृत्रऽहा । धृष्णुऽसेनः । सम्ऽगृभ्य । नः । आ । भर । भूरिं । पश्वः

१६३. मण्डलम् ३, सूक्तम् ५६, मन्त्रः ५ (ऋक्सङ्ख्या : २९९३)
वाक्यम् १: त्री षधस्था सिन्धवस्त्रिः कवीनामुत त्रिमाता विदथेषु सम्राट् ।
पदानि : त्री । सधऽस्था । सिन्धवः । त्रिः । कवीनाम् । उत । त्रिऽमाता । विदथेषु । सम्ऽराट्
वाक्यम् २: ऋतावरीर्योषणास्तिस्रो अप्यास्त्रिरा दिवो विदथे पत्यमानाः ॥
पदानि : ऋतऽवरीः । योषणाः । तिस्रः । अप्याः । त्रिः । आ । दिवः । विदथे । पत्यमानाः

१६४. मण्डलम् ३, सूक्तम् ५८, मन्त्रः ६ (ऋक्सङ्ख्या : ३००८)
वाक्यम् १: पुराणमोकः सख्यं शिवं वां युवोर्नरा द्रविणं जह्नाव्यम् ।
पदानि : पुराणम् । ओकः । सख्यम् । शिवम् । वाम् । युवोः । नरा । द्रविणम् । जह्नाव्याम्
वाक्यम् २: पुनः कृण्वानाः सख्या शिवानि मध्वा मदेम सह नू समानाः ॥
पदानि : पुनरिति । कृण्वानाः । सख्या । शिवानि । मध्वा । मदेम । सह । नु । समानाः

१६५. मण्डलम् ३, सूक्तम् ५८, मन्त्रः ८ (ऋक्सङ्ख्या : ३०१०)
वाक्यम् १: अश्विना परि वामिषः पुरूचीरीयुर्गीर्भिर्यतमाना अमृध्राः ।
पदानि : अश्विना । परि । वाम् । इषः । पुरूचीः । ईयुः । गीःऽभिः । यतमानाः । अमृध्राः
वाक्यम् २: रथो ह वामृतजा अद्रिजूतः परि द्यावापृथिवी याति सद्यः ॥
पदानि : रथः । ह । वाम् । ऋतऽजाः । अद्रिऽजूतः । परि । द्यावापृथिवी इति । याति । सद्यः

१६६. मण्डलम् ३, सूक्तम् ५९, मन्त्रः १ (ऋक्सङ्ख्या : ३०१२)
वाक्यम् १: मित्रो जनान्यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्याम् ।

पदानि : मित्रः । जनान् । यातयति । ब्रुवाणः । मित्रः । दाधार । पृथिवीम् । उत । द्याम्
वाक्यम् २: मित्रः कृष्टीरनिमिषाभि चष्टे मित्राय हव्यं घृतवज्जुहोत ॥
पदानि : मित्रः । कृष्टीः । अनिऽमिषा । अभि । चष्टे । मित्राय । हव्यम् । घृतऽवत् । जुहोत

१६७. मण्डलम् ३, सूक्तम् ६०, मन्त्रः २ (ऋक्सङ्ख्या : ३०२२)
वाक्यम् १: याभिः शचीभिश्चमसाँ अपिंशत ययाधिया गामरिंणीत चर्मणः ।
पदानि : याभिः । शचीभिः । चमसान् । अपिंशत । ययाः । धिया । गाम् । अरिंणीत । चर्मणः
वाक्यम् २: येन हरी मनसा निरतक्षत तेन देवत्वमृभवः समानश ॥
पदानि : येन । हरी इति । मनसा । निःऽअतक्षत । तेन । देवऽत्वम् । ऋभवः । सम् । आनश

१६८. मण्डलम् ३, सूक्तम् ६०, मन्त्रः ५ (ऋक्सङ्ख्या : ३०२५)
वाक्यम् १: इन्द्र ऋभुभिर्वाजवद्भिः समुक्षितं सुतं सोममा वृषस्वा गभस्त्योः ।
पदानि : इन्द्र । ऋभुऽभिः । वाजवत्ऽभिः । सम्ऽउक्षितम् । सुतम् । सोमम् । आ । वृषस्व । गभस्त्योः
वाक्यम् २: धियेषितो मघवन्दाशुषो गृहे सौधन्वनेभिः सह मत्स्वा नृभिः ॥
पदानि : धिया । इषितः । मघऽवन् । दाशुषः । गृहे । सौधन्वनेभिः । सह । मत्स्व । नृऽभिः

१६९. मण्डलम् ३, सूक्तम् ६१, मन्त्रः ७ (ऋक्सङ्ख्या : ३०३४)
वाक्यम् १: ऋतस्य बुध्न उषसामिषण्यन्वृषा मही रोदसी आ विवेश ।
पदानि : ऋतस्य । बुध्ने । उषसाम् । इषण्यन् । वृषा । मही इति । रोदसी इति । आ । विवेश
वाक्यम् २: मही मित्रस्य वरुणस्य माया चन्द्रेव भानुं वि दधे पुरुत्रा ॥
पदानि : मही । मित्रस्य । वरुणस्य । माया । चन्द्राऽइव । भानुम् । वि । दधे । पुरुऽत्रा

१७०. मण्डलम् ४, सूक्तम् १, मन्त्रः ९ (ऋक्सङ्ख्या : ३०६१)
वाक्यम् १: स चेतयन्मनुषो यज्ञबन्धुः प्र तं महया रशनया नयन्ति ।
पदानि : सः । चेतयत् । मनुषः । यज्ञऽबन्धुः । प्र । तम् । महया । रशनया । नयन्ति
वाक्यम् २: स क्षेत्यस्य दुर्यासु साधन्देवो मर्तस्य सधनित्वमाप ॥
पदानि : सः । क्षेति । अस्य । दुर्यासु । साधन् । देवः । मर्तस्य । सधनिऽत्वम् । आप

१७१. मण्डलम् ४, सूक्तम् १, मन्त्रः १३ (ऋक्सङ्ख्या : ३०६५)
वाक्यम् १: अस्माकमत्र पितरो मनुष्या अभि प्र सेदुर्ऋतमाशुषाणाः ।
पदानि : अस्माकम् । अत्र । पितरः । मनुष्याः । अभि । प्र । सेदुः । ऋतम् । आशुषाणाः
वाक्यम् २: अश्मव्रजाः सुदुघा वव्रे अन्तरुदुस्रा आजन्नुषसो हुवानाः ॥
पदानि : अश्मऽव्रजाः । सुऽदुघाः । वव्रे । अन्तः । उत् । उस्राः । आजन् । उषसः । हुवानाः

१७२. मण्डलम् ४, सूक्तम् २, मन्त्रः ६ (ऋक्सङ्ख्या : ३०७८)
वाक्यम् १: यस्त इध्मं जभरत्सिष्विदानो मूर्धानं वा ततपते त्वाया ।
पदानि : यः । ते । इध्मम् । जभरत् । सिस्विदानः । मूर्धानम् । वा । ततपते । त्वाऽया
वाक्यम् २: भुवस्तस्य स्वतवाँः पायुरग्ने विश्वस्मात्सीमघायत उरुष्य ॥
पदानि : भुवः । तस्य । स्वऽतवान् । पायुः । अग्ने । विश्वस्मात् । सीम् । अघऽयतः । उरुष्य

१७३. मण्डलम् ४, सूक्तम् ४, मन्त्रः १ (ऋक्सङ्ख्या : ३१०९)
वाक्यम् १: कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन।
पदानि : कृणुष्व। पाजः। प्रऽसितिम्। न। पृथ्वीम्। याहि। राजाऽइव। अमऽवान्। इभेन
वाक्यम् २: तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः॥
पदानि : तृष्वीम्। अनु। प्रऽसितिम्। द्रूणानः। अस्ता। असि। विध्य। रक्षसः। तपिष्ठैः

१७४. मण्डलम् ४, सूक्तम् ४, मन्त्रः १५ (ऋक्सङ्ख्या : ३१२३)
वाक्यम् १: अया ते अग्ने समिधा विधेम प्रति स्तोमं शस्यमानं गृभाय।
पदानि : अया। ते। अग्ने। सम्ऽइधा। विधेम। प्रति। स्तोमम्। शस्यमानम्। गृभाय
वाक्यम् २: दहाशसो रक्षसः पाह्यस्मान्दुहो निदो मित्रमहो अवद्यात्॥
पदानि : दह। अशसः। रक्षसः। पाहि। अस्मान्। द्रुहः। निदः। मित्रऽमहः। अवद्यात्

१७५. मण्डलम् ४, सूक्तम् ५, मन्त्रः ४ (ऋक्सङ्ख्या : ३१२७)
वाक्यम् १: प्र ताँ अग्निर्बभसत्तिग्मजम्भस्तपिष्ठेन शोचिषा यः सुराधाः।
पदानि : प्र। तान्। अग्निः। बभसत्। तिग्मऽजम्भः। तपिष्ठेन। शोचिषा। यः। सुऽराधाः
वाक्यम् २: प्र ये मिनन्ति वरुणस्य धाम प्रिया मित्रस्य चेततो ध्रुवाणि॥
पदानि : प्र। ये। मिनन्ति। वरुणस्य। धाम। प्रिया। मित्रस्य। चेततः। ध्रुवाणि

१७६. मण्डलम् ४, सूक्तम् ६, मन्त्रः २ (ऋक्सङ्ख्या : ३१४०)
वाक्यम् १: अमूरो होता न्यसादि विक्ष्वग्निर्मन्द्रो विदथेषु प्रचेताः।
पदानि : अमूरः। होता। नि। असादि। विक्षु। अग्निः। मन्द्रः। विदथेषु। प्रऽचेताः
वाक्यम् २: ऊर्ध्वं भानुं सवितेवाश्रेन्मेतेव धूमं स्तभायदुप द्याम्॥
पदानि : ऊर्ध्वम्। भानुम्। सविताऽइव। अश्रेत्। मेताऽइव। धूमम्। स्तभायत्। उप। द्याम्

१७७. मण्डलम् ४, सूक्तम् ६, मन्त्रः ८ (ऋक्सङ्ख्या : ३१४६)
वाक्यम् १: द्विर्यं पञ्च जीजनन्त्संवसानाः स्वसारो अग्निं मानुषीषु विक्षु।
पदानि : द्विः। यम्। पञ्च। जीजनन्। सम्ऽवसानाः। स्वसारः। अग्निम्। मानुषीषु। विक्षु
वाक्यम् २: उषर्बुधमथर्यो३ न दन्तं शुक्रं स्वासं परशुं न तिग्मम्॥
पदानि : उषःऽबुधम्। अथर्यः। न। दन्तम्। शुक्रम्। सुऽआसम्। परशुम्। न। तिग्मम्

१७८. मण्डलम् ४, सूक्तम् ७, मन्त्रः ७ (ऋक्सङ्ख्या : ३१५६)
वाक्यम् १: ससस्य यद्वियुता सस्मिन्नूधन्नृतस्य धामन्रणयन्त देवाः।
पदानि : ससस्य। यत्। विऽयुता। सस्मिन्। ऊधन्। ऋतस्य। धामन्। रणयन्त। देवाः
वाक्यम् २: महाँ अग्निर्नमसा रातहव्यो वेरध्वराय सदमित्कृतावा॥
पदानि : महान्। अग्निः। नमसा। रातऽहव्यः। वेः। अध्वराय। सदम्। इत्। ऋतऽवा

१७९. मण्डलम् ४, सूक्तम् १७, मन्त्रः ४ (ऋक्सङ्ख्या : ३२४१)
वाक्यम् १: सुवीरस्ते जनिता मन्यत द्यौरिन्द्रस्य कर्ता स्वपस्तमो भूत्।
पदानि : सुऽवीरः। ते। जनिता। मन्यत। द्यौः। इन्द्रस्य। कर्ता। स्वपःऽतमः। भूत्
वाक्यम् २: य ईं जजान स्वर्यं सुवज्रमनपच्युतं सदसो न भूमं॥
पदानि : यः। ईम्। जजान। स्वर्यम्। सुऽवज्रम्। अनपऽच्युतम्। सदसः। न। भूमं

१८०. मण्डलम् ४, सूक्तम् १७, मन्त्रः ६ (ऋक्सङ्ख्या : ३२४३)
वाक्यम् १: सत्रा सोमा अभवन्नस्य विश्वे सत्रा मदासो बृहतो मदिष्ठाः ।
पदानि : सत्रा । सोमाः । अभवन् । अस्य । विश्वे । सत्रा । मदासः । बृहतः । मदिष्ठाः
वाक्यम् २: सत्राभवो वसुपतिर्वसूनां दत्रे विश्वा अधिथा इन्द्र कृष्टीः ॥
पदानि : सत्रा । अभवः । वसुऽपतिः । वसूनाम् । दत्रे । विश्वाः । अधिथाः । इन्द्र । कृष्टीः

१८१. मण्डलम् ४, सूक्तम् १७, मन्त्रः ७ (ऋक्सङ्ख्या : ३२४४)
वाक्यम् १: त्वमध प्रथमं जायमानोऽमे विश्वा अधिथा इन्द्र कृष्टीः ।
पदानि : त्वम् । अध । प्रथमम् । जायमानः । अमे । विश्वाः । अधिथाः । इन्द्र । कृष्टीः
वाक्यम् २: त्वं प्रतिं प्रवतं आशयानमहिं वज्रेण मघवन्वि वृश्चः ॥
पदानि : त्वम् । प्रतिं । प्रऽवतः । आऽशयानम् । अहिम् । वज्रेण । मघऽवन् । वि । वृश्चः

१८२. मण्डलम् ४, सूक्तम् १७, मन्त्रः ९ (ऋक्सङ्ख्या : ३२४६)
वाक्यम् १: अयं वृतश्चातयते समीचीर्य आजिषु मघवा शृण्व एकः ।
पदानि : अयम् । वृतः । चातयते । सम्ऽईचीः । यः । आजिषु । मघऽवा । शृण्वे । एकः
वाक्यम् २: अयं वाजं भरति यं सनोत्यस्य प्रियासः सख्ये स्याम ॥
पदानि : अयम् । वाजम् । भरति । यम् । सनोति । अस्य । प्रियासः । सख्ये । स्याम

१८३. मण्डलम् ४, सूक्तम् १८, मन्त्रः ९ (ऋक्सङ्ख्या : ३२६७)
वाक्यम् १: ममच्चन ते मघवन्व्यंसो निविविध्वाँ अप हनू जघान ।
पदानि : मम । चन । ते । मघऽवन् । विऽअंसः । निऽविविध्वान् । अप । हनू इति । जघान
वाक्यम् २: अधा निविद्ध उत्तरो बभूवाञ्छिरो दासस्य सं पिणग्वधेन ॥
पदानि : अध । निऽविद्धः । उत्ऽतरः । बभूवान् । शिरः । दासस्य । सम् । पिणक् । वधेन

१८४. मण्डलम् ४, सूक्तम् २२, मन्त्रः ३ (ऋक्सङ्ख्या : ३३०७)
वाक्यम् १: यो देवो देवतमो जायमानो महो वाजेभिर्महद्भिश्च शुष्मैः ।
पदानि : यः । देवः । देवऽतमः । जायमानः । महः । वाजेभिः । महत्ऽभिः । च । शुष्मैः
वाक्यम् २: दधानो वज्रं बाह्वोरुशन्तं द्याममेन रेजयत्प्र भूम ॥
पदानि : दधानः । वज्रम् । बाह्वोः । उशन्तम् । द्याम् । अमेन । रेजयत् । प्र । भूम

१८५. मण्डलम् ४, सूक्तम् २४, मन्त्रः २ (ऋक्सङ्ख्या : ३३२८)
वाक्यम् १: स वृत्रहत्ये हव्यः स ईड्यः स सुष्टुत इन्द्रः सत्यराधाः ।
पदानि : सः । वृत्रऽहत्ये । हव्यः । सः । ईड्यः । सः । सुऽस्तुतः । इन्द्रः । सत्यऽराधाः
वाक्यम् २: स यामन्ना मघवा मर्त्याय ब्रह्मण्यते सुष्वये वरिवो धात् ॥
पदानि : सः । यामन् । आ । मघऽवा । मर्त्याय । ब्रह्मण्यते । सुस्वये । वरिवः । धात्

१८६. मण्डलम् ४, सूक्तम् २५, मन्त्रः ४ (ऋक्सङ्ख्या : ३३४१)
वाक्यम् १: तस्मा अग्निर्भारतः शर्म यंसज्ज्योक्पश्यात्सूर्यमुच्चरन्तम् ।
पदानि : तस्मै । अग्निः । भारतः । शर्म । यंसत् । ज्योक् । पश्यात् । सूर्यम् । उत्ऽचरन्तम्

वाक्यम् २: य इन्द्रा॑य सुनवा॒मेत्याह॒ नरे॒ नर्या॑य नृ॒तमा॑य नृ॒णाम् ॥
पदानि : यः । इन्द्रा॑य । सुनवा॑म । इति॑ । आह॑ । नरे॑ । नर्या॑य । नृऽत॑माय । नृ॒णाम्

१८७. मण्डलम् ४, सूक्तम् २६, मन्त्रः ५ (ऋक्सङ्ख्या : ३३५०)
वाक्यम् १: भर॒द्यदि॒ विर॑तो॒ वेवि॑जानः पृ॒थोरु॑णा॒ मनो॑जवा असर्जि ।
पदानि : भर॑त् । यदि॑ । विः । अतः॑ । वेवि॑जानः । पृ॒था । उ॒रु॒णा॑ । मनः॑ऽजवाः । अ॒स॒र्जि॒
वाक्यम् २: तूय॑ं ययौ॒ मधु॑ना सो॒म्येनो॒त श्रवो॑ विविदे श्ये॒नो अत्र॑ ॥
पदानि : तूय॑म् । य॒यौ॒ । मधु॑ना । सो॒म्येन॑ । उ॒त । श्रवः॑ । वि॒वि॒दे॒ । श्ये॒नः । अत्र॑

१८८. मण्डलम् ४, सूक्तम् ३३, मन्त्रः १ (ऋक्सङ्ख्या : ३४३१)
वाक्यम् १: प्र ऋ॒भुभ्यो॑ दू॒तमि॑व॒ वाच॑मिष्य उप॒स्तिरे॒ श्वैत॑रीं धे॒नुमी॑ळे ।
पदानि : प्र । ऋ॒भुऽभ्यः॑ । दू॒तम्ऽइ॑व । वाच॑म् । इ॒ष्ये॒ । उ॒प॒ऽस्तिरे॑ । श्वैत॑रीम् । धे॒नुम् । ई॒ळे॒
वाक्यम् २: ये वात॑जूतास्त॒रणि॑भि॒रेवै॒: परि॒ द्यां स॒द्यो अ॒पसो॑ बभूवुः ॥
पदानि : ये । वात॑ऽजूताः । त॒रणि॑ऽभिः । एवैः॑ । परि॑ । द्याम् । स॒द्यः । अ॒पसः॑ । ब॒भू॒वुः

१८९. मण्डलम् ४, सूक्तम् ३३, मन्त्रः ३ (ऋक्सङ्ख्या : ३४३३)
वाक्यम् १: पुन॒र्ये च॒क्रुः पि॒तरा॒ युवा॑ना॒ सना॒ यूपे॑व जर॒णा शया॑ना ।
पदानि : पुनः॑ । ये । च॒क्रुः॒ । पि॒तरा॑ । युवा॑ना । सना॑ । यूपा॑ऽइव । ज॒र॒णा । शया॑ना
वाक्यम् २: ते वाजो॒ विभ्वाँ॑ ऋ॒भुरिन्द्र॑वन्तो॒ मधु॑ष्परसो नोऽवन्तु य॒ज्ञम् ॥
पदानि : ते । वाजः॑ । विऽभ्वा॑ । ऋ॒भुः । इन्द्र॑ऽवन्तः । मधु॑ऽष्परसः । नः॒ । अ॒व॒न्तु॒ । य॒ज्ञम्

१९०. मण्डलम् ४, सूक्तम् ३३, मन्त्रः ८ (ऋक्सङ्ख्या : ३४३८)
वाक्यम् १: रथ॑ं ये च॒क्रुः सु॒वृत॑ं नरे॒ष्ठां ये धे॒नुं वि॑श्व॒जुव॑ं वि॒श्वरू॑पाम् ।
पदानि : रथ॑म् । ये । च॒क्रुः॒ । सु॒ऽवृत॑म् । न॒रे॒ऽस्था॒म् । ये । धे॒नुम् । वि॒श्व॒ऽजुव॑म् । वि॒श्वऽरू॑पाम्
वाक्यम् २: त आ त॑क्षन्त्वृभवो॒ रयिं॑ नः॒ स्ववं॑सः॒ स्वप॑सः सु॒हस्ताः॑ ॥
पदानि : ते । आ । त॒क्ष॒न्तु॒ । ऋ॒भवः॑ । र॒यिम् । नः॒ । सु॒ऽअव॑सः । सु॒ऽअप॑सः । सु॒ऽहस्ताः॑

१९१. मण्डलम् ४, सूक्तम् ३४, मन्त्रः ४ (ऋक्सङ्ख्या : ३४४५)
वाक्यम् १: अभू॑दु वो विध॒ते र॑त्न॒धेय॑मि॒दा नरो॒ दा॒शुषे॒ मर्त्या॑य ।
पदानि : अभू॑त् । ऊँ॒ इति॑ । वः॒ । वि॒ध॒ते । र॒त्न॒ऽधेय॑म् । इ॒दा । न॒रः॒ । दा॒शुषे॑ । मर्त्या॑य
वाक्यम् २: पिब॑त वाजा ऋभवो द॒दे वो॒ महि॑ तृ॒तीय॑ं सव॑नं॒ मदा॑य ॥
पदानि : पिब॑त । वा॒जाः॒ । ऋ॒भ॒वः॒ । द॒दे । वः॒ । महि॑ । तृ॒तीय॑म् । सव॑नम् । मदा॑य

१९२. मण्डलम् ४, सूक्तम् ३४, मन्त्रः ६ (ऋक्सङ्ख्या : ३४४७)
वाक्यम् १: आ नप॑ातः शवसो यात॒नोपे॒मं य॒ज्ञं नम॑सा हू॒यमा॑नाः ।
पदानि : आ । न॒पा॒तः॒ । श॒व॒सः॒ । या॒त॒न॒ । उप॑ । इ॒मम् । य॒ज्ञम् । नम॑सा । हू॒यमा॑नाः
वाक्यम् २: स॒जोष॑सः सूरयो॒ यस्य॑ च॒ स्थ मध्व॑: पात रत्न॒धा इन्द्र॑वन्तः ॥
पदानि : स॒ऽजोष॑सः । सू॒र॒यः॒ । यस्य॑ । च॒ । स्थ । मध्व॑: । पा॒त॒ । र॒त्न॒ऽधाः । इन्द्र॑ऽवन्तः

१९३. मण्डलम् ४, सूक्तम् ३५, मन्त्रः ३ (ऋक्सङ्ख्या : ३४५५)

वाक्यम् १: व्यकृणोत चमसं चतुर्धा सखे वि शिक्षेत्यब्रवीत ।
पदानि : वि । अकृणोत । चमसम् । चतुःऽधा । सखे । वि । शिक्ष । इति । अब्रवीत
वाक्यम् २: अथैत वाजा अमृतस्य पन्थां गणं देवानामृभवः सुहस्ताः ॥
पदानि : अथ । ऐत । वाजाः । अमृतस्य । पन्थाम् । गणम् । देवानाम् । ऋभवः । सुऽहस्ताः

१९४. मण्डलम् ४, सूक्तम् ३६, मन्त्रः ३ (ऋक्सङ्ख्या : ३४६४)
वाक्यम् १: तद्वो वाजा ऋभवः सुप्रवाचनं देवेषु विभ्वो अभवन्महित्वनम् ।
पदानि : तत् । वः । वाजाः । ऋभवः । सुऽप्रवाचनम् । देवेषु । विऽभ्वः । अभवत् । महिऽत्वनम्
वाक्यम् २: जिव्री यत्सन्ता पितरा सनाजुरा पुनर्युवाना चरथाय तक्षथ ॥
पदानि : जिव्री इति । यत् । सन्ता । पितरा । सनाऽजुरा । पुनः । युवाना । चरथाय । तक्षथ

१९५. मण्डलम् ४, सूक्तम् ३७, मन्त्रः १ (ऋक्सङ्ख्या : ३४७१)
वाक्यम् १: उप नो वाजा अध्वरमृभुक्षा देवा यात पथिभिर्देववयानैः ।
पदानि : उप । नः । वाजाः । अध्वरम् । ऋभुक्षाः । देवाः । यात । पथिऽभिः । देवऽयानैः
वाक्यम् २: यथा यज्ञं मनुषो विक्ष्वाग्नेसु दधिध्वे रण्वाः सुदिनेष्वह्नाम् ॥
पदानि : यथा । यज्ञम् । मनुषः । विक्षु । आसु । दधिध्वे । रण्वाः । सुऽदिनेषु । अह्नाम्

१९६. मण्डलम् ४, सूक्तम् ३८, मन्त्रः ६ (ऋक्सङ्ख्या : ३४८४)
वाक्यम् १: उत स्मासु प्रथमः सरिष्यन्नि वेवेति श्रेणिभी रथानाम् ।
पदानि : उत । स्म । आसु । प्रथमः । सरिष्यन् । नि । वेवेति । श्रेणिऽभिः । रथानाम्
वाक्यम् २: स्रजं कृण्वानो जन्यो न शुभ्वा रेणुं रेरिहत्किरणं ददश्वान् ॥
पदानि : स्रजम् । कृण्वानः । जन्यः । न । शुभ्वा । रेणुम् । रेरिहत् । किरणम् । ददश्वान्

१९७. मण्डलम् ४, सूक्तम् ३८, मन्त्रः १० (ऋक्सङ्ख्या : ३४८८)
वाक्यम् १: आ दधिक्राः शवसा पञ्च कृष्टीः सूर्य इव ज्योतिषापस्ततान ।
पदानि : आ । दधिऽक्राः । शवसा । पञ्च । कृष्टीः । सूर्यः ऽइव । ज्योतिषा । अपः । ततान
वाक्यम् २: सहस्रसाः शतसा वाज्यर्वा पूणक्तु मध्वा समिमा वचाँसि ॥
पदानि : सहस्रऽसाः । शतऽसाः । वाजी । अर्वा । पूणक्तु । मध्वा । सम् । इमा । वचाँसि

१९८. मण्डलम् ४, सूक्तम् ४१, मन्त्रः ११ (ऋक्सङ्ख्या : ३५१०)
वाक्यम् १: आ नो बृहन्ता बृहतीभिरूती इन्द्रं यातं वरुण वाजसातौ ।
पदानि : आ । नः । बृहन्ता । बृहतीभिः । ऊती । इन्द्रं । यातम् । वरुण । वाजऽसातौ
वाक्यम् २: यद्दिद्यवः पृतनासु प्रक्रीळान्तस्यं वां स्याम सनितारं आजेः ॥
पदानि : यत् । दिद्यवः । पृतनासु । प्रऽक्रीळान् । तस्यं । वाम् । स्याम । सनितारः । आजेः

१९९. मण्डलम् ४, सूक्तम् ४२, मन्त्रः ३ (ऋक्सङ्ख्या : ३५१३)
वाक्यम् १: अहमिन्द्रो वरुणस्ते महित्वोर्वी गभीरे रजसी सुमेके ।
पदानि : अहम् । इन्द्रः । वरुणः । ते इति । महिऽत्वा । उर्वी इति । गभीरे इति । रजसी इति । सुमेके इति सुऽमेके
वाक्यम् २: त्वष्टेव विश्वा भुवनानि विद्वान्त्समैरयं रोदसी धारयं च ॥
पदानि : त्वष्टाऽइव । विश्वा । भुवनानि । विद्वान् । सम् । ऐरयम् । रोदसी इति । धारयम् । च

२००. मण्डलम् ४, सूक्तम् ४३, मन्त्रः १ (ऋक्सङ्ख्या : ३५२१)
वाक्यम् १: क उं श्रवत्कतमो यज्ञियानां वन्दारु देवः कतमो जुषाते।
पदानि : कः। ऊँ इति। श्रवत्। कतमः। यज्ञियानाम्। वन्दारु। देवः। कतमः। जुषाते
वाक्यम् २: कस्येमां देवीममृतेषु प्रेष्ठां हृदि श्रेषाम सुष्टुतिं सुहव्याम्॥
पदानि : कस्य। इमाम्। देवीम्। अमृतेषु। प्रेष्ठाम्। हृदि। श्रेषाम। सुऽस्तुतिम्। सुऽहव्याम्

२०१. मण्डलम् ४, सूक्तम् ४४, मन्त्रः ६ (ऋक्सङ्ख्या : ३५३३)
वाक्यम् १: नू नो रयिं पुरुवीरं बृहन्तं दस्रा मिमाथामुभयेष्वस्मे।
पदानि : नु। नः। रयिम्। पुरुऽवीरम्। बृहन्तम्। दस्रा। मिमाथाम्। उभयेषु। अस्मे इति
वाक्यम् २: नरो यद्वामश्विना स्तोममावन्त्सधस्तुतिमाजमीळ्हासो अग्मन्॥
पदानि : नरः। यत्। वाम्। अश्विना। स्तोमम्। आवन्। सधऽस्तुतिम्। आजऽमीळ्हासः। अग्मन्

२०२. मण्डलम् ४, सूक्तम् ४५, मन्त्रः ३ (ऋक्सङ्ख्या : ३५३७)
वाक्यम् १: मध्वः पिबतं मधुपेभिरासभिरुत प्रियं मधुने युञ्जाथां रथम्।
पदानि : मध्वः। पिबतम्। मधुऽपेभिः। आसऽभिः। उत। प्रियम्। मधुने। युञ्जाथाम्। रथम्
वाक्यम् २: आ वर्तनिं मधुना जिन्वथस्पथो दृतिं वहेथे मधुमन्तमश्विना॥
पदानि : आ। वर्तनिम्। मधुना। जिन्वथः। पथः। दृतिम्। वहेथे इति। मधुऽमन्तम्। अश्विना

२०३. मण्डलम् ४, सूक्तम् ५१, मन्त्रः ७ (ऋक्सङ्ख्या : ३५८१)
वाक्यम् १: ता घा ता भद्रा उषसः पुरासुरभिष्टिद्युम्ना ऋतजातसत्याः।
पदानि : ताः। घ। ताः। भद्राः। उषसः। पुरा। आसुः। अभिष्टिऽद्युम्नाः। ऋतजातऽसत्याः
वाक्यम् २: यास्वीजानः शशमान उक्थैः स्तुवञ्छंसन्द्रविणं सद्य आपं॥
पदानि : यासु। ईजानः। शशमानः। उक्थैः। स्तुवन्। शंसन्। द्रविणम्। सद्यः। आपं

२०४. मण्डलम् ४, सूक्तम् ५४, मन्त्रः ६ (ऋक्सङ्ख्या : ३६०५)
वाक्यम् १: ये ते त्रिरहन्त्सवितः सवासो दिवेदिवे सौभगमासुवन्ति।
पदानि : ये। ते। त्रिः। अहन्। सवितरिति। सवासः। दिवेऽदिवे। सौभगम्। आऽसुवन्ति
वाक्यम् २: इन्द्रो द्यावापृथिवी सिन्धुरद्भिरादित्यैर्नो अदितिः शर्म यंसत्॥
पदानि : इन्द्रः। द्यावापृथिवी इति। सिन्धुः। अत्ऽभिः। आदित्यैः। नः। अदितिः। शर्म। यंसत्

२०५. मण्डलम् ४, सूक्तम् ५६, मन्त्रः ३ (ऋक्सङ्ख्या : ३६१८)
वाक्यम् १: स इत्स्वपा भुवनेष्वास य इमे द्यावापृथिवी जजान।
पदानि : सः। इत्। सुऽअपाः। भुवनेषु। आस। यः। इमे इति। द्यावापृथिवी इति। जजान
वाक्यम् २: उर्वी गंभीरे रजसी सुमेके अवंशे धीरः शच्या समैरत्॥
पदानि : उर्वी इति। गभीरे इति। रजसी इति। सुमेके इति सुऽमेके। अवंशे। धीरः। शच्या। सम्। ऐरत्

२०६. मण्डलम् ४, सूक्तम् ५८, मन्त्रः १० (ऋक्सङ्ख्या : ३६४०)
वाक्यम् १: अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त।
पदानि : अभि। अर्षत। सुऽस्तुतिम्। गव्यम्। आजिम्। अस्मासु। भद्रा। द्रविणानि। धत्त
वाक्यम् २: इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत्पवन्ते॥

पदानि : इ॒मम्। य॒ज्ञम्। न॒य॒त। दे॒वता॑। नः। घृ॒तस्य॑। धाराः॑। मधु॑ऽमत्। प॒व॒न्ते॒

२०७. मण्डलम् ५, सूक्तम् १, मन्त्रः २ (ऋक्सङ्ख्या : ३६४३)
वाक्यम् १: अबो॑धि होता॑ य॒जथा॑य दे॒वानू॒र्ध्वो अ॒ग्निः सु॒मना॑ः प्रा॒तर॑स्थात्।
पदानि : अबो॑धि। होता॑। य॒जथा॑य। दे॒वान्। ऊ॒र्ध्वः। अ॒ग्निः। सु॒ऽमना॑ः। प्रा॒तः। अ॒स्था॒त्
वाक्यम् २: समि॑द्धस्य रुश॒ददर्शि॒ पाजो॑ म॒हान्दे॒वस्तम॑सो निर॑मोचि॥
पदानि : सम्ऽइ॑द्धस्य। रुश॑त्। अ॒द॒र्शि॒। पाज॑ः। म॒हान्। दे॒वः। तम॑सः। निः। अ॒मो॒चि॒

२०८. मण्डलम् ५, सूक्तम् १, मन्त्रः ५ (ऋक्सङ्ख्या : ३६४६)
वाक्यम् १: जनि॑ष्ट॒ हि जेन्यो॑ अग्रे॒ अह्ना॑ं हि॒तो हि॒तेष्वरु॑षो वने॑षु।
पदानि : जनि॑ष्ट। हि। जेन्य॑ः। अग्रे। अह्ना॑म्। हि॒तः। हि॒तेषु॑। अरु॑षः। वने॑षु
वाक्यम् २: दमे॑दमे स॒प्त रत्ना॑ दधा॒नोऽग्निर्होता॒ नि ष॑सादा॒ यजी॑यान्॥
पदानि : दमे॑ऽदमे। स॒प्त। रत्ना॑। दधा॑नः। अ॒ग्निः। होता॑। नि। स॒सा॒द॒। यजी॑यान्

२०९. मण्डलम् ५, सूक्तम् १, मन्त्रः ११ (ऋक्सङ्ख्या : ३६५२)
वाक्यम् १: आद्य रथं॑ भानुमो भानुमन्त॒मग्ने॑ तिष्ठ॑ यज॒तेभि॒ः स॑म॑न्तम्।
पदानि : आ। अ॒द्य। रथ॑म्। भा॒नु॒ऽम॒ः। भा॒नु॒ऽम॒न्त॑म्। अग्ने॑। तिष्ठ॑। य॒ज॒तेभिः॑। सम्ऽअ॑न्तम्
वाक्यम् २: वि॒द्वान्प॒॑थीना॑मुर्वी॒न्तरि॑क्षमेह दे॒वान्ह॒॑विरद्या॑य वक्षि॥
पदानि : वि॒द्वान्। प॒थीना॑म्। उ॒रु। अ॒न्तरि॑क्षम्। आ। इ॒ह। दे॒वान्। ह॒विः॒ऽअद्या॑य। व॒क्षि॒

२१०. मण्डलम् ५, सूक्तम् २, मन्त्रः १ (ऋक्सङ्ख्या : ३६५४)
वाक्यम् १: कु॒मा॒रं मा॒ता यु॑व॒तिः समु॑ब्धं गु॒हा॑ बिभर्ति न द॑दाति पि॒त्रे।
पदानि : कु॒मा॒रम्। मा॒ता। यु॒व॒तिः। सम्ऽउ॑ब्धम्। गु॒हा॑। बि॒भ॒र्ति॒। न। द॒दा॒ति॒। पि॒त्रे
वाक्यम् २: अनी॑कमस्य॒ न मि॒नज्जना॑सः पु॒रः प॒॑श्यन्ति॒ निहि॑तमर॒तौ॥
पदानि : अनी॑कम्। अ॒स्य॒। न। मि॒नत्। जना॑सः। पु॒रः। प॒श्य॒न्ति॒। निऽहि॑तम्। अ॒र॒तौ

२११. मण्डलम् ५, सूक्तम् २, मन्त्रः ९ (ऋक्सङ्ख्या : ३६६२)
वाक्यम् १: वि ज्योति॑षा बृह॒ता भा॑त्य॒ग्निरा॒विर्वि॒श्वा॑नि कृणुते मह॒त्वा।
पदानि : वि। ज्योति॑षा। बृ॒ह॒ता। भा॒ति॒। अ॒ग्निः। आ॒विः। वि॒श्वा॑नि। कृ॒णु॒ते॒। म॒हि॒ऽत्वा
वाक्यम् २: प्रादेवी॒र्मा॒याः स॑हते दु॒रेवा॒ः शिशी॑ते॒ शृङ्गे॒ रक्षं॑से वि॒निक्षे॥
पदानि : प्र। अ॒देवीः। मा॒यायाः। स॒ह॒ते॒। दुः॒ऽएवा॑ः। शिशी॑ते। शृङ्गे॒ इति॑। रक्षं॑से। वि॒ऽनिक्षे॑

२१२. मण्डलम् ५, सूक्तम् ३, मन्त्रः २ (ऋक्सङ्ख्या : ३६६७)
वाक्यम् १: त्वम॑र्य॒मा भ॑वसि॒ यत्क॒नीना॑ं नाम॑ स्वधाव॒न्गुह्यं॑ बिभर्षि।
पदानि : त्वम्। अ॒र्य॒मा। भ॒व॒सि॒। यत्। क॒नीना॑म्। नाम॑। स्व॒धा॒ऽव॒न्। गुह्य॑म्। बि॒भ॒र्षि॒
वाक्यम् २: अञ्ज॑न्ति॑ मि॒त्रं सु॒धि॑त॑ं न गोभि॒र्यद्दं॑प॑ती॒ सम॑नसा कृ॒णोषि॑॥
पदानि : अञ्ज॑न्ति। मि॒त्रम्। सु॒ऽधि॑तम्। न। गोभिः॑। यत्। दं॑प॑ती॒ इति॒ दम्ऽप॑ती। सऽम॑नसा। कृ॒णोषि॑

२१३. मण्डलम् ५, सूक्तम् ३, मन्त्रः ८ (ऋक्सङ्ख्या : ३६७३)
वाक्यम् १: त्वाम॒स्या व्युषि॑ देव॒ पूर्वे॑ दू॒तं क॒॑ण्वा॒ना अ॑यजन्त ह॒व्यैः।

पदानि : त्वाम्। अस्याः। विऽउषिं। देव। पूर्वे। दूतम्। कृण्वानाः। अयजन्त। हव्यैः
वाक्यम् २: सस्थे यदग्न ईयसे रयीणां देवो मर्तैर्वसुभिरिध्यमानः॥
पदानि : सम्ऽस्थे। यत्। अग्ने। ईयसे। रयीणाम्। देवः। मर्तैः। वसुऽभिः। इध्यमानः

२१४. मण्डलम् ५, सूक्तम् ४, मन्त्रः ७ (ऋक्सङ्ख्या : ३६८४)
वाक्यम् १: वयं ते अग्न उक्थैर्विधेम वयं हव्यैः पावक भद्रशोचे।
पदानि : वयम्। ते। अग्ने। उक्थैः। विधेम। वयम्। हव्यैः। पावक। भद्रऽशोचे
वाक्यम् २: अस्मे रयिं विश्ववारं समिन्वास्मे विश्वानि द्रविणानि धेहि॥
पदानि : अस्मे इति। रयिम्। विश्वऽवारम्। सम्। इन्व। अस्मे इति। विश्वानि। द्रविणानि। धेहि

२१५. मण्डलम् ५, सूक्तम् ८, मन्त्रः ७ (ऋक्सङ्ख्या : ३७२६)
वाक्यम् १: त्वामग्ने प्रदिव आहुतं घृतैः सुम्नायवः सुषमिधा समीधिरे।
पदानि : त्वाम्। अग्ने। प्रऽदिवः। आऽहुतम्। घृतैः। सुम्नऽयवः। सुऽसमिधा। सम्। ईधिरे
वाक्यम् २: स वावृधान ओषधीभिरुक्षितोऽभि ज्रयांसि पार्थिवा वि तिष्ठसे॥
पदानि : सः। ववृधानः। ओषधीभिः। उक्षितः। अभि। ज्रयांसि। पार्थिवा। वि। तिष्ठसे

२१६. मण्डलम् ५, सूक्तम् १९, मन्त्रः ५ (ऋक्सङ्ख्या : ३७८९)
वाक्यम् १: क्रीळन्नो रश्म आ भुवः सं भस्मना वायुना वेविदानः।
पदानि : क्रीळन्। नः। रश्मे। आ। भुवः। सम्। भस्मना। वायुना। वेविदानः
वाक्यम् २: ता अस्य सन्धृषजो न तिग्माः सुसंशिता वक्ष्यो वक्षणेस्थाः॥
पदानि : ताः। अस्य। सन्। धृषजः। न। तिग्माः। सुऽसंशिताः। वक्ष्यः। वक्षणेऽस्थाः

२१७. मण्डलम् ५, सूक्तम् २९, मन्त्रः ५ (ऋक्सङ्ख्या : ३८४४)
वाक्यम् १: अध क्रत्वा मघवन्तुभ्यं देवा अनु विश्वे अददुः सोमपेयम्।
पदानि : अध। क्रत्वा। मघऽवन्। तुभ्यम्। देवाः। अनु। विश्वे। अददुः। सोमऽपेयम्
वाक्यम् २: यत्सूर्यस्य हरितः पतन्तीः पुरः सतीरुपरा एतशे कः॥
पदानि : यत्। सूर्यस्य। हरितः। पतन्तीः। पुरः। सतीः। उपराः। एतशे। करिति कः

२१८. मण्डलम् ५, सूक्तम् २९, मन्त्रः १५ (ऋक्सङ्ख्या : ३८५४)
वाक्यम् १: इन्द्र ब्रह्म क्रियमाणा जुषस्व या ते शविष्ठ नव्या अकर्म।
पदानि : इन्द्र। ब्रह्म। क्रियमाणा। जुषस्व। या। ते। शविष्ठ। नव्याः। अकर्म
वाक्यम् २: वस्त्रेव भद्रा सुकृता वसूयू रथं न धीरः स्वपा अतक्षम्॥
पदानि : वस्त्राऽइव। भद्रा। सुऽकृता। वसुऽयुः। रथम्। न। धीरः। सुऽअपाः। अतक्षम्

२१९. मण्डलम् ५, सूक्तम् ३०, मन्त्रः ५ (ऋक्सङ्ख्या : ३८५९)
वाक्यम् १: परो यत्त्वं परम आजनिष्ठाः परावति श्रुत्यं नाम बिभ्रत्।
पदानि : परः। यत्। त्वम्। परमः। आऽजनिष्ठाः। पराऽवति। श्रुत्यम्। नाम। बिभ्रत्
वाक्यम् २: अतश्चिदिन्द्रादभयन्त देवा विश्वा अपो अजयद्दासपत्नीः॥
पदानि : अतः। चित्। इन्द्रात्। अभयन्त। देवाः। विश्वाः। अपः। अजयत्। दासऽपत्नीः

२२०. मण्डलम् ५, सूक्तम् ३०, मन्त्रः ६ (ऋक्सङ्ख्या : ३८६०)
वाक्यम् १: तुभ्येदेते मरुतः सुशेवा अर्चन्त्यर्कं सुन्वन्त्यन्धः ।
पदानि : तुभ्यं । इत् । एते । मरुतः । सुऽशेवाः । अर्चन्ति । अर्कम् । सुन्वन्ति । अन्धः
वाक्यम् २: अहिंमोहानमप आशयानं प्र मायाभिर्मायिनं सक्षदिन्द्रः ॥
पदानि : अहिंम् । ओहानम् । अपः । आऽशयानम् । प्र । मायाभिः । मायिनम् । सक्षत् । इन्द्रः

२२१. मण्डलम् ५, सूक्तम् ३१, मन्त्रः १२ (ऋक्सङ्ख्या : ३८८१)
वाक्यम् १: आयं जना अभिचक्षे जगामेन्द्रः सखायं सुतसोममिच्छन् ।
पदानि : आ । अयम् । जनाः । अभिऽचक्षे । जगाम । इन्द्रः । सखायम् । सुतऽसोमम् । इच्छन्
वाक्यम् २: वदन्ग्रावाव वेदिं भ्रियाते यस्यं जीरमध्वर्यवश्चरन्ति ॥
पदानि : वदन् । ग्रावा । अव । वेदिम् । भ्रियाते । यस्य । जीरम् । अध्वर्यवः । चरन्ति

२२२. मण्डलम् ५, सूक्तम् ३२, मन्त्रः ७ (ऋक्सङ्ख्या : ३८८९)
वाक्यम् १: उद्यदिन्द्रो महते दानवाय वधर्यमिष्ट सहो अप्रतीतम् ।
पदानि : उत् । यत् । इन्द्रः । महते । दानवाय । वधः । यमिष्ट । सहः । अप्रतिऽइतम्
वाक्यम् २: यदीं वज्रस्य प्रभृतौ ददाभ विश्वस्य जन्तोरधमं चकार ॥
पदानि : यत् । ईम् । वज्रस्य । प्रऽभृतौ । ददाभ । विश्वस्य । जन्तोः । अधमम् । चकार

२२३. मण्डलम् ५, सूक्तम् ३२, मन्त्रः ११ (ऋक्सङ्ख्या : ३८९३)
वाक्यम् १: एकं नु त्वा सत्पतिं पाञ्चजन्यं जातं शृणोमि यशसं जनेषु ।
पदानि : एकम् । नु । त्वा । सत्ऽपतिम् । पाञ्चऽजन्यम् । जातम् । शृणोमि । यशसम् । जनेषु
वाक्यम् २: तं मे जगृभ्र आशसो नविष्ठं दोषा वस्तोर्हवमानास इन्द्रम् ॥
पदानि : तम् । मे । जगृभ्रे । आऽशसः । नविष्ठम् । दोषा । वस्तोः । हवमानासः । इन्द्रम्

२२४. मण्डलम् ५, सूक्तम् ३४, मन्त्रः २ (ऋक्सङ्ख्या : ३९०६)
वाक्यम् १: आ यः सोमेन जठरमपिप्रतामन्दत मघवा मध्वो अन्धसः ।
पदानि : आ । यः । सोमेन । जठरम् । अपिप्रत । अमन्दत । मघऽवा । मध्वः । अन्धसः
वाक्यम् २: यदीं मृगाय हन्तवे महावधः सहस्रभृष्टिमुशना वधं यमत् ॥
पदानि : यत् । ईम् । मृगाय । हन्तवे । महाऽवधः । सहस्रऽभृष्टिम् । उशना । वधम् । यमत्

२२५. मण्डलम् ५, सूक्तम् ४१, मन्त्रः ३ (ऋक्सङ्ख्या : ३९५४)
वाक्यम् १: आ वां येष्ठाश्विना हुवध्यै वातस्य पत्मन्त्रथ्यस्य पुष्टौ ।
पदानि : आ । वाम् । येष्ठा । अश्विना । हुवध्यै । वातस्य । पत्मन् । रथ्यस्य । पुष्टौ
वाक्यम् २: उत वां दिवो असुराय मन्म प्रान्धांसीव यज्यवे भरध्वम् ॥
पदानि : उत । वा । दिवः । असुराय । मन्म । प्र । अन्धांसिऽइव । यज्यवे । भरध्वम्

२२६. मण्डलम् ५, सूक्तम् ४२, मन्त्रः ३ (ऋक्सङ्ख्या : ३९७४)
वाक्यम् १: उदीरय कवितमं कवीनामुनत्तैनमभि मध्वा घृतेन ।
पदानि : उत् । ईरय । कविऽतमम् । कवीनाम् । उनत्त । एनम् । अभि । मध्वा । घृतेन
वाक्यम् २: स नो वसूनि प्रयता हितानि चन्द्राणि देवः सविता सुवाति ॥
पदानि : सः । नः । वसूनि । प्रऽयता । हितानि । चन्द्राणि । देवः । सविता । सुवाति

२२७. मण्डलम् ५, सूक्तम् ४२, मन्त्रः ५ (ऋक्सङ्ख्या : ३९७६)
वाक्यम् १: देवो भगः सविता रायो अंश इन्द्रो वृत्रस्य संजितो धनानाम्।
पदानि : देवः। भगः। सविता। रायः। अंशः। इन्द्रः। वृत्रस्य। सम्ऽजितः। धनानाम्
वाक्यम् २: ऋभुक्षा वाजं उत वा पुरंधिरवन्तु नो अमृतासस्तुरासः॥
पदानि : ऋभुक्षाः। वाजः। उत। वा। पुरम्ऽधिः। अवन्तु। नः। अमृतासः। तुरासः

२२८. मण्डलम् ५, सूक्तम् ४२, मन्त्रः १० (ऋक्सङ्ख्या : ३९८१)
वाक्यम् १: य ओहते रक्षसो देववीतावचक्रेभिस्तं मरुतो नि यात।
पदानि : यः। ओहते। रक्षसः। देवऽवीतौ। अचक्रेभिः। तम्। मरुतः। नि। यात
वाक्यम् २: यो वः शमीं शशमानस्य निन्दात्तुच्छ्यान्कामान्करते सिष्विदानः॥
पदानि : यः। वः। शमीम्। शशमानस्य। निन्दात्। तुच्छ्यान्। कामान्। करते। सिस्विदानः

२२९. मण्डलम् ५, सूक्तम् ४२, मन्त्रः १३ (ऋक्सङ्ख्या : ३९८४)
वाक्यम् १: प्र सू महे सुशरणाय मेधां गिरं भरे नव्यसीं जायमानाम्।
पदानि : प्र। सु। महे। सुऽशरणाय। मेधाम्। गिरम्। भरे। नव्यसीम्। जायमानाम्
वाक्यम् २: य आहुना दुहितुर्वक्षणासु रूपा मिनानो अकृणोदिदं नः॥
पदानि : यः। आहुनाः। दुहितुः। वक्षणासु। रूपा। मिनानः। अकृणोत्। इदम्। नः

२३०. मण्डलम् ५, सूक्तम् ४३, मन्त्रः ६ (ऋक्सङ्ख्या : ३९९५)
वाक्यम् १: आ नो महीमरमतिं सजोषा ग्नां देवीं नमसा रातहव्याम्।
पदानि : आ। नः। महीम्। अरमतिम्। सऽजोषाः। ग्नाम्। देवीम्। नमसा। रातऽहव्याम्
वाक्यम् २: मधोर्मदाय बृहतीमृतज्ञामाग्ने वह पथिभिर्देवयानैः॥
पदानि : मधोः। मदाय। बृहतीम्। ऋतऽज्ञाम्। आ। अग्ने। वह। पथिऽभिः। देवऽयानैः

२३१. मण्डलम् ५, सूक्तम् ४३, मन्त्रः ९ (ऋक्सङ्ख्या : ३९९८)
वाक्यम् १: प्र तव्यसो नमउक्तिं तुरस्याहं पूष्ण उत वायोरदिक्षि।
पदानि : प्र। तव्यसः। नमःऽउक्तिम्। तुरस्य। अहम्। पूष्णः। उत। वायोः। अदिक्षि
वाक्यम् २: या राधसा चोदितारा मतीनां या वाजस्य द्रविणोदा उत त्मन्॥
पदानि : या। राधसा। चोदितारा। मतीनाम्। या। वाजस्य। द्रविणःऽदौ। उत। त्मन्

२३२. मण्डलम् ५, सूक्तम् ४५, मन्त्रः ७ (ऋक्सङ्ख्या : ४०२८)
वाक्यम् १: अनूनोदत्र हस्तयतो अद्रिरार्चन्येन दशा मासो नवग्वाः।
पदानि : अनूनोत्। अत्र। हस्तऽयतः। अद्रिः। आर्चन्। येन। दशा। मासः। नवऽग्वाः
वाक्यम् २: ऋतं यती सरमा गा अविन्दद्विश्वानि सत्याङ्गिराश्चकार॥
पदानि : ऋतम्। यती। सरमा। गाः। अविन्दत्। विश्वानि। सत्या। अङ्गिराः। चकार

२३३. मण्डलम् ५, सूक्तम् ४५, मन्त्रः ८ (ऋक्सङ्ख्या : ४०२९)
वाक्यम् १: विश्वे अस्या व्युषि माहिनायाः सं यद्गोभिरङ्गिरसो नवन्त।
पदानि : विश्वे। अस्याः। विऽउषि। माहिनायाः। सम्। यत्। गोभिः। अङ्गिरसः। नवन्त

वाक्यम् २: उत्सं आसां परमे सधस्थं ऋतस्य पथा सरमा विदद्गाः ॥
पदानि : उत्सः । आसाम् । परमे । सधऽस्थे । ऋतस्य । पथा । सरमा । विदत् । गाः

२३४. मण्डलम् ५, सूक्तम् ४५, मन्त्रः १० (ऋक्सङ्ख्या : ४०३१)
वाक्यम् १: आ सूर्यो अरुहच्छुक्रमर्णोऽयुक्त यद्धरितो वीतपृष्ठाः ।
पदानि : आ । सूर्यः । अरुहत् । शुक्रम् । अर्णः । अयुक्त । यत् । हरितः । वीतऽपृष्ठाः
वाक्यम् २: उद्ना न नावमनयन्त धीरा आशृण्वतीरापो अर्वागतिष्ठन् ॥
पदानि : उद्ना । न । नावम् । अनयन्त । धीराः । आऽशृण्वतीः । आपः । अर्वाक् । अतिष्ठन्

२३५. मण्डलम् ५, सूक्तम् ४८, मन्त्रः १ (ऋक्सङ्ख्या : ४०४८)
वाक्यम् १: कदु प्रियाय धाम्ने मनामहे स्वक्षत्राय स्वयशसे महे वयम् ।
पदानि : कत् । ऊँ इति । प्रियाय । धाम्ने । मनामहे । स्वऽक्षत्राय । स्वऽयशसे । महे । वयम्
वाक्यम् २: आमेन्यस्य रजसो यदभ्र आँ अपो वृणाना वितनोति मायिनी ॥
पदानि : आऽमेन्यस्य । रजसः । यत् । अभ्रे । आ । अपः । वृणाना । विऽतनोति । मायिनी

२३६. मण्डलम् ५, सूक्तम् ५१, मन्त्रः १३ (ऋक्सङ्ख्या : ४०७५)
वाक्यम् १: विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये ।
पदानि : विश्वे । देवाः । नः । अद्य । स्वस्तये । वैश्वानरः । वसुः । अग्निः । स्वस्तये
वाक्यम् २: देवा अवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः ॥
पदानि : देवाः । अवन्तु । ऋभवः । स्वस्तये । स्वस्ति । नः । रुद्रः । पातु । अंहसः

२३७. मण्डलम् ५, सूक्तम् ५४, मन्त्रः १२ (ऋक्सङ्ख्या : ४१२२)
वाक्यम् १: तं नाकमर्यो अगृभीतशोचिषं रुशत्पिप्पलं मरुतो वि धूनुथ ।
पदानि : तम् । नाकम् । अर्यः । अगृभीतऽशोचिषम् । रुशत् । पिप्पलम् । मरुतः । वि । धूनुथ
वाक्यम् २: समञ्चन्त वृजनातितिष्विषन्त यत्स्वरन्ति घोषं वितततमृतायवः ॥
पदानि : सम् । अञ्चन्त । वृजना । अतितिष्विषन्त । यत् । स्वरन्ति । घोषम् । विऽततम् । ऋतऽयवः

२३८. मण्डलम् ५, सूक्तम् ५९, मन्त्रः ५ (ऋक्सङ्ख्या : ४१६५)
वाक्यम् १: अश्वा इवेदरुषासः सबन्धवः शूरा इव प्रयुधः प्रोत युयुधुः ।
पदानि : अश्वाःऽइव । इत् । अरुषासः । सऽबन्धवः । शूराःऽइव । प्रऽयुधः । प्र । उत । युयुधुः
वाक्यम् २: मर्या इव सुवृधो वावृधुर्नरः सूर्यस्य चक्षुः प्र मिनन्ति वृष्टिभिः ॥
पदानि : मर्याःऽइव । सुऽवृधः । ववृधुः । नरः । सूर्यस्य । चक्षुः । प्र । मिनन्ति । वृष्टिऽभिः

२३९. मण्डलम् ५, सूक्तम् ५९, मन्त्रः ८ (ऋक्सङ्ख्या : ४१६८)
वाक्यम् १: मिमातु द्यौरदितिर्वीतये नः सं दानुचित्रा उषसो यतन्ताम् ।
पदानि : मिमातु । द्यौः । अदितिः । वीतये । नः । सम् । दानुऽचित्राः । उषसः । यतन्ताम्
वाक्यम् २: आचुच्यवुर्दिव्यं कोशमेत ऋषे रुद्रस्य मरुतो गृणानाः ॥
पदानि : आ । अचुच्यवुः । दिव्यम् । कोशम् । एते । ऋषे । रुद्रस्य । मरुतः । गृणानाः

२४०. मण्डलम् ६, सूक्तम् ४, मन्त्रः ७ (ऋक्सङ्ख्या : ४४०७)

वाक्यम् १: त्वां हि मन्द्रतममर्कशोकैर्ववृमहे महिं नः श्रोष्यग्ने ।
पदानि : त्वाम् । हि । मन्द्रऽतमम् । अर्कऽशोकैः । ववृमहे । महिं । नः । श्रोषिं । अग्ने
वाक्यम् २: इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति राधसा नृतमाः ॥
पदानि : इन्द्रम् । न । त्वा । शवसा । देवता । वायुम् । पृणन्ति । राधसा । नृऽतमाः

२४१. मण्डलम् ६, सूक्तम् ५, मन्त्रः ४ (ऋक्सङ्ख्या : ४४१२)
वाक्यम् १: यो नः सनुत्यो अभिदासदग्ने यो अन्तरो मित्रमहो वनुष्यात् ।
पदानि : यः । नः । सनुत्यः । अभिऽदासत् । अग्ने । यः । अन्तरः । मित्रऽमहः । वनुष्यात्
वाक्यम् २: तमजरेभिर्वृषभिस्तव स्वैस्तपा तपिष्ठ तपसा तपस्वान् ॥
पदानि : तम् । अजरेभिः । वृषऽभिः । तव । स्वैः । तपः । तपिष्ठ । तपसा । तपस्वान्

२४२. मण्डलम् ६, सूक्तम् ७, मन्त्रः १ (ऋक्सङ्ख्या : ४४२३)
वाक्यम् १: मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
पदानि : मूर्धानम् । दिवः । अरतिम् । पृथिव्याः । वैश्वानरम् । ऋते । आ । जातम् । अग्निम्
वाक्यम् २: कविं सम्राजमतिंथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥
पदानि : कविम् । सम्ऽराजम् । अतिंथिम् । जनानाम् । आसन् । आ । पात्रम् । जनयन्त । देवाः

२४३. मण्डलम् ६, सूक्तम् ९, मन्त्रः ४ (ऋक्सङ्ख्या : ४४४०)
वाक्यम् १: अयं होता प्रथमः पश्यतेममिदं ज्योतिरमृतं मर्त्येषु ।
पदानि : अयम् । होता । प्रथमः । पश्यत । इमम् । इदम् । ज्योतिः । अमृतम् । मर्त्येषु
वाक्यम् २: अयं स जज्ञे ध्रुव आ निषत्तोऽमर्त्यस्तन्वा३ वर्धमानः ॥
पदानि : अयम् । सः । जज्ञे । ध्रुवः । आ । निऽसत्तः । अमर्त्यः । तन्वा । वर्धमानः

२४४. मण्डलम् ६, सूक्तम् ११, मन्त्रः २ (ऋक्सङ्ख्या : ४४५२)
वाक्यम् १: त्वं होता मन्द्रतमो नो अध्रुगन्तर्देवो विदथा मर्त्येषु ।
पदानि : त्वम् । होता । मन्द्रऽतमः । नः । अध्रुक् । अन्तः । देवः । विदथा । मर्त्येषु
वाक्यम् २: पावकया जुह्वा३ वह्निरासाग्ने यजस्व तन्वं१ तव स्वाम् ॥
पदानि : पावकया । जुह्वा । वह्निः । आसा । अग्ने । यजस्व । तन्वम् । तव । स्वाम्

२४५. मण्डलम् ६, सूक्तम् १५, मन्त्रः १३ (ऋक्सङ्ख्या : ४४८७)
वाक्यम् १: अग्निर्होता गृहपतिः स राजा विश्वा वेद जनिमा जातवेदाः ।
पदानि : अग्निः । होता । गृहऽपतिः । सः । राजा । विश्वा । वेद । जनिम । जातऽवेदाः
वाक्यम् २: देवानामुत यो मर्त्यानां यजिष्ठः स प्र यजतामृतावा ॥
पदानि : देवानाम् । उत । यः । मर्त्यानाम् । यजिष्ठः । सः । प्र । यजताम् । ऋतऽवा

२४६. मण्डलम् ६, सूक्तम् १५, मन्त्रः १९ (ऋक्सङ्ख्या : ४४९३)
वाक्यम् १: वयमु त्वा गृहपते जनानामग्ने अकर्म समिधा बृहन्तम् ।
पदानि : वयम् । ऊँ इति । त्वा । गृहऽपते । जनानाम् । अग्ने । अकर्म । सम्ऽइधा । बृहन्तम्
वाक्यम् २: अस्थूरि नो गार्हपत्यानि सन्तु तिग्मेन नस्तेजसा सं शिशाधि ॥
पदानि : अस्थूरि । नः । गार्हऽपत्यानि । सन्तु । तिग्मेन । नः । तेजसा । सम् । शिशाधि

२४७. मण्डलम् ६, सूक्तम् १७, मन्त्रः १३ (ऋक्सङ्ख्या : ४५५४)
वाक्यम् १: एवा ता विश्वा चकृवांसमिन्द्रं महामुग्रमजुर्यं सहोदाम्।
पदानि : एव। ता। विश्वा। चकृऽवांसम्। इन्द्रम्। महाम्। उग्रम्। अजुर्यम्। सहःऽदाम्
वाक्यम् २: सुवीरं त्वा स्वायुधं सुवज्रमा ब्रह्म नव्यमवसे ववृत्यात्॥
पदानि : सुऽवीरम्। त्वा। सुऽआयुधम्। सुऽवज्रम्। आ। ब्रह्म। नव्यम्। अवसे। ववृत्यात्

२४८. मण्डलम् ६, सूक्तम् १९, मन्त्रः ८ (ऋक्सङ्ख्या : ४५७९)
वाक्यम् १: आ नो भर वृषणं शुष्ममिन्द्र धनस्पृतं शूशुवांसं सुदक्षम्।
पदानि : आ। नः। भर। वृषणम्। शुष्मम्। इन्द्र। धनऽस्पृतम्। शूशुऽवांसम्। सुऽदक्षम्
वाक्यम् २: येन वंसाम पृतनासु शत्रून्तवोतिभिरुत जामींरजामीन्॥
पदानि : येन। वंसाम। पृतनासु। शत्रून्। तव। ऊतिऽभिः। उत। जामीन्। अजामीन्

२४९. मण्डलम् ६, सूक्तम् २०, मन्त्रः ९ (ऋक्सङ्ख्या : ४५९३)
वाक्यम् १: स ईं स्पृधो वनते अप्रतीतो बिभ्रद्वज्रं वृत्रहणं गभस्तौ।
पदानि : सः। ईम्। स्पृधः। वनते। अप्रतिऽइतः। बिभ्रत्। वज्रम्। वृत्रऽहनम्। गभस्तौ
वाक्यम् २: तिष्ठद्धरी अध्यस्तेव गर्ते वचोयुजा वहत इन्द्रमूष्वम्॥
पदानि : तिष्ठत्। हरी इति। अधि। अस्ताऽइव। गर्ते। वचःऽयुजा। वहतः। इन्द्रम्। ऋष्वम्

२५०. मण्डलम् ६, सूक्तम् २३, मन्त्रः २ (ऋक्सङ्ख्या : ४६२२)
वाक्यम् १: यद्वा दिवि पार्ये सुष्विमिन्द्र वृत्रहत्येऽवसि शूरसातौ।
पदानि : यत्। वा। दिवि। पार्ये। सुस्विम्। इन्द्र। वृत्रऽहत्ये। अवसि। शूरऽसातौ
वाक्यम् २: यद्वा दक्षस्य बिभ्युषो अबिभ्यदरन्धयः शर्धत इन्द्र दस्यून्॥
पदानि : यत्। वा। दक्षस्य। बिभ्युषः। अबिभ्यत्। अरन्धयः। शर्धतः। इन्द्र। दस्यून्

२५१. मण्डलम् ६, सूक्तम् २४, मन्त्रः ९ (ऋक्सङ्ख्या : ४६३९)
वाक्यम् १: गम्भीरेण न उरुणामत्रिन्प्रेषो यन्धि सुतपावन्वाजान्।
पदानि : गम्भीरेण। नः। उरुणा। अमत्रिन्। प्र। इषः। यन्धि। सुतऽपावन्। वाजान्
वाक्यम् २: स्था ऊ षु ऊर्ध्व ऊती अरिषण्यन्नक्तोर्व्युष्टौ परितक्म्यायाम्॥
पदानि : स्थाः। ऊँ इति। सु। ऊर्ध्वः। ऊती। अरिषण्यन्। अक्तोः। विऽउष्टौ। परिऽतक्म्यायाम्

२५२. मण्डलम् ६, सूक्तम् २५, मन्त्रः ६ (ऋक्सङ्ख्या : ४६४६)
वाक्यम् १: स पत्यत उभयोर्नृम्णमयोर्यदीं वेधसः समिथे हवन्ते।
पदानि : सः। पत्यते। उभयोः। नृम्णम्। अयोः। यदि। वेधसः। सम्ऽइथे। हवन्ते
वाक्यम् २: वृत्रे वा महो नृवति क्षये वा व्यचस्वन्ता यदिं वितन्तसैते॥
पदानि : वृत्रे। वा। महः। नृऽवति। क्षये। वा। व्यचस्वन्ता। यदि। विऽतन्तसैते इति

२५३. मण्डलम् ६, सूक्तम् २८, मन्त्रः ६ (ऋक्सङ्ख्या : ४६७१)
वाक्यम् १: यूयं गावो मेदयथा कृशं चिदश्रीरं चित्कृणुथा सुप्रतीकम्।
पदानि : यूयम्। गावः। मेदयथ। कृशम्। चित्। अश्रीरम्। चित्। कृणुथ। सुऽप्रतीकम्
वाक्यम् २: भद्रं गृहं कृणुथ भद्रवाचो बृहद्वो वय उच्यते सभासु॥

पदानि : भद्रम्। गृहम्। कृणुथ। भद्रऽवाचः। बृहत्। वः। वयः। उच्यते। सभासु

२५४. मण्डलम् ६, सूक्तम् २९, मन्त्रः २ (ऋक्सङ्ख्या : ४६७५)
वाक्यम् १: आ यस्मिन्हस्ते नर्या मिमिक्षुरा रथे हिरण्यये रथेष्ठाः।
पदानि : आ। यस्मिन्। हस्ते। नर्याः। मिमिक्षुः। आ। रथे। हिरण्यये। रथेऽस्थाः
वाक्यम् २: आ रश्मयो गभस्त्योः स्थूरयोराध्वन्नश्वासो वृषणो युजानाः॥
पदानि : आ। रश्मयः। गभस्त्योः। स्थूरयोः। आ। अध्वन्। अश्वासः। वृषणः। युजानाः

२५५. मण्डलम् ६, सूक्तम् ३०, मन्त्रः ५ (ऋक्सङ्ख्या : ४६८४)
वाक्यम् १: त्वमपो वि दुरो विषूचीरिन्द्र दृळ्हमरुजः पर्वतस्य।
पदानि : त्वम्। अपः। वि। दुरः। विषूचीः। इन्द्र। दृळ्हम्। अरुजः। पर्वतस्य
वाक्यम् २: राजाभवो जगतश्चर्षणीनां साकं सूर्यं जनयन्द्यामुषासम्॥
पदानि : राजा। अभवः। जगतः। चर्षणीनाम्। साकम्। सूर्यम्। जनयन्। द्याम्। उषसम्

२५६. मण्डलम् ६, सूक्तम् ३१, मन्त्रः १ (ऋक्सङ्ख्या : ४६८५)
वाक्यम् १: अभूरेको रयिपते रयीणामा हस्तयोरधिथा इन्द्र कृष्टीः।
पदानि : अभूः। एकः। रयिऽपते। रयीणाम्। आ। हस्तयोः। अधिथाः। इन्द्र। कृष्टीः
वाक्यम् २: वि तोके अप्सु तनये च सूरेऽवोचन्त् चर्षणयो विवाचः॥
पदानि : वि। तोके। अप्ऽसु। तनये। च। सूरे। अवोचन्त। चर्षणयः। विऽवाचः

२५७. मण्डलम् ६, सूक्तम् ३१, मन्त्रः २ (ऋक्सङ्ख्या : ४६८६)
वाक्यम् १: त्वद्भियेन्द्र पार्थिवानि विश्वाच्युता चिच्च्यावयन्ते रजांसि।
पदानि : त्वत्। भिया। इन्द्र। पार्थिवानि। विश्वा। अच्युता। चित्। च्यवयन्ते। रजांसि
वाक्यम् २: द्यावाक्षामा पर्वतासो वनानि विश्वं दृळ्हं भयते अज्मन्ना ते॥
पदानि : द्यावाक्षामा। पर्वतासः। वनानि। विश्वम्। दृळ्हम्। भयते। अज्मन्। आ। ते

२५८. मण्डलम् ६, सूक्तम् ३४, मन्त्रः ५ (ऋक्सङ्ख्या : ४७०४)
वाक्यम् १: अस्मा एतन्महाङ्गृषमस्मा इन्द्राय स्तोत्रं मतिभिरवाचि।
पदानि : अस्मै। एतत्। महि। आङ्गृषम्। अस्मै। इन्द्राय। स्तोत्रम्। मतिऽभिः। अवाचि
वाक्यम् २: असद्यथा महति वृत्रतूर्य इन्द्रो विश्वायुरविता वृधश्च॥
पदानि : असत्। यथा। महति। वृत्रऽतूर्ये। इन्द्रः। विश्वऽआयुः। अविता। वृधः। च

२५९. मण्डलम् ६, सूक्तम् ३९, मन्त्रः ५ (ऋक्सङ्ख्या : ४७२९)
वाक्यम् १: नू गृणानो गृणते प्रत्न राजन्निषः पिन्व वसुदेयाय पूर्वीः।
पदानि : नु। गृणानः। गृणते। प्रत्न। राजन्। इषः। पिन्व। वसुऽदेयाय। पूर्वीः
वाक्यम् २: अप ओषधीरविषा वनानि गा अर्वतो नॄनृचसे रिरीहि॥
पदानि : अपः। ओषधीः। अविषा। वनानि। गाः। अर्वतः। नॄन्। ऋचसे। रिरीहि

२६०. मण्डलम् ६, सूक्तम् ४४, मन्त्रः १७ (ऋक्सङ्ख्या : ४७६४)
वाक्यम् १: एना मन्द्रानो जहि शूर शत्रूञ्जामिमजामिं मघवन्नमित्रान्।

पदानि : एना । मन्द्रानः । जहि । शूर । शत्रून् । जामिम् । अजामिम् । मघऽवन् । अमित्रान्
वाक्यम् २: अभिषेणाँ अभ्याऽदेदिशानान्परांच इन्द्र प्र मृणा जही चं ॥
पदानि : अभिऽसेनान् । अभि । आऽदेदिशानान् । परांचः । इन्द्र । प्र । मृण । जहि । च

२६१. मण्डलम् ६, सूक्तम् ४४, मन्त्रः २१ (ऋक्सङ्ख्या : ४७६८)
वाक्यम् १: वृषांसि दिवो वृषभः पृथिव्या वृषा सिन्धूनां वृषभः स्तियानाम् ।
पदानि : वृषा । असि । दिवः । वृषभः । पृथिव्याः । वृषा । सिन्धूनाम् । वृषभः । स्तियानाम्
वाक्यम् २: वृष्णे त इन्दुर्वृषभ पीपाय स्वादू रसो मधुपेयो वरांय ॥
पदानि : वृष्णे । ते । इन्दुः । वृषभ । पीपाय । स्वादुः । रसः । मधुऽपेयः । वरांय

२६२. मण्डलम् ६, सूक्तम् ४८, मन्त्रः ४ (ऋक्सङ्ख्या : ४८५३)
वाक्यम् १: महो देवान्यजसि यक्ष्यानुषक्तव क्रत्वोत दंसना ।
पदानि : महः । देवान् । यजसि । यक्षि । आनुषक् । तव । क्रत्वा । उत । दंसना
वाक्यम् २: अर्वाचः सीं कृणुह्यग्नेऽवसे रास्व वाजोत वंस्व ॥
पदानि : अर्वाचः । सीम् । कृणुहि । अग्ने । अवसे । रास्व । वाजा । उत । वंस्व

२६३. मण्डलम् ६, सूक्तम् ४८, मन्त्रः १७ (ऋक्सङ्ख्या : ४८६६)
वाक्यम् १: मा काकम्बीरमुद्बृहो वनस्पतिमशस्तीर्वि हि नीनशः ।
पदानि : मा । काकम्बीरम् । उत् । बृहः । वनस्पतिम् । अशस्तीः । वि । हि । नीनशः
वाक्यम् २: मोत सूरो अहं एवा चन ग्रीवा आदधते वेः ॥
पदानि : मा । उत । सूरः । अहरितिं । एव । चन । ग्रीवाः । आऽदधते । वेरिति वेः

२६४. मण्डलम् ६, सूक्तम् ४९, मन्त्रः १२ (ऋक्सङ्ख्या : ४८८३)
वाक्यम् १: प्र वीराय प्र तवसे तुरायाजा यूथेव पशुरक्षिरस्तम् ।
पदानि : प्र । वीराय । प्र । तवसे । तुराय । अजं । यूथाऽइव । पशुऽरक्षिः । अस्तम्
वाक्यम् २: स पिंस्पृशति तन्विं श्रुतस्य स्तृभिर्न नाकं वचनस्य विपः ॥
पदानि : सः । पिस्पृशति । तन्विं । श्रुतस्य । स्तृऽभिः । न । नाकम् । वचनस्य । विपः

२६५. मण्डलम् ६, सूक्तम् ४९, मन्त्रः १३ (ऋक्सङ्ख्या : ४८८४)
वाक्यम् १: यो रजांसि विममे पार्थिवानि त्रिश्चिद्विष्णुर्मनवे बाधितायं ।
पदानि : यः । रजांसि । विऽममे । पार्थिवानि । त्रिः । चित् । विष्णुः । मनवे । बाधितायं
वाक्यम् २: तस्यं ते शर्मन्नुपदद्यमाने राया मदेम तन्वाऽ तनां च ॥
पदानि : तस्यं । ते । शर्मन् । उपऽदद्यमाने । राया । मदेम । तन्वा । तनां । च

२६६. मण्डलम् ६, सूक्तम् ५०, मन्त्रः ७ (ऋक्सङ्ख्या : ४८९३)
वाक्यम् १: ओमानंमापो मानुषीरमृक्तं धातं तोकाय तनंयाय शं योः ।
पदानि : ओमानम् । आपः । मानुषीः । अमृक्तम् । धातं । तोकायं । तनंयाय । शम् । योः
वाक्यम् २: यूयं हि ष्ठा भिषजो मातृतमा विश्वस्य स्थातुर्जगंतो जनित्रीः ॥
पदानि : यूयम् । हि । स्थ । भिषजः । मातृऽतमाः । विश्वस्य । स्थातुः । जगंतः । जनित्रीः

२६७. मण्डलम् ६, सूक्तम् ६२, मन्त्रः २ (ऋक्सङ्ख्या : ५०१७)
वाक्यम् १: ता यज्ञमा शुचिंभिश्चक्रमाणा रथस्य भानुं रुरुचू रजोंभिः ।
पदानि : ता । यज्ञम् । आ । शुचिंऽभिः । चक्रमाणा । रथस्य । भानुम् । रुरुचुः । रजःऽभिः
वाक्यम् २: पुरू वरांस्यमिंता मिमानापो धन्वान्यतिं याथो अज्रान् ॥
पदानि : पुरु । वरांसि । अमिंता । मिमाना । अपः । धन्वानि । अतिं । याथः । अज्रान्

२६८. मण्डलम् ६, सूक्तम् ६३, मन्त्रः १० (ऋक्सङ्ख्या : ५०३६)
वाक्यम् १: सं वां शता नासत्या सहस्राश्वानां पुरुपन्था गिरे दात् ।
पदानि : सम् । वाम् । शता । नासत्या । सहस्रा । अश्वानाम् । पुरुऽपन्थाः । गिरे । दात्
वाक्यम् २: भरद्वाजाय वीर नू गिरे दाद्धता रक्षांसि पुरुदंससा स्युः ॥
पदानि : भरत्ऽवाजाय । वीर । नु । गिरे । दात् । हता । रक्षांसि । पुरुऽदंससा । स्युरितिं स्युः

२६९. मण्डलम् ६, सूक्तम् ६५, मन्त्रः १ (ऋक्सङ्ख्या : ५०४४)
वाक्यम् १: एषा स्या नो दुहिता दिवोजाः क्षितीरुच्छन्ती मानुषीरजीगः ।
पदानि : एषा । स्या । नः । दुहिता । दिवःऽजाः । क्षितीः । उच्छन्ती । मानुषीः । अजीगरितिं
वाक्यम् २: या भानुना रुशता राम्यास्वज्ञायि तिरस्तमंसश्चिदक्तून् ॥
पदानि : या । भानुना । रुशता । राम्यासु । अज्ञायि । तिरः । तमंसः । चित् । अक्तून्

२७०. मण्डलम् ६, सूक्तम् ६५, मन्त्रः २ (ऋक्सङ्ख्या : ५०४५)
वाक्यम् १: वि तद्ययुररुणयुग्भिरश्वैश्चित्रं भान्त्युषसश्चन्द्ररथाः ।
पदानि : वि । तत् । ययुः । अरुणयुक्ऽभिः । अश्वैः । चित्रम् । भान्ति । उषसः । चन्द्रऽरथाः
वाक्यम् २: अग्रं यज्ञस्य बृहतो नयन्तीर्वि ता बाधन्ते तम ऊर्म्यायाः ॥
पदानि : अग्रम् । यज्ञस्य । बृहतः । नयन्तीः । वि । ताः । बाधन्ते । तमः । ऊर्म्यायाः

२७१. मण्डलम् ६, सूक्तम् ६५, मन्त्रः ५ (ऋक्सङ्ख्या : ५०४८)
वाक्यम् १: इदा हि तं उषो अद्रिसानो गोत्रा गवामङ्गिरसो गृणन्तिं ।
पदानि : इदा । हि । ते । उषः । अद्रिसानो इत्यद्रिऽसानो । गोत्रा । गवाम् । अङ्गिरसः । गृणन्तिं
वाक्यम् २: व्यर्केण बिभिदुर्ब्रह्मणा च सत्या नृणामभवद्देवहूतिः ॥
पदानि : वि । अर्केण । बिभिदुः । ब्रह्मणा । च । सत्या । नृणाम् । अभवत् । देवऽहूतिः

२७२. मण्डलम् ६, सूक्तम् ६६, मन्त्रः ११ (ऋक्सङ्ख्या : ५०६०)
वाक्यम् १: तं वृधन्तं मारुतं भ्राजदृष्टिं रुद्रस्य सूनुं हवसा विवासे ।
पदानि : तम् । वृधन्तम् । मारुतम् । भ्राजत्ऽऋष्टिम् । रुद्रस्य । सूनुम् । हवसा । आ । विवासे
वाक्यम् २: दिवः शर्धाय शुचयो मनीषा गिरयो नाप उग्रा अस्पृध्रन् ॥
पदानि : दिवः । शर्धाय । शुचयः । मनीषाः । गिरयः । न । आपः । उग्राः । अस्पृध्रन्

२७३. मण्डलम् ६, सूक्तम् ७५, मन्त्रः ५ (ऋक्सङ्ख्या : ५११९)
वाक्यम् १: बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्यं ।
पदानि : बह्वीनाम् । पिता । बहुः । अस्य । पुत्रः । चित्र । चा । कृणोति । समना । अवऽगत्यं
वाक्यम् २: इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥
पदानि : इषुऽधिः । सङ्काः । पृतनाः । च । सर्वाः । पृष्ठे । निऽनद्धः । जयति । प्रऽसूतः

२७४. मण्डलम् ७, सूक्तम् १, मन्त्रः २३ (ऋक्सङ्ख्या : ५१५६)
वाक्यम् १: स मर्तो॑ अग्ने स्वनीक रे॒वानम॑र्त्ये य आ॑जुहोति॑ ह॒व्यम्।
पदानि : सः। मर्तः॑। अ॒ग्ने॒। सु॒ऽअ॒नी॒क॒। रे॒वान्। अम॑र्त्ये। यः। आ॒ऽजु॒होति॑। ह॒व्यम्
वाक्यम् २: स दे॒वता॑ वसुवनिं॑ दधाति॒ यं सू॒रिर॒र्थी पृ॒च्छमा॑न॒ एति॑॥
पदानि : सः। दे॒वता॑। व॒सु॒ऽउ॒वनि॑म्। द॒धा॒ति॒। यम्। सू॒रिः। अ॒र्थी। पृ॒च्छमा॑नः। एति॑

२७५. मण्डलम् ७, सूक्तम् ५, मन्त्रः २ (ऋक्सङ्ख्या : ५१९१)
वाक्यम् १: पृ॒ष्टो दि॒वि धा॒य्य॒ग्निः पृ॑थि॒व्यां ने॒ता सिन्धू॑नां वृष॒भः स्तिया॑नाम्।
पदानि : पृ॒ष्टः। दि॒वि। धायि॑। अ॒ग्निः। पृ॒थि॒व्याम्। ने॒ता। सिन्धू॑नाम्। वृ॒ष॒भः। स्तिया॑नाम्
वाक्यम् २: स मानु॑षीर॒भि विशो॒ वि भा॑ति वैश्वान॒रो वा॑वृधा॒नो वरे॑ण॥
पदानि : सः। मानु॑षीः। अ॒भि। विशः॑। वि। भा॒ति॒। वै॒श्वा॒न॒रः। व॒वृ॒धा॒नः। वरे॑ण

२७६. मण्डलम् ७, सूक्तम् ६, मन्त्रः ६ (ऋक्सङ्ख्या : ५२०४)
वाक्यम् १: यस्य॒ शर्म॒न्नुप॒ विश्वे॒ जना॑स॒ एवै॒स्तस्थुः॑ सु॒म॒तिं भिक्ष॑माणाः।
पदानि : यस्य॑। शर्म॑न्। उप॑। विश्वे॑। जना॑सः। एवैः॑। त॒स्थुः॑। सु॒ऽम॒तिम्। भिक्ष॑माणाः
वाक्यम् २: वै॒श्वा॒न॒रो वर॒मा रोद॑स्योरा॒ग्निः स॑साद पि॒त्रोरु॒पस्थ॑म्॥
पदानि : वै॒श्वा॒न॒रः। वर॑म्। आ। रोद॑स्योः। आ। अ॒ग्निः। स॒सा॒द॒। पि॒त्रोः। उ॒प॒ऽस्थ॑म्

२७७. मण्डलम् ७, सूक्तम् ८, मन्त्रः १ (ऋक्सङ्ख्या : ५२१३)
वाक्यम् १: इ॒न्धे राजा॑ सम॒र्यो नमो॑भि॒र्यस्य॒ प्रती॑क॒माहु॑तं घृ॒तेन॑।
पदानि : इ॒न्धे। राजा॑। सम्। अ॒र्यः। नमः॑ऽभिः। यस्य॑। प्रती॑कम्। आऽहु॑तम्। घृ॒तेन॑
वाक्यम् २: नरो॑ ह॒व्येभि॑रीळते स॒बाध॒ आग्निरग्र॑ उ॒षसा॑मशोचि॥
पदानि : नरः॑। ह॒व्येभिः॑। ई॒ळ॒ते॒। स॒ऽबाधः॑। आ। अ॒ग्निः। अग्रे॑। उ॒षसा॑म्। अ॒शो॒चि॒

२७८. मण्डलम् ७, सूक्तम् ८, मन्त्रः ५ (ऋक्सङ्ख्या : ५२१७)
वाक्यम् १: अस॒न्नित्त्वे आ॒हव॑नानि॒ भूरि॒ भुवो॒ विश्वे॑भिः सु॒मना॒ अनी॑कैः।
पदानि : अस॑न्। इत्। त्वे इति॑। आ॒ऽहव॑नानि। भूरि॑। भुवः॑। विश्वे॑भिः। सु॒ऽमनाः॑। अनी॑कैः
वाक्यम् २: स्तु॒तश्चि॑दग्ने शृ॒ण्विषे गृ॑णा॒नः स्व॒यं व॑र्धस्व त॒न्वं॑ सुजात॥
पदानि : स्तु॒तः। चि॒त्। अ॒ग्ने॒। शृ॒ण्वि॒षे॒। गृ॒णा॒नः। स्व॒यम्। व॒र्ध॒स्व॒। त॒न्व॑म्। सु॒ऽजा॒त॒

२७९. मण्डलम् ७, सूक्तम् ९, मन्त्रः ३ (ऋक्सङ्ख्या : ५२२२)
वाक्यम् १: अम॑ूरः क॒विरदि॑तिर्वि॒वस्वा॑न्त्सुसं॒सन्मि॒त्रो अति॑थिः शि॒वो नः॑।
पदानि : अम॑ूरः। क॒विः। अदि॑तिः। वि॒वस्वा॑न्। सु॒ऽस॒सत्। मि॒त्रः। अति॑थिः। शि॒वः। नः॒
वाक्यम् २: चि॒त्रभा॑नुरुषसा॑ भा॒त्यग्रे॒ऽपां गर्भः॑ प्र॒स्व॑१ आ वि॑वेश॥
पदानि : चि॒त्रऽभा॑नुः। उ॒षसा॑म्। भा॒ति॒। अग्रे॑। अ॒पाम्। गर्भः॑। प्र॒ऽस्वः॑। आ। वि॒वे॒श॒

२८०. मण्डलम् ७, सूक्तम् १६, मन्त्रः ४ (ऋक्सङ्ख्या : ५२६३)
वाक्यम् १: तं त्वा॑ दू॒तं कृ॑ण्महे य॒शस्त॑मं दे॒वाँ आ वी॒तये॑ वह।
पदानि : तम्। त्वा॒। दू॒तम्। कृ॒ण्म॒हे॒। य॒शःऽत॑मम्। दे॒वान्। आ। वी॒तये॑। व॒ह॒

वाक्यम् २: विश्वा॑ सूनो सहसो मर्त॒भोज॑ना रास्व॒ तद्यत्त्वेम॑हे ॥
पदानि : विश्वा॑। सू॒नो॒ इति॑। स॒ह॒सः॒। म॒र्त॒ऽभोज॑ना। रास्व॑। तत्। यत्। त्वा॒। ईम॑हे

२८१. मण्डलम् ७, सूक्तम् १८, मन्त्रः ६ (ऋक्सङ्ख्या : ५२८४)
वाक्यम् १: पु॒रो॒ळा इत्तुर्वशो॒ यक्षु॑रासीद्रा॒ये मत्स्या॑सो॒ निशि॑ता॒ अपी॑व ।
पदानि : पु॒रो॒ळाः। इत्। तुर्वशः॑। यक्षुः॑। आ॒सी॒त्। रा॒ये। मत्स्या॑सः। निऽशि॑ताः। अपि॑ऽइव
वाक्यम् २: श्रु॒ष्टिं च॑क्रु॒र्भृग॑वो द्रु॒ह्यव॑श्च॒ सखा॒ सखा॑यमत॒रद्वि॑षू॒चोः ॥
पदानि : श्रु॒ष्टिम्। च॒क्रुः॒। भृग॑वः। द्रु॒ह्यवः॑। च॒। सखा॑। सखा॑यम्। अ॒त॒रत्। विषू॑चोः

२८२. मण्डलम् ७, सूक्तम् १८, मन्त्रः २२ (ऋक्सङ्ख्या : ५३००)
वाक्यम् १: द्वे नप्तु॑र्दे॒ववं॑तः शते गोद्वा रथा॑ वधूम॑न्ता सुदासः॑ ।
पदानि : द्वे इति॑। नप्तुः॑। दे॒वऽव॑तः। शते इति॑। गोः॑। द्वा। रथा॑। व॒धूऽम॑न्ता। सु॒ऽदासः॑
वाक्यम् २: अर्ह॒न्नग्ने॑ पैजव॒नस्य॒ दान॑ं होतेव॒ सद्म॑ पर्येमि॒ रेभ॑न् ॥
पदानि : अर्ह॑न्। अ॒ग्ने॒। पै॒ज॒ऽव॒नस्य॑। दान॑म्। होता॑ऽइव। सद्म॑। परि॑। ए॒मि॒। रेभ॑न्

२८३. मण्डलम् ७, सूक्तम् २०, मन्त्रः ३ (ऋक्सङ्ख्या : ५३१७)
वाक्यम् १: युध्मो अ॑न॒र्वा ख॑ज॒कृत्स॒मद्वा॒ शूरः॑ सत्रा॒षाड्जनु॑षे॒मषा॑ळ्हः ।
पदानि : युध्मः। अ॒न॒र्वा। ख॒ज॒ऽकृत्। स॒मत्ऽवा॑। शूरः॑। स॒त्रा॒ऽषाट्। ज॒नुषा॑। ई॒म्। अषा॑ळ्हः
वाक्यम् २: व्यास॒ इन्द्रः॑ पृत॒नाः॒ स्वोजा॒ अधा॒ विश्वं॑ शत्रू॒यन्तं॑ जघान ॥
पदानि : वि। आ॒से॒। इन्द्रः॑। पृ॒त॒नाः॒। सु॒ऽओजाः॑। अध॑। विश्व॑म्। श॒त्रु॒ऽयन्त॑म्। ज॒घा॒न॒

२८४. मण्डलम् ७, सूक्तम् २१, मन्त्रः ३ (ऋक्सङ्ख्या : ५३२७)
वाक्यम् १: त्वमि॑न्द्र स्रवि॒तवा अ॒पस्कः॒ परि॑ष्ठिता अहि॑ना शूर पू॒र्वीः ।
पदानि : त्वम्। इ॒न्द्र॒। स्र॒वि॒तवै। अ॒पः। क॒रि॒ति॒ कः। परि॑ऽस्थिताः। अहि॑ना। शू॒र॒। पू॒र्वीः
वाक्यम् २: त्वद्वा॑वक्रे र॒थ्यो॒३॑ न धेना॒ रेज॑न्ते॒ विश्वा॑ कृ॒त्रिमा॑णि भी॒षा ॥
पदानि : त्वत्। वा॒व॒क्रे॒। र॒थ्यः॑। न। धेनाः॑। रेज॑न्ते। विश्वा॑। कृ॒त्रिमा॑णि। भी॒षा

२८५. मण्डलम् ७, सूक्तम् २३, मन्त्रः १ (ऋक्सङ्ख्या : ५३४४)
वाक्यम् १: उदु ब्रह्मा॑ण्यैरत श्रव॒स्येन्द्रं॑ सम॒र्ये म॑हया वसिष्ठ ।
पदानि : उत्। ऊँ॒ इति॑। ब्रह्मा॑णि। ऐ॒र॒त॒। श्र॒व॒स्या। इन्द्र॑म्। स॒ऽअ॒र्ये। म॒ह॒य॒। व॒सि॒ष्ठ॒
वाक्यम् २: आ यो विश्वा॑नि॒ शव॑सा त॒तानोप॑श्रोता म॒ ईव॑तो॒ वचा॑ंसि ॥
पदानि : आ। यः। विश्वा॑नि। शव॑सा। त॒तान॑। उ॒प॒ऽश्रो॒ता। मे॒। ईव॑तः। वचा॑ंसि

२८६. मण्डलम् ७, सूक्तम् २७, मन्त्रः ३ (ऋक्सङ्ख्या : ५३६९)
वाक्यम् १: इन्द्रो॒ राजा॒ जग॑तश्चर्षणी॒नामधि॒ क्षमि॒ विषु॑रूपं॒ यदस्ति॑ ।
पदानि : इन्द्रः॑। राजा॑। जग॑तः। च॒र्ष॒णी॒नाम्। अधि॑। क्षमि॑। विषु॑ऽरूपम्। यत्। अस्ति॑
वाक्यम् २: ततो॑ ददाति दा॒शुषे॒ व॒सू॒नि॒ चोद॒द्राध॒ उप॑स्तुतश्चिद॒र्वाक् ॥
पदानि : ततः॑। द॒दा॒ति॒। दा॒शुषे॑। व॒सू॒नि॒। चोद॑त्। राधः॑। उप॑ऽस्तुतः। चि॒त्। अ॒र्वाक्

२८७. मण्डलम् ७, सूक्तम् ३२, मन्त्रः २१ (ऋक्सङ्ख्या : ५४१९)

वाक्यम् १: न दुष्टुती मर्त्यो विन्दते वसु न स्रेधन्तं रयिर्नशत्।
पदानि : न। दुःऽस्तुती। मर्त्यः। विन्दते। वसु। न। स्रेधन्तम्। रयिः। नशत्
वाक्यम् २: सुशक्तिरिन्मघवन्तुभ्यं मावते देष्णं यत्पार्ये दिवि॥
पदानि : सुऽशक्तिः। इत्। मघऽवन्। तुभ्यम्। माऽवते। देष्णम्। यत्। पार्ये। दिवि

२८८. मण्डलम् ७, सूक्तम् ३३, मन्त्रः ११ (ऋक्सङ्ख्या : ५४३६)
वाक्यम् १: उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन्मनसोऽधि जातः।
पदानि : उत। असि। मैत्रावरुणः। वसिष्ठ। उर्वश्याः। ब्रह्मन्। मनसः। अधि। जातः
वाक्यम् २: द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवाः पुष्करे त्वाददन्त॥
पदानि : द्रप्सम्। स्कन्नम्। ब्रह्मणा। दैव्येन। विश्वे। देवाः। पुष्करे। त्वा। अददन्त

२८९. मण्डलम् ७, सूक्तम् ३४, मन्त्रः २४ (ऋक्सङ्ख्या : ५४६३)
वाक्यम् १: अनु तदुर्वी रोदसी जिहातामनु द्युक्षो वरुण इन्द्रसखा।
पदानि : अनु। तत्। उर्वी इति। रोदसी इति। जिहाताम्। अनु। द्युक्षः। वरुणः। इन्द्रऽसखा
वाक्यम् २: अनु विश्वे मरुतो ये सहासो रायः स्याम धरुणं धियध्यै॥
पदानि : अनु। विश्वे। मरुतः। ये। सहासः। रायः। स्याम। धरुणम्। धियध्यै

२९०. मण्डलम् ७, सूक्तम् ३५, मन्त्रः १ (ऋक्सङ्ख्या : ५४६५)
वाक्यम् १: शं न इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या।
पदानि : शम्। नः। इन्द्राग्नी इति। भवताम्। अवःऽभिः। शम्। नः। इन्द्रावरुणा। रातऽहव्या
वाक्यम् २: शमिन्द्रासोमा सुविताय शं योः शं न इन्द्रापूषणा वाजसातौ॥
पदानि : शम्। इन्द्रासोमा। सुविताय। शम्। योः। शम्। नः। इन्द्रापूषणा। वाजऽसातौ

२९१. मण्डलम् ७, सूक्तम् ३६, मन्त्रः ५ (ऋक्सङ्ख्या : ५४८४)
वाक्यम् १: यजन्ते अस्य सख्यं वयश्च नमस्विनः स्व ऋतस्य धामन्।
पदानि : यजन्ते। अस्य। सख्यम्। वयः। च। नमस्विनः। स्वे। ऋतस्य। धामन्
वाक्यम् २: वि पृक्षो बाबधे नृभिः स्तवान इदं नमो रुद्राय प्रेष्ठम्॥
पदानि : वि। पृक्षः। बाबधे। नृऽभिः। स्तवानः। इदम्। नमः। रुद्राय। प्रेष्ठम्

२९२. मण्डलम् ७, सूक्तम् ३८, मन्त्रः २ (ऋक्सङ्ख्या : ५४९८)
वाक्यम् १: उदु तिष्ठ सवितः श्रुध्य१स्य हिरण्यपाणे प्रभृतावृतस्य।
पदानि : उत्। ऊँ इति। तिष्ठ। सवितरिति। श्रुधि। अस्य। हिरण्यऽपाणे। प्रऽभृतौ। ऋतस्य
वाक्यम् २: व्यु१र्वीं पृथ्वीममतिं सृजान आ नृभ्यो मर्तभोजनं सुवानः॥
पदानि : वि। उर्वीम्। पृथ्वीम्। अमतिम्। सृजानः। आ। नृऽभ्यः। मर्तऽभोजनम्। सुवानः

२९३. मण्डलम् ७, सूक्तम् ३८, मन्त्रः ५ (ऋक्सङ्ख्या : ५५०१)
वाक्यम् १: अभि ये मिथो वनुषः सपन्ते रातिं दिवो रातिषाचः पृथिव्याः।
पदानि : अभि। ये। मिथः। वनुषः। सपन्ते। रातिम्। दिवः। रातिऽसाचः। पृथिव्याः
वाक्यम् २: अहिर्बुध्न्य उत नः शृणोतु वरूत्र्येकधेनुभिर्नि पातु॥
पदानि : अहिः। बुध्न्यः। उत। नः। शृणोतु। वरूत्री। एकधेनुऽभिः। नि। पातु

२९४. मण्डलम् ७, सूक्तम् ३८, मन्त्रः ६ (ऋक्सङ्ख्या : ५५०२)
वाक्यम् १: अनु॑ तन्नो जास्पतिर्मंसीष्ट रत्नं॑ देवस्य सवि॒तुरि॑यानः ।
पदानि : अनु॑ । तत् । नः॒ । जाःपतिः॑ । मं॒सी॒ष्ट॒ । रत्न॑म् । दे॒वस्य॑ । स॒वि॒तुः । इ॒या॒नः
वाक्यम् २: भगं॑मु॒ग्रोऽव॑से॒ जोह॑वीति॒ भग॒मनु॑ग्रो॒ अध॑ याति॒ रत्न॑म् ॥
पदानि : भग॑म् । उ॒ग्रः । अव॑से । जोह॑वीति । भग॑म् । अनु॑ग्रः । अध॑ । या॒ति॒ । रत्न॑म्

२९५. मण्डलम् ७, सूक्तम् ३९, मन्त्रः १ (ऋक्सङ्ख्या : ५५०५)
वाक्यम् १: ऊ॒र्ध्वो अ॒ग्निः सु॑म॒तिं वस्वो॑ अश्रेत्प्रती॒ची जू॒र्णिर्दे॒वता॑तिमेति ।
पदानि : ऊ॒र्ध्वः । अ॒ग्निः । सु॒ऽम॒तिम् । वस्वः॑ । अ॒श्रे॒त् । प्र॒ती॒ची । जू॒र्णिः । दे॒वऽता॑तिम् । ए॒ति
वाक्यम् २: भे॒जाते॒ अद्री॑ र॒थ्ये॑व पन्था॑मृ॒तं होता॑ न इषि॒तो य॑जाति ॥
पदानि : भे॒जाते॒ इति॑ । अद्री॒ इति॑ । र॒थ्या॑ऽइव । पन्था॑म् । ऋ॒तम् । होता॑ । नः॒ । इ॒षि॒तः । य॒जा॒ति॒

२९६. मण्डलम् ७, सूक्तम् ३९, मन्त्रः ३ (ऋक्सङ्ख्या : ५५०७)
वाक्यम् १: ज्म॒या अत्र॒ वस॑वो रन्त दे॒वा उ॒रावन्तरि॑क्षे मर्जयन्त शु॒भ्राः ।
पदानि : ज्म॒याः । अत्र॑ । वस॑वः । र॒न्त॒ । दे॒वाः । उ॒रौ । अ॒न्तरि॑क्षे । म॒र्ज॒य॒न्त॒ । शु॒भ्राः
वाक्यम् २: अ॒र्वाक्प॒थ उ॑रुज्रयः कृणुध्वं श्रोता॑ दू॒तस्य॑ जग्मुषो॑ नो अ॒स्य ॥
पदानि : अ॒र्वाक् । प॒थः । उ॒रु॒ऽज्र॒यः॒ । कृ॒णु॒ध्व॒म् । श्रोत॑ । दू॒तस्य॑ । ज॒ग्मु॒षः॑ । नः॒ । अ॒स्य

२९७. मण्डलम् ७, सूक्तम् ४०, मन्त्रः १ (ऋक्सङ्ख्या : ५५१२)
वाक्यम् १: ओ श्रु॒ष्टिर्वि॑दथ्या॒३॑ समेतु प्रति॒ स्तोमं॑ दधीमहि तु॒राणा॑म् ।
पदानि : ओ इति॑ । श्रु॒ष्टिः । वि॒द॒थ्या॑ । सम् । ए॒तु॒ । प्रति॑ । स्तोम॑म् । दु॒धी॒म॒हि॒ । तु॒राणा॑म्
वाक्यम् २: यदु॒द्य दे॒वः स॑वि॒ता सु॒वाति॒ स्यामा॑स्य र॒त्निनो॑ विभा॒गे ॥
पदानि : यत् । अ॒द्य । दे॒वः । स॒वि॒ता । सु॒वाति॑ । स्याम॑ । अ॒स्य॒ । र॒त्निनः॑ । वि॒ऽभा॒गे

२९८. मण्डलम् ७, सूक्तम् ४३, मन्त्रः १ (ऋक्सङ्ख्या : ५५३२)
वाक्यम् १: प्र वो॑ य॒ज्ञेषु॑ देव॒यन्तो॑ अर्च॒न्द्यावा॒ नमो॑भिः पृथि॒वी इ॑षध्यै॑ ।
पदानि : प्र । वः॒ । य॒ज्ञेषु॑ । दे॒व॒ऽयन्तः॑ । अ॒र्च॒न् । द्यावा॑ । नमः॑ऽभिः । पृ॒थि॒वी इति॑ । इ॒ष॒ध्यै॑
वाक्यम् २: येषा॑ ब्रह्मा॒ण्यस॑मानि॒ विप्रा॒ विष्व॑ग्वि॒यन्ति॑ व॒निनो॒ न शाखाः॑ ॥
पदानि : येषा॑म् । ब्रह्मा॑णि । अस॑मानि । विप्रा॑ । विष्व॑क् । वि॒ऽयन्ति॑ । व॒निनः॑ । न । शाखाः॑

२९९. मण्डलम् ७, सूक्तम् ४४, मन्त्रः ५ (ऋक्सङ्ख्या : ५५४१)
वाक्यम् १: आ नो॑ दधिक्राः प॒थ्या॑मनक्त्वृ॒तस्य॒ पन्था॒मन्वे॑त॒वा उ॑ ।
पदानि : आ । नः॒ । दु॒धि॒ऽक्राः॒ । प॒थ्या॑म् । अ॒न॒क्तु॒ । ऋ॒तस्य॑ । पन्था॑म् । अनु॑ऽए॒त॒वै । ऊँ॒ इति॑
वाक्यम् २: शृ॒णोतु॑ नो दैव्यं॒ शर्धो॑ अ॒ग्निः शृ॒ण्वन्तु॒ विश्वे॑ म॒हि॒षा अ॑मू॒राः ॥
पदानि : शृ॒णोतु॑ । नः॒ । दैव्य॑म् । शर्धः॑ । अ॒ग्निः । शृ॒ण्वन्तु॑ । विश्वे॑ । म॒हि॒षाः । अ॒मू॒राः

३००. मण्डलम् ७, सूक्तम् ४७, मन्त्रः १ (ऋक्सङ्ख्या : ५५५०)
वाक्यम् १: आपो॒ यं वः॑ प्रथ॒मं दे॑व॒यन्त॑ इन्द्र॒पान॑मू॒र्मिमकृ॑ण्वते॒ळः ।
पदानि : आपः॑ । यम् । वः॒ । प्र॒थ॒मम् । दे॒व॒ऽयन्तः॑ । इ॒न्द्र॒ऽपान॑म् । ऊ॒र्मिम् । अकृ॑ण्वत । इ॒ळः
वाक्यम् २: तं वो॑ व॒यं शु॒चिम॑रि॒प्रम॒द्य घृ॑त॒प्रुषं॑ मधु॒मन्तं॑ वनेम ॥

पदानि : तम्। वः। वयम्। शुचिंम्। अरिप्रम्। अद्य। घृतऽप्रुषम्। मधुंऽमन्तम्। वनेम

३०१. मण्डलम् ७, सूक्तम् ४७, मन्त्रः २ (ऋक्सङ्ख्या : ५५५१)
वाक्यम् १: तमूर्मिमांपो मधुंमत्तमं वोऽपां नपांदवत्वाशुहेमां।
पदानि : तम्। ऊर्मिम्। आपः। मधुंमत्ऽतमम्। वः। अपाम्। नपात्। अवतु। आशुऽहेमां
वाक्यम् २: यस्मिन्निन्द्रो वसुंभिर्मादयांते तमश्याम देवयन्तों वो अद्य ॥
पदानि : यस्मिंन्। इन्द्रः। वसुंऽभिः। मादयांते। तम्। अश्याम। देवऽयन्तः। वः। अद्य

३०२. मण्डलम् ७, सूक्तम् ५४, मन्त्रः २ (ऋक्सङ्ख्या : ५५७६)
वाक्यम् १: वास्तोंष्पते प्रतरंणो न एधि गयस्फानो गोभिरश्वेंभिरिन्दो।
पदानि : वास्तोः। पते। प्रऽतरंणः। नः। एधि। गयऽस्फानः। गोभिः। अश्वेंभिः। इन्दो इतिं
वाक्यम् २: अजरांसस्ते सख्ये स्यांम पितेवं पुत्रान्प्रतिं नो जुषस्व ॥
पदानि : अजरांसः। ते। सख्ये। स्याम। पिताऽइंव। पुत्रान्। प्रतिं। नः। जुषस्व

३०३. मण्डलम् ७, सूक्तम् ५६, मन्त्रः १६ (ऋक्सङ्ख्या : ५६०१)
वाक्यम् १: अत्यांसो न ये मरुतः स्वञ्चों यक्षदृशो न शुभयंन्त मर्याः।
पदानि : अत्यांसः। न। ये। मरुतः। सुऽअञ्चः। यक्षऽदृशः। न। शुभयंन्त। मर्याः
वाक्यम् २: ते हंर्म्येष्ठाः शिशवो न शुभ्रा वत्सासो न प्रक्रीळिनः पयोधाः ॥
पदानि : ते। हर्म्येऽस्थाः। शिशवः। न। शुभ्राः। वत्सासः। न। प्रऽक्रीळिनः। पयःऽधाः

३०४. मण्डलम् ७, सूक्तम् ५६, मन्त्रः १९ (ऋक्सङ्ख्या : ५६०४)
वाक्यम् १: इमे तुरं मरुतों रामयन्तीमे सहः सहसं आ नमन्ति।
पदानि : इमे। तुरम्। मरुतः। रमयन्ति। इमे। सहः। सहसः। आ। नमन्ति
वाक्यम् २: इमे शंसं वनुष्यतो नि पांन्ति गुरु द्वेषो अरंरुषे दधन्ति ॥
पदानि : इमे। शंसम्। वनुष्यतः। नि। पान्ति। गुरु। द्वेषः। अरंरुषे। दधन्ति

३०५. मण्डलम् ७, सूक्तम् ५६, मन्त्रः २२ (ऋक्सङ्ख्या : ५६०७)
वाक्यम् १: सं यद्धनंन्त मन्युभिर्जनांसः शूरां यह्वीष्वोषधीषु विक्षु।
पदानि : सम्। यत्। हनंन्त। मन्युऽभिः। जनांसः। शूराः। यह्वीषुं। ओषधीषु। विक्षु
वाक्यम् २: अधं स्मा नो मरुतो रुद्रियासस्त्रातारों भूत पृतनास्वर्यः ॥
पदानि : अधं। स्म। नः। मरुतः। रुद्रियासः। त्रातारः। भूत। पृतनासु। अर्यः

३०६. मण्डलम् ७, सूक्तम् ५९, मन्त्रः ८ (ऋक्सङ्ख्या : ५६३१)
वाक्यम् १: यो नों मरुतो अभि दुर्हृणायुस्तिरश्चित्तानिं वसवो जिघांसति।
पदानि : यः। नः। मरुतः। अभि। दुःऽहृणायुः। तिरः। चित्तानिं। वसवः। जिघांसति
वाक्यम् २: द्रुहः पाशान्प्रति स मुंचीष्ट तपिंष्ठेन हन्मंना हन्तना तम् ॥
पदानि : द्रुहः। पाशान्। प्रतिं। सः। मुचीष्ट। तपिंष्ठेन। हन्मंना। हन्तन। तम्

३०७. मण्डलम् ७, सूक्तम् ६०, मन्त्रः ८ (ऋक्सङ्ख्या : ५६४३)
वाक्यम् १: यद्नोपावददितिः शर्म भद्रं मित्रो यच्छंन्ति वरुणः सुदासें।

पदानि : यत्। गोपावत्। अदितिः। शर्म। भद्रम्। मित्रः। यच्छन्ति। वरुणः। सुऽदासे
वाक्यम् २: तस्मिन्ना तोकं तनयं दधानाना मा कर्म देवहेळनं तुरासः॥
पदानि : तस्मिन्। आ। तोकम्। तनयम्। दधानाः। मा। कर्म। देवऽहेळनम्। तुरासः

३०८. मण्डलम् ७, सूक्तम् ६०, मन्त्रः ९ (ऋक्सङ्ख्या : ५६४४)
वाक्यम् १: अव वेदिं होत्राभिर्यजेत रिपः काश्चिद्वरुणध्रुतः सः।
पदानि : अव। वेदिम्। होत्राभिः। यजेत। रिपः। काः। चित्। वरुणऽध्रुतः। सः
वाक्यम् २: परि द्वेषोभिरर्यमा वृणक्तूरुं सुदासे वृषणा उ लोकम्॥
पदानि : परि। द्वेषःऽभिः। अर्यमा। वृणक्तु। उरुम्। सुऽदासे। वृषणौ। ऊँ इति। लोकम्

३०९. मण्डलम् ७, सूक्तम् ६२, मन्त्रः १ (ऋक्सङ्ख्या : ५६५५)
वाक्यम् १: उत्सूर्यो बृहदुर्चीष्यश्रेत्पुरु विश्वा जनिम मानुषाणाम्।
पदानि : उत्। सूर्यः। बृहत्। अर्चीषि। अश्रेत्। पुरु। विश्वा। जनिम। मानुषाणाम्
वाक्यम् २: समो दिवा ददृशे रोचमानः क्रत्वा कृतः सुकृतः कर्तृभिर्भूत्॥
पदानि : समः। दिवा। ददृशे। रोचमानः। क्रत्वा। कृतः। सुऽकृतः। कर्तृऽभिः। भूत्

३१०. मण्डलम् ७, सूक्तम् ६२, मन्त्रः ४ (ऋक्सङ्ख्या : ५६५८)
वाक्यम् १: द्यावाभूमी अदिते त्रासीथां नो ये वां जज्ञुः सुजनिमान ऋष्वे।
पदानि : द्यावाभूमी इति। अदिते। त्रासीथाम्। नः। ये। वाम्। जज्ञुः। सुऽजनिमानः। ऋष्वे इति
वाक्यम् २: मा हेळे भूम वरुणस्य वायोर्मा मित्रस्य प्रियतमस्य नृणाम्॥
पदानि : मा। हेळे। भूम। वरुणस्य। वायोः। मा। मित्रस्य। प्रियऽतमस्य। नृणाम्

३११. मण्डलम् ७, सूक्तम् ६४, मन्त्रः १ (ऋक्सङ्ख्या : ५६६७)
वाक्यम् १: दिवि क्षयन्ता रजसः पृथिव्यां प्र वां घृतस्य निर्णिजो ददीरन्।
पदानि : दिवि। क्षयन्ता। रजसः। पृथिव्याम्। प्र। वाम्। घृतस्य। निःऽनिजः। ददीरन्
वाक्यम् २: हव्यं नो मित्रो अर्यमा सुजातो राजा सुक्षत्रो वरुणो जुषन्त॥
पदानि : हव्यम्। नः। मित्रः। अर्यमा। सुऽजातः। राजा। सुऽक्षत्रः। वरुणः। जुषन्त

३१२. मण्डलम् ७, सूक्तम् ६४, मन्त्रः २ (ऋक्सङ्ख्या : ५६६८)
वाक्यम् १: आ राजाना महऋतस्य गोपा सिन्धुपती क्षत्रिया यातमर्वाक्।
पदानि : आ। राजाना। महः। ऋतस्य। गोपा। सिन्धुपती इति सिन्धुऽपती। क्षत्रिया। यातम्। अर्वाक्
वाक्यम् २: इळां नो मित्रावरुणोत वृष्टिमवं दिव इन्वतं जीरदानू॥
पदानि : इळाम्। नः। मित्रावरुणा। उत। वृष्टिम्। अव। दिवः। इन्वतम्। जीरदानू इति जीरऽदानू

३१३. मण्डलम् ७, सूक्तम् ६९, मन्त्रः ३ (ऋक्सङ्ख्या : ५७१७)
वाक्यम् १: स्वश्वा यशसा यातमर्वाग्दस्रा निधिं मधुमन्तं पिबाथः।
पदानि : सुऽअश्वा। यशसा। आ। यातम्। अर्वाक्। दस्रा। निऽधिम्। मधुऽमन्तम्। पिबाथः
वाक्यम् २: वि वां रथो वध्वाऽ यादमानोऽन्तान्दिवो बाधते वर्तनिभ्याम्॥
पदानि : वि। वाम्। रथः। वध्वा। यादमानः। अन्तान्। दिवः। बाधते। वर्तनिऽभ्याम्

३१४. मण्डलम् ७, सूक्तम् ७१, मन्त्रः १ (ऋक्सङ्ख्या : ५७३०)
वाक्यम् १: अप॒ स्वसु॒रुष॒सो॒ नग्नि॑हीते रि॒णक्ति॑ कृ॒ष्णीर॑रु॒षाय॒ पन्था॑म्।
पदानि : अप॑। स्वसुः॑। उ॒षसः॑। नक्। जि॒ही॒ते॒। रि॒णक्ति॑। कृ॒ष्णीः॑। अ॒रु॒षाय॑। पन्था॑म्
वाक्यम् २: अश्वा॑मघा॒ गोम॑घा॒ वां हु॒वेम॒ दिवा॒ नक्तं॒ शरु॑म॒स्मद्यु॑योतम्॥
पदानि : अश्व॑ऽमघा। गोऽम॑घा। वा॒म्। हु॒वेम॒। दिवा॑। नक्त॑म्। शरु॑म्। अ॒स्मत्। यु॒यो॒त॒म्

३१५. मण्डलम् ७, सूक्तम् ७६, मन्त्रः १ (ऋक्सङ्ख्या : ५७६०)
वाक्यम् १: उदु॒ ज्योति॑र॒मृतं॑ वि॒श्वज॑न्यं वि॒श्वान॑रः स॒विता॑ दे॒वो अ॑श्रेत्।
पदानि : उत्। ऊँ॒ इति॑। ज्योतिः॑। अ॒मृत॑म्। वि॒श्वऽज॑न्यम्। वि॒श्वान॑रः। स॒वि॒ता। दे॒वः। अ॒श्रे॒त्
वाक्यम् २: क्रत्वा॑ दे॒वाना॑मजनिष्ट॒ चक्षु॑रा॒विर॑कृ॒र्भुव॑नं॒ विश्व॑मुषाः॥
पदानि : क्रत्वा॑। दे॒वाना॑म्। अ॒ज॒नि॒ष्ट॒। चक्षुः॑। आ॒विः। अ॒कृ॒रित्य॑कृः। भुव॑नम्। विश्व॑म्। उ॒षाः॒

३१६. मण्डलम् ७, सूक्तम् ७६, मन्त्रः ३ (ऋक्सङ्ख्या : ५७६२)
वाक्यम् १: तानी॑दहा॑नि बहुला॒न्यास॒न्या प्रा॒चीन॒मुदि॑ता॒ सूर्य॑स्य।
पदानि : तानि॑। इत्। अहा॑नि। ब॒हु॒लानि॑। आ॒स॒न्। या। प्रा॒चीन॑म्। उत्ऽइ॑ता। सूर्य॑स्य
वाक्यम् २: यत॒: परि॑ जा॒र इ॑वा॒चर॒न्त्युषो॑ दद॒क्षे न पुन॑र्यतीवा॑॥
पदानि : यतः॑। परि॑। जा॒रःऽइ॑व। आ॒ऽच॒र॒न्ती। उषः॑। द॒द॒क्षे। न। पुनः॑। य॒तीऽइ॑व

३१७. मण्डलम् ७, सूक्तम् ७७, मन्त्रः ४ (ऋक्सङ्ख्या : ५७७०)
वाक्यम् १: अन्ति॑वामा दू॒रे अ॒मित्र॑मुच्छो॒र्वीं गव्यू॑ति॒मभ॑यं कृधी नः।
पदानि : अन्ति॑ऽवामा। दू॒रे। अ॒मित्र॑म्। उ॒च्छ॒। उ॒र्वीम्। गव्यू॑तिम्। अभ॑यम्। कृ॒धि॒। नः॒
वाक्यम् २: या॒वय॒ द्वेष॒ आ भ॑रा॒ वसू॑नि चो॒दय॒ राधो॑ गृण॒ते म॑घोनि॥
पदानि : य॒वय॑। द्वेषः॑। आ। भ॒र॒। वसू॑नि। चो॒दय॑। राधः॑। गृ॒ण॒ते। म॒घो॒नि॒

३१८. मण्डलम् ७, सूक्तम् ७८, मन्त्रः २ (ऋक्सङ्ख्या : ५७७४)
वाक्यम् १: प्रति॑ षीमग्निर्जरते समि॒द्धः प्रति॒ विप्रा॑सो म॒तिभि॑र्गृणन्तः।
पदानि : प्रति॑। सी॒म्। अ॒ग्निः। ज॒र॒ते॒। सम्ऽइ॑द्धः। प्रति॑। विप्रा॑सः। म॒तिऽभिः॑। गृ॒ण॒न्तः॑
वाक्यम् २: उ॒षा या॑ति॒ ज्योति॑षा॒ बाध॑माना॒ विश्वा॒ तमां॑सि दुरि॒ता॑प॒ देवी॥
पदानि : उ॒षाः॑। या॒ति॒। ज्योति॑षा। बाध॑माना। विश्वा॑। तमां॑सि। दुः॒ऽइ॒ता। अप॑। दे॒वी

३१९. मण्डलम् ७, सूक्तम् ८१, मन्त्रः ४ (ऋक्सङ्ख्या : ५७८९)
वाक्यम् १: उ॒च्छ॒न्ती या कृ॑णोषि॑ मं॒हना॑ महि॒ प्रख्यै॑ दे॒वि॒ स्व॑र्दृ॒शे।
पदानि : उ॒च्छ॒न्ती॑। या। कृ॒णोषि॑। मं॒हना॑। म॒हि॒। प्रऽख्यै॑। दे॒वि॒। स्वः॑। दृ॒शे
वाक्यम् २: तस्यास्ते रत्न॒भाज॑ ईमहे व॒यं स्याम॑ मा॒तुर्न सू॒नवः॑॥
पदानि : तस्याः॑। ते॒। र॒त्न॒ऽभाजः॑। ई॒म॒हे॒। व॒यम्। स्याम॑। मा॒तुः॒। न। सू॒नवः॑

३२०. मण्डलम् ७, सूक्तम् ८७, मन्त्रः ४ (ऋक्सङ्ख्या : ५८३३)
वाक्यम् १: उ॒वाच॑ मे॒ वरु॑णो मेधि॒राय॒ त्रिः स॒प्त नामाघ्न्या॑ बिभर्ति।
पदानि : उ॒वाच॑। मे॒। वरु॑णः। मे॒धि॒राय। त्रिः। स॒प्त। नाम॑। अघ्न्या॑। बि॒भ॒र्ति॒
वाक्यम् २: वि॒द्वान्प॒दस्य॑ गु॒ह्या॒ न वो॑चद्यु॒गाय॒ विप्र॒ उप॑राय॒ शिक्ष॑न्॥
पदानि : वि॒द्वान्। प॒दस्य॑। गु॒ह्या॑। न। वो॒च॒त्। यु॒गाय॑। विप्रः॑। उप॑राय। शिक्ष॑न्

३२१. मण्डलम् ७, सूक्तम् ९१, मन्त्रः ६ (ऋक्सङ्ख्या : ५८६१)
वाक्यम् १: या वां शतं नियुतो याः सहस्रमिन्द्रवायू विश्ववाराः सचन्ते ।
पदानि : याः । वाम् । शतम् । नियुतः । याः । सहस्रम् । इन्द्रवायू इति । विश्वऽवाराः । सचन्ते
वाक्यम् २: आभिर्यातं सुविदत्राभिरर्वाक्पातं नरा प्रतिभृतस्य मध्वः ॥
पदानि : आ । आभिः । यातम् । सुऽविदत्राभिः । अर्वाक् । पातम् । नरा । प्रतिऽभृतस्य । मध्वः

३२२. मण्डलम् ७, सूक्तम् ९२, मन्त्रः २ (ऋक्सङ्ख्या : ५८६४)
वाक्यम् १: प्र सोता जीरो अध्वरेष्वस्थात्सोममिन्द्राय वायवे पिबध्यै ।
पदानि : प्र । सोता । जीरः । अध्वरेषु । अस्थात् । सोमम् । इन्द्राय । वायवे । पिबध्यै
वाक्यम् २: प्र यद्वां मध्वो अग्रियं भरन्त्यध्वर्यवो देवयन्तः शचीभिः ॥
पदानि : प्र । यत् । वाम् । मध्वः । अग्रियम् । भरन्ति । अध्वर्यवः । देवऽयन्तः । शचीभिः

३२३. मण्डलम् ७, सूक्तम् ९५, मन्त्रः ५ (ऋक्सङ्ख्या : ५८९२)
वाक्यम् १: इमा जुह्वाना युष्मदा नमोभिः प्रति स्तोमं सरस्वति जुषस्व ।
पदानि : इमा । जुह्वानाः । युष्मत् । आ । नमःऽभिः । प्रति । स्तोमम् । सरस्वति । जुषस्व
वाक्यम् २: तव शर्मन्प्रियतमे दधाना उप स्थेयाम शरणं न वृक्षम् ॥
पदानि : तव । शर्मन् । प्रियऽतमे । दधानाः । उप । स्थेयाम । शरणम् । न । वृक्षम्

३२४. मण्डलम् ७, सूक्तम् ९७, मन्त्रः २ (ऋक्सङ्ख्या : ५९०१)
वाक्यम् १: आ दैव्या वृणीमहेऽवांसि बृहस्पतिर्नो मह आ सखायः ।
पदानि : आ । दैव्या । वृणीमहे । अवांसि । बृहस्पतिः । नः । महे । आ । सखायः
वाक्यम् २: यथा भवेम मीळ्हुषे अनागा यो नो दाता परावतः पितेव ॥
पदानि : यथा । भवेम । मीळ्हुषे । अनागाः । यः । नः । दाता । पराऽवतः । पिताऽइव

३२५. मण्डलम् ७, सूक्तम् ९७, मन्त्रः ३ (ऋक्सङ्ख्या : ५९०२)
वाक्यम् १: तमु ज्येष्ठं नमसा हविर्भिः सुशेवं ब्रह्मणस्पतिं गृणीषे ।
पदानि : तम् । ऊँ इति । ज्येष्ठम् । नमसा । हविःऽभिः । सुऽशेवम् । ब्रह्मणः । पतिम् । गृणीषे
वाक्यम् २: इन्द्रं श्लोको महि दैव्यः सिषक्तु यो ब्रह्मणो देवकृतस्य राजा ॥
पदानि : इन्द्रम् । श्लोकः । महि । दैव्यः । सिसक्तु । यः । ब्रह्मणः । देवऽकृतस्य । राजा

३२६. मण्डलम् ७, सूक्तम् ९८, मन्त्रः ३ (ऋक्सङ्ख्या : ५९१२)
वाक्यम् १: जज्ञानः सोमं सहसे पपाथ प्र ते माता महिमानमुवाच ।
पदानि : जज्ञानः । सोमम् । सहसे । पपाथ । प्र । ते । माता । महिमानम् । उवाच
वाक्यम् २: एन्द्र पप्राथोर्वन्तरिक्षं युधा देवेभ्यो वरिवश्चकर्थ ॥
पदानि : आ । इन्द्र । पप्राथ । उरु । अन्तरिक्षम् । युधा । देवेभ्यः । वरिवः । चकर्थ

३२७. मण्डलम् ७, सूक्तम् ९८, मन्त्रः ६ (ऋक्सङ्ख्या : ५९१५)
वाक्यम् १: तवेदं विश्वमभितः पशव्यं यत्पश्यसि चक्षसा सूर्यस्य ।
पदानि : तव । इदम् । विश्वम् । अभितः । पशव्यम् । यत् । पश्यसि । चक्षसा । सूर्यस्य

वाक्यम् २: गवा॑मसि॒ गोप॑तिरेक॑ इन्द्र भक्षी॒महि॑ ते॒ प्रय॑तस्य॒ वस्वः॑ ॥
पदानि : गवा॑म्। अ॒सि॒। गोऽप॑तिः। एकः॑। इ॒न्द्र॒। भ॒क्षी॒महि॑। ते॒। प्रऽय॑तस्य। वस्वः॑

३२८. मण्डलम् ७, सूक्तम् १०३, मन्त्रः ३ (ऋक्सङ्ख्या : ५९४२)
वाक्यम् १: यदी॑मेनाँ उश॒तो अ॒भ्यव॑र्षीत्तृ॒ष्यावं॑तः प्रावृ॒ष्यागं॑तायाम्।
पदानि : यत्। ई॒म्। एना॑न्। उ॒श॒तः। अ॒भि। अव॑र्षीत्। तृ॒ष्याऽवं॑तः। प्रा॒वृषि॑। आऽगं॑तायाम्
वाक्यम् २: अ॒रख्व॑लीकृत्या॒ पि॒तर॑ं न पु॒त्रो अ॒न्यो अ॒न्यमुप॒ वद॑न्तमेति ॥
पदानि : अ॒रख्व॑लीकृत्य॑। पि॒तर॑म्। न। पु॒त्रः। अ॒न्यः। अ॒न्यम्। उप॑। वद॑न्तम्। ए॒ति॒

३२९. मण्डलम् ७, सूक्तम् १०३, मन्त्रः ७ (ऋक्सङ्ख्या : ५९४६)
वाक्यम् १: ब्रा॒ह्म॒णासो॑ अतिरा॒त्रे न सोमे॒ सरो॒ न पू॒र्ण॒मभि॑तो वद॑न्तः।
पदानि : ब्रा॒ह्म॒णासः॑। अ॒ति॒ऽरा॒त्रे। न। सोमे। सरः॑। न। पू॒र्ण॒म्। अ॒भितः॑। वद॑न्तः
वाक्यम् २: सं॒व॒त्स॒रस्य॒ तदहः॒ परि॑ ष्ठ यन्म॑ण्डू॒काः प्रा॑वृषी॒णं ब॒भूव॑ ॥
पदानि : सं॒व॒त्स॒रस्य॑। तत्। अहः॑। परि॑। स्थ॒। यत्। म॒ण्डू॒काः॑। प्रा॒वृ॒षी॒ण॒म्। ब॒भूव॑

३३०. मण्डलम् ७, सूक्तम् १०४, मन्त्रः १७ (ऋक्सङ्ख्या : ५९६६)
वाक्यम् १: प्र या जिगा॑ति ख॒र्गलेव॒ नक्त॒मप॑ द्रु॒हा त॒न्व॑१॒॑ गूह॑माना।
पदानि : प्र। या। जिगा॑ति। ख॒र्गला॑ऽइव। नक्त॑म्। अप॑। द्रु॒हा। त॒न्व॑म्। गूह॑माना
वाक्यम् २: व॒व्रा॑ँ अ॑न॒न्ताँ अव॒ सा प॑दीष्ट ग्रावा॑णो घ्नन्तु र॒क्षस॑ उप॒ब्दैः॑ ॥
पदानि : व॒व्रान्। अ॒न॒न्तान्। अव॑। सा। प॒दी॒ष्ट॒। ग्रावा॑णः। घ्न॒न्तु॒। र॒क्षसः॑। उ॒प॒ब्दैः॑

३३१. मण्डलम् ८, सूक्तम् १, मन्त्रः ३३ (ऋक्सङ्ख्या : ६००७)
वाक्यम् १: अध॒ प्लायो॑गि॒रति॑ दासदु॒न्याना॑सङ्गो अ॑ग्ने दु॒शभिः॑ स॒हस्रैः॑।
पदानि : अध॑। प्लायो॑गिः। अति॑। दा॒स॒त्। अ॒न्यान्। आ॒ऽस॒ङ्गः॑। अ॒ग्ने॒। दु॒शऽभिः॑। स॒हस्रैः॑
वाक्यम् २: अधो॒क्षणो॒ दश॒ मह्यं॑ रुश॑न्तो न॒ळा इ॑व॒ सर॑सो॒ नि॑रतिष्ठन् ॥
पदानि : अध॑। उ॒क्षणः॑। दश॑। मह्य॑म्। रुश॑न्तः। न॒ळाःऽइ॑व। सर॑सः। निः॑। अ॒ति॒ष्ठ॒न्

३३२. मण्डलम् ८, सूक्तम् ४, मन्त्रः २ (ऋक्सङ्ख्या : ६०७६)
वाक्यम् १: यद्वा रु॒मे रु॒शं॑मे॒ श्याव॑के॒ कृप॒ इन्द्रं॑ मा॒दय॑से॒ सचा॑।
पदानि : यत्। वा॒। रु॒मे। रु॒शं॑मे। श्याव॑के। कृपे॑। इन्द्र॑म्। मा॒दय॑से। सचा॑
वाक्यम् २: कण्वा॑सस्त्वा॒ ब्रह्म॑भिः॒ स्तोम॑वाहस॒ इन्द्रा य॑च्छ॒न्त्या ग॑हि ॥
पदानि : कण्वा॑सः। त्वा॒। ब्रह्म॑ऽभिः। स्तोम॑ऽवाहसः। इन्द्र॑। आ। य॒च्छ॒न्ति॒। आ। ग॒हि॒

३३३. मण्डलम् ८, सूक्तम् ४, मन्त्रः ८ (ऋक्सङ्ख्या : ६०८२)
वाक्यम् १: स॒व्यामनु॑ स्फि॒ग्यं॑ वावसे॒ वृषा॒ न दा॒नो अ॑स्य रोषति।
पदानि : स॒व्याम्। अनु॑। स्फि॒ग्य॑म्। व॒व॒से॒। वृषा॑। न। दा॒नः। अ॒स्य॒। रो॒ष॒ति॒
वाक्यम् २: मध्वा॒ सं॑पृ॒क्ताः सार॒घेण॑ धे॒नव॒स्तूय॑मेहि द्र॒वा॒ पिब॑ ॥
पदानि : मध्वा॑। सम्ऽपृ॒क्ताः। सा॒र॒घेण॑। धे॒नवः॑। तूय॑म्। आ। इ॒हि॒। द्र॒व॒। पिब॑

३३४. मण्डलम् ८, सूक्तम् ८, मन्त्रः ६ (ऋक्सङ्ख्या : ६२२४)

वाक्यम् १: यच्चिद्धि वां पुर ऋषयो जुहूरेऽवसे नरा ।
पदानि : यत् । चित् । हि । वाम् । पुरा । ऋषयः । जुहूरे । अवसे । नरा
वाक्यम् २: आ यातमश्विना गतमुपेमां सुष्टुतिं मम ॥
पदानि : आ । यातम् । अश्विना । आ । गतम् । उप । इमाम् । सुऽस्तुतिम् । मम

३३५. मण्डलम् ८, सूक्तम् २०, मन्त्रः १४ (ऋक्सङ्ख्या : ६४७२)
वाक्यम् १: तान्वन्दस्व मरुतस्ताँ उप स्तुहि तेषां हि धुनीनाम् ।
पदानि : तान् । वन्दस्व । मरुतः । तान् । उप । स्तुहि । तेषाम् । हि । धुनीनाम्
वाक्यम् २: अराणां न चरमस्तदेषां दाना महा तदेषाम् ॥
पदानि : अराणाम् । न । चरमः । तत् । एषाम् । दाना । महा । तत् । एषाम्

३३६. मण्डलम् ८, सूक्तम् २२, मन्त्रः ४ (ऋक्सङ्ख्या : ६५०६)
वाक्यम् १: युवो रथस्य परि चक्रमीयत ईर्मान्यद्वामिषण्यति ।
पदानि : युवोः । रथस्य । परि । चक्रम् । ईयते । ईर्मा । अन्यत् । वाम् । इषण्यति
वाक्यम् २: अस्माँ अच्छा सुमतिर्वां शुभस्पती आ धेनुरिव धावतु ॥
पदानि : अस्मान् । अच्छ । सुऽमतिः । वाम् । शुभः । पती इति । आ । धेनुःऽइव । धावतु

३३७. मण्डलम् ८, सूक्तम् २७, मन्त्रः ६ (ऋक्सङ्ख्या : ६६३५)
वाक्यम् १: अभि प्रिया मरुतो या वो अश्व्या हव्या मित्र प्रयाथन ।
पदानि : अभि । प्रिया । मरुतः । या । वः । अश्व्या । हव्या । मित्र । प्रऽयाथन
वाक्यम् २: आ बर्हिरिन्द्रो वरुणस्तुरा नर आदित्यासः सदन्तु नः ॥
पदानि : आ । बर्हिः । इन्द्रः । वरुणः । तुराः । नरः । आदित्यासः । सदन्तु । नः

३३८. मण्डलम् ८, सूक्तम् २७, मन्त्रः ८ (ऋक्सङ्ख्या : ६६३७)
वाक्यम् १: आ प्र यात मरुतो विष्णो अश्विना पूषन्माकीनया धिया ।
पदानि : आ । प्र । यात । मरुतः । विष्णो इति । अश्विना । पूषन् । माकीनया । धिया
वाक्यम् २: इन्द्र आ यातु प्रथमः सनिष्युभिर्वृषा यो वृत्रहा गृणे ॥
पदानि : इन्द्रः । आ । यातु । प्रथमः । सनिष्युऽभिः । वृषा । यः । वृत्रऽहा । गृणे

३३९. मण्डलम् ८, सूक्तम् ४२, मन्त्रः ३ (ऋक्सङ्ख्या : ६८३८)
वाक्यम् १: इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण सं शिशाधि ।
पदानि : इमाम् । धियम् । शिक्षमाणस्य । देव । क्रतुम् । दक्षम् । वरुण । सम् । शिशाधि
वाक्यम् २: ययाति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेम ॥
पदानि : ययां । अति । विश्वा । दुःऽइता । तरेम । सुऽतर्माणम् । अधि । नावम् । रुहेम

३४०. मण्डलम् ८, सूक्तम् ४६, मन्त्रः १७ (ऋक्सङ्ख्या : ६९६३)
वाक्यम् १: महः सु वो अरमिषे स्तवामहे मीळ्हुषे अरंगमाय जग्मये ।
पदानि : महः । सु । वः । अरम् । इषे । स्तवामहे । मीळ्हुषे । अरम्ऽगमाय । जग्मये
वाक्यम् २: यज्ञेभिर्गीर्भिर्विश्वमनुषां मरुतामियक्षसि गाये त्वा नमसा गिरा ॥
पदानि : यज्ञेभिः । गीःऽभिः । विश्वऽमनुषाम् । मरुताम् । इयक्षसि । गाये । त्वा । नमसा । गिरा

३४१. मण्डलम् ८, सूक्तम् ४६, मन्त्रः २१ (ऋक्सङ्ख्या : ६९६७)
वाक्यम् १: आ स एंतु य ईवदाँ अदेवः पूर्तमांदुदे।
पदानि : आ। सः। एतु। यः। ईवंत्। आ। अदेवः। पूर्तम्। आऽदुदे
वाक्यम् २: यथां चिद्वशो अश्व्यः पृथुश्रवंसि कानीतेऽस्या व्युष्यांदुदे॥
पदानि : यथां। चित्। वशः। अश्व्यः। पृथुऽश्रवंसि। कानीते। अस्याः। विऽउषिं। आऽदुदे

३४२. मण्डलम् ८, सूक्तम् ४८, मन्त्रः २ (ऋक्सङ्ख्या : ६९९९)
वाक्यम् १: अन्तश्च प्रागा अदितिर्भवास्यवयाता हरंसो दैव्यस्य।
पदानि : अन्तरितिं। च। प्र। अगाः। अदितिः। भवासि। अवऽयाता। हरंसः। दैव्यस्य
वाक्यम् २: इन्दुविन्द्रंस्य सख्यं जुषाणः श्रौष्टींव धुरमनु राय ऋध्याः॥
पदानि : इन्दो इतिं। इन्द्रंस्य। सख्यम्। जुषाणः। श्रौष्टींऽइव। धुरंम्। अनु। राये। ऋध्याः

३४३. मण्डलम् ८, सूक्तम् ४८, मन्त्रः ११ (ऋक्सङ्ख्या : ७००८)
वाक्यम् १: अप त्या अस्थुरनिरा अमींवा निरंत्रसन्तमिषीचीरभैषुः।
पदानि : अपं। त्याः। अस्थुः। अनिराः। अमींवाः। निः। अत्रसन्। तमिषीचीः। अभैषुः
वाक्यम् २: आ सोमो अस्माँ अरुहद्बिहायां अगन्म यत्र प्रतिरन्त आयुः॥
पदानि : आ। सोमः। अस्मान्। अरुहत्। विऽहायाः। अगन्म। यत्र। प्रऽतिरन्ते। आयुः

३४४. मण्डलम् ८, सूक्तम् ५९, मन्त्रः ६ (ऋक्सङ्ख्या : ७०९१)
वाक्यम् १: इन्द्रावरुणा यदृषिभ्यो मनीषां वाचो मतिं श्रुतमदत्तमग्रे।
पदानि : इन्द्रावरुणा। यत्। ऋषिऽभ्यः। मनीषाम्। वाचः। मतिम्। श्रुतम्। अदत्तम्। अग्रे
वाक्यम् २: यानि स्थानान्यसृजन्त धीरा यज्ञं तन्वानास्तपसाभ्यपश्यम्॥
पदानि : यानिं। स्थानांनि। असृजन्त। धीराः। यज्ञम्। तन्वानाः। तपसा। अभि। अपश्यम्

३४५. मण्डलम् ८, सूक्तम् ६१, मन्त्रः ४ (ऋक्सङ्ख्या : ७११६)
वाक्यम् १: अप्रामिसत्य मघवन्तथेदसदिन्द्र क्रत्वा यथा वशः।
पदानि : अप्रांमिऽसत्य। मघऽवन्। तथां। इत्। असत्। इन्द्र। क्रत्वां। यथां। वशः
वाक्यम् २: सनेम वाजं तवं शिप्रिन्नवसा मक्षू चिद्यन्तो अद्रिवः॥
पदानि : सनेमं। वाजम्। तवं। शिप्रिन्। अवसा। मक्षु। चित्। यन्तः। अद्रिऽवः

३४६. मण्डलम् ८, सूक्तम् ६६, मन्त्रः ४ (ऋक्सङ्ख्या : ७१८२)
वाक्यम् १: निखांतं चिद्यः पुरुसंभृतं वसूदिद्वपंति दाशुषे।
पदानि : निऽखांतम्। चित्। यः। पुरुऽसंभृतम्। वसु। उत्। इत्। वपंति। दाशुषे
वाक्यम् २: वज्री सुशिप्रो हर्यश्व इत्करदिन्द्रः क्रत्वा यथा वशांत्॥
पदानि : वज्री। सुऽशिप्रः। हरिंऽअश्वः। इत्। करत्। इन्द्रः। क्रत्वां। यथां। वशांत्

३४७. मण्डलम् ८, सूक्तम् ६६, मन्त्रः १४ (ऋक्सङ्ख्या : ७१९२)
वाक्यम् १: त्वं नो अस्या अमतेरुत क्षुधोऽभिशस्तेरव स्पृधि।
पदानि : त्वम्। नः। अस्याः। अमतेः। उत। क्षुधः। अभिऽशस्तेः। अव। स्पृधि
वाक्यम् २: त्वं न ऊती तवं चित्रया धिया शिक्षा शचिष्ठ गातुवित्॥

पदानि : त्वम्। नः। ऊती। तव। चित्रया। धिया। शिक्ष। शचिष्ठ। गातुऽवित्

३४८. मण्डलम् ८, सूक्तम् ८७, मन्त्रः १ (ऋक्सङ्ख्या : ७४५१)
वाक्यम् १: द्युम्नी वां स्तोमो अश्विना क्रिविर्न सेक आ गतम्।
पदानि : द्युम्नी। वाम्। स्तोमः। अश्विना। क्रिविः। न। सेके। आ। गतम्
वाक्यम् २: मध्वः सुतस्य स दिवि प्रियो नरा पातं गौराविवेरिणे॥
पदानि : मध्वः। सुतस्य। सः। दिवि। प्रियः। नरा। पातम्। गौरौऽइव। इरिणे

३४९. मण्डलम् ८, सूक्तम् ९६, मन्त्रः १ (ऋक्सङ्ख्या : ७५७१)
वाक्यम् १: अस्मा उषास आतिरन्त यामन्निन्द्राय नक्तमूर्म्याः सुवाचः।
पदानि : अस्मै। उषसः। आ। अतिरन्त। यामन्। इन्द्राय। नक्तम्। ऊर्म्याः। सुऽवाचः
वाक्यम् २: अस्मा आपो मातरः सप्त तस्थुर्नृभ्यस्तराय सिन्धवः सुपाराः॥
पदानि : अस्मै। आपः। मातरः। सप्त। तस्थुः। नृऽभ्यः। तराय। सिन्धवः। सुऽपाराः

३५०. मण्डलम् ८, सूक्तम् ९९, मन्त्रः ६ (ऋक्सङ्ख्या : ७६२४)
वाक्यम् १: अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न मातरा।
पदानि : अनु। ते। शुष्मम्। तुरयन्तम्। ईयतुः। क्षोणी इति। शिशुम्। न। मातरा
वाक्यम् २: विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि॥
पदानि : विश्वाः। ते। स्पृधः। श्नथयन्त। मन्यवे। वृत्रम्। यत्। इन्द्र। तूर्वसि

३५१. मण्डलम् ९, सूक्तम् ६८, मन्त्रः ६ (ऋक्सङ्ख्या : ८३०६)
वाक्यम् १: मन्द्रस्य रूपं विविदुर्मनीषिणः श्येनो यदन्धो अभरत्परावतः।
पदानि : मन्द्रस्य। रूपम्। विविदुः। मनीषिणः। श्येनः। यत्। अन्धः। अभरत्। पराऽवतः
वाक्यम् २: तं मर्जयन्त सुवृधं नदीष्वाँ उशन्तमंशुं परियन्तमूग्मियम्॥
पदानि : तम्। मर्जयन्त। सुऽवृधम्। नदीषु। आ। उशन्तम्। अंशुम्। परिऽयन्तम्। ऋग्मियम्

३५२. मण्डलम् ९, सूक्तम् ७०, मन्त्रः १ (ऋक्सङ्ख्या : ८३२१)
वाक्यम् १: त्रिरस्मै सप्त धेनवो दुदुह्रे सत्यामाशिरं पूर्व्ये व्योमनि।
पदानि : त्रिः। अस्मै। सप्त। धेनवः। दुदुह्रे। सत्याम्। आऽशिरम्। पूर्व्ये। विऽओमनि
वाक्यम् २: चत्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्धत॥
पदानि : चत्वारि। अन्या। भुवनानि। निःऽनिजे। चारूणि। चक्रे। यत्। ऋतैः। अवर्धत

३५३. मण्डलम् ९, सूक्तम् ७०, मन्त्रः ४ (ऋक्सङ्ख्या : ८३२४)
वाक्यम् १: स मृज्यमानो दशभिः सुकर्मभिः प्र मध्यमासु मातृषु प्रमे सचा।
पदानि : सः। मृज्यमानः। दशऽभिः। सुकर्मऽभिः। प्र। मध्यमासु। मातृषु। प्रऽमे। सचा
वाक्यम् २: व्रतानि पानो अमृतस्य चारुण उभे नृचक्षा अनु पश्यते विशौ॥
पदानि : व्रतानि। पानः। अमृतस्य। चारुणः। उभे इति। नृऽचक्षाः। अनु। पश्यते। विशौ

३५४. मण्डलम् ९, सूक्तम् ७०, मन्त्रः ६ (ऋक्सङ्ख्या : ८३२६)
वाक्यम् १: स मातरा न ददृशान उस्रियो नानददेति मरुतामिव स्वनः।

पदानि : सः । मातरा । न । ददृशानः । उस्रियः । नानदत् । एति । मरुताम्ऽइव । स्वनः
वाक्यम् २: जानन्नृतं प्रथमं यत्स्वर्णरं प्रशस्तये कमवृणीत सुक्रतुः ॥
पदानि : जानन् । ऋतम् । प्रथमम् । यत् । स्वःऽनरम् । प्रऽशस्तये । कम् । अवृणीत । सुऽक्रतुः

३५५. मण्डलम् ९, सूक्तम् ७२, मन्त्रः ४ (ऋक्सङ्ख्या : ८३४३)
वाक्यम् १: नृधूतो अद्रिषुतो बर्हिषि प्रियः पतिर्गवां प्रदिव इन्दुर्ऋत्वियः ।
पदानि : नृऽधूतः । अद्रिऽसुतः । बर्हिषि । प्रियः । पतिः । गवाम् । प्रऽदिवः । इन्दुः । ऋत्वियः
वाक्यम् २: पुरंधिवान्मनुषो यज्ञसाधनः शुचिर्धिया पवते सोम इन्द्र ते ॥
पदानि : पुरंन्धिऽवान् । मनुषः । यज्ञऽसाधनः । शुचिः । धिया । पवते । सोमः । इन्द्र । ते

३५६. मण्डलम् ९, सूक्तम् ७३, मन्त्रः २ (ऋक्सङ्ख्या : ८३५०)
वाक्यम् १: सम्यक्सम्यञ्चो महिषा अहेषत सिन्धोरूर्मावधि वेना अवीविपन् ।
पदानि : सम्यक् । सम्यञ्चः । महिषाः । अहेषत । सिन्धोः । ऊर्मौ । अधि । वेनाः । अवीविपन्
वाक्यम् २: मधोर्धारांभिर्जनयन्तो अर्कमित्प्रियामिन्द्रस्य तन्वंमवीवृधन् ॥
पदानि : मधोः । धाराभिः । जनयन्तः । अर्कम् । इत् । प्रियाम् । इन्द्रस्य । तन्वम् । अवीवृधन्

३५७. मण्डलम् ९, सूक्तम् ७५, मन्त्रः १ (ऋक्सङ्ख्या : ८३६७)
वाक्यम् १: अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते ।
पदानि : अभि । प्रियाणि । पवते । चनःऽहितः । नामानि । यह्वः । अधि । येषु । वर्धते
वाक्यम् २: आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वञ्चमरुहद्विचक्षणः ॥
पदानि : आ । सूर्यस्य । बृहतः । बृहन् । अधि । रथम् । विष्वञ्चम् । अरुहत् । विऽचक्षणः

३५८. मण्डलम् ९, सूक्तम् ७७, मन्त्रः १ (ऋक्सङ्ख्या : ८३७७)
वाक्यम् १: एष प्र कोशे मधुमाँ अचिक्रददिन्द्रस्य वज्रो वपुषो वपुष्टरः ।
पदानि : एषः । प्र । कोशे । मधुऽमान् । अचिक्रदत् । इन्द्रस्य । वज्रः । वपुषः । वपुःऽतरः
वाक्यम् २: अभीमृतस्य सुदुघा घृतश्चुतो वाश्रा अर्षन्ति पयसेव धेनवः ॥
पदानि : अभि । ईम् । ऋतस्य । सुऽदुघाः । घृतऽश्चुतः । वाश्राः । अर्षन्ति । पयसाऽइव । धेनवः

३५९. मण्डलम् ९, सूक्तम् ७८, मन्त्रः ४ (ऋक्सङ्ख्या : ८३८५)
वाक्यम् १: गोजिन्नः सोमो रथजिद्धिरण्यजित्स्वर्जिदब्जित्पवते सहस्रजित् ।
पदानि : गोऽजित् । नः । सोमः । रथऽजित् । हिरण्यऽजित् । स्वःऽजित् । अप्ऽजित् । पवते । सहस्रऽजित्
वाक्यम् २: यं देवासश्चक्रिरे पीतये मदं स्वादिष्ठं द्रप्समरुणं मयोभुवम् ॥
पदानि : यम् । देवासः । चक्रिरे । पीतये । मदम् । स्वादिष्ठम् । द्रप्सम् । अरुणम् । मयःऽभुवम्

३६०. मण्डलम् ९, सूक्तम् ८५, मन्त्रः ५ (ऋक्सङ्ख्या : ८४२१)
वाक्यम् १: कनिक्रदत्कलशे गोभिरज्यसे व्य१व्ययं समया वारमर्षसि ।
पदानि : कनिक्रदत् । कलशे । गोभिः । अज्यसे । वि । अव्ययम् । समया । वारम् । अर्षसि
वाक्यम् २: मर्मृज्यमानो अत्यो न सानसिरिन्द्रस्य सोम जठरे समक्षरः ॥
पदानि : मर्मृज्यमानः । अत्यः । न । सानसिः । इन्द्रस्य । सोम । जठरे । सम् । अक्षरः

३६१. मण्डलम् ९, सूक्तम् ८५, मन्त्रः ८ (ऋक्सङ्ख्या : ८४२४)
वाक्यम् १: पवमानो अभ्यर्षा सुवीर्यमुर्वीं गव्यूतिं महि शर्म सप्रथः ।
पदानि : पवमानः । अभि । अर्ष । सुऽवीर्यम् । उर्वीम् । गव्यूतिम् । महि । शर्म । सऽप्रथः
वाक्यम् २: माकिर्नो अस्य परिषूतिरीशतेन्दो जयेम त्वया धनंधनम् ॥
पदानि : माकिः । नः । अस्य । परिऽसूतिः । ईशत । इन्दो इति । जयेम । त्वया । धनम्ऽधनम्

३६२. मण्डलम् ९, सूक्तम् ८६, मन्त्रः ७ (ऋक्सङ्ख्या : ८४३५)
वाक्यम् १: यज्ञस्य केतुः पवते स्वध्वरः सोमो देवानामुप याति निष्कृतम् ।
पदानि : यज्ञस्य । केतुः । पवते । सुऽअध्वरः । सोमः । देवानाम् । उप । याति । निःऽकृतम्
वाक्यम् २: सहस्रधारः परि कोशमर्षति वृषा पवित्रमत्येति रोरुवत् ॥
पदानि : सहस्रंऽधारः । परि । कोशम् । अर्षति । वृषा । पवित्रम् । अति । एति । रोरुवत्

३६३. मण्डलम् ९, सूक्तम् ८६, मन्त्रः २० (ऋक्सङ्ख्या : ८४४८)
वाक्यम् १: मनीषिभिः पवते पूर्व्यः कविर्नृभिर्यतः परि कोशाँ अचिक्रदत् ।
पदानि : मनीषिऽभिः । पवते । पूर्व्यः । कविः । नृऽभिः । यतः । परि । कोशान् । अचिक्रदत्
वाक्यम् २: त्रितस्य नाम जनयन्मधु क्षरदिन्द्रस्य वायोः सख्याय कर्तवे ॥
पदानि : त्रितस्य । नाम । जनयन् । मधु । क्षरत् । इन्द्रस्य । वायोः । सख्याय । कर्तवे

३६४. मण्डलम् ९, सूक्तम् ८६, मन्त्रः २३ (ऋक्सङ्ख्या : ८४५१)
वाक्यम् १: अद्रिभिः सुतः पवसे पवित्र आँ इन्दविन्द्रस्य जठरेष्वाविशन् ।
पदानि : अद्रिऽभिः । सुतः । पवसे । पवित्रे । आ । इन्दो इति । इन्द्रस्य । जठरेषु । आऽविशन्
वाक्यम् २: त्वं नृचक्षा अभवो विचक्षण सोम गोत्रमङ्गिरोभ्योऽवृणोरप ॥
पदानि : त्वम् । नृऽचक्षाः । अभवः । विऽचक्षण । सोम । गोत्रम् । अङ्गिरःऽभ्यः । अवृणोः । अप

३६५. मण्डलम् ९, सूक्तम् ८६, मन्त्रः ४१ (ऋक्सङ्ख्या : ८४६९)
वाक्यम् १: स भन्दना उदियर्ति प्रजावतीर्विश्वायुर्विश्वाः सुभरा अहर्दिवि ।
पदानि : सः । भन्दनाः । उत् । इयर्ति । प्रजाऽवतीः । विश्वऽआयुः । विश्वाः । सुऽभराः । अहःऽदिवि
वाक्यम् २: ब्रह्म प्रजावद्रयिमश्वपस्त्यं पीत इन्दविन्द्रमस्मभ्यं याचतात् ॥
पदानि : ब्रह्म । प्रजाऽवत् । रयिम् । अश्वऽपस्त्यम् । पीतः । इन्दो इति । इन्द्रम् । अस्मभ्यम् । याचतात्

३६६. मण्डलम् ९, सूक्तम् ८६, मन्त्रः ४६ (ऋक्सङ्ख्या : ८४७४)
वाक्यम् १: असर्जि स्कम्भो दिव उद्यतो मदः परि त्रिधातुर्भुवनान्यर्षति ।
पदानि : असर्जि । स्कम्भः । दिवः । उत्ऽयतः । मदः । परि । त्रिऽधातुः । भुवनानि । अर्षति
वाक्यम् २: अंशुं रिहन्ति मतयः पनिप्नतं गिरा यदि निर्णिजमृग्मिणो ययुः ॥
पदानि : अंशुम् । रिहन्ति । मतयः । पनिप्नतम् । गिरा । यदि । निःऽनिजम् । ऋग्मिणः । ययुः

३६७. मण्डलम् ९, सूक्तम् ८८, मन्त्रः ६ (ऋक्सङ्ख्या : ८४९१)
वाक्यम् १: एते सोमा अति वाराण्यव्या दिव्या न कोशासो अभ्रवर्षाः ।
पदानि : एते । सोमाः । अति । वाराणि । अव्या । दिव्याः । न । कोशासः । अभ्रऽवर्षाः
वाक्यम् २: वृथा समुद्रं सिन्धवो न नीचीः सुतासो अभि कलशाँ असृग्रन् ॥
पदानि : वृथा । समुद्रम् । सिन्धवः । न । नीचीः । सुतासः । अभि । कलशान् । असृग्रन्

३६८. मण्डलम् ९, सूक्तम् ८९, मन्त्रः ६ (ऋक्सङ्ख्या : ८४९९)
वाक्यम् १: विष्टम्भो दिवो धरुणः पृथिव्या विश्वा उत क्षितयो हस्ते अस्य।
पदानि : विष्टम्भः। दिवः। धरुणः। पृथिव्याः। विश्वाः। उत। क्षितयः। हस्ते। अस्य
वाक्यम् २: असत्त उत्सो गृणते नियुत्वान्मध्वो अंशुः पवत इन्द्रियाय॥
पदानि : असत्। ते। उत्सः। गृणते। नियुत्वान्। मध्वः। अंशुः। पवते। इन्द्रियाय

३६९. मण्डलम् ९, सूक्तम् ९१, मन्त्रः १ (ऋक्सङ्ख्या : ८५०७)
वाक्यम् १: असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमो मनीषी।
पदानि : असर्जि। वक्वा। रथ्ये। यथा। आजौ। धिया। मनोता। प्रथमः। मनीषी
वाक्यम् २: दश स्वसारो अधि सानो अव्येऽजन्ति वह्निं सदनान्यच्छ॥
पदानि : दश। स्वसारः। अधि। सानौ। अव्ये। अजन्ति। वह्निम्। सदनानि। अच्छ

३७०. मण्डलम् ९, सूक्तम् ९२, मन्त्रः ३ (ऋक्सङ्ख्या : ८५१५)
वाक्यम् १: प्र सुमेधा गातुविद्विश्वदेवः सोमः पुनानः सदं एति नित्यम्।
पदानि : प्र। सुऽमेधाः। गातुऽवित्। विश्वऽदेवः। सोमः। पुनानः। सदः। एति। नित्यम्
वाक्यम् २: भुवद्विश्वेषु काव्येषु रन्तानु जनान्यतते पञ्च धीरः॥
पदानि : भुवत्। विश्वेषु। काव्येषु। रन्ता। अनु। जनान्। यतते। पञ्च। धीरः

३७१. मण्डलम् ९, सूक्तम् ९२, मन्त्रः ६ (ऋक्सङ्ख्या : ८५१८)
वाक्यम् १: परि सद्मेव पशुमान्ति होता राजा न सत्यः समितीरियानः।
पदानि : परि। सद्म। इव। पशुऽमन्ति। होता। राजा। न। सत्यः। सम्ऽइतीः। इयानः
वाक्यम् २: सोमः पुनानः कलशाँ अयासीत्सीदन्मृगो न महिषो वनेषु॥
पदानि : सोमः। पुनानः। कलशान्। अयासीत्। सीदन्। मृगः। न। महिषः। वनेषु

३७२. मण्डलम् ९, सूक्तम् ९३, मन्त्रः ३ (ऋक्सङ्ख्या : ८५२१)
वाक्यम् १: उत प्र पिप्य ऊधरघ्न्यायाइन्दुर्धाराभिः सचते सुमेधाः।
पदानि : उत। प्र। पिप्ये। ऊधः। अघ्न्यायाः। इन्दुः। धाराभिः। सचते। सुऽमेधाः
वाक्यम् २: मूर्धानं गावः पयसा चमूष्वभि श्रीणन्ति वसुभिर्न निक्तैः॥
पदानि : मूर्धानम्। गावः। पयसा। चमूषु। अभि। श्रीणन्ति। वसुऽभिः। न। निक्तैः

३७३. मण्डलम् ९, सूक्तम् ९६, मन्त्रः ८ (ऋक्सङ्ख्या : ८५४१)
वाक्यम् १: स मत्सरः पृत्सु वन्वन्नवातः सहस्ररेता अभि वाजमर्ष।
पदानि : सः। मत्सरः। पृत्ऽसु। वन्वन्। अवातः। सहस्रऽरेताः। अभि। वाजम्। अर्ष
वाक्यम् २: इन्द्रायेन्दो पवमानो मनीष्यंशोरूर्मिमीरय गा इषण्यन्॥
पदानि : इन्द्राय। इन्दो इति। पवमानः। मनीषी। अंशोः। ऊर्मिम्। ईरय। गाः। इषण्यन्

३७४. मण्डलम् ९, सूक्तम् ९६, मन्त्रः २३ (ऋक्सङ्ख्या : ८५५६)
वाक्यम् १: अपघ्नन्नेषि पवमान शत्रून्प्रियां न जारो अभिगीत इन्दुः।
पदानि : अपऽघ्नन्। एषि। पवमान। शत्रून्। प्रियाम्। न। जारः। अभिऽगीतः। इन्दुः

वाक्यम् २: सीदन्वनेषु शकुनो न पत्वा सोमः पुनानः कलशेषु सत्ता ॥
पदानि : सीदन्। वनेषु। शकुनः। न। पत्वा। सोमः। पुनानः। कलशेषु। सत्ता

३७५. मण्डलम् ९, सूक्तम् ९७, मन्त्रः १ (ऋक्सङ्ख्या : ८५५८)
वाक्यम् १: अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसम्।
पदानि : अस्य। प्रेषा। हेमना। पूयमानः। देवः। देवेभिः। सम्। अपृक्त। रसम्
वाक्यम् २: सुतः पवित्रं पर्येति रेभन्मितेव सद्म पशुमान्ति होता ॥
पदानि : सुतः। पवित्रम्। परि। एति। रेभन्। मिताऽइव। सद्म। पशुऽमन्ति। होता

३७६. मण्डलम् ९, सूक्तम् ९७, मन्त्रः १० (ऋक्सङ्ख्या : ८५६७)
वाक्यम् १: इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन्मदाय।
पदानि : इन्दुः। वाजी। पवते। गोऽन्योघाः। इन्द्रे। सोमः। सहः। इन्वन्। मदाय
वाक्यम् २: हन्ति रक्षो बाधते पर्यरातीर्वरिवः कृण्वन्वृजनस्य राजा ॥
पदानि : हन्ति। रक्षः। बाधते। परि। अरातीः। वरिवः। कृण्वन्। वृजनस्य। राजा

३७७. मण्डलम् ९, सूक्तम् ९७, मन्त्रः १२ (ऋक्सङ्ख्या : ८५६९)
वाक्यम् १: अभि प्रियाणि पवते पुनानो देवो देवान्त्स्वेन रसेन पृञ्चन्।
पदानि : अभि। प्रियाणि। पवते। पुनानः। देवः। देवान्। स्वेन। रसेन। पृञ्चन्
वाक्यम् २: इन्दुर्धर्माण्यृतुथा वसानो दश क्षिपो अव्यत सानो अव्ये ॥
पदानि : इन्दुः। धर्माणि। ऋतुऽथा। वसानः। दश। क्षिपः। अव्यत। सानौ। अव्ये

३७८. मण्डलम् ९, सूक्तम् ९७, मन्त्रः १६ (ऋक्सङ्ख्या : ८५७३)
वाक्यम् १: जुष्टी नं इन्दो सुपथा सुगान्युरौ पवस्व वरिवांसि कृण्वन्।
पदानि : जुष्टी। नः। इन्दो इति। सुऽपथा। सुऽगानि। उरौ। पवस्व। वरिवांसि। कृण्वन्
वाक्यम् २: घनेव विष्वंग्दुरितानि विघ्नन्नधि ष्णुना धन्व सानो अव्ये ॥
पदानि : घनाऽइव। विष्वंक्। दुःऽइतानि। विऽघ्नन्। अधि। स्नुना। धन्व। सानौ। अव्ये

३७९. मण्डलम् ९, सूक्तम् ९७, मन्त्रः ५३ (ऋक्सङ्ख्या : ८६१०)
वाक्यम् १: उत नं एना पवया पवस्वाधि श्रुते श्रवाय्यस्य तीर्थे।
पदानि : उत। नः। एना। पवया। पवस्व। अधि। श्रुते। श्रवाय्यस्य। तीर्थे
वाक्यम् २: षष्टिं सहस्रा नैगुतो वसूनि वृक्षं न पक्वं धूनवद्रणाय ॥
पदानि : षष्टिम्। सहस्रा। नैगुतः। वसूनि। वृक्षम्। न। पक्वम्। धूनवत्। रणाय

३८०. मण्डलम् ९, सूक्तम् ९७, मन्त्रः ५५ (ऋक्सङ्ख्या : ८६१२)
वाक्यम् १: सं त्री पवित्रा वितंतान्येष्यन्वेकं धावसि पूयमानः।
पदानि : सम्। त्री। पवित्रा। विऽतंतानि। एषि। अनु। एकम्। धावसि। पूयमानः
वाक्यम् २: असि भगो असि दात्रस्य दातासि मघवा मघवद्भ्य इन्दो ॥
पदानि : असि। भगः। असि। दात्रस्य। दाता। असि। मघऽवा। मघवत्ऽभ्यः। इन्दो इति

३८१. मण्डलम् ९, सूक्तम् ९७, मन्त्रः ५७ (ऋक्सङ्ख्या : ८६१४)

वाक्यम् १: इन्दुं॑ रिहन्ति महि॒षा अद॑ब्धाः प॒दे रे॑भन्ति क॒वयो॒ न गृध्राः॑ ।
पदानि : इन्दु॑म् । रि॒ह॒न्ति॒ । म॒हि॒षाः । अद॑ब्धाः । प॒दे । रे॒भ॒न्ति॒ । क॒वयः॑ । न । गृध्राः॑
वाक्यम् २: हि॒न्व॒न्ति॒ धीरा॑ दश॒भिः॒ क्षिपा॑भिः॒ सम॑ञ्जते रू॒पम॒पां रसे॑न ॥
पदानि : हि॒न्व॒न्ति॒ । धीराः॑ । द॒श॒ऽभिः॑ । क्षिपा॑भिः । सम् । अ॒ञ्ज॒ते॒ । रू॒पम् । अ॒पाम् । रसे॑न

३८२. मण्डलम् ९, सूक्तम् १०७, मन्त्रः १३ (ऋक्सङ्ख्या : ८७१३)
वाक्यम् १: आ ह॑र्य॒तो अर्जु॑ने॒ अत्के॑ अ॒व्यत प्रि॒यः सू॒नुर्न मर्ज्यः॑ ।
पदानि : आ । ह॒र्य॒तः । अर्जु॑ने । अत्के॑ । अ॒व्य॒त । प्रि॒यः । सू॒नुः । न । मर्ज्यः॑
वाक्यम् २: तमी॑ हिन्वन्त्यपसो॒ यथा॒ रथं॒ न॒दीष्वा गभ॑स्त्योः ॥
पदानि : तम् । ई॒म् । हि॒न्व॒न्ति॒ । अ॒पसः॑ । यथा॑ । रथ॑म् । न॒दीषु॑ । आ । गभ॑स्त्योः

३८३. मण्डलम् ९, सूक्तम् १०८, मन्त्रः ६ (ऋक्सङ्ख्या : ८७३२)
वाक्यम् १: य उ॒स्रिया॒ अप्या॑ अ॒न्तर॑श्म॒नो निर्गा अकृ॑न्त॒दोज॑सा ।
पदानि : यः । उ॒स्रिया॑ः । अप्या॑ः । अ॒न्तः । अश्म॑नः । निः । गाः । अकृ॑न्तत् । ओज॑सा
वाक्यम् २: अ॒भि व्र॒जं त॑त्निषे॒ गव्य॒मश्व्यं॑ वा॒मीव॑ धृष्णवा रु॑ज ॥
पदानि : अ॒भि । व्र॒जम् । त॒त्नि॒षे॒ । गव्य॑म् । अश्व्य॑म् । वा॒मीऽइ॑व । धृ॒ष्णो॒ इति॑ । आ । रु॒ज॒

३८४. मण्डलम् १०, सूक्तम् १, मन्त्रः ६ (ऋक्सङ्ख्या : ८८०४)
वाक्यम् १: स तु वस्त्रा॒ण्यध॒ पेश॑नानि॒ वसा॑नो अ॒ग्निर्नाभा॑ पृथि॒व्याः ।
पदानि : सः । तु । वस्त्रा॑णि । अध॑ । पेश॑नानि । वसा॑नः । अ॒ग्निः । नाभा॑ । पृ॒थि॒व्याः
वाक्यम् २: अ॒रु॒षो जा॒तः प॒द इळा॑याः पु॒रोहि॑तो राजन्यक्षीह दे॒वान् ॥
पदानि : अ॒रु॒षः । जा॒तः । प॒दे । इळा॑यः । पु॒रः॒ऽहि॑तः । रा॒ज॒न् । य॒क्षि॒ । इ॒ह । दे॒वान्

३८५. मण्डलम् १०, सूक्तम् २, मन्त्रः १ (ऋक्सङ्ख्या : ८८०६)
वाक्यम् १: पि॒प्री॒हि दे॒वाँ उ॑श॒तो य॑विष्ठ वि॒द्वाँ ऋ॒तूँर्ऋ॑तुपते यजे॒ह ।
पदानि : पि॒प्री॒हि । दे॒वान् । उ॒श॒तः । य॒वि॒ष्ठ॒ । वि॒द्वान् । ऋ॒तून् । ऋ॒तु॒ऽप॒ते॒ । य॒ज॒ । इ॒ह
वाक्यम् २: ये दैव्या॑ ऋ॒त्विज॒स्तेभि॑रग्ने॒ त्वं होतॄ॑णाम॒स्यायं॑जिष्ठः ॥
पदानि : ये । दैव्या॑ः । ऋ॒त्विजः॑ । तेभिः॑ । अ॒ग्ने॒ । त्वम् । होतॄ॑णाम् । अ॒सि॒ । आऽय॑जिष्ठः

३८६. मण्डलम् १०, सूक्तम् ५, मन्त्रः १ (ऋक्सङ्ख्या : ८८२७)
वाक्यम् १: एक॑ः समु॒द्रो ध॒रुणो॑ रयी॒णाम॒स्मद्धृ॒दो भूरि॑जन्मा॒ वि च॑ष्टे ।
पदानि : एकः॑ । स॒मु॒द्रः । ध॒रुणः॑ । र॒यी॒णाम् । अ॒स्मत् । हृ॒दः । भूरि॑ऽजन्मा । वि । च॒ष्टे॒
वाक्यम् २: सिष॒क्त्यूर्ध्वा॒ नि॒ण्योरु॑पस्थ॒ उत्स॑स्य॒ मध्ये॑ निहि॑तं प॒दं वे॒ः ॥
पदानि : सिस॑क्ति । ऊ॒र्धः॑ । नि॒ण्योः । उ॒प॒ऽस्थे । उत्स॑स्य । मध्ये॑ । निऽहि॑तम् । प॒दम् । वेरिति॑ वे॒ः

३८७. मण्डलम् १०, सूक्तम् ७, मन्त्रः १ (ऋक्सङ्ख्या : ८८४१)
वाक्यम् १: स्व॒स्ति नो॑ दि॒वो अ॑ग्ने पृथि॒व्या वि॒श्वायु॑र्धेहि य॒जथा॑य देव ।
पदानि : स्व॒स्ति । नः॒ । दि॒वः । अ॒ग्ने॒ । पृ॒थि॒व्याः । वि॒श्वऽआ॑युः । धे॒हि॒ । य॒जथा॑य । दे॒व॒
वाक्यम् २: सचे॑महि॒ तव॑ दस्म प्रके॒तैरु॑रुष्या णं उ॒रुभि॑र्देव शं॑सैः ॥
पदानि : सचे॑महि । तव॑ । दस्म॒ । प्र॒ऽके॒तैः । उ॒रु॒ष्य । नः॒ । उ॒रुऽभिः॑ । दे॒व॒ । शं॑सैः

३८८. मण्डलम् १०, सूक्तम् ८, मन्त्रः ९ (ऋक्सङ्ख्या : ८८५६)
वाक्यम् १: भूरीदिन्द्रं उदिनक्षन्तमोजोऽवाभिनत्सत्पतिर्मन्यमानम् ।
पदानि : भूरि । इत् । इन्द्रः । उत्ऽइनक्षन्तम् । ओजः । अव । अभिनत् । सत्ऽपतिः । मन्यमानम्
वाक्यम् २: त्वाष्ट्रस्य चिद्विश्वरूपस्य गोनामाचक्राणस्त्रीणि शीर्षा परा वर्क् ॥
पदानि : त्वाष्ट्रस्य । चित् । विश्वऽरूपस्य । गोनाम् । आऽचक्राणः । त्रीणि । शीर्षा । परा । वर्गितिवर्क्

३८९. मण्डलम् १०, सूक्तम् १०, मन्त्रः ७ (ऋक्सङ्ख्या : ८८७२)
वाक्यम् १: यमस्य मा यम्यं१ काम आगन्त्समाने योनौ सहशेय्याय ।
पदानि : यमस्य । मा । यम्यम् । कामः । आ । अगन् । समाने । योनौ । सहऽशेय्याय
वाक्यम् २: जायेव पत्ये तन्वं१ रिरिच्यां वि चिद्वृहेव रथ्येव चक्रा ॥
पदानि : जायाऽइव । पत्ये । तन्वम् । रिरिच्याम् । वि । चित् । वृहेव । रथ्याऽइव । चक्रा

३९०. मण्डलम् १०, सूक्तम् ११, मन्त्रः ५ (ऋक्सङ्ख्या : ८८८४)
वाक्यम् १: सदासि रण्वो यवसेव पुष्यते होत्राभिरग्ने मनुषः स्वध्वरः ।
पदानि : सदा । असि । रण्वः । यवसाऽइव । पुष्यते । होत्राभिः । अग्ने । मनुषः । सुऽअध्वरः
वाक्यम् २: विप्रस्य वा यच्छशमान उक्थ्यं१ वाजं ससवाँ उपयासि भूरिभिः ॥
पदानि : विप्रस्य । वा । यत् । शशमानः । उक्थ्यम् । वाजम् । ससऽवान् । उपऽयासि । भूरिऽभिः

३९१. मण्डलम् १०, सूक्तम् १२, मन्त्रः ८ (ऋक्सङ्ख्या : ८८९६)
वाक्यम् १: यस्मिन्देवा मन्मनि संचरन्त्यपीच्ये३ न वयमस्य विद्म ।
पदानि : यस्मिन् । देवाः । मन्मनि । सम्ऽचरन्ति । अपीच्ये । न । वयम् । अस्य । विद्म
वाक्यम् २: मित्रो नो अत्रादितिरनागान्त्सविता देवो वरुणाय वोचत् ॥
पदानि : मित्रः । नः । अत्र । अदितिः । अनागान् । सविता । देवः । वरुणाय । वोचत्

३९२. मण्डलम् १०, सूक्तम् १३, मन्त्रः ३ (ऋक्सङ्ख्या : ८९००)
वाक्यम् १: पञ्च पदानि रुपो अन्वरोहं चतुष्पदीमन्वेमि व्रतेन ।
पदानि : पञ्च । पदानि । रुपः । अनु । अरोहम् । चतुःऽपदीम् । अनु । एमि । व्रतेन
वाक्यम् २: अक्षरेण प्रति मिम एतामृतस्य नाभावधि सं पुनामि ॥
पदानि : अक्षरेण । प्रति । मिमे । एताम् । ऋतस्य । नाभौ । अधि । सम् । पुनामि

३९३. मण्डलम् १०, सूक्तम् १३, मन्त्रः ४ (ऋक्सङ्ख्या : ८९०१)
वाक्यम् १: देवेभ्यः कमवृणीत मृत्युं प्रजायै कममृतं नावृणीत ।
पदानि : देवेभ्यः । कम् । अवृणीत । मृत्युम् । प्रऽजायै । कम् । अमृतम् । न । अवृणीत
वाक्यम् २: बृहस्पतिं यज्ञमकृण्वत ऋषिं प्रियां यमस्तन्वं१ प्रारिरेचीत् ॥
पदानि : बृहस्पतिम् । यज्ञम् । अकृण्वत । ऋषिम् । प्रियाम् । यमः । तन्वम् । प्र । अरिरेचीत्

३९४. मण्डलम् १०, सूक्तम् १३, मन्त्रः ५ (ऋक्सङ्ख्या : ८९०२)
वाक्यम् १: सप्त क्षरन्ति शिशवे मरुत्वते पित्रे पुत्रासो अप्यवीवतन्नृतम् ।
पदानि : सप्त । क्षरन्ति । शिशवे । मरुत्वते । पित्रे । पुत्रासः । अपि । अवीवतन् । ऋतम्
वाक्यम् २: उभे इदस्योभयस्य राजत उभे यतेते उभयस्य पुष्यतः ॥

पदानि : उ॒भे इति॑ । इत् । अ॒स्य॒ । उ॒भय॑स्य । रा॒ज॒तः॒ । उ॒भे इति॑ । य॒ते॒ते॒ इति॑ । उ॒भय॑स्य । पु॒ष्य॒तः॒

३९५. मण्डलम् १०, सूक्तम् १४, मन्त्रः ४ (ऋक्सङ्ख्या : ८९०६)
वाक्यम् १: इ॒मं य॑म प्रस्त॒रमा हि सीदाङ्गि॑रोभिः पि॒तृभि॑: संविदा॒नः ।
पदानि : इ॒मम् । य॒म॒ । प्र॒ऽस्त॒रम् । आ । हि । सीद॑ । अङ्गि॑रःऽभिः । पि॒तृऽभिः॑ । स॒म्ऽवि॒दा॒नः
वाक्यम् २: आ त्वा॒ मन्त्रा॑: कविश॒स्ता व॑हन्त्वे॒ना रा॑जन्ह॒विषा॑ मादयस्व ॥
पदानि : आ । त्वा॒ । मन्त्रा॑: । क॒वि॒ऽश॒स्ताः । व॒ह॒न्तु॒ । एना । रा॒ज॒न् । ह॒विषा॑ । मा॒द॒य॒स्व॒

३९६. मण्डलम् १०, सूक्तम् १७, मन्त्रः ३ (ऋक्सङ्ख्या : ८९४९)
वाक्यम् १: पू॒षा त्वे॒तश्चा॑वयतु प्र विद्वाननष्टपशुर्भुवनस्य गो॒पाः ।
पदानि : पू॒षा । त्वा॒ । इ॒तः । च्य॒व॒य॒तु॒ । प्र । वि॒द्वान् । अन॑ष्टऽपशुः । भुव॑नस्य । गो॒पाः
वाक्यम् २: स त्वै॒तेभ्य॒: परि॑ ददत्पि॒तृभ्यो॑ऽग्निर्दे॒वेभ्य॑: सुविदु॒त्रिये॑भ्यः ॥
पदानि : सः । त्वा॒ । ए॒तेभ्य॑: । परि॑ । द॒द॒त् । पि॒तृऽभ्यः॑ । अ॒ग्निः । दे॒वेभ्यः॑ । सु॒ऽवि॒दु॒त्रिये॑भ्यः

३९७. मण्डलम् १०, सूक्तम् १८, मन्त्रः ६ (ऋक्सङ्ख्या : ८९६६)
वाक्यम् १: आ रो॑हतायु॒र्ज॒रस॑ं वृणा॒ना अ॑नुपू॒र्वं यत॑माना॒ यति॑ ष्ठ ।
पदानि : आ । रो॒ह॒त॒ । आयु॑: । ज॒रस॑म् । वृ॒णा॒नाः । अ॒नु॒ऽपू॒र्वम् । यत॑मानाः । यति॑ । स्थ
वाक्यम् २: इ॒ह त्वष्टा॑ सुजनि॑मा स॒जोषा॑ दी॒र्घमायु॑: करति जी॒वसे॑ वः ॥
पदानि : इ॒ह । त्वष्टा॑ । सु॒ऽज॒नि॒मा । स॒ऽजोषाः॑ । दी॒र्घम् । आयु॑: । क॒र॒ति॒ । जी॒वसे॑ । वः॒

३९८. मण्डलम् १०, सूक्तम् १८, मन्त्रः १२ (ऋक्सङ्ख्या : ८९७२)
वाक्यम् १: उ॒च्चञ्च॑माना पृथि॒वी सु ति॑ष्ठतु स॒हस्रं॑ मित॒ उप॒ हि श्र॑य॑न्ताम् ।
पदानि : उ॒त्ऽच्चञ्च॑माना । पृ॒थि॒वी । सु । ति॒ष्ठ॒तु॒ । स॒हस्र॑म् । मि॒तः॑ । उप॑ । हि । श्र॒य॒न्ता॒म्
वाक्यम् २: ते गृ॒हासो॑ घृत॒श्चुतो॑ भवन्तु वि॒श्वाहा॑स्मै शर॒णाः स॒न्त्वत्र॑ ॥
पदानि : ते । गृ॒हासः॑ । घृ॒त॒ऽश्चुतः॑ । भ॒व॒न्तु॒ । वि॒श्वाहा॑ । अ॒स्मै॒ । श॒र॒णाः । स॒न्तु॒ । अत्र॑

३९९. मण्डलम् १०, सूक्तम् २७, मन्त्रः १३ (ऋक्सङ्ख्या : ९०६१)
वाक्यम् १: प॒त्तो ज॑गार प्र॒त्यञ्च॑मत्ति शी॒र्ष्णा शिर॒: प्रति॑ दधौ॒ वरू॑थम् ।
पदानि : प॒त्तः । ज॒गा॒र॒ । प्र॒त्यञ्च॑म् । अ॒त्ति॒ । शी॒र्ष्णा । शिरः॑ । प्रति॑ । दु॒धौ॒ । वरू॑थम्
वाक्यम् २: आसी॑न ऊ॒र्ध्वामुप॑सि॑ क्षिणाति॒ न्य॑ङ्ङु॒त्ता॒नाम॑न्वेति॒ भूमि॑म् ॥
पदानि : आसी॑नः । ऊ॒र्ध्वाम् । उ॒प॒सि॑ । क्षि॒णा॒ति॒ । न्य॑ङ् । उ॒त्ता॒नाम् । अनु॑ । ए॒ति॒ । भूमि॑म्

४००. मण्डलम् १०, सूक्तम् २८, मन्त्रः २ (ऋक्सङ्ख्या : ९०७४)
वाक्यम् १: स रो॑रु॒वद्वृ॒षभस्ति॒ग्मशृ॑ङ्गो॒ वर्ष्म॑न्त॒स्थौ व॑रि॒मन्ना॑ पृथि॒व्याः ।
पदानि : सः । रो॒रु॒वत् । वृ॒ष॒भः । ति॒ग्मऽशृ॑ङ्गः । वर्ष्म॑न् । त॒स्थौ । व॒रि॒मन् । आ । पृ॒थि॒व्याः
वाक्यम् २: विश्वे॒ष्वेनं॑ वृ॒जने॑षु पा॒मि॒ यो मे॑ कु॒क्षी सु॒तसो॑मः पृ॒णाति॑ ॥
पदानि : विश्वे॑षु । ए॒न॒म् । वृ॒जने॑षु । पा॒मि॒ । यः । मे॒ । कु॒क्षी इति॑ । सु॒तऽसो॑मः । पृ॒णाति॑

४०१. मण्डलम् १०, सूक्तम् २८, मन्त्रः ८ (ऋक्सङ्ख्या : ९०८०)
वाक्यम् १: दे॒वास॑ आयन्पर॒शूँर॑बिभ्रन्वना॑ वृश्चन्तो॑ अ॒भि वि॒ङ्गिरा॑यन् ।

पदानि : दे॒वासः॑ । आ॒य॒न् । प॒र॒शून् । अ॒बि॒भ्र॒न् । वना॑ । वृ॒श्च॒न्तः॑ । अ॒भि । वि॒ट्ऽभिः । आ॒य॒न्
वाक्यम् २: नि सु॒द्रु॑ꣳ दध॑तो व॒क्षणा॑सु यत्रा॒ कृपी॑टमनु॒ तद्द॑हन्ति ॥
पदानि : नि । सु॒ऽद्रु॑म् । दध॑तः । व॒क्षणा॑सु । यत्र॑ । कृपी॑टम् । अनु॑ । तत् । द॒ह॒न्ति

४०२. मण्डलम् १०, सूक्तम् २८, मन्त्रः १० (ऋक्सङ्ख्या : ९०८२)
वाक्यम् १: सु॒प॒र्ण इ॒त्था न॒खमा सि॑षा॒यावरु॑द्धः परि॒पदं॒ न सिं॒हः ।
पदानि : सु॒ऽप॒र्णः । इ॒त्था । न॒खम् । आ । सि॒सा॒य॒ । अव॑ऽरुद्धः । प॒रि॒ऽपद॑म् । न । सिं॒हः
वाक्यम् २: नि॒रु॒द्धश्चि॑न्महि॒षस्त॒र्ष्यावा॑न्गो॒धा तस्मा॑ अ॒यथं॑ कर्षदे॒तत् ॥
पदानि : नि॒ऽरु॒द्धः । चि॒त् । म॒हि॒षः । त॒र्ष्याऽवा॑न् । गो॒धा । तस्मै॑ । अ॒यथ॑म् । क॒र्ष॒त् । एत॑त्

४०३. मण्डलम् १०, सूक्तम् ३०, मन्त्रः ४ (ऋक्सङ्ख्या : ९०९६)
वाक्यम् १: यो अ॑नि॒ध्मो दीद॑यदप्स्व१॑न्तर्यं विप्रा॑स ईळ॑ते अध्व॒रेषु॑ ।
पदानि : यः । अ॒नि॒ध्मः । दीद॑यत् । अ॒प्ऽसु । अ॒न्तः । यम् । वि॒प्रा॑सः । ईळ॑ते । अ॒ध्व॒रेषु॑
वाक्यम् २: अपा॑ नपा॒न्मधु॑मतीर॒पो दा॒ याभि॒रिन्द्रो॑ वावृ॒धे वी॒र्या॑य ॥
पदानि : अपा॑म् । न॒पा॒त् । मधु॑ऽमतीः । अ॒पः । दाः॒ । याभिः॑ । इन्द्रः॑ । व॒वृ॒धे । वी॒र्या॑य

४०४. मण्डलम् १०, सूक्तम् ३४, मन्त्रः १० (ऋक्सङ्ख्या : ९१४६)
वाक्यम् १: जा॒या त॑प्यते कित॒वस्य॑ ही॒ना मा॒ता पु॒त्रस्य॒ चर॑तः क्व॑ स्वित् ।
पदानि : जा॒या । त॒प्य॒ते॒ । कि॒त॒वस्य॑ । ही॒ना । मा॒ता । पु॒त्रस्य॑ । चर॑तः । क्व॑ । स्वि॒त्
वाक्यम् २: ऋ॒णा॒वा बि॑भ्य॒द्धन॑मि॒च्छमा॑नो॒ऽन्येषा॒मस्त॒मुप॒ नक्त॑मेति ॥
पदानि : ऋ॒ण॒ऽवा । बि॒भ्य॒त् । धन॑म् । इ॒च्छमा॑नः । अ॒न्येषा॑म् । अस्त॑म् । उप॑ । नक्त॑म् । ए॒ति

४०५. मण्डलम् १०, सूक्तम् ३५, मन्त्रः १ (ऋक्सङ्ख्या : ९१५१)
वाक्यम् १: अबु॑ध्रमु त्य इन्द्र॑वन्तो अ॒ग्नयो॒ ज्योति॑र्भर॑न्त उ॒षसो॒ व्यु॑ष्टिषु ।
पदानि : अबु॑ध्रम् । ऊँ॒ इति॑ । त्ये । इन्द्र॑ऽवन्तः । अ॒ग्नयः॑ । ज्योतिः॑ । भर॑न्तः । उ॒षसः॑ । विऽउ॑ष्टिषु
वाक्यम् २: म॒ही द्यावा॑पृथि॒वी चेत॑ता॒मपो॒ऽद्या दे॒वाना॒मव॒ आ वृ॑णीमहे ॥
पदानि : म॒ही इति॑ । द्यावा॑पृथि॒वी इति॑ । चेत॑ताम् । अपः॑ । अ॒द्य । दे॒वाना॑म् । अवः॑ । आ । वृ॒णी॒म॒हे॒

४०६. मण्डलम् १०, सूक्तम् ३५, मन्त्रः ३ (ऋक्सङ्ख्या : ९१५३)
वाक्यम् १: द्यावा॑ नो अ॒द्य पृ॑थि॒वी अना॑गसो म॒ही त्रा॑येतां सुवि॒ताय॑ मा॒तरा॑ ।
पदानि : द्यावा॑ । नः॒ । अ॒द्य । पृ॒थि॒वी इति॑ । अना॑गसः । म॒ही इति॑ । त्रा॒ये॒ता॒म् । सु॒वि॒ताय॑ । मा॒तरा॑
वाक्यम् २: उ॒षा उ॒च्छन्त्यप॑ बाधतामघं स्व॒स्त्य१॑ग्निं सं॑मिधा॒नमी॑महे ॥
पदानि : उ॒षाः । उ॒च्छन्ती॑ । अप॑ । बा॒ध॒ता॒म् । अ॒घम् । स्व॒स्ति । अ॒ग्निम् । स॒म्ऽइ॒धा॒नम् । ई॒म॒हे॒

४०७. मण्डलम् १०, सूक्तम् ४२, मन्त्रः ११ (ऋक्सङ्ख्या : ९२३७)
वाक्यम् १: बृ॒ह॒स्पति॑र्नः॒ परि॑ पातु प॒श्चादुतोत्त॑रस्मा॒दध॑रादघा॒योः ।
पदानि : बृ॒ह॒स्पतिः॑ । नः॒ । परि॑ । पा॒तु॒ । प॒श्चात् । उ॒त । उत्ऽत॑रस्मात् । अध॑रात् । अ॒घ॒ऽयोः
वाक्यम् २: इन्द्रः॑ पु॒रस्ता॑दुत म॑ध्य॒तो नः॒ सखा॒ सखि॑भ्यो॒ वरि॑वः कृणोतु ॥
पदानि : इन्द्रः॑ । पु॒रस्ता॑त् । उ॒त । म॒ध्य॒तः । नः॒ । सखा॑ । सखि॑ऽभ्यः । वरि॑वः । कृ॒णो॒तु

४०८. मण्डलम् १०, सूक्तम् ४५, मन्त्रः ८ (ऋक्सङ्ख्या : ९२६७)
वाक्यम् १: दृशानो रुक्म उर्विया व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः ।
पदानि : दृशानः । रुक्मः । उर्विया । वि । अद्यौत् । दुःऽमर्षम् । आयुः । श्रिये । रुचानः
वाक्यम् २: अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौर्जनयत्सुरेताः ॥
पदानि : अग्निः । अमृतः । अभवत् । वयःऽभिः । यत् । एनम् । द्यौः । जनयत् । सुऽरेताः

४०९. मण्डलम् १०, सूक्तम् ४६, मन्त्रः ५ (ऋक्सङ्ख्या : ९२७६)
वाक्यम् १: प्र भूर्जयन्तं महां विपोधां मूरा अमूरं पुरां दुर्माणम् ।
पदानि : प्र । भूः । जयन्तम् । महाम् । विपःऽधाम् । मूराः । अमूरम् । पुराम् । दुर्माणम्
वाक्यम् २: नयन्तो गर्भं वनां धियं धुर्हिरिश्मश्रुं नार्वाणं धनर्चम् ॥
पदानि : नयन्तः । गर्भम् । वनाम् । धियम् । धुः । हिरिंऽश्मश्रुम् । न । अर्वाणम् । धनंऽअर्चम्

४१०. मण्डलम् १०, सूक्तम् ५०, मन्त्रः ४ (ऋक्सङ्ख्या : ९३१५)
वाक्यम् १: भुवस्त्वमिन्द्र ब्रह्मणा महान्भुवो विश्वेषु सवनेषु यज्ञियः ।
पदानि : भुवः । त्वम् । इन्द्र । ब्रह्मणा । महान् । भुवः । विश्वेषु । सवनेषु । यज्ञियः
वाक्यम् २: भुवो नॄँश्च्यौत्नो विश्वस्मिन्भरे ज्येष्ठश्च मन्त्रो विश्वचर्षणे ॥
पदानि : भुवः । नॄन् । च्यौत्नः । विश्वस्मिन् । भरे । ज्येष्ठः । च । मन्त्रः । विश्वऽचर्षणे

४११. मण्डलम् १०, सूक्तम् ५३, मन्त्रः ७ (ऋक्सङ्ख्या : ९३४०)
वाक्यम् १: अक्षानहो नह्यतनोत सोम्या इष्कृणुध्वं रशना ओत पिंशत ।
पदानि : अक्षऽनहः । नह्यतन । उत । सोम्याः । इष्कृणुध्वम् । रशनाः । आ । उत । पिंशत
वाक्यम् २: अष्टावन्धुरं वहताभितो रथं येनं देवासो अनयन्नभि प्रियम् ॥
पदानि : अष्टाऽवन्धुरम् । वहत । अभितः । रथम् । येनं । देवासः । अनयन् । अभि । प्रियम्

४१२. मण्डलम् १०, सूक्तम् ५३, मन्त्रः ९ (ऋक्सङ्ख्या : ९३४२)
वाक्यम् १: त्वष्टा माया वेदपसामपस्तमो बिभ्रत्पात्रा देवपानानि शंतमा ।
पदानि : त्वष्टा । मायाः । वेत् । अपसाम् । अपःऽतमः । बिभ्रत् । पात्रा । देवऽपानानि । शम्ऽतमा
वाक्यम् २: शिशीते नूनं परशुं स्वायसं येनं वृश्चादेतशो ब्रह्मणस्पतिः ॥
पदानि : शिशीते । नूनम् । परशुम् । सुऽआयसम् । येनं । वृश्चात् । एतशः । ब्रह्मणः । पतिः

४१३. मण्डलम् १०, सूक्तम् ५५, मन्त्रः ४ (ऋक्सङ्ख्या : ९३५४)
वाक्यम् १: यदुष औच्छः प्रथमा विभानामजनयो येनं पुष्टस्यं पुष्टम् ।
पदानि : यत् । उषः । औच्छः । प्रथमा । विऽभानाम् । अजनयः । येनं । पुष्टस्यं । पुष्टम्
वाक्यम् २: यत्ते जामित्वमवरं परस्या महन्महत्या असुरत्वमेकम् ॥
पदानि : यत् । ते । जामिऽत्वम् । अवरम् । परस्याः । महत् । महत्याः । असुरऽत्वम् । एकम्

४१४. मण्डलम् १०, सूक्तम् ५६, मन्त्रः ७ (ऋक्सङ्ख्या : ९३६५)
वाक्यम् १: नावा न क्षोदः प्रदिशः पृथिव्याः स्वस्तिभिरति दुर्गाणि विश्वा ।
पदानि : नावा । न । क्षोदः । प्रऽदिशः । पृथिव्याः । स्वस्तिऽभिः । अति । दुःऽगानि । विश्वा
वाक्यम् २: स्वां प्रजां बृहदुक्थो महित्वावरेष्वदधादा परेषु ॥
पदानि : स्वाम् । प्रऽजाम् । बृहत्ऽउक्थः । महिऽत्वा । आ । अवरेषु । अदधात् । आ । परेषु

४१५. मण्डलम् १०, सूक्तम् ६१, मन्त्रः १२ (ऋक्सङ्ख्या : ९४१७)
वाक्यम् १: पश्वा यत्पश्चा वियुता बुधन्तेतिं ब्रवीति वक्तरी ररांणः ।
पदानि : पश्वा । यत् । पश्चा । विऽयुता । बुधन्त । इतिं । ब्रवीति । वक्तरिं । ररांणः
वाक्यम् २: वसोर्वसुत्वा कारवोऽनेहा विश्वं विवेष्टि द्रविणमुप क्षु ॥
पदानि : वसोः । वसुऽत्वा । कारवः । अनेहा । विश्वम् । विवेष्टि । द्रविणम् । उपं । क्षु

४१६. मण्डलम् १०, सूक्तम् ६३, मन्त्रः ५ (ऋक्सङ्ख्या : ९४४८)
वाक्यम् १: सम्राजो ये सुवृधो यज्ञमायुरपरिह्वृता दधिरे दिवि क्षयम् ।
पदानि : सम्ऽराजः । ये । सुऽवृधः । यज्ञम् । आऽययुः । अपरिऽह्वृताः । दधिरे । दिवि । क्षयम्
वाक्यम् २: ताँ आ विवास नमसा सुवृक्तिभिर्महो आदित्याँ अदितिं स्वस्तये ॥
पदानि : तान् । आ । विवास । नमसा । सुवृक्तिऽभिः । महः । आदित्यान् । अदितिम् । स्वस्तये

४१७. मण्डलम् १०, सूक्तम् ६४, मन्त्रः ३ (ऋक्सङ्ख्या : ९४६३)
वाक्यम् १: नरा वा शंसं पूषणमगोह्यमग्निं देवेद्धमभ्यर्चसे गिरा ।
पदानि : नराशंसम् । वा । पूषणम् । अगोह्यम् । अग्निम् । देवऽइद्धम् । अभि । अर्चसे । गिरा
वाक्यम् २: सूर्यामासा चन्द्रमसा यमं दिवि त्रितं वातमुषसमक्तुमश्विना ॥
पदानि : सूर्यामासा । चन्द्रमसा । यमम् । दिवि । त्रितम् । वातम् । उषसम् । अक्तुम् । अश्विना

४१८. मण्डलम् १०, सूक्तम् ६५, मन्त्रः ३ (ऋक्सङ्ख्या : ९४८०)
वाक्यम् १: तेषां हि मह्ना महतामनर्वणां स्तोमाँ इयर्म्यृतज्ञा ऋतावृधाम् ।
पदानि : तेषाम् । हि । मह्ना । महताम् । अनर्वणाम् । स्तोमान् । इयर्मि । ऋतऽज्ञाः । ऋतऽवृधाम्
वाक्यम् २: ये अप्सवमर्णवं चित्रराधसस्ते नो रासन्तां महये सुमित्र्याः ॥
पदानि : ये । अप्सवम् । अर्णवम् । चित्रऽराधसः । ते । नः । रासन्ताम् । महये । सुऽमित्र्याः

४१९. मण्डलम् १०, सूक्तम् ६५, मन्त्रः ११ (ऋक्सङ्ख्या : ९४८८)
वाक्यम् १: ब्रह्म गामश्वं जनयन्त ओषधीर्वनस्पतीन्पृथिवीं पर्वताँ अपः ।
पदानि : ब्रह्म । गाम् । अश्वम् । जनयन्तः । ओषधीः । वनस्पतीन् । पृथिवीम् । पर्वतान् । अपः
वाक्यम् २: सूर्यं दिवि रोहयन्तः सुदानव आर्या व्रता विसृजन्तो अधि क्षमिं ॥
पदानि : सूर्यम् । दिवि । रोहयन्तः । सुऽदानवः । आर्या । व्रता । विऽसृजन्तः । अधिं । क्षमिं

४२०. मण्डलम् १०, सूक्तम् ६५, मन्त्रः १३ (ऋक्सङ्ख्या : ९४९०)
वाक्यम् १: पावीरवी तन्यतुरेकपादजो दिवो धर्ता सिन्धुरापः समुद्रियः ।
पदानि : पावीरवी । तन्यतुः । एकऽपात् । अजः । दिवः । धर्ता । सिन्धुः । आपः । समुद्रियः
वाक्यम् २: विश्वे देवासः शृणवन्वचांसि मे सरस्वती सह धीभिः पुरंध्या ॥
पदानि : विश्वे । देवासः । शृणवन् । वचांसि । मे । सरस्वती । सह । धीभिः । पुरम्ऽध्या

४२१. मण्डलम् १०, सूक्तम् ६९, मन्त्रः ९ (ऋक्सङ्ख्या : ९५४०)
वाक्यम् १: देवाश्चित्ते अमृता जातवेदो महिमानं वाध्र्यश्व प्र वोचन् ।
पदानि : देवाः । चित् । ते । अमृताः । जातऽवेदः । महिमानम् । वाध्रिऽअश्व । प्र । वोचन्

वाक्यम् २: यत्सं॑पृच्छं मानु॑षीर्विश॒ आय॒न्त्वं नृभि॑रजय॒स्त्वावृ॑धेभिः ॥
पदानि : यत्। स॒म्ऽपृच्छ॑म्। मानु॑षीः। विशः॑। आय॑न्। त्वम्। नृऽभिः॑। अ॒ज॒यः॒। त्वाऽवृ॑धेभिः

४२२. मण्डलम् १०, सूक्तम् ७४, मन्त्रः २ (ऋक्सङ्ख्या : ९५८७)
वाक्यम् १: हवं॑ एषा॒मसु॑रो नक्षत॒ द्यां श्रव॑स्यता मन॑सा नि॑सत॒ क्षाम्।
पदानि : हवः॑। एषा॒म्। असु॑रः। न॒क्ष॒त॒। द्याम्। श्रव॒स्य॒ता। मन॑सा। नि॒ऽस॒त॒। क्षाम्
वाक्यम् २: चक्षा॑णा॒ यत्र॑ सु॒वि॒तायं॑ दे॒वा द्यौर्न वारे॑भिः कृ॒णव॑न्त॒ स्वैः ॥
पदानि : चक्षा॑णाः। यत्र॑। सु॒ऽवि॒तायं॑। दे॒वाः। द्यौः। न। वारे॑भिः। कृ॒णव॑न्त। स्वैः

४२३. मण्डलम् १०, सूक्तम् ७७, मन्त्रः १ (ऋक्सङ्ख्या : ९६०९)
वाक्यम् १: अ॒भ्र॒प्रु॒षो न वा॒चा प्रु॑षा॒ वसु॑ हविष्मन्तो न य॒ज्ञा वि॑जा॒नुषः॑।
पदानि : अ॒भ्र॒ऽप्रु॒षः॑। न। वा॒चा। प्रु॒ष॒। वसु॑। हविष्मन्तः। न। य॒ज्ञाः। वि॒ऽज॒नुषः॑
वाक्यम् २: सु॒मारु॑तं न ब्रह्मा॒ण॑म॒र्हसे॑ ग॒णम॑स्तो॒ष्येषां न शो॒भसे॑ ॥
पदानि : सु॒ऽमारु॑तम्। न। ब्रह्मा॑णम्। अ॒र्हसे॑। ग॒णम्। अ॒स्तो॒षि॒। ए॒षा॒म्। न। शो॒भसे॑

४२४. मण्डलम् १०, सूक्तम् ७८, मन्त्रः २ (ऋक्सङ्ख्या : ९६१८)
वाक्यम् १: अ॒ग्निर्न ये भ्राज॑सा रु॒क्मव॑क्षसो॒ वात॑ासो न स्व॒युजः॑ स॒द्यऊ॑तयः।
पदानि : अ॒ग्निः। न। ये। भ्राज॑सा। रु॒क्मऽव॑क्षसः। वात॑ासः। न। स्व॒ऽयुजः॑। स॒द्यःऽऊ॑तयः
वाक्यम् २: प्र॒ज्ञा॒तारो॒ न ज्येष्ठाः॑ सु॒नी॒तयः॑ सु॒शर्मा॑णो॒ न सोमा॑ ऋ॒तं य॒ते ॥
पदानि : प्र॒ऽज्ञा॒तारः॑। न। ज्येष्ठाः॑। सु॒ऽनी॒तयः॑। सु॒ऽशर्मा॑णः। न। सोमाः॑। ऋ॒तम्। य॒ते

४२५. मण्डलम् १०, सूक्तम् ७८, मन्त्रः ५ (ऋक्सङ्ख्या : ९६२१)
वाक्यम् १: अश्वा॑सो॒ न ये ज्येष्ठा॑स आ॒शवो॑ दि॒धि॒षवो॒ न र॒थ्यः॑ सुदान॑वः।
पदानि : अश्वा॑सः। न। ये। ज्येष्ठा॑सः। आ॒शवः॑। दि॒धि॒षवः॑। न। र॒थ्यः॑। सु॒ऽदान॑वः
वाक्यम् २: आपो॒ न नि॒म्नैरु॒दभि॑र्जिग॒त्नवो॑ वि॒श्वरू॑पा अङ्गि॑रसो न साम॑भिः ॥
पदानि : आपः॑। न। नि॒म्नैः। उ॒दऽभिः॑। जि॒ग॒त्नवः॑। वि॒श्वऽरू॑पाः। अङ्गि॑रसः। न। साम॑ऽभिः

४२६. मण्डलम् १०, सूक्तम् ७९, मन्त्रः २ (ऋक्सङ्ख्या : ९६२६)
वाक्यम् १: गुहा॑ शिरो॒ निहि॑तमृध॒ग्गक्षी असि॑न्वन्नत्ति जि॒ह्वया॒ वना॑नि।
पदानि : गुहा॑। शिरः॑। निऽहि॑तम्। ऋध॑क्। अ॒क्षी इति॑। असि॑न्वन्। अ॒त्ति॒। जि॒ह्वया॑। वना॑नि
वाक्यम् २: अत्रा॑ण्यस्मै प॒ड्भिः सं भ॑रन्त्युत्ता॒नह॑स्ता॒ नम॒साधि॑ वि॒क्षु ॥
पदानि : अत्रा॑णि। अ॒स्मै॒। प॒ट्ऽभिः। सम्। भ॒र॒न्ति॒। उ॒त्ता॒नऽह॑स्ताः। नम॑सा। अधि॑। वि॒क्षु

४२७. मण्डलम् १०, सूक्तम् ८०, मन्त्रः ४ (ऋक्सङ्ख्या : ९६३५)
वाक्यम् १: अ॒ग्निर्द॒द्द्रवि॑णं वी॒रपे॑शा अ॒ग्निर्ऋ॒षिं यः स॒हस्रा॑ सु॒नोति॑।
पदानि : अ॒ग्निः। द॒दात्। द्रवि॑णम्। वी॒रऽपे॑शाः। अ॒ग्निः। ऋषि॑म्। यः। स॒हस्रा॑। सु॒नोति॑
वाक्यम् २: अ॒ग्निर्दि॒वि ह॒व्यमा त॑ता॒नाग्नेर्धामा॑नि॒ विभृ॑ता पुरु॒त्रा ॥
पदानि : अ॒ग्निः। दि॒वि। ह॒व्यम्। आ। त॒ता॒न॒। अ॒ग्नेः। धामा॑नि। विऽभृ॑ता। पु॒रु॒ऽत्रा

४२८. मण्डलम् १०, सूक्तम् ८०, मन्त्रः ५ (ऋक्सङ्ख्या : ९६३६)

वाक्यम् १: अग्निमुक्थैर्ऋषयो वि ह्वयन्तेऽग्निं नरो यामनि बाधितासः ।
पदानि : अग्निम् । उक्थैः । ऋषयः । वि । ह्वयन्ते । अग्निम् । नरः । यामनि । बाधितासः
वाक्यम् २: अग्निं वयो अन्तरिक्षे पतन्तोऽग्निः सहस्रा परि याति गोनाम् ॥
पदानि : अग्निम् । वयः । अन्तरिक्षे । पतन्तः । अग्निः । सहस्रा । परि । याति । गोनाम्

४२९. मण्डलम् १०, सूक्तम् ८१, मन्त्रः २ (ऋक्सङ्ख्या : ९६४०)
वाक्यम् १: किं स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथासीत् ।
पदानि : किम् । स्वित् । आसीत् । अधिऽस्थानम् । आऽरम्भणम् । कतमत् । स्वित् । कथा । आसीत्
वाक्यम् २: यतो भूमिं जनयन्विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः ॥
पदानि : यतः । भूमिम् । जनयन् । विश्वऽकर्मा । वि । द्याम् । और्णोत् । महिना । विश्वऽचक्षाः

४३०. मण्डलम् १०, सूक्तम् ८२, मन्त्रः १ (ऋक्सङ्ख्या : ९६४६)
वाक्यम् १: चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नन्नमाने ।
पदानि : चक्षुषः । पिता । मनसा । हि । धीरः । घृतम् । एनेइति । अजनत् । नम्नमाने इति
वाक्यम् २: यदेदन्ता अददहन्त पूर्व आदिद्द्यावापृथिवी अप्रथेताम् ॥
पदानि : यदा । इत् । अन्ताः । अददहन्त । पूर्वे । आत् । इत् । द्यावापृथिवी इति । अप्रथेताम्

४३१. मण्डलम् १०, सूक्तम् ८५, मन्त्रः १८ (ऋक्सङ्ख्या : ९६८४)
वाक्यम् १: पूर्वापरं चरतो माययैतौ शिशू क्रीळन्तौ परि यातो अध्वरम् ।
पदानि : पूर्वऽअपरम् । चरतः । मायया । एतौ । शिशू इति । क्रीळन्तौ । परि । यातः । अध्वरम्
वाक्यम् २: विश्वान्यन्यो भुवनाभिचष्ट ऋतूँरन्यो विदधज्जायते पुनः ॥
पदानि : विश्वानि । अन्यः । भुवना । अभिऽचष्टे । ऋतून् । अन्यः । विऽदधत् । जायते । पुनरिति

४३२. मण्डलम् १०, सूक्तम् ८५, मन्त्रः ३६ (ऋक्सङ्ख्या : ९७०२)
वाक्यम् १: गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः ।
पदानि : गृभ्णामि । ते । सौभगऽत्वाय । हस्तम् । मया । पत्या । जरत्ऽअष्टिः । यथा । असः
वाक्यम् २: भगो अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥
पदानि : भगः । अर्यमा । सविता । पुरंऽधिः । मह्यम् । त्वा । अदुः । गार्हऽपत्याय । देवाः

४३३. मण्डलम् १०, सूक्तम् ८५, मन्त्रः ३७ (ऋक्सङ्ख्या : ९७०३)
वाक्यम् १: तां पूषञ्छिवतमामेरयस्व यस्यां बीजं मनुष्या३ वपन्ति ।
पदानि : ताम् । पूषन् । शिवऽतमाम् । आ । ईरयस्व । यस्याम् । बीजम् । मनुष्याः । वपन्ति
वाक्यम् २: या न ऊरू उशती विश्रयाते यस्यामुशन्तः प्रहराम शेपम् ॥
पदानि : या । नः । ऊरू इति । उशती । विऽश्रयाते । यस्याम् । उशन्तः । प्रऽहराम । शेपम्

४३४. मण्डलम् १०, सूक्तम् ८७, मन्त्रः ५ (ऋक्सङ्ख्या : ९७४१)
वाक्यम् १: अग्ने त्वचं यातुधानस्य भिन्धि हिंस्राशनिर्हरसा हन्त्वेनम् ।
पदानि : अग्ने । त्वचम् । यातुऽधानस्य । भिन्धि । हिंस्रा । अशनिः । हरसा । हन्तु । एनम्
वाक्यम् २: प्र पर्वाणि जातवेदः शृणीहि क्रव्यात्क्रविष्णुर्वि चिनोतु वृक्णम् ॥
पदानि : प्र । पर्वाणि । जातऽवेदः । शृणीहि । क्रव्यऽअत् । क्रविष्णुः । वि । चिनोतु । वृक्णम्

४३५. मण्डलम् १०, सूक्तम् ८७, मन्त्रः १९ (ऋक्सङ्ख्या : ९७५५)
वाक्यम् १: सनादग्ने मृणसि यातुधानान्न त्वा रक्षाꣳसि पृतनासु जिग्युः ।
पदानि : सनात् । अग्ने । मृणसि । यातुऽधानान् । न । त्वा । रक्षाꣳसि । पृतनासु । जिग्युः
वाक्यम् २: अनु दह सहमूरान्क्रव्यादो मा ते हेत्या मुक्षत दैव्यायाः ॥
पदानि : अनु । दह । सहऽमूरान् । क्रव्यऽअदः । मा । ते । हेत्याः । मुक्षत । दैव्यायाः

४३६. मण्डलम् १०, सूक्तम् ८७, मन्त्रः २१ (ऋक्सङ्ख्या : ९७५७)
वाक्यम् १: पश्चात्पुरस्तादधरादुदक्तात्कविः काव्येन परि पाहि राजन् ।
पदानि : पश्चात् । पुरस्तात् । अधरात् । उदक्तात् । कविः । काव्येन । परि । पाहि । राजन्
वाक्यम् २: सखे सखायमजरो जरिम्णेऽग्ने मर्ताँ अमर्त्यस्त्वं नः ॥
पदानि : सखे । सखायम् । अजरः । जरिम्णे । अग्ने । मर्तान् । अमर्त्यः । त्वम् । नः

४३७. मण्डलम् १०, सूक्तम् ८९, मन्त्रः १५ (ऋक्सङ्ख्या : ९७९५)
वाक्यम् १: शत्रूयन्तो अभि ये नस्ततस्रे महि व्राधन्त ओगणास इन्द्र ।
पदानि : शत्रुऽयन्तः । अभि । ये । नः । ततस्रे । महि । व्राधन्तः । ओगणासः । इन्द्र
वाक्यम् २: अन्धेनामित्रास्तमसा सचन्तां सुज्योतिषो अक्तवस्ताँ अभि ष्युः ॥
पदानि : अन्धेन । अमित्राः । तमसा । सचन्ताम् । सुऽज्योतिषः । अक्तवः । तान् । अभि । स्युरिति स्युः

४३८. मण्डलम् १०, सूक्तम् ८९, मन्त्रः १६ (ऋक्सङ्ख्या : ९७९६)
वाक्यम् १: पुरूणि हि त्वा सवना जनानां ब्रह्माणि मन्दन्गृणतामृषीणाम् ।
पदानि : पुरूणि । हि । त्वा । सवना । जनानाम् । ब्रह्माणि । मन्दन् । गृणताम् । ऋषीणाम्
वाक्यम् २: इमामाघोषन्नवसा सहूतिं तिरो विश्वाँ अर्चतो याह्यर्वाङ् ॥
पदानि : इमाम् । आऽघोषन् । अवसा । सऽहूतिम् । तिरः । विश्वान् । अर्चतः । याहि । अर्वाङ्

४३९. मण्डलम् १०, सूक्तम् ९२, मन्त्रः १ (ऋक्सङ्ख्या : ९८३०)
वाक्यम् १: यज्ञस्य वो रथ्यँ विशपतिँ विशां होतारमक्तोरतिँथिं विभावसुम् ।
पदानि : यज्ञस्य । वः । रथ्यम् । विशपतिम् । विशाम् । होतारम् । अक्तोः । अतिथिम् । विभाऽवसुम्
वाक्यम् २: शोचञ्छुष्कासु हरिणीषु जर्भुरद्वृषा केतुर्यजतो द्यामशायत ॥
पदानि : शोचन् । शुष्कासु । हरिणीषु । जर्भुरत् । वृषा । केतुः । यजतः । द्याम् । अशायत

४४०. मण्डलम् १०, सूक्तम् ९४, मन्त्रः ५ (ऋक्सङ्ख्या : ९८६४)
वाक्यम् १: सुपर्णा वाचमक्रतोप द्यव्याखरे कृष्णा इषिरा अनर्तिषुः ।
पदानि : सुऽपर्णाः । वाचम् । अक्रत । उप । द्यवि । आऽखरे । कृष्णाः । इषिराः । अनर्तिषुः
वाक्यम् २: न्यङ्ङि यन्त्युपरस्य निष्कृतं पुरू रेतो दधिरे सूर्यश्चितः ॥
पदानि : न्यक् । नि । यन्ति । उपरस्य । निःऽकृतम् । पुरु । रेतः । दधिरे । सूर्यऽश्चितः

४४१. मण्डलम् १०, सूक्तम् ९४, मन्त्रः ८ (ऋक्सङ्ख्या : ९८६७)
वाक्यम् १: ते अद्रयो दशयन्त्रास आशवस्तेषामाधानं पर्येति हर्यतम् ।
पदानि : ते । अद्रयः । दशऽयन्त्रासः । आशवः । तेषाम् । आऽधानम् । परि । एति । हर्यतम्
वाक्यम् २: त ऊं सुतस्य सोम्यस्यान्धसोंऽशोः पीयूषं प्रथमस्य भेजिरे ॥

पदानि : ते । ऊँ इति । सुतस्य । सोम्यस्य । अन्धसः । अंशोः । पीयूषम् । प्रथमस्य । भेजिरे

४४२. मण्डलम् १०, सूक्तम् ९५, मन्त्रः १० (ऋक्सङ्ख्या : ९८८३)
वाक्यम् १: विद्युन्न या पतन्ती दविद्योद्भरन्ती मे अप्या काम्यानि ।
पदानि : विऽद्युत् । न । या । पतन्ती । दविद्योत् । भरन्ती । मे । अप्या । काम्यानि
वाक्यम् २: जनिष्टो अपो नर्यः सुजातः प्रोर्वशी तिरत दीर्घमायुः ॥
पदानि : जनिष्टो इति । अपः । नर्यः । सुऽजातः । प्र । उर्वशी । तिरत । दीर्घम् । आयुः

४४३. मण्डलम् १०, सूक्तम् ९६, मन्त्रः ११ (ऋक्सङ्ख्या : ९९०२)
वाक्यम् १: आ रोदसी हर्यमाणो महित्वा नव्यंनव्यं हर्यसि मन्म नु प्रियम् ।
पदानि : आ । रोदसी इति । हर्यमाणः । महिऽत्वा । नव्यम्ऽनव्यम् । हर्यसि । मन्म । नु । प्रियम्
वाक्यम् २: प्र पस्त्यमसुर हर्यतं गोरा विष्कृधि हरये सूर्याय ॥
पदानि : प्र । पस्त्यम् । असुर । हर्यतम् । गोः । आ । विः । कृधि । हरये । सूर्याय

४४४. मण्डलम् १०, सूक्तम् ९६, मन्त्रः १३ (ऋक्सङ्ख्या : ९९०४)
वाक्यम् १: अपाः पूर्वेषां हरिवः सुतानामथो इदं सवनं केवलं ते ।
पदानि : अपाः । पूर्वेषाम् । हरिऽवः । सुतानाम् । अथो इति । इदम् । सवनम् । केवलम् । ते
वाक्यम् २: ममद्धि सोमं मधुमन्तमिन्द्र सत्रा वृषञ्जठर आ वृषस्व ॥
पदानि : ममद्धि । सोमम् । मधुऽमन्तम् । इन्द्र । सत्रा । वृषन् । जठरे । आ । वृषस्व

४४५. मण्डलम् १०, सूक्तम् ९८, मन्त्रः ४ (ऋक्सङ्ख्या : ९९३१)
वाक्यम् १: आ नो द्रप्सा मधुमन्तो विशन्त्विन्द्र देह्यधिरथं सहस्रम् ।
पदानि : आ । नः । द्रप्साः । मधुऽमन्तः । विशन्तु । इन्द्र । देहि । अधिऽरथम् । सहस्रम्
वाक्यम् २: नि षीद होत्रमृतुथा यजस्व देवान्देवापे हविषा सपर्य ॥
पदानि : नि । सीद । होत्रम् । ऋतुऽथा । यजस्व । देवान् । देवऽआपे । हविषा । सपर्य

४४६. मण्डलम् १०, सूक्तम् ९८, मन्त्रः ९ (ऋक्सङ्ख्या : ९९३६)
वाक्यम् १: त्वां पूर्व ऋषयो गीर्भिरायन्त्वामध्वरेषु पुरुहूत विश्वे ।
पदानि : त्वाम् । पूर्वे । ऋषयः । गीःऽभिः । आयन् । त्वाम् । अध्वरेषु । पुरुऽहूत । विश्वे
वाक्यम् २: सहस्राण्यधिरथान्यस्मे आ नो यज्ञं रोहिदश्वोप याहि ॥
पदानि : सहस्राणि । अधिऽरथानि । अस्मे इति । आ । नः । यज्ञम् । रोहित्ऽअश्व । उप । याहि

४४७. मण्डलम् १०, सूक्तम् ९९, मन्त्रः ३ (ऋक्सङ्ख्या : ९९४२)
वाक्यम् १: स वाजं यातापदुष्पदा यन्त्स्वर्षाता परि षदत्सनिष्यन् ।
पदानि : सः । वाजम् । याता । अपदुःऽपदा । यन् । स्वःऽसाता । परि । सदत् । सनिष्यन्
वाक्यम् २: अनर्वा यच्छतदुरस्य वेदो घ्नञ्छिश्नदेवाँ अभि वर्पसा भूत् ॥
पदानि : अनर्वा । यत् । शतऽदुरस्य । वेदः । घ्नन् । शिश्नऽदेवान् । अभि । वर्पसा । भूत्

४४८. मण्डलम् १०, सूक्तम् ९९, मन्त्रः ६ (ऋक्सङ्ख्या : ९९४५)
वाक्यम् १: स इद्वासं तुवीरवं पतिर्दन् षळक्षं त्रिशीर्षाणं दमन्यत् ।

पदानि : सः । इत् । दासम् । तुविऽरवम् । पतिः । दन् । षट्ऽअक्षम् । त्रिऽशीर्षाणम् । दमन्यत्
वाक्यम् २: अस्य त्रितो न्वोजसा वृधानो विपा वराहमयोअग्रया हन् ॥
पदानि : अस्य । त्रितः । नु । ओजसा । वृधानः । विपा । वराहम् । अयःऽअग्रया । हन्नितिहन्

४४९. मण्डलम् १०, सूक्तम् १००, मन्त्रः १२ (ऋक्सङ्ख्या : ९९६३)
वाक्यम् १: चित्रस्ते भानुः क्रतुप्रा अभिष्टिः सन्ति स्पृधो जरणिप्रा अधृष्टाः ।
पदानि : चित्रः । ते । भानुः । क्रतुऽप्राः । अभिष्टिः । सन्ति । स्पृधः । जरणिऽप्राः । अधृष्टाः
वाक्यम् २: रजिष्ठया रज्या पश्व आ गोस्तूतूर्षति पर्यग्रं दुवस्युः ॥
पदानि : रजिष्ठया । रज्या । पश्वः । आ । गोः । तूतूर्षति । परि । अग्रम् । दुवस्युः

४५०. मण्डलम् १०, सूक्तम् १०३, मन्त्रः ११ (ऋक्सङ्ख्या : ९९९८)
वाक्यम् १: अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
पदानि : अस्माकम् । इन्द्रः । सम्ऽऋतेषु । ध्वजेषु । अस्माकम् । याः । इषवः । ताः । जयन्तु
वाक्यम् २: अस्माकं वीरा उत्तरे भवन्त्वस्माँ उ देवा अवता हवेषु ॥
पदानि : अस्माकम् । वीराः । उत्ऽतरे । भवन्तु । अस्मान् । ऊँ इति । देवाः । अवत । हवेषु

४५१. मण्डलम् १०, सूक्तम् १०४, मन्त्रः २ (ऋक्सङ्ख्या : १०००२)
वाक्यम् १: अप्सु धूतस्य हरिवः पिबेह नृभिः सुतस्य जठरं पृणस्व ।
पदानि : अप्ऽसु । धूतस्य । हरिऽवः । पिब । इह । नृऽभिः । सुतस्य । जठरम् । पृणस्व
वाक्यम् २: मिमिक्षुर्यमद्रय इन्द्र तुभ्यं तेभिर्वर्धस्व मदमुक्थवाहः ॥
पदानि : मिमिक्षुः । यम् । अद्रयः । इन्द्र । तुभ्यम् । तेभिः । वर्धस्व । मदम् । उक्थऽवाहः

४५२. मण्डलम् १०, सूक्तम् १०४, मन्त्रः ९ (ऋक्सङ्ख्या : १०००९)
वाक्यम् १: अपो महीरभिशस्तेरमुञ्चोऽजागरास्वधिं देव एकः ।
पदानि : अपः । महीः । अभिऽशस्तेः । अमुञ्चः । अजागः । आसु । अधिं । देवः । एकः
वाक्यम् २: इन्द्र यास्त्वं वृत्रतूर्ये चकर्थ ताभिर्विश्वायुस्तन्वं पुपुष्याः ॥
पदानि : इन्द्र । याः । त्वम् । वृत्रऽतूर्ये । चकर्थ । ताभिः । विश्वऽआयुः । तन्वम् । पुपुष्याः

४५३. मण्डलम् १०, सूक्तम् १०४, मन्त्रः १० (ऋक्सङ्ख्या : १००१०)
वाक्यम् १: वीरेण्यः क्रतुरिन्द्रः सुशस्तिरुतापि धेना पुरुहूतमीट्टे ।
पदानि : वीरेण्यः । क्रतुः । इन्द्रः । सुऽशस्तिः । उत । अपि । धेना । पुरुऽहूतम् । ईट्टे
वाक्यम् २: आर्दयद्वृत्रमकृणोदु लोकं ससाहे शक्रः पृतना अभिष्टिः ॥
पदानि : आर्दयत् । वृत्रम् । अकृणोत् । ऊँ इति । लोकम् । ससहे । शक्रः । पृतनाः । अभिष्टिः

४५४. मण्डलम् १०, सूक्तम् १०८, मन्त्रः २ (ऋक्सङ्ख्या : १००४६)
वाक्यम् १: इन्द्रस्य दूतीरिषिता चरामि महः इच्छन्तीः पणयो निधीन्वः ।
पदानि : इन्द्रस्य । दूतीः । इषिता । चरामि । महः । इच्छन्तीः । पणयः । निऽधीन् । वः
वाक्यम् २: अतिष्कदो भियसा तन्न आवत्तथा रसाया अतरं पयांसि ॥
पदानि : अतिऽस्कदः । भियसा । तत् । नः । आवत् । तथा । रसायाः । अतरम् । पयांसि

४५५. मण्डलम् १०, सूक्तम् १०८, मन्त्रः ११ (ऋक्सङ्ख्या : १००५५)
वाक्यम् १: दूरमि॑त पणयो॒ वरी॑य उद्गावो॑ यन्तु मिन॒तीर्ऋ॒तेन॑ ।
पदानि : दूर॑म् । इ॒त॒ । प॒ण॒यः॒ । वरी॑यः । उत् । गावः॑ । य॒न्तु॒ । मि॒न॒तीः॒ । ऋ॒तेन॑
वाक्यम् २: बृह॒स्पति॒र्या अवि॑न्दन्निगू॒ळ्हाः॒ सोमो॒ ग्रावा॑ण॒ ऋष॑यश्च॒ विप्राः॑ ॥
पदानि : बृ॒ह॒स्पतिः॑ । याः । अवि॑न्दत् । निऽगू॑ळ्हाः । सोमः॑ । ग्रावा॑णः । ऋष॑यः । च॒ । विप्राः॑

४५६. मण्डलम् १०, सूक्तम् ११०, मन्त्रः ११ (ऋक्सङ्ख्या : १००७३)
वाक्यम् १: स॒द्यो जा॒तो व्य॑मिमीत य॒ज्ञम॒ग्निर्दे॒वाना॑मभवत्पुरो॒गाः ।
पदानि : स॒द्यः । जा॒तः । वि । अ॒मि॒मी॒त॒ । य॒ज्ञम् । अ॒ग्निः । दे॒वाना॑म् । अ॒भ॒व॒त् । पु॒रः॒ऽगाः
वाक्यम् २: अ॒स्य होतुः॑ प्र॒दिश्यृ॑तस्य॒ वाचि॒ स्वाहा॑कृतं ह॒विर॑दन्तु दे॒वाः ॥
पदानि : अ॒स्य । होतुः॑ । प्र॒ऽदिशि॑ । ऋ॒तस्य॑ । वा॒चि । स्वाहा॑ऽकृतम् । ह॒विः । अ॒द॒न्तु॒ । दे॒वाः

४५७. मण्डलम् १०, सूक्तम् ११२, मन्त्रः ६ (ऋक्सङ्ख्या : १००८९)
वाक्यम् १: इ॒दं ते॒ पात्रं॒ सन॑वित्तमिन्द्र पिबा॒ सोम॑मे॒ना श॑तक्रतो ।
पदानि : इ॒दम् । ते॒ । पात्र॑म् । सन॑ऽवित्तम् । इ॒न्द्र॒ । पिब॑ । सोम॑म् । एना । श॒त॒क्र॒तो॒ इति॑ शत॑ऽक्रतो
वाक्यम् २: पूर्ण आ॑हा॒वो म॑दि॒रस्य॒ मध्वो॒ यं विश्व॒ इद॑भि॒हर्य॑न्ति दे॒वाः ॥
पदानि : पूर्णः । आ॒ऽह॒वः । म॒दि॒रस्य॑ । मध्वः॑ । यम् । विश्वे॑ । इत् । अ॒भि॒ऽहर्य॑न्ति । दे॒वाः

४५८. मण्डलम् १०, सूक्तम् ११३, मन्त्रः १ (ऋक्सङ्ख्या : १००९४)
वाक्यम् १: तम॑स्य॒ द्यावा॑पृथि॒वी सचेतसा॒ विश्वे॑भि॒र्देवै॒रनु॑ शुष्म॒मावताम् ।
पदानि : तम् । अ॒स्य॒ । द्यावा॑पृथि॒वी इति॑ । सऽचेतसा । विश्वे॑भिः । दे॒वैः । अनु॑ । शुष्म॑म् । आ॒व॒ता॒म्
वाक्यम् २: यदैत्कृ॑ण्वा॒नो म॑हि॒मान॑मिन्द्रि॒यं पी॒त्वी सोम॑स्य क्रतु॒माँ अ॑वर्धत ॥
पदानि : यत् । ऐत् । कृ॒ण्वा॒नः । म॒हि॒मान॑म् । इ॒न्द्रि॒यम् । पी॒त्वी । सोम॑स्य । क्र॒तु॒ऽमान् । अ॒व॒र्ध॒त

४५९. मण्डलम् १०, सूक्तम् ११६, मन्त्रः ९ (ऋक्सङ्ख्या : १०१३१)
वाक्यम् १: प्रेन्द्रा॒ग्निभ्या॑ सुवच॒स्यामि॑यर्मि॒ सिन्धा॑विव॒ प्रेर॑यं॒ नाव॑म॒र्कैः ।
पदानि : प्र । इ॒न्द्रा॒ग्निऽभ्या॑म् । सु॒ऽव॒च॒स्याम् । इ॒य॒र्मि॒ । सिन्धौ॑ऽइव । प्र । ई॒र॒य॒म् । नाव॑म् । अ॒र्कैः
वाक्यम् २: अया॑ इव॒ परि॑ चरन्ति दे॒वा ये अ॒स्मभ्यं॑ धन॒दा उ॒द्भिद॑श्च ॥
पदानि : अयाः॑ऽइव । परि॑ । च॒र॒न्ति॒ । दे॒वाः । ये । अ॒स्मभ्य॑म् । ध॒न॒ऽदाः । उ॒त्ऽभिदः॑ । च॒

४६०. मण्डलम् १०, सूक्तम् १२३, मन्त्रः ४ (ऋक्सङ्ख्या : १०१९३)
वाक्यम् १: जा॒नन्तो॑ रू॒पम॑कृपन्त॒ विप्रा॑ मृ॒गस्य॒ घोषं॑ महि॒षस्य॒ हि ग्मन् ।
पदानि : जा॒नन्तः॑ । रू॒पम् । अ॒कृ॒प॒न्त॒ । विप्राः॑ । मृ॒गस्य॑ । घोष॑म् । म॒हि॒षस्य॑ । हि । ग्मन्
वाक्यम् २: ऋ॒तेन॒ यन्तो॒ अधि॒ सिन्धु॑मस्थु॒र्विद॒द्गन्ध॒र्वो अ॒मृता॑नि॒ नाम॑ ॥
पदानि : ऋ॒तेन॑ । यन्तः॑ । अधि॑ । सिन्धु॑म् । अ॒स्थुः॒ । वि॒दत् । ग॒न्ध॒र्वः । अ॒मृता॑नि । नाम॑

४६१. मण्डलम् १०, सूक्तम् १२८, मन्त्रः २ (ऋक्सङ्ख्या : १०२३२)
वाक्यम् १: मम॑ दे॒वा वि॑ह॒वे सं॑न्तु॒ सर्व॒ इन्द्र॑वन्तो म॒रुतो॒ विष्णु॑रग्निः ।
पदानि : मम॑ । दे॒वाः । वि॒ऽह॒वे । स॒न्तु॒ । सर्वे॑ । इन्द्र॑ऽवन्तः । म॒रुतः॑ । विष्णुः॑ । अ॒ग्निः
वाक्यम् २: मम॒ान्तरि॑क्षमुरुलो॒कमस्तु॑ मह्यं॒ वातः॑ पवतां॒ काम॑े अ॒स्मिन् ॥
पदानि : मम॑ । अ॒न्तरि॑क्षम् । उ॒रु॒ऽलो॒कम् । अ॒स्तु॒ । म॒ह्य॒म् । वातः॑ । प॒व॒ता॒म् । काम॑े । अ॒स्मिन्

४६२. मण्डलम् १०, सूक्तम् १३१, मन्त्रः २ (ऋक्सङ्ख्या : १०२५५)
वाक्यम् १: कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।
पदानि : कुवित् । अङ्ग । यवऽमन्तः । यवम् । चित् । यथा । दान्ति । अनुऽपूर्वम् । विऽयूय
वाक्यम् २: इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमोवृक्तिं न जग्मुः ॥
पदानि : इहऽइह । एषाम् । कृणुहि । भोजनानि । ये । बर्हिषः । नमःऽवृक्तिम् । न । जग्मुः

४६३. मण्डलम् १०, सूक्तम् १३२, मन्त्रः ७ (ऋक्सङ्ख्या : १०२६७)
वाक्यम् १: युवं ह्यप्नराजावसीदतं तिष्ठद्रथं न धूर्षदं वनर्षदम् ।
पदानि : युवम् । हि । अप्नऽराजौ । असीदतम् । तिष्ठत् । रथम् । न । धूःऽसदम् । वनऽसदम्
वाक्यम् २: ता नः कणूकयन्तीर्नृमेधस्तत्रे अंहसः सुमेधस्तत्रे अंहसः ॥
पदानि : ताः । नः । कणूकऽयन्तीः । नृऽमेधः । तत्रे । अंहसः । सुऽमेधः । तत्रे । अंहसः

४६४. मण्डलम् १०, सूक्तम् १३९, मन्त्रः ४ (ऋक्सङ्ख्या : १०३१२)
वाक्यम् १: विश्वावसुं सोम गन्धर्वमापो दट्टशुषीस्तट्टतेना व्यायन् ।
पदानि : विश्वऽवसुम् । सोम । गन्धर्वम् । आपः । दट्टशुषीः । तत् । ऋतेन । वि । आयन्
वाक्यम् २: तदन्ववैदिन्द्रो रारहाण आसां परि सूर्यस्य परिधीँरपश्यत् ॥
पदानि : तत् । अनुऽअवैत् । इन्द्रः । ररहाणः । आसाम् । परि । सूर्यस्य । परिऽधीन् । अपश्यत्

४६५. मण्डलम् १०, सूक्तम् १४१, मन्त्रः १ (ऋक्सङ्ख्या : १०३२१)
वाक्यम् १: अग्ने अच्छा वदेह नः प्रत्यङ्नः सुमना भव ।
पदानि : अग्ने । अच्छ । वद । इह । नः । प्रत्यङ् । नः । सुऽमनाः । भव
वाक्यम् २: प्र नो यच्छ विशस्पते धनदा असि नस्त्वम् ॥
पदानि : प्र । नः । यच्छ । विशः । पते । धनऽदाः । असि । नः । त्वम्

४६६. मण्डलम् १०, सूक्तम् १४८, मन्त्रः २ (ऋक्सङ्ख्या : १०३६५)
वाक्यम् १: ऋष्वस्त्वमिन्द्र शूर जातो दासीर्विशः सूर्येण सह्याः ।
पदानि : ऋष्वः । त्वम् । इन्द्र । शूर । जातः । दासीः । विशः । सूर्येण । सह्याः
वाक्यम् २: गुहा हितं गुह्यं गूळ्हमप्सु बिभृमसि प्रस्रवणे न सोमम् ॥
पदानि : गुहा । हितम् । गुह्यम् । गूळ्हम् । अप्ऽसु । बिभृमसि । प्रऽस्रवणे । न । सोमम्

४६७. मण्डलम् १०, सूक्तम् १६१, मन्त्रः ४ (ऋक्सङ्ख्या : १०४३३)
वाक्यम् १: शतं जीव शरदो वर्धमानः शतं हेमन्ताञ्छतमु वसन्तान् ।
पदानि : शतम् । जीव । शरदः । वर्धमानः । शतम् । हेमन्तान् । शतम् । ऊँ इति । वसन्तान्
वाक्यम् २: शतमिन्द्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः ॥
पदानि : शतम् । इन्द्राग्नी इति । सविता । बृहस्पतिः । शतऽआयुषा । हविषा । इमम् । पुनः । दुः

४६८. मण्डलम् १०, सूक्तम् १६१, मन्त्रः ५ (ऋक्सङ्ख्या : १०४३४)
वाक्यम् १: आहार्षं त्वाविदं त्वा पुनरागाः पुनर्नव ।
पदानि : आ । अहार्षम् । त्वा । अविदम् । त्वा । पुनः । आ । अगाः । पुनःऽनव

वाक्यम् २: सर्वाङ्ग सर्वं ते चक्षुः सर्वमायुश्च तेऽविदम् ॥
पदानि : सर्वऽअङ्ग । सर्वम् । ते । चक्षुः । सर्वम् । आयुः । च । ते । अविदम्

४६९. मण्डलम् १०, सूक्तम् १६५, मन्त्रः ५ (ऋक्सङ्ख्या : १०४५६)
वाक्यम् १: ऋचा कपोतं नुदत प्रणोदमिषं मदन्तः परि गां नयध्वम् ।
पदानि : ऋचा । कपोतम् । नुदत । प्रऽनोदम् । इषम् । मदन्तः । परि । गाम् । नयध्वम्
वाक्यम् २: संयोपयन्तो दुरितानि विश्वा हित्वा न ऊर्जं प्र पतात्पतिष्ठः ॥
पदानि : सम्ऽयोपयन्तः । दुःऽइतानि । विश्वा । हित्वा । नः । ऊर्जम् । प्र । पतात् । पतिष्ठः

४७०. मण्डलम् १०, सूक्तम् १६८, मन्त्रः १ (ऋक्सङ्ख्या : १०४६६)
वाक्यम् १: वातस्य नु महिमानं रथस्य रुजन्नेति स्तनयन्नस्य घोषः ।
पदानि : वातस्य । नु । महिमानम् । रथस्य । रुजन् । एति । स्तनयन् । अस्य । घोषः
वाक्यम् २: दिविस्पृग्यात्यरुणानि कृण्वन्नुतो एति पृथिव्या रेणुमस्यन् ॥
पदानि : दिविऽस्पृक् । याति । अरुणानि । कृण्वन् । उतो इति । एति । पृथिव्या । रेणुम् । अस्यन्

४७१. मण्डलम् १०, सूक्तम् १७०, मन्त्रः १ (ऋक्सङ्ख्या : १०४७४)
वाक्यम् १: विभ्राड्बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविंहुतम् ।
पदानि : विऽभ्राट् । बृहत् । पिबतु । सोम्यम् । मधु । आयुः । दधत् । यज्ञऽपतौ । अविंऽहुतम्
वाक्यम् २: वातजूतो यो अभिरक्षति त्मना प्रजाः पुपोष पुरुधा वि राजति ॥
पदानि : वातऽजूतः । यः । अभिऽरक्षति । त्मना । प्रऽजाः । पुपोष । पुरुधा । वि । राजति

४७२. मण्डलम् १०, सूक्तम् १७७, मन्त्रः २ (ऋक्सङ्ख्या : १०५०६)
वाक्यम् १: पतंगो वाचं मनसा बिभर्ति तां गन्धर्वोऽवदद्गर्भे अन्तः ।
पदानि : पतङ्गः । वाचम् । मनसा । बिभर्ति । ताम् । गन्धर्वः । अवदत् । गर्भे । अन्तरिति
वाक्यम् २: तां द्योतमानां स्वर्यं मनीषामृतस्य पदे कवयो नि पान्ति ॥
पदानि : ताम् । द्योतमानाम् । स्वर्यम् । मनीषाम् । ऋतस्य । पदे । कवयः । नि । पान्ति

४७३. मण्डलम् १०, सूक्तम् १९१, मन्त्रः ३ (ऋक्सङ्ख्या : १०५५१)
वाक्यम् १: समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम् ।
पदानि : समानः । मन्त्रः । सम्ऽइतिः । समानी । समानम् । मनः । सह । चित्तम् । एषाम्
वाक्यम् २: समानं मन्त्रमभि मन्त्रये वः समानेन वो हविषा जुहोमि ॥
पदानि : समानम् । मन्त्रम् । अभि । मन्त्रये । वः । समानेन । वः । हविषा । जुहोमि

दशपदवाक्यकाः मन्त्राः
(२९६ मन्त्राः)

१. मण्डलम् १, सूक्तम् २४, मन्त्रः ९ (ऋक्सङ्ख्या : २६२)
वाक्यम् १: शतं ते राजन्भिषजः सहस्रमुर्वी गभीरा सुमतिष्टे अस्तु ।
पदानि : शतम् । ते । राजन् । भिषजः । सहस्रम् । उर्वी । गभीरा । सुऽमतिः । ते । अस्तु
वाक्यम् २: बाधस्व दूरे निर्ऋतिं पराचैः कृतं चिदेनः प्र मुमुग्ध्यस्मत् ॥
पदानि : बाधस्व । दूरे । निःऽऋतिम् । पराचैः । कृतम् । चित् । एनः । प्र । मुमुग्धि । अस्मत्

२. मण्डलम् १, सूक्तम् २४, मन्त्रः ११ (ऋक्सङ्ख्या : २६४)
वाक्यम् १: तत्त्वा॑ यामि॒ ब्रह्म॑णा॒ वन्द॑मान॒स्तदा शा॑स्ते॒ यज॑मानो॒ हवि॑र्भिः॑ ।
पदानि : तत्। त्वा॒ । यामि॑ । ब्रह्म॑णा । वन्द॑मानः । तत् । आ । शा॒स्ते॒ । यज॑मानः । हवि॑ः॒ऽभिः॑
वाक्यम् २: अहे॑ळमानो॒ वरु॑णे॒ह बो॒ध्युरु॑शंस॒ मा न॒ आयुः॒ प्र मो॑षीः ॥
पदानि : अहे॑ळमानः । व॒रु॒ण॒ । इ॒ह । बो॒धि॒ । उरु॑ऽशंस । मा । नः॒ । आयुः॑ । प्र । मो॒षीः॒

३. मण्डलम् १, सूक्तम् ३३, मन्त्रः १ (ऋक्सङ्ख्या : ३८४)
वाक्यम् १: एताया॒मोप॑ गव्यन्त॒ इन्द्र॑म॒स्माक॑ं सु प्रम॑तिं वावृधाति ।
पदानि : आ । इ॒त॒ । अया॑म । उप॑ । गव्यन्तः॑ । इन्द्र॑म् । अ॒स्माक॑म् । सु । प्रऽम॑तिम् । व॒वृ॒धा॒ति॒
वाक्यम् २: अ॒ना॒मृ॒णः कु॑विदा॒दस्य॑ रा॒यो गवां॒ केत॑ं पर॑मावर्जते नः ॥
पदानि : अ॒ना॒मृ॒णः । कु॒वि॒त् । आत् । अ॒स्य॒ । रा॒यः । गवा॑म् । केत॑म् । पर॑म् । आ॒ऽव॒र्ज॒ते॒ । नः॒

४. मण्डलम् १, सूक्तम् ३३, मन्त्रः ३ (ऋक्सङ्ख्या : ३८६)
वाक्यम् १: नि सर्व॑सेन इषु॒धीँर॑सक्त॒ सम॒र्यो गा अ॑ज॒ति॒ यस्य॒ वष्टि॑ ।
पदानि : नि । सर्व॑ऽसेनः । इ॒षु॒ऽधीन् । अ॒स॒क्त॒ । स॒म् । अ॒र्यः । गाः । अ॒ज॒ति॒ । यस्य॑ । वष्टि॑
वाक्यम् २: चो॒ष्कू॒यमा॑ण इन्द्र॒ भूरि॑ वा॒मं मा प॒णिर्भू॒रस्मदधि॑ प्रवृद्ध ॥
पदानि : चो॒ष्कू॒यमा॑णः । इ॒न्द्र॒ । भूरि॑ । वा॒मम् । मा । प॒णिः । भूः॒ । अ॒स्मत् । अधि॑ । प्र॒ऽवृ॒द्ध॒

५. मण्डलम् १, सूक्तम् ३३, मन्त्रः १० (ऋक्सङ्ख्या : ३९३)
वाक्यम् १: न ये दि॒वः पृ॑थि॒व्या अन्त॑मापु॒र्न मा॒याभि॑र्धन॒दां प॒र्यभू॑वन् ।
पदानि : न । ये । दि॒वः । पृ॒थि॒व्याः । अन्त॑म् । आ॒पुः॒ । न । मा॒याभिः॑ । ध॒न॒ऽदाम् । प॒रि॒ऽअभू॑वन्
वाक्यम् २: युज॑ं वज्रं॑ वृषभश्च॑क्र इन्द्रो॒ निर्ज्योति॑षा॒ तम॑सो॒ गा अ॑दुक्षत् ॥
पदानि : युज॑म् । वज्र॑म् । वृ॒ष॒भः । च॒क्रे॒ । इन्द्रः॑ । निः । ज्योति॑षा । तम॑सः । गाः । अ॒धु॒क्ष॒त्

६. मण्डलम् १, सूक्तम् ३३, मन्त्रः १३ (ऋक्सङ्ख्या : ३९६)
वाक्यम् १: अ॒भि सि॒ध्मो अ॑जिगादस्य॒ शत्रू॒न्वि ति॒ग्मेन॑ वृष॒भेणा॒ पुरो॑ऽभेत् ।
पदानि : अ॒भि । सि॒ध्मः । अ॒जि॒गा॒त् । अ॒स्य॒ । शत्रू॑न् । वि । ति॒ग्मेन॑ । वृ॒ष॒भेण॑ । पुरः॑ । अ॒भे॒त्
वाक्यम् २: सं वज्रे॑णासृजद्वृ॒त्रमिन्द्रः॒ प्र स्वां म॒तिम॑तिर॒च्छाश॑दानः ॥
पदानि : सम् । वज्रे॑ण । अ॒सृ॒ज॒त् । वृ॒त्रम् । इन्द्रः॑ । प्र । स्वाम् । म॒तिम् । अ॒ति॒र॒त् । शाश॑दानः

७. मण्डलम् १, सूक्तम् ३४, मन्त्रः ४ (ऋक्सङ्ख्या : ४०२)
वाक्यम् १: त्रिर्व॒र्तिर्या॑तं॒ त्रिर॑नु॒व्रते॑ ज॒ने त्रिः सु॒प्राव्ये॑ त्रे॒धेव॑ शिक्षतम् ।
पदानि : त्रिः । व॒र्तिः । या॒त॒म् । त्रिः । अ॒नु॒ऽव्र॒ते । जने । त्रिः॑ । सु॒ऽप्र॒ऽअ॒व्ये॑ । त्रे॒धाऽइ॑व । शि॒क्ष॒त॒म्
वाक्यम् २: त्रिर्नान्द्यं॑ वहतमश्विना यु॒वं त्रिः पृक्षो॑ अ॒स्मे अ॒क्षरे॑व पिन्वतम् ॥
पदानि : त्रिः । नान्द्य॑म् । व॒ह॒त॒म् । अ॒श्वि॒ना॒ । यु॒वम् । त्रिः । पृक्षः॑ । अ॒स्मे इति॑ । अ॒क्षरा॑ऽइव । पि॒न्व॒त॒म्

८. मण्डलम् १, सूक्तम् ५१, मन्त्रः १ (ऋक्सङ्ख्या : ६००)
वाक्यम् १: अ॒भि त्यं मे॒षं पु॑रुहू॒तमृ॒ग्मिय॒मिन्द्रं॑ गी॒र्भिर्म॑दता॒ वस्वो॑ अर्ण॒वम् ।
पदानि : अ॒भि । त्यम् । मे॒षम् । पु॒रु॒ऽहू॒तम् । ऋ॒ग्मिय॑म् । इन्द्र॑म् । गीः॒ऽभिः । म॒द॒त॒ । वस्वः॑ । अ॒र्ण॒वम्

वाक्यम् २: यस्य द्यावो न विचरन्ति मानुषा भुजे मंहिष्ठमभि विप्रमर्चत ॥
पदानि : यस्य। द्यावः। न। विऽचरन्ति। मानुषा। भुजे। मंहिष्ठम्। अभि। विप्रम्। अर्चत

९. मण्डलम् १, सूक्तम् ५१, मन्त्रः ५ (ऋक्सङ्ख्या : ६०४)
वाक्यम् १: त्वं मायाभिरप मायिनोऽधमः स्वधाभिर्ये अधि शुम्नावजुह्वत।
पदानि : त्वम्। मायाभिः। अप। मायिनः। अधमः। स्वधाभिः। ये। अधि। शुम्नौ। अजुह्वत
वाक्यम् २: त्वं पिप्रोर्नृमणः प्रारुजः पुरः प्र ऋजिश्वानं दस्युहत्येष्वाविथ ॥
पदानि : त्वम्। पिप्रोः। नृऽमनः। प्र। अरुजः। पुरः। प्र। ऋजिश्वानम्। दस्युऽहत्येषु। आविथ

१०. मण्डलम् १, सूक्तम् ५१, मन्त्रः ८ (ऋक्सङ्ख्या : ६०७)
वाक्यम् १: वि जानीह्यार्यान्ये च दस्यवो बर्हिष्मते रन्धया शासदव्रतान्।
पदानि : वि। जानीहि। आर्यान्। ये। च। दस्यवः। बर्हिष्मते। रन्धय। शासत्। अव्रतान्
वाक्यम् २: शाकी भव यजमानस्य चोदिता विश्वेत्ता ते सधमादेषु चाकन ॥
पदानि : शाकी। भव। यजमानस्य। चोदिता। विश्वा। इत्। ता। ते। सधऽमादेषु। चाकन

११. मण्डलम् १, सूक्तम् ५२, मन्त्रः १ (ऋक्सङ्ख्या : ६१५)
वाक्यम् १: त्यं सु मेषं महया स्वर्विदं शतं यस्य सुभ्वः साकमीरते।
पदानि : त्यम्। सु। मेषम्। महय। स्वःऽविदम्। शतम्। यस्य। सुऽभ्वः। साकम्। ईरते
वाक्यम् २: अत्यं न वाजं हवनस्यदं रथमेन्द्रं ववृत्यामवसे सुवृक्तिभिः ॥
पदानि : अत्यम्। न। वाजम्। हवनऽस्यदम्। रथम्। आ। इन्द्रम्। ववृत्याम्। अवसे। सुवृक्तिऽभिः

१२. मण्डलम् १, सूक्तम् ५२, मन्त्रः १५ (ऋक्सङ्ख्या : ६२९)
वाक्यम् १: आर्चन्नत्रं मरुतः सस्मिन्नाजौ विश्वे देवासो अमदन्ननु त्वा।
पदानि : आर्चन्। अत्र। मरुतः। सस्मिन्। आजौ। विश्वे। देवासः। अमदन्। अनु। त्वा
वाक्यम् २: वृत्रस्य यद्भृष्टिमता वधेन नि त्वमिन्द्र प्रत्यानं जघन्थ ॥
पदानि : वृत्रस्य। यत्। भृष्टिऽमता। वधेन। नि। त्वम्। इन्द्र। प्रति। आनम्। जघन्थ

१३. मण्डलम् १, सूक्तम् ५३, मन्त्रः ३ (ऋक्सङ्ख्या : ६३२)
वाक्यम् १: शचीव इन्द्र पुरुकृद्युमत्तम तवेदिदमभितश्चेकिते वसु।
पदानि : शचीऽवः। इन्द्र। पुरुऽकृत्। द्युमत्ऽतम। तव। इत्। इदम्। अभितः। चेकिते। वसु
वाक्यम् २: अतः संगृभ्याभिभूत आ भर मा त्वायतो जरितुः काममूनयीः ॥
पदानि : अतः। सम्ऽगृभ्य। अभिऽभूते। आ। भर। मा। त्वाऽयतः। जरितुः। कामम्। ऊनयीः

१४. मण्डलम् १, सूक्तम् ५४, मन्त्रः ३ (ऋक्सङ्ख्या : ६४३)
वाक्यम् १: अर्चा दिवे बृहते शूष्यं१ वचः स्वक्षत्रं यस्य धृषतो धृषन्मनः।
पदानि : अर्च। दिवे। बृहते। शूष्यम्। वचः। स्वऽक्षत्रम्। यस्य। धृषतः। धृषत्। मनः
वाक्यम् २: बृहच्छ्रवा असुरो बर्हणा कृतः पुरो हरिभ्यां वृषभो रथो हि षः ॥
पदानि : बृहत्ऽश्रवाः। असुरः। बर्हणा। कृतः। पुरः। हरिऽभ्याम्। वृषभः। रथः। हि। सः

१५. मण्डलम् १, सूक्तम् ५४, मन्त्रः ५ (ऋक्सङ्ख्या : ६४५)

वाक्यम् १: नि यद्वृणक्षिं श्वसनस्यं मूर्धनि शुष्णस्य चिद्बृन्दिनो रोरुवद्वना।
पदानि : नि। यत्। वृणक्षिं। श्वसनस्यं। मूर्धनिं। शुष्णस्य। चित्। बृन्दिनः। रोरुवत्। वना
वाक्यम् २: प्राचीनेन मनसा बर्हणावता यदद्या चित्कृणवः कस्त्वा परिं॥
पदानि : प्राचीनेन। मनसा। बर्हणाऽवता। यत्। अद्य। चित्। कृणवः। कः। त्वा। परिं

१६. मण्डलम् १, सूक्तम् ६३, मन्त्रः ३ (ऋक्सङ्ख्या : ७२४)
वाक्यम् १: त्वं सत्य इन्द्र धृष्णुरेतान्त्वमृभुक्षा नर्यस्त्वं षाट्।
पदानि : त्वम्। सत्यः। इन्द्र। धृष्णुः। एतान्। त्वम्। ऋभुक्षाः। नर्यः। त्वम्। षाट्
वाक्यम् २: त्वं शुष्णं वृजने पृक्ष आणौ यूने कुत्साय द्युमते सचाहन्॥
पदानि : त्वम्। शुष्णम्। वृजने। पृक्षे। आणौ। यूने। कुत्साय। द्युऽमते। सचा। अहन्

१७. मण्डलम् १, सूक्तम् ६४, मन्त्रः ४ (ऋक्सङ्ख्या : ७३४)
वाक्यम् १: चित्रैरञ्जिभिर्वपुषे व्यञ्जते वक्षःसु रुक्माँ अधिं येतिरे शुभे।
पदानि : चित्रैः। अञ्जिऽभिः। वपुषे। वि। अञ्जते। वक्षःऽसु। रुक्मान्। अधिं। येतिरे। शुभे
वाक्यम् २: अंसेष्वेषां नि मिमृक्षुरृष्टयः साकं जज्ञिरे स्वधया दिवो नरः॥
पदानि : अंसेषु। एषाम्। नि। मिमृक्षुः। ऋष्टयः। साकम्। जज्ञिरे। स्वधया। दिवः। नरः

१८. मण्डलम् १, सूक्तम् ७१, मन्त्रः २ (ऋक्सङ्ख्या : ८०८)
वाक्यम् १: वीळु चिदृळ्हा पितरो न उक्थैरद्रिं रुजन्नङ्गिरसो रवेण।
पदानि : वीळु। चित्। दृळ्हा। पितरः। नः। उक्थैः। अद्रिम्। रुजन्। अङ्गिरसः। रवेण
वाक्यम् २: चक्रुर्दिवो बृहतो गातुमस्मे अहः स्वर्विविदुः केतुमुस्राः॥
पदानि : चक्रुः। दिवः। बृहतः। गातुम्। अस्मे इतिं। अहरितिं। स्वः। विविदुः। केतुम्। उस्राः

१९. मण्डलम् १, सूक्तम् ७१, मन्त्रः ७ (ऋक्सङ्ख्या : ८१३)
वाक्यम् १: अग्निं विश्वा अभि पृक्षः सचन्ते समुद्रं न स्रवतः सप्त यह्वीः।
पदानि : अग्निम्। विश्वाः। अभि। पृक्षः। सचन्ते। समुद्रम्। न। स्रवतः। सप्त। यह्वीः
वाक्यम् २: न जामिभिर्वि चिकिते वयो नो विदा देवेषु प्रमतिं चिकित्वान्॥
पदानि : न। जामिऽभिः। वि। चिकिते। वयः। नः। विदाः। देवेषुं। प्रऽमतिम्। चिकित्वान्

२०. मण्डलम् १, सूक्तम् ७२, मन्त्रः ६ (ऋक्सङ्ख्या : ८२२)
वाक्यम् १: त्रिः सप्त यद्गुह्यानि त्वे इत्पदाविदन्निहिता यज्ञियासः।
पदानि : त्रिः। सप्त। यत्। गुह्यानि। त्वे इतिं। इत्। पदा। अविदन्। निऽहिता। यज्ञियासः
वाक्यम् २: तेभीं रक्षन्ते अमृतं सजोषाः पशूञ्च स्थातॄञ्चरथं च पाहि॥
पदानि : तेभिः। रक्षन्ते। अमृतम्। सऽजोषाः। पशून्। च। स्थातॄन्। चरथम्। च। पाहि

२१. मण्डलम् १, सूक्तम् ७७, मन्त्रः २ (ऋक्सङ्ख्या : ८५७)
वाक्यम् १: यो अध्वरेषु शंतम ऋतावा होता तमू नमोभिरा कृणुध्वम्।
पदानि : यः। अध्वरेषु। शम्ऽतमः। ऋतऽवा। होता। तम्। ऊँ इतिं। नमःऽभिः। आ। कृणुध्वम्
वाक्यम् २: अग्निर्यद्वेर्मर्ताय देवान्त्सचा बोधाति मनसा यजाति॥
पदानि : अग्निः। यत्। वेः। मर्ताय। देवान्। सः। च। बोधाति। मनसा। यजाति

२२. मण्डलम् १, सूक्तम् ८३, मन्त्रः ६ (ऋक्सङ्ख्या : ९१४)
वाक्यम् १: बर्हिर्वा यत्स्वपत्याय वृज्यतेऽर्को वा श्लोकमाघोषते दिवि ।
पदानि : बर्हिः । वा । यत् । सुऽअपत्याय । वृज्यते । अर्कः । वा । श्लोकम् । आऽघोषते । दिवि
वाक्यम् २: ग्रावा यत्र वदति कारुरुक्थ्यस्तस्येदिन्द्रो अभिपित्वेषु रण्यति ॥
पदानि : ग्रावा । यत्र । वदति । कारुः । उक्थ्यः । तस्य । इत् । इन्द्रः । अभिऽपित्वेषु । रण्यति

२३. मण्डलम् १, सूक्तम् ८७, मन्त्रः ४ (ऋक्सङ्ख्या : ९६०)
वाक्यम् १: स हि स्वसृत्पृषदश्वो युवा गणोऽया ईशानस्तविषीभिरावृतः ।
पदानि : सः । हि । स्वऽसृत् । पृषत्ऽअश्वः । युवा । गणः । अया । ईशानः । तविषीभिः । आऽवृतः
वाक्यम् २: असि सत्य ऋणयावानेद्योऽस्या धियः प्रावितार्था वृषा गणः ॥
पदानि : असि । सत्यः । ऋणऽयावा । अनेद्यः । अस्याः । धियः । प्रऽअविता । अर्थ । वृषा । गणः

२४. मण्डलम् १, सूक्तम् ९१, मन्त्रः ३ (ऋक्सङ्ख्या : ९९०)
वाक्यम् १: राज्ञो नु ते वरुणस्य व्रतानि बृहद्गभीरं तव सोम धाम ।
पदानि : राज्ञः । नु । ते । वरुणस्य । व्रतानि । बृहत् । गभीरम् । तव । सोम । धाम
वाक्यम् २: शुचिष्ट्वमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम ॥
पदानि : शुचिः । त्वम् । असि । प्रियः । न । मित्रः । दक्षाय्यः । अर्यमाऽइव । असि । सोम

२५. मण्डलम् १, सूक्तम् ९१, मन्त्रः ४ (ऋक्सङ्ख्या : ९९१)
वाक्यम् १: या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु ।
पदानि : या । ते । धामानि । दिवि । या । पृथिव्याम् । या । पर्वतेषु । ओषधीषु । अप्ऽसु
वाक्यम् २: तेभिर्नो विश्वैः सुमना अहेळन्राजन्त्सोम प्रति हव्या गृभाय ॥
पदानि : तेभिः । नः । विश्वैः । सुऽमनाः । अहेळन् । राजन् । सोम । प्रति । हव्या । गृभाय

२६. मण्डलम् १, सूक्तम् ९१, मन्त्रः २२ (ऋक्सङ्ख्या : १००९)
वाक्यम् १: त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः ।
पदानि : त्वम् । इमाः । ओषधीः । सोम । विश्वाः । त्वम् । अपः । अजनयः । त्वम् । गाः
वाक्यम् २: त्वमा ततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥
पदानि : त्वम् । आ । ततन्थ । उरु । अन्तरिक्षम् । त्वम् । ज्योतिषा । वि । तमः । ववर्थ

२७. मण्डलम् १, सूक्तम् ९१, मन्त्रः २३ (ऋक्सङ्ख्या : १०१०)
वाक्यम् १: देवेन नो मनसा देव सोम रायो भागं सहसावन्नभि युध्य ।
पदानि : देवेन । नः । मनसा । देव । सोम । रायः । भागम् । सहसाऽवन् । अभि । युध्य
वाक्यम् २: मा त्वा तनदीशिषे वीर्यस्योभयेभ्यः प्र चिकित्सा गविष्टौ ॥
पदानि : मा । त्वा । आ । तनत् । ईशिषे । वीर्यस्य । उभयेभ्यः । प्र । चिकित्स । गोऽइष्टौ

२८. मण्डलम् १, सूक्तम् ९२, मन्त्रः ५ (ऋक्सङ्ख्या : १०१५)
वाक्यम् १: प्रत्यर्ची रुशदस्या अदर्शि वि तिष्ठते बाधते कृष्णमभ्वम् ।
पदानि : प्रति । अर्चिः । रुशत् । अस्याः । अदर्शि । वि । तिष्ठते । बाधते । कृष्णम् । अभ्वम्
वाक्यम् २: स्वरुं न पेशो विदथेष्वञ्जञ्चित्रं दिवो दुहिता भानुमश्रेत् ॥

पदानि : स्वरुम्। न। पेशः। विदथेषु। अञ्जन्। चित्रम्। दिवः। दुहिता। भानुम्। अश्रेत्

२९. मण्डलम् १, सूक्तम् ९५, मन्त्रः ३ (ऋक्सङ्ख्या : १०५९)
वाक्यम् १: त्रीणि जाना परि भूषन्त्यस्य समुद्र एकं दिव्येकमप्सु।
पदानि : त्रीणि। जाना। परि। भूषन्ति। अस्य। समुद्रे। एकम्। दिवि। एकम्। अप्ऽसु
वाक्यम् २: पूर्वामनु प्र दिशं पार्थिवानामृतून्प्रशासद्वि दधावनुष्ठु॥
पदानि : पूर्वाम्। अनु। प्र। दिशम्। पार्थिवानाम्। ऋतून्। प्रऽशासत्। वि। दधौ। अनुष्ठु

३०. मण्डलम् १, सूक्तम् १०१, मन्त्रः ८ (ऋक्सङ्ख्या : ११९५)
वाक्यम् १: यद्वा मरुत्वः परमे सधस्थे यद्वावमे वृजने मादयासे।
पदानि : यत्। वा। मरुत्वः। परमे। सधऽस्थे। यत्। वा। अवमे। वृजने। मादयासे
वाक्यम् २: अत आ याह्यध्वरं नो अच्छा त्वाया हविश्चकृमा सत्यराधः॥
पदानि : अतः। आ। याहि। अध्वरम्। नः। अच्छ। त्वाऽया। हविः। चकृम। सत्यऽराधः

३१. मण्डलम् १, सूक्तम् १०२, मन्त्रः ४ (ऋक्सङ्ख्या : ११२२)
वाक्यम् १: वयं जयेम त्वया युजा वृतमस्माकमंशमुदवा भरेभरे।
पदानि : वयम्। जयेम। त्वया। युजा। वृतम्। अस्माकम्। अंशम्। उत्। अव। भरेऽभरे
वाक्यम् २: अस्मभ्यमिन्द्र वरिवः सुगं कृधि प्र शत्रूणां मघवन्वृष्ण्या रुज॥
पदानि : अस्मभ्यम्। इन्द्र। वरिवः। सुऽगम्। कृधि। प्र। शत्रूणाम्। मघऽवन्। वृष्ण्या। रुज

३२. मण्डलम् १, सूक्तम् १०२, मन्त्रः १० (ऋक्सङ्ख्या : ११२८)
वाक्यम् १: त्वं जिगेथ न धना रुरोधिथाभेष्वाजा मघवन्महत्सु च।
पदानि : त्वम्। जिगेथ। न। धना। रुरोधिथ। अभेषु। आजा। मघऽवन्। महत्ऽसु। च
वाक्यम् २: त्वामुग्रमवसे सं शिशीमस्यथा न इन्द्र हवनेषु चोदय॥
पदानि : त्वाम्। उग्रम्। अवसे। सम्। शिशीमसि। अथ। नः। इन्द्र। हवनेषु। चोदय

३३. मण्डलम् १, सूक्तम् १०४, मन्त्रः ७ (ऋक्सङ्ख्या : ११४४)
वाक्यम् १: अधा मन्ये श्रत्ते अस्मा अधायि वृषा चोदस्व महते धनाय।
पदानि : अध। मन्ये। श्रत्। ते। अस्मै। अधायि। वृषा। चोदस्व। महते। धनाय
वाक्यम् २: मा नो अकृते पुरुहूत योनाविन्द्र क्षुध्यद्भ्यो वयं आसुतिं दाः॥
पदानि : मा। नः। अकृते। पुरुऽहूत। योनौ। इन्द्र। क्षुध्यत्ऽभ्यः। वयः। आऽसुतिम्। दाः

३४. मण्डलम् १, सूक्तम् १११, मन्त्रः २ (ऋक्सङ्ख्या : १२०७)
वाक्यम् १: आ नो यज्ञाय तक्षत ऋभुमद्वयः क्रत्वे दक्षाय सुप्रजावतीमिषम्।
पदानि : आ। नः। यज्ञाय। तक्षत। ऋभुऽमत्। वयः। क्रत्वे। दक्षाय। सुऽप्रजावतीम्। इषम्
वाक्यम् २: यथा क्षयाम सर्ववीरया विशा तन्नः शर्धाय धासथा स्विन्द्रियम्॥
पदानि : यथा। क्षयाम। सर्वऽवीरया। विशा। तत्। नः। शर्धाय। धासथ। सु। इन्द्रियम्

३५. मण्डलम् १, सूक्तम् १११, मन्त्रः ३ (ऋक्सङ्ख्या : १२०८)
वाक्यम् १: आ तक्षत सातिमस्मभ्यमृभवः सातिं रथाय सातिमर्वते नरः।

पदानि : आ। तक्षत्। सातिम्। अस्मभ्यम्। ऋभवः। सातिम्। रथाय। सातिम्। अर्वते। नरः
वाक्यम् २: सातिं नो जैत्रीं सं महेत विश्वहा जामिमजामिं पृतनासु सक्षणिम्॥
पदानि : सातिम्। नः। जैत्रीम्। सम्। महेत। विश्वहा। जामिम्। अजामिम्। पृतनासु। सक्षणिम्

३६. मण्डलम् १, सूक्तम् ११५, मन्त्रः ४ (ऋक्सङ्ख्या : १२७०)
वाक्यम् १: तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्वितरं सं जभार।
पदानि : तत्। सूर्यस्य। देवऽत्वम्। तत्। महिऽत्वम्। मध्या। कर्तोः। विऽतरम्। सम्। जभार
वाक्यम् २: यदेदयुक्त हरितः सधस्थादादात्री वासस्तनुते सिमस्मै॥
पदानि : यदा। इत्। अयुक्त। हरितः। सधऽस्थात्। आत्। रात्री। वासः। तनुते। सिमस्मै

३७. मण्डलम् १, सूक्तम् ११७, मन्त्रः ४ (ऋक्सङ्ख्या : १३०१)
वाक्यम् १: अश्वं न गूळ्हमश्विना दुरेवैर्ऋषिं नरा वृषणा रेभमप्सु।
पदानि : अश्वम्। न। गूळ्हम्। अश्विना। दुःऽएवैः। ऋषिम्। नरा। वृषणा। रेभम्। अप्ऽसु
वाक्यम् २: सं तं रिणीथो विप्रुतं दंसोभिर्न वां जूर्यन्ति पूर्व्या कृतानि॥
पदानि : सम्। तम्। रिणीथः। विऽप्रुतम्। दंसःऽभिः। न। वाम्। जूर्यन्ति। पूर्व्या। कृतानि

३८. मण्डलम् १, सूक्तम् ११७, मन्त्रः १९ (ऋक्सङ्ख्या : १३१६)
वाक्यम् १: मही वामूतिरश्विना मयोभूरुत स्रामं धिष्ण्या सं रिणीथः।
पदानि : मही। वाम्। ऊतिः। अश्विना। मयःऽभूः। उत। स्रामम्। धिष्ण्या। सम्। रिणीथः
वाक्यम् २: अथा युवामिदह्वयत्पुरंधिरागच्छतं सीं वृषणावसोभिः॥
पदानि : अथ। युवाम्। इत्। अह्वयत्। पुरम्ऽधिः। आ। अगच्छतम्। सीम्। वृषणौ। अवःऽभिः

३९. मण्डलम् १, सूक्तम् १२१, मन्त्रः १२ (ऋक्सङ्ख्या : १३६७)
वाक्यम् १: त्वमिन्द्र नर्यो याँ अवो नृन्तिष्ठा वातस्य सुयुजो वहिष्ठान्।
पदानि : त्वम्। इन्द्र। नर्यः। यान्। अवः। नॄन्। तिष्ठ। वातस्य। सुऽयुजः। वहिष्ठान्
वाक्यम् २: यं ते काव्य उशना मन्दिनं दाद्वृत्रहणं पार्यं ततक्ष वज्रम्॥
पदानि : यम्। ते। काव्यः। उशना। मन्दिनम्। दात्। वृत्रऽहनम्। पार्यम्। ततक्ष। वज्रम्

४०. मण्डलम् १, सूक्तम् १४०, मन्त्रः २ (ऋक्सङ्ख्या : १५२७)
वाक्यम् १: अभि द्विजन्मा त्रिवृदन्नमृज्यते संवत्सरे वावृधे जग्धमी पुनः।
पदानि : अभि। द्विऽजन्मा। त्रिऽवृत्। अन्नम्। ऋज्यते। संवत्सरे। ववृधे। जग्धम्। ईमिति। पुनरिति
वाक्यम् २: अन्यस्यासा जिह्वया जेन्यो वृषा न्यन्येन वनिनो मृष्ट वारणः॥
पदानि : अन्यस्य। आसा। जिह्वया। जेन्यः। वृषा। नि। अन्येन। वनिनः। मृष्ट। वारणः

४१. मण्डलम् १, सूक्तम् १४०, मन्त्रः ९ (ऋक्सङ्ख्या : १५३४)
वाक्यम् १: अधीवासं परि मातू रिहन्नह तुविग्रेभिः सत्वभिर्याति वि ज्रयः।
पदानि : अधीवासम्। परि। मातुः। रिहन्। अह। तुविऽग्रेभिः। सत्वऽभिः। याति। वि। ज्रयः
वाक्यम् २: वयो दधत्पद्वते रेरिहत्सदानु श्येनी सचते वर्तनीरह॥
पदानि : वयः। दधत्। पत्ऽवते। रेरिहत्। सदा। अनु। श्येनी। सचते। वर्तनिः। अह

४२. मण्डलम् १, सूक्तम् १४१, मन्त्रः ३ (ऋक्सङ्ख्या : १५४१)
वाक्यम् १: निर्यदीं बुध्नान्महिषस्य वर्पस ईशानासः शवसा क्रन्त सूरयः ।
पदानि : निः । यत् । ईम् । बुध्नात् । महिषस्य । वर्पसः । ईशानासः । शवसा । क्रन्त । सूरयः
वाक्यम् २: यदीमनु प्रदिवो मध्व आधवे गुहा सन्तं मातरिश्वा मथायति ॥
पदानि : यत् । ईम् । अनु । प्रऽदिवः । मध्वः । आऽधवे । गुहा । सन्तम् । मातरिश्वा । मथायति

४३. मण्डलम् १, सूक्तम् १४४, मन्त्रः १ (ऋक्सङ्ख्या : १५७३)
वाक्यम् १: एति प्र होता व्रतमस्य माययोर्ध्वां दधानः शुचिपेशसं धियम् ।
पदानि : एति । प्र । होता । व्रतम् । अस्य । मायया । ऊर्ध्वाम् । दधानः । शुचिऽपेशसम् । धियम्
वाक्यम् २: अभि स्रुचः क्रमते दक्षिणावृतो या अस्य धामं प्रथमं ह निंसते ॥
पदानि : अभि । स्रुचः । क्रमते । दक्षिणाऽआवृतः । याः । अस्य । धामं । प्रथमम् । ह । निंसते

४४. मण्डलम् १, सूक्तम् १४४, मन्त्रः ५ (ऋक्सङ्ख्या : १५७७)
वाक्यम् १: तमीं हिन्वन्ति धीतयो दश व्रिशो देवं मर्तास ऊतये हवामहे ।
पदानि : तम् । ईम् । हिन्वन्ति । धीतयः । दश । व्रिशः । देवम् । मर्तासः । ऊतये । हवामहे
वाक्यम् २: धनोरधिं प्रवत आ स ऋण्वत्यभिव्रजद्भिर्वयुना नवाधित ॥
पदानि : धनोः । अधिं । प्रऽवतः । आ । सः । ऋण्वति । अभिव्रजत्ऽभिः । वयुना । नवा । अधित

४५. मण्डलम् १, सूक्तम् १५३, मन्त्रः ४ (ऋक्सङ्ख्या : १६२७)
वाक्यम् १: उत वां विक्षु मद्यास्वन्धो गाव आपश्च पीपयन्त देवीः ।
पदानि : उत । वाम् । विक्षु । मद्यासु । अन्धः । गावः । आपः । च । पीपयन्त । देवीः
वाक्यम् २: उतो नो अस्य पूर्व्यः पतिर्दन्वीतं पातं पयस उस्रियायाः ॥
पदानि : उतो इति । नः । अस्य । पूर्व्यः । पतिः । दन् । वीतम् । पातम् । पयसः । उस्रियायाः

४६. मण्डलम् १, सूक्तम् १५४, मन्त्रः ५ (ऋक्सङ्ख्या : १६३२)
वाक्यम् १: तदस्य प्रियमभि पाथो अश्यां नरो यत्र देवयवो मदन्ति ।
पदानि : तत् । अस्य । प्रियम् । अभि । पाथः । अश्याम् । नरः । यत्र । देवऽयवः । मदन्ति
वाक्यम् २: उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ॥
पदानि : उरुऽक्रमस्य । सः । हि । बन्धुः । इत्था । विष्णोः । पदे । परमे । मध्वः । उत्सः

४७. मण्डलम् १, सूक्तम् १६०, मन्त्रः ५ (ऋक्सङ्ख्या : १६६६)
वाक्यम् १: ते नो गृणाने महिनी महि श्रवः क्षत्रं द्यावापृथिवी धासथो बृहत् ।
पदानि : ते इति । नः । गृणाने इति । महिनी इति । महि । श्रवः । क्षत्रम् । द्यावापृथिवी इति । धासथः । बृहत्
वाक्यम् २: येनाभि कृष्टीस्ततनाम विश्वहा पनाय्यमोजो अस्मे समिन्वतम् ॥
पदानि : येन । अभि । कृष्टीः । ततनाम । विश्वहा । पनाय्यम् । ओजः । अस्मे इति । सम् । इन्वतम्

४८. मण्डलम् १, सूक्तम् १६१, मन्त्रः ५ (ऋक्सङ्ख्या : १६७१)
वाक्यम् १: हनामैनाँ इति त्वष्टा यदब्रवीच्चमसं ये देवपानमनिंन्दिषुः ।
पदानि : हनाम । एनान् । इति । त्वष्टा । यत् । अब्रवीत् । चमसम् । ये । देवऽपानम् । अनिंन्दिषुः
वाक्यम् २: अन्या नामानि कृण्वते सुते सचाँ अन्यैरेनान्कन्याऽ३ नामभिः स्परत् ॥
पदानि : अन्या । नामानि । कृण्वते । सुते । सचा । अन्यैः । एनान् । कन्या । नामऽभिः । स्परत्

४९. मण्डलम् १, सूक्तम् १६३, मन्त्रः ४ (ऋक्सङ्ख्या : १७०६)
वाक्यम् १: त्रीणि॑ त आहुर्दि॒वि बन्ध॑नानि॒ त्रीण्य॒प्सु त्रीण्य॒न्तः स॑मु॒द्रे।
पदानि : त्रीणि॑। ते॒। आ॒हुः॒। दि॒वि। बन्ध॑नानि। त्रीणि॑। अ॒प्ऽसु। त्रीणि॑। अ॒न्तरिति॑। स॒मु॒द्रे
वाक्यम् २: उ॒तेव॑ मे॒ वरु॑णश्छन्त्स्यर्व॒न्यत्रा॑ त आ॒हुः प॑र॒मं ज॒नित्र॑म्॥
पदानि : उ॒तऽइ॑व। मे॒। वरु॑णः। छ॒न्त्सि॒। अ॒र्व॒न्। यत्र॑। ते॒। आ॒हुः। प॒र॒मम्। ज॒नित्र॑म्

५०. मण्डलम् १, सूक्तम् १६४, मन्त्रः ३ (ऋक्सङ्ख्या : १७१८)
वाक्यम् १: इ॒मं रथ॒मधि॒ ये स॒प्त त॒स्थुः स॒प्तच॑क्रं स॒प्त व॑ह॒न्त्यश्वाः॑।
पदानि : इ॒मम्। रथ॑म्। अधि॑। ये। स॒प्त। त॒स्थुः। स॒प्तऽच॑क्रम्। स॒प्त। व॒ह॒न्ति॒। अश्वाः॑
वाक्यम् २: स॒प्त स्वसा॑रो अ॒भि सं न॑वन्ते॒ यत्र॒ गवां॒ निहि॑ता स॒प्त नाम॑॥
पदानि : स॒प्त। स्वसा॑रः। अ॒भि। सम्। न॒व॒न्ते॒। यत्र॑। गवा॑म्। निऽहि॑ता। स॒प्त। नाम॑

५१. मण्डलम् १, सूक्तम् १६४, मन्त्रः ४९ (ऋक्सङ्ख्या : १७६४)
वाक्यम् १: यस्ते॒ स्तनः॑ शश॒यो यो म॑यो॒भूर्येन॒ विश्वा॒ पुष्य॑सि॒ वार्या॑णि।
पदानि : यः। ते॒। स्तनः॑। श॒श॒यः। यः। म॒यः॒ऽभूः। येन॑। विश्वा॑। पुष्य॑सि। वार्या॑णि
वाक्यम् २: यो र॑त्न॒धा व॑सुवि॒द्यः सु॒दत्रः॒ सर॑स्वति॒ तमि॒ह धात॑वे कः॥
पदानि : यः। र॒त्न॒ऽधाः। व॒सु॒ऽवि॒त्। यः। सु॒ऽद॒त्रः॑। सर॑स्वति। तम्। इ॒ह। धात॑वे। कः॒रिति॑ कः

५२. मण्डलम् १, सूक्तम् १६६, मन्त्रः १२ (ऋक्सङ्ख्या : १७९४)
वाक्यम् १: तद्वः॑ सुजाता मरुतो महित्व॒नं दी॒र्घं वो॑ दा॒त्रमदि॑तेरिव व्र॒तम्।
पदानि : तत्। वः॒। सु॒ऽजा॒ताः॒। म॒रु॒तः॒। म॒हि॒ऽत्व॒नम्। दी॒र्घम्। वः॒। दा॒त्रम्। अदि॑तेः॒ऽइव। व्र॒तम्
वाक्यम् २: इन्द्र॑श्च॒न त्यज॑सा॒ वि ह्रु॑णाति॒ तज्जना॑य॒ यस्मै॒ सुकृ॑ते॒ अरा॑ध्वम्॥
पदानि : इन्द्रः॑। च॒न। त्यज॑सा। वि। ह्रु॒णा॒ति॒। तत्। जना॑य। यस्मै॑। सु॒ऽकृ॑ते। अरा॑ध्वम्

५३. मण्डलम् १, सूक्तम् १६७, मन्त्रः ७ (ऋक्सङ्ख्या : १८०४)
वाक्यम् १: प्र तं वि॑वक्मि॒ वक्म्यो॒ य ए॑षां म॒रुता॑ं महि॒मा स॒त्यो अस्ति॑।
पदानि : प्र। तम्। वि॒व॒क्मि॒। वक्म्यः॑। यः। ए॒षा॒म्। म॒रुता॑म्। म॒हि॒मा। स॒त्यः। अस्ति॑
वाक्यम् २: सचा॒ यदी॑ वृष॑मणा अहं॒युः स्थि॒रा चि॒ज्जनी॑र्वहं॒ते सु॒भा॒गाः॥
पदानि : सचा॑। यत्। ई॒म्। वृष॑ऽमनाः। अ॒ह॒म्ऽयुः। स्थि॒रा। चि॒त्। जनीः॑। व॒हं॒ते। सु॒ऽभा॒गाः

५४. मण्डलम् १, सूक्तम् १८०, मन्त्रः ४ (ऋक्सङ्ख्या : १८९५)
वाक्यम् १: यु॒वं ह॑ घ॒र्मं मधु॑मन्तमत्र॒येऽपो न क्षोदो॑ऽवृणीतमे॒षे।
पदानि : यु॒वम्। ह॒। घ॒र्मम्। मधु॑ऽमन्तम्। अ॒त्र॒ये। अ॒पः। न। क्षोदः॑। अ॒वृ॒णी॒त॒म्। ए॒षे
वाक्यम् २: तद्वां॑ नरावश्वि॒ना प॑श्वइ॒ष्टौ रथ्ये॑व च॒क्रा प्रति॑ यन्ति॒ मध्वः॑॥
पदानि : तत्। वा॒म्। न॒रौ॒। अ॒श्वि॒ना। प॒श्वः॑ऽइ॒ष्टौ। रथ्या॑ऽइव। च॒क्रा। प्रति॑। य॒न्ति॒। मध्वः॑

५५. मण्डलम् १, सूक्तम् १८०, मन्त्रः ५ (ऋक्सङ्ख्या : १८९६)
वाक्यम् १: आ वां॑ दा॒नाय॑ ववृतीय दस्रा॒ गोरोहे॑ण तौ॒ग्र्यो न॑ जिव्रिः॑।
पदानि : आ। वा॒म्। दा॒नाय॑। व॒वृ॒तीय॒। दस्रा॑। गोः। ओहे॑न। तौ॒ग्र्यः। न। जिव्रिः॑

वाक्यम् २: अपः क्षोणी सचते माहिना वां जूर्णो वामक्षुरंहसो यजत्रा ॥
पदानि : अपः । क्षोणी इति । सचते । माहिना । वाम् । जूर्णः । वाम् । अक्षुः । अंहसः । यजत्रा

५६. मण्डलम् १, सूक्तम् १८१, मन्त्रः ८ (ऋक्सङ्ख्या : १९०९)
वाक्यम् १: उत स्या वां रुशंतो बप्ससो गीस्तिंबर्हिषि सदसि पिन्वते नॄन् ।
पदानि : उत । स्या । वाम् । रुशंतः । बप्ससः । गीः । त्रिऽबर्हिषि । सदसि । पिन्वते । नॄन्
वाक्यम् २: वृषा वां मेघो वृषणा पीपाय गोर्न सेके मनुषो दशस्यन् ॥
पदानि : वृषा । वाम् । मेघः । वृषणा । पीपाय । गोः । न । सेके । मनुषः । दशस्यन्

५७. मण्डलम् १, सूक्तम् १८६, मन्त्रः २ (ऋक्सङ्ख्या : १९४३)
वाक्यम् १: आ नो विश्व आस्क्रा गमन्तु देवा मित्रो अर्यमा वरुणः सजोषाः ।
पदानि : आ । नः । विश्वे । आस्क्राः । गमन्तु । देवाः । मित्रः । अर्यमा । वरुणः । सऽजोषाः
वाक्यम् २: भुवन्यथा नो विश्वे वृधासः करन्त्सुषहा विथुरं न शवः ॥
पदानि : भुवन् । यथा । नः । विश्वे । वृधासः । करन् । सुऽसहा । विथुरम् । न । शवः

५८. मण्डलम् १, सूक्तम् १८९, मन्त्रः ४ (ऋक्सङ्ख्या : १९७८)
वाक्यम् १: पाहि नो अग्ने पायुभिरजस्रैरुत प्रिये सदन आ शुशुक्वान् ।
पदानि : पाहि । नः । अग्ने । पायुऽभिः । अजस्रैः । उत । प्रिये । सदने । आ । शुशुक्वान्
वाक्यम् २: मा ते भयं जरितारं यविष्ठ नूनं विदुन्मापरं सहस्वः ॥
पदानि : मा । ते । भयम् । जरितारम् । यविष्ठ । नूनम् । विदत् । मा । अपरम् । सहस्वः

५९. मण्डलम् १, सूक्तम् १९०, मन्त्रः २ (ऋक्सङ्ख्या : १९८४)
वाक्यम् १: तमृत्विया उप वाचः सचन्ते सर्गो न यो देवयतामसर्जि ।
पदानि : तम् । ऋत्वियाः । उप । वाचः । सचन्ते । सर्गः । न । यः । देवऽयताम् । असर्जि
वाक्यम् २: बृहस्पतिः स ह्यञ्जो वरांसि विभ्वाभवत्समृते मातरिश्वा ॥
पदानि : बृहस्पतिः । सः । हि । अञ्जः । वरांसि । विऽभ्वा । अभवत् । सम् । ऋते । मातरिश्वा

६०. मण्डलम् १, सूक्तम् १९०, मन्त्रः ४ (ऋक्सङ्ख्या : १९८६)
वाक्यम् १: अस्य श्लोको दिवीयते पृथिव्यामत्यो न येंसद्यक्षभृद्विचेताः ।
पदानि : अस्य । श्लोकः । दिवि । ईयते । पृथिव्याम् । अत्यः । न । यंसत् । यक्षऽभृत् । विऽचेताः
वाक्यम् २: मृगाणां न हेतयो यन्ति चेमा बृहस्पतेरहिंमायाँ अभि द्यून् ॥
पदानि : मृगाणाम् । न । हेतयः । यन्ति । च । इमाः । बृहस्पतेः । अहिंऽमायान् । अभि । द्यून्

६१. मण्डलम् १, सूक्तम् १९०, मन्त्रः ७ (ऋक्सङ्ख्या : १९८९)
वाक्यम् १: सं यं स्तुभोऽवनयो न यन्ति समुद्रं न स्रवतो रोधचक्राः ।
पदानि : सम् । यम् । स्तुभः । अवनयः । न । यन्ति । समुद्रम् । न । स्रवतः । रोधऽचक्राः
वाक्यम् २: स विद्वाँ उभयं चष्टे अन्तर्बृहस्पतिस्तर आपश्च गृध्रः ॥
पदानि : सः । विद्वान् । उभयम् । चष्टे । अन्तः । बृहस्पतिः । तरः । आपः । च । गृध्रः

६२. मण्डलम् २, सूक्तम् १, मन्त्रः ४ (ऋक्सङ्ख्या : २०१०)

वाक्यम् १: त्वमग्ने राजा वरुणो धृतव्रतस्त्वं मित्रो भवसि दस्म ईड्यः ।
पदानि : त्वम् । अग्ने । राजा । वरुणः । धृतऽव्रतः । त्वम् । मित्रः । भवसि । दस्मः । ईड्यः
वाक्यम् २: त्वमर्यमा सत्पतिर्यस्य संभुजं त्वमंशो विदथे देव भाजयुः ॥
पदानि : त्वम् । अर्यमा । सत्ऽपतिः । यस्य । सम्ऽभुजम् । त्वम् । अंशः । विदथे । देव । भाजयुः

६३. मण्डलम् २, सूक्तम् २, मन्त्रः २ (ऋक्सङ्ख्या : २०२४)
वाक्यम् १: अभि त्वा नक्तीरुषसो ववाशिरेऽग्ने वत्सं न स्वसरेषु धेनवः ।
पदानि : अभि । त्वा । नक्तीः । उषसः । ववाशिरे । अग्ने । वत्सम् । न । स्वसरेषु । धेनवः
वाक्यम् २: दिव इवेदरतिर्मानुषा युगा क्षपो भासि पुरुवार संयतः ॥
पदानि : दिवःऽइव । इत् । अरतिः । मानुषा । युगा । आ । क्षपः । भासि । पुरुऽवार । सम्ऽयतः

६४. मण्डलम् २, सूक्तम् २, मन्त्रः १० (ऋक्सङ्ख्या : २०३२)
वाक्यम् १: वयमग्ने अर्वता वा सुवीर्यं ब्रह्मणा वा चितयेमा जनाँ अतिं ।
पदानि : वयम् । अग्ने । अर्वता । वा । सुऽवीर्यम् । ब्रह्मणा । वा । चितयेम । जनान् । अतिं
वाक्यम् २: अस्माकं द्युम्नमधि पञ्च कृष्टिषूच्चा स्वर्ण शुशुचीत दुष्टरम् ॥
पदानि : अस्माकम् । द्युम्नम् । अधि । पञ्च । कृष्टिषु । उच्चा । स्वः । न । शुशुचीत । दुस्तरम्

६५. मण्डलम् २, सूक्तम् ३, मन्त्रः ३ (ऋक्सङ्ख्या : २०३८)
वाक्यम् १: ईळितो अग्ने मनसा नो अर्हन्देवान्यक्षि मानुषात्पूर्वो अद्य ।
पदानि : ईळितः । अग्ने । मनसा । नः । अर्हन् । देवान् । यक्षि । मानुषात् । पूर्वः । अद्य
वाक्यम् २: स आ वह मरुतां शर्धो अच्युतमिन्द्रं नरो बर्हिषदं यजध्वम् ॥
पदानि : सः । आ । वह । मरुताम् । शर्धः । अच्युतम् । इन्द्रम् । नरः । बर्हिऽसदम् । यजध्वम्

६६. मण्डलम् २, सूक्तम् ११, मन्त्रः ३ (ऋक्सङ्ख्या : २०९८)
वाक्यम् १: उक्थेष्विन्नु शूर येषु चाकन्स्तोमेष्विन्द्र रुद्रियेषु च ।
पदानि : उक्थेषु । इत् । नु । शूर । येषु । चाकन् । स्तोमेषु । इन्द्र । रुद्रियेषु । च
वाक्यम् २: तुभ्येदेता यासु मन्दसानः प्र वायवे सिस्रते न शुभ्राः ॥
पदानि : तुभ्यं । इत् । एताः । यासु । मन्दसानः । प्र । वायवे । सिस्रते । न । शुभ्राः

६७. मण्डलम् २, सूक्तम् १४, मन्त्रः १० (ऋक्सङ्ख्या : २१५४)
वाक्यम् १: अध्वर्यवः पयसोधर्यथा गोः सोमेभिरीं पृणता भोजमिन्द्रम् ।
पदानि : अध्वर्यवः । पयसा । ऊधः । यथा । गोः । सोमेभिः । ईम् । पृणत । भोजम् । इन्द्रम्
वाक्यम् २: वेदाहमस्य निभृतं म एतद्दित्संन्तं भूयो यजतश्चिकेत ॥
पदानि : वेद । अहम् । अस्य । निऽभृतम् । मे । एतत् । दित्संन्तम् । भूयः । यजतः । चिकेत

६८. मण्डलम् २, सूक्तम् १६, मन्त्रः ७ (ऋक्सङ्ख्या : २१७३)
वाक्यम् १: प्र ते नावं न समने वचस्युवं ब्रह्मणा यामि सवनेषु दाधृषिः ।
पदानि : प्र । ते । नावम् । न । समने । वचस्युवम् । ब्रह्मणा । यामि । सवनेषु । दधृषिः
वाक्यम् २: कुविन्नो अस्य वचसो निबोधिषदिन्द्रमुत्सं न वसुनः सिचामहे ॥
पदानि : कुवित् । नः । अस्य । वचसः । निऽबोधिषत् । इन्द्रम् । उत्सम् । न । वसुनः । सिचामहे

६९. मण्डलम् २, सूक्तम् १७, मन्त्रः ८ (ऋक्सङ्ख्या : २१८३)
वाक्यम् १: भोजं त्वामिन्द्र वयं हुवेम दुदिष्टिमिन्द्रापाꣳसि वाजान्।
पदानि : भोजम्। त्वाम्। इन्द्र। वयम्। हुवेम। दुदिः। त्वम्। इन्द्र। अपाꣳसि। वाजान्
वाक्यम् २: अविड्ढीन्द्र चित्रया न ऊती कृधि वृषन्निन्द्र वस्यसो नः॥
पदानि : अविड्ढि। इन्द्र। चित्रया। नः। ऊती। कृधि। वृषन्। इन्द्र। वस्यसः। नः

७०. मण्डलम् २, सूक्तम् १८, मन्त्रः ४ (ऋक्सङ्ख्या : २१८८)
वाक्यम् १: आ द्वाभ्यां हरिभ्यामिन्द्र याह्या चतुर्भिरा षड्भिर्हूयमानः।
पदानि : आ। द्वाभ्याम्। हरिऽभ्याम्। इन्द्र। याहि। आ। चतुःऽभिः। आ। षट्ऽभिः। हूयमानः
वाक्यम् २: आष्टाभिर्दशभिः सोमपेयमयं सुतः सुमख मा मृधस्कः॥
पदानि : आ। अष्टाभिः। दशऽभिः। सोमऽपेयम्। अयम्। सुतः। सुऽमख। मा। मृधः। करितिं कः

७१. मण्डलम् २, सूक्तम् २०, मन्त्रः ३ (ऋक्सङ्ख्या : २२०५)
वाक्यम् १: स नो युवेन्द्रो जोहूत्रः सखा शिवो नरामस्तु पाता।
पदानि : सः। नः। युवा। इन्द्रः। जोहूत्रः। सखा। शिवः। नराम्। अस्तु। पाता
वाक्यम् २: यः शंसन्तं यः शशमानमूती पचन्तं च स्तुवन्तं च प्रणेषत्॥
पदानि : यः। शंसन्तम्। यः। शशमानम्। ऊती। पचन्तम्। च। स्तुवन्तम्। च। प्रऽनेषत्

७२. मण्डलम् २, सूक्तम् २३, मन्त्रः ७ (ऋक्सङ्ख्या : २२२८)
वाक्यम् १: उत वा यो नो मर्चयादनागसोऽरातीवा मर्तः सानुको वृकः।
पदानि : उत। वा। यः। नः। मर्चयात्। अनागसः। अरातिऽवा। मर्तः। सानुकः। वृकः
वाक्यम् २: बृहस्पते अप तं वर्तया पथः सुगं नो अस्यै देववीतये कृधि॥
पदानि : बृहस्पते। अप। तम्। वर्तय। पथः। सुऽगम्। नः। अस्यै। देवऽवीतये। कृधि

७३. मण्डलम् २, सूक्तम् २९, मन्त्रः ४ (ऋक्सङ्ख्या : २२९७)
वाक्यम् १: हुये देवा यूयमिदापयः स्थ ते मृळत नाधमानाय मह्यम्।
पदानि : हुये। देवाः। यूयम्। इत्। आपयः। स्थ। ते। मृळत। नाधमानाय। मह्यम्
वाक्यम् २: मा वो रथो मध्यमवाळृते भून्मा युष्मावत्स्वापिषु श्रमिष्म॥
पदानि : मा। वः। रथः। मध्यमऽवाट्। ऋते। भूत्। मा। युष्मावत्ऽसु। आपिषु। श्रमिष्म

७४. मण्डलम् २, सूक्तम् ३०, मन्त्रः ३ (ऋक्सङ्ख्या : २३०३)
वाक्यम् १: ऊर्ध्वो ह्यस्थादध्यन्तरिक्षेऽधा वृत्राय प्र वधं जभार।
पदानि : ऊर्ध्वः। हि। अस्थात्। अधि। अन्तरिक्षे। अध। वृत्राय। प्र। वधम्। जभार
वाक्यम् २: मिहं वसान उप ही मदुद्रोत्तिग्मायुधो अजयच्छत्रुमिन्द्रः॥
पदानि : मिहम्। वसानः। उप। हि। ईम्। अदुद्रोत्। तिग्मऽआयुधः। अजयत्। शत्रुम्। इन्द्रः

७५. मण्डलम् २, सूक्तम् ३१, मन्त्रः ४ (ऋक्सङ्ख्या : २३१५)
वाक्यम् १: उत स्य देवो भुवनस्य सक्षणिस्त्वष्टा ग्नाभिः सजोषा जूजुवद्रथम्।
पदानि : उत। स्यः। देवः। भुवनस्य। सक्षणिः। त्वष्टा। ग्नाभिः। सऽजोषाः। जूजुवत्। रथम्
वाक्यम् २: इळा भगो बृहद्दिवोत रोदसी पूषा पुरंधिरश्विनावधा पतीं॥

पदानि : इळा॑ । भगः॑ । बृ॒हत्ऽदि॒वा । उ॒त । रोद॑सी॒ इति॑ । पू॒षा । पु॒र॒म्ऽधिः । अ॒श्विनौ॑ । अध॑ । पती॒ इति॑

७६. मण्डलम् २, सूक्तम् ३१, मन्त्रः ६ (ऋक्सङ्ख्या : २३१७)
वाक्यम् १: उ॒त व॒: शंस॑मुशिजा॑मिव श्म॒स्यहि॑र्बु॒ध्न्यो३॑ऽज एक॑पादुत ।
पदानि : उ॒त । व॒: । शंस॑म् । उ॒शिजा॑म्ऽइव । श्म॒सि॒ । अहि॑: । बु॒ध्न्य॑: । अ॒जः । एक॑ऽपात् । उ॒त
वाक्यम् २: त्रि॒त ऋ॑भुक्षाः स॑वि॒ता चनो॑ दधे॒ऽपां नपा॑दाशुहे॒मा धि॒या शमि॑ ॥
पदानि : त्रि॒तः । ऋ॒भु॒क्षाः॒ । स॒वि॒ता । चनः॑ । दु॒धे॒ । अ॒पाम् । नपा॑त् । आ॒शु॒ऽहे॒मा । धि॒या । शमि॑

७७. मण्डलम् २, सूक्तम् ३४, मन्त्रः २ (ऋक्सङ्ख्या : २३४३)
वाक्यम् १: द्यावो॒ न स्तृभि॑श्चितयन्त खा॒दिनो॒ व्य१॑भ्रिया॒ न द्यु॑तयन्त वृ॒ष्टय॑: ।
पदानि : द्याव॑: । न । स्तृऽभि॑: । चि॒त॒य॒न्त॒ । खा॒दिन॑: । वि । अ॒भ्रिया॑: । न । द्यु॒त॒य॒न्त॒ । वृ॒ष्टय॑:
वाक्यम् २: रु॒द्रो यद्वो॑ मरुतो रुक्मवक्षसो॒ वृषा॑जनि॒ पृश्ना॑: शु॒क्र ऊध॑नि ॥
पदानि : रु॒द्रः । यत् । वः॒ । म॒रु॒तः॒ । रु॒क्म॒ऽव॒क्ष॒सः॒ । वृषा॑ । अज॑नि । पृश्ना॑: । शु॒क्रे । ऊध॑नि

७८. मण्डलम् २, सूक्तम् ३४, मन्त्रः ९ (ऋक्सङ्ख्या : २३५०)
वाक्यम् १: यो नो॑ मरुतो वृ॒कता॑ति॒ मर्त्यो॑ रि॒पुर्दु॒धे व॑सवो॒ रक्ष॑ता रि॒षः ।
पदानि : यः । नः॒ । म॒रु॒तः॒ । वृ॒कऽता॑ति । मर्त्यः॑ । रि॒पुः । दु॒धे । व॒स॒वः॒ । रक्ष॑त । रि॒षः
वाक्यम् २: व॒र्तय॑त॒ तपु॑षा च॒क्रिया॒भि तमव॑ रुद्रा अ॒शसो॑ हन्तना॒ वधः॑ ॥
पदानि : व॒र्तय॑त । तपु॑षा । च॒क्रिया॑ । अ॒भि । तम् । अव॑ । रु॒द्राः॒ । अ॒शसः॑ । ह॒न्त॒न॒ । वधः॑ऽइति॑

७९. मण्डलम् २, सूक्तम् ३४, मन्त्रः १२ (ऋक्सङ्ख्या : २३५३)
वाक्यम् १: ते दश॑ग्वाः प्रथ॒मा य॒ज्ञमू॑हिरे॒ ते नो॑ हिन्वन्तूषसो॒ व्यु॑ष्टिषु ।
पदानि : ते । दश॑ऽग्वाः । प्र॒थ॒माः । य॒ज्ञम् । ऊ॒हि॒रे॒ । ते । नः॒ । हि॒न्व॒न्तु॒ । उ॒षसः॑ । विऽउ॑ष्टिषु
वाक्यम् २: उ॒षा न रा॒मीर॑रु॒णैरपो॑र्णुते म॒हो ज्योति॑षा शुच॒ता गोअ॑र्णसा ॥
पदानि : उ॒षाः । न । रा॒मीः । अ॒रु॒णैः । अप॑ । ऊ॒र्णु॒ते॒ । म॒हः । ज्योति॑षा । शु॒च॒ता । गोऽअ॑र्णसा

८०. मण्डलम् २, सूक्तम् ३५, मन्त्रः ३ (ऋक्सङ्ख्या : २३५९)
वाक्यम् १: सम॒न्या य॑न्त्युप॑ यन्त्य॒न्याः स॑मा॒नमू॒र्वं न॒द्य॑: पृणन्ति ।
पदानि : सम् । अ॒न्याः । य॒न्ति॒ । उप॑ । य॒न्ति॒ । अ॒न्याः । स॒मा॒नम् । ऊ॒र्वम् । न॒द्य॑: । पृ॒ण॒न्ति॒
वाक्यम् २: तमू॒ शुचिं॒ शुच॑यो दीदि॒वांस॑मपां नपा॑तं॒ परि॑ तस्थु॒रापः॑ ॥
पदानि : तम् । ऊँ॒ इति॑ । शुचि॑म् । शुच॑यः । दी॒दि॒ऽवांस॑म् । अ॒पाम् । नपा॑तम् । परि॑ । त॒स्थुः॒ । आपः॑

८१. मण्डलम् २, सूक्तम् ३६, मन्त्रः ६ (ऋक्सङ्ख्या : २३७७)
वाक्यम् १: जु॒षेथा॑ यज्ञं॒ बोध॑तं॒ हव॑स्य मे स॒त्तो होता॑ नि॒विद॑: पू॒र्व्या अनु॑ ।
पदानि : जु॒षेथा॑म् । य॒ज्ञम् । बोध॑तम् । हव॑स्य । मे॒ । स॒त्तः । होता॑ । नि॒ऽविदः॑ । पू॒र्व्याः । अनु॑
वाक्यम् २: अच्छा॒ राजा॑ना॒ नम॑ एत्या॒वृतं॑ प्रशा॒स्त्रादा पि॑बतं सो॒म्यं मधु॑ ॥
पदानि : अच्छ॑ । राजा॑ना । नमः॑ । ए॒ति॒ । आ॒ऽवृत॑म् । प्र॒ऽशा॒स्त्रात् । आ । पि॒ब॒त॒म् । सो॒म्यम् । मधु॑

८२. मण्डलम् २, सूक्तम् ३७, मन्त्रः १ (ऋक्सङ्ख्या : २३७८)
वाक्यम् १: मन्द॑स्व हो॒त्रादनु॒ जोष॒मन्ध॑सोऽध्व॒र्यव॒: स पू॒र्णां व॑ष्ट्या॒सिच॑म् ।

पदानि : मन्दस्व । होत्रात् । अनु । जोषम् । अन्धसः । अध्वर्यवः । सः । पूर्णाम् । वष्टि । आऽसिचम् ।
वाक्यम् २: तस्मा एतं भरत तद्वशो ददिर्होत्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥
पदानि : तस्मै । एतम् । भरत । तत्ऽवशः । ददिः । होत्रात् । सोमम् । द्रविणःऽदः । पिब । ऋतुऽभिः

८३. मण्डलम् २, सूक्तम् ३७, मन्त्रः ६ (ऋक्सङ्ख्या : २३८३)
वाक्यम् १: जोष्यग्ने समिधं जोष्याहुतिं जोषि ब्रह्म जन्यं जोषि सुष्टुतिम् ।
पदानि : जोषि । अग्ने । सम्ऽइधम् । जोषि । आऽहुतिम् । जोषि । ब्रह्म । जन्यम् । जोषि । सुऽस्तुतिम्
वाक्यम् २: विश्वेभिर्विश्वाँ ऋतुना वसो मह उशन्देवाँ उशतः पायया हविः ॥
पदानि : विश्वेभिः । विश्वान् । ऋतुना । वसो इति । महः । उशन् । देवान् । उशतः । पायय । हविः

८४. मण्डलम् ३, सूक्तम् ३, मन्त्रः ७ (ऋक्सङ्ख्या : २४८०)
वाक्यम् १: अग्ने जरस्व स्वपत्य आयुन्यूर्जा पिन्वस्व समिषो दिदीहि नः ।
पदानि : अग्ने । जरस्व । सुऽअपत्ये । आयुनि । ऊर्जा । पिन्वस्व । सम् । इषः । दिदीहि । नः
वाक्यम् २: वयांसि जिन्व बृहतश्च जागृव उशिग्देवानामसि सुक्रतुर्विपाम् ॥
पदानि : वयांसि । जिन्व । बृहतः । च । जागृवे । उशिक् । देवानाम् । असि । सुऽक्रतुः । विपाम्

८५. मण्डलम् ३, सूक्तम् १४, मन्त्रः ४ (ऋक्सङ्ख्या : २५८६)
वाक्यम् १: मित्रश्च तुभ्यं वरुणः सहस्वोऽग्ने विश्वे मरुतः सुम्नमर्चन् ।
पदानि : मित्रः । च । तुभ्यम् । वरुणः । सहस्वः । अग्ने । विश्वे । मरुतः । सुम्नम् । अर्चन्
वाक्यम् २: यच्छोचिषा सहसस्पुत्र तिष्ठा अभि क्षितीः प्रथयन्त्सूर्यो नॄन् ॥
पदानि : यत् । शोचिषा । सहसः । पुत्र । तिष्ठाः । अभि । क्षितीः । प्रथयन् । सूर्यः । नॄन्

८६. मण्डलम् ३, सूक्तम् २९, मन्त्रः १६ (ऋक्सङ्ख्या : २६९३)
वाक्यम् १: यदद्य त्वा प्रयति यज्ञे अस्मिन्होतश्चिकित्वोऽवृणीमहीह ।
पदानि : यत् । अद्य । त्वा । प्रऽयति । यज्ञे । अस्मिन् । होतरिति । चिकित्वः । अवृणीमहि । इह
वाक्यम् २: ध्रुवमया ध्रुवमुताशमिष्ठाः प्रजानन्विद्वाँ उप याहि सोमम् ॥
पदानि : ध्रुवम् । अया: । ध्रुवम् । उत । अशमिष्ठाः । प्रऽजानन् । विद्वान् । उप । याहि । सोमम्

८७. मण्डलम् ३, सूक्तम् ३०, मन्त्रः १० (ऋक्सङ्ख्या : २७०३)
वाक्यम् १: अलातृणो वल इन्द्र व्रजो गोः पुरा हन्तोर्भयमानो व्यार ।
पदानि : अलातृणः । वलः । इन्द्र । व्रजः । गोः । पुरा । हन्तोः । भयमानः । वि । आर
वाक्यम् २: सुगान्पथो अकृणोन्निरजे गाः प्रावन्वाणीः पुरुहूतं धमन्तीः ॥
पदानि : सुऽगान् । पथः । अकृणोत् । निःऽअजे । गाः । प्र । आवन् । वाणीः । पुरुऽहूतम् । धमन्तीः

८८. मण्डलम् ३, सूक्तम् ३०, मन्त्रः ११ (ऋक्सङ्ख्या : २७०४)
वाक्यम् १: एको द्वे वसुमती समीची इन्द्र आ पप्रौ पृथिवीमुत द्याम् ।
पदानि : एकः । द्वे इति । वसुमती इति वसुऽमती । समीची इति सम्ऽईची । इन्द्रः । आ । पप्रौ । पृथिवीम् । उत । द्याम्
वाक्यम् २: उतान्तरिक्षादभि नः समीक इषो रथीः सयुजः शूर वाजान् ॥
पदानि : उत । अन्तरिक्षात् । अभि । नः । सम्ऽईके । इषः । रथीः । सऽयुजः । शूर । वाजान्

८९. मण्डलम् ३, सूक्तम् ३०, मन्त्रः १६ (ऋक्सङ्ख्या : २७०९)
वाक्यम् १: सं घोषः शृण्वेऽवमैरमित्रैर्जहि न्येष्वशनिं तपिष्ठाम्।
पदानि : सम्। घोषः। शृण्वे। अवमैः। अमित्रैः। जहि। नि। एषु। अशनिम्। तपिष्ठाम्
वाक्यम् २: वृश्चेमधस्ताद्वि रुजा सहस्व जहि रक्षो मघवन्नन्धयस्व॥
पदानि : वृश्च। ईम्। अधस्तात्। वि। रुज। सहस्व। जहि। रक्षः। मघऽवन्। रन्धयस्व

९०. मण्डलम् ३, सूक्तम् ३१, मन्त्रः ५ (ऋक्सङ्ख्या : २७२०)
वाक्यम् १: वीळौ सतीरभि धीरा अतृन्दन्प्राचाहिन्वन्मनसा सप्त विप्राः।
पदानि : वीळौ। सतीः। अभि। धीराः। अतृन्दन्। प्राचा। अहिन्वन्। मनसा। सप्त। विप्राः
वाक्यम् २: विश्वामविन्दन्पथ्यामृतस्य प्रजानन्नित्ता नमसा विवेश॥
पदानि : विश्वाम्। अविन्दन्। पथ्याम्। ऋतस्य। प्रऽजानन्। इत्। ता। नमसा। आ। विवेश

९१. मण्डलम् ३, सूक्तम् ३२, मन्त्रः १२ (ऋक्सङ्ख्या : २७४९)
वाक्यम् १: यज्ञो हि तं इन्द्र वर्धनो भूदुत प्रियः सुतसोमो मियेधः।
पदानि : यज्ञः। हि। ते। इन्द्र। वर्धनः। भूत्। उत। प्रियः। सुतऽसोमः। मियेधः
वाक्यम् २: यज्ञेनं यज्ञमव यज्ञियः सन्यज्ञस्ते वज्रमहिहत्य आवत्॥
पदानि : यज्ञेनं। यज्ञम्। अव। यज्ञियः। सन्। यज्ञः। ते। वज्रम्। अहिऽहत्ये। आवत्

९२. मण्डलम् ३, सूक्तम् ३५, मन्त्रः ३ (ऋक्सङ्ख्या : २७८१)
वाक्यम् १: उपो नयस्व वृषणा तपुष्पोतेमव त्वं वृषभ स्वधावः।
पदानि : उपो इति। नयस्व। वृषणा। तपुःऽपा। उत। ईम्। अव। त्वम्। वृषभ। स्वधाऽवः
वाक्यम् २: ग्रसेतामश्वा वि मुचेह शोणा दिवेदिवे सदृशीरद्धि धानाः॥
पदानि : ग्रसेताम्। अश्वा। वि। मुच। इह। शोणा। दिवेऽदिवे। सऽदृशीः। अद्धि। धानाः

९३. मण्डलम् ३, सूक्तम् ३५, मन्त्रः ८ (ऋक्सङ्ख्या : २७८६)
वाक्यम् १: इमं नरः पर्वतास्तुभ्यमापः समिन्द्र गोभिर्मधुमन्तमक्रन्।
पदानि : इमम्। नरः। पर्वताः। तुभ्यम्। आपः। सम्। इन्द्र। गोभिः। मधुऽमन्तम्। अक्रन्
वाक्यम् २: तस्यागत्या सुमना ऋष्व पाहि प्रजानन्विद्वान्पथ्या३ अनु स्वाः॥
पदानि : तस्य। आऽगत्य। सुऽमनाः। ऋष्व। पाहि। प्रऽजानन्। विद्वान्। पथ्याः। अनु। स्वाः

९४. मण्डलम् ३, सूक्तम् ३५, मन्त्रः १० (ऋक्सङ्ख्या : २७८८)
वाक्यम् १: इन्द्र पिब स्वधया चित्सुतस्याग्नेर्वा पाहि जिह्वया यजत्र।
पदानि : इन्द्र। पिब। स्वधया। चित्। सुतस्य। अग्नेः। वा। पाहि। जिह्वया। यजत्र
वाक्यम् २: अध्वर्योर्वा प्रयतं शक्र हस्ताद्धोतुर्वा यज्ञं हविषो जुषस्व॥
पदानि : अध्वर्योः। वा। प्रऽयतम्। शक्र। हस्तात्। होतुः। वा। यज्ञम्। हविषः। जुषस्व

९५. मण्डलम् ३, सूक्तम् ३६, मन्त्रः ३ (ऋक्सङ्ख्या : २७९२)
वाक्यम् १: पिबा वर्धस्व तवं घा सुतास इन्द्र सोमासः प्रथमा उतेमे।
पदानि : पिब। वर्धस्व। तवं। घ। सुतासः। इन्द्र। सोमासः। प्रथमाः। उत। इमे
वाक्यम् २: यथापिबः पूर्व्याँइंन्द्र सोमाँ एवा पाहि पन्यो अद्या नवीयान्॥

पदानि : यथा। अपिबः। पूर्व्यान्। इन्द्र। सोमान्। एव। पाहि। पन्यः। अद्य। नवीयान्

९६. मण्डलम् ३, सूक्तम् ४३, मन्त्रः १ (ऋक्सङ्ख्या : २८५८)
वाक्यम् १: आ याह्यर्वाङुप वन्धुरेष्ठास्तवेदनु प्रदिवः सोमपेयम्।
पदानि : आ। याहि। अर्वाङ्। उप। वन्धुरेऽस्थाः। तव। इत्। अनु। प्रऽदिवः। सोमऽपेयम्
वाक्यम् २: प्रिया सखाया वि मुचोप बर्हिस्त्वामिमे हव्यवाहो हवन्ते॥
पदानि : प्रिया। सखाया। वि। मुच। उप। बर्हिः। त्वाम्। इमे। हव्यऽवाहः। हवन्ते

९७. मण्डलम् ३, सूक्तम् ४३, मन्त्रः ७ (ऋक्सङ्ख्या : २८६४)
वाक्यम् १: इन्द्र पिब वृषधूतस्य वृष्ण आ यं ते श्येन उशते जभार।
पदानि : इन्द्र। पिब। वृषऽधूतस्य। वृष्णः। आ। यम्। ते। श्येनः। उशते। जभार
वाक्यम् २: यस्य मदे च्यावयसि प्र कृष्टीर्यस्य मदे अप गोत्रा ववर्थ॥
पदानि : यस्य। मदे। च्यवयसि। प्र। कृष्टीः। यस्य। मदे। अप। गोत्रा। ववर्थ

९८. मण्डलम् ३, सूक्तम् ४७, मन्त्रः ४ (ऋक्सङ्ख्या : २८८४)
वाक्यम् १: ये त्वाहिहत्ये मघवन्नवर्धन्ये शाम्बरे हरिवो ये गविष्टौ।
पदानि : ये। त्वा। अहिऽहत्ये। मघऽवन्। अवर्धन्। ये। शाम्बरे। हरिऽवः। ये। गोऽइष्टौ
वाक्यम् २: ये त्वा नूनमनुमदन्ति विप्राः पिबेन्द्र सोमं सगणो मरुद्भिः॥
पदानि : ये। त्वा। नूनम्। अनुऽमदन्ति। विप्राः। पिब। इन्द्र। सोमम्। सऽगणः। मरुत्ऽभिः

९९. मण्डलम् ३, सूक्तम् ५०, मन्त्रः २ (ऋक्सङ्ख्या : २८९७)
वाक्यम् १: आ ते सपर्यू जवसे युनज्मि ययोरनु प्रदिवः श्रुष्टिमावः।
पदानि : आ। ते। सपर्यू इति। जवसे। युनज्मि। ययोः। अनु। प्रऽदिवः। श्रुष्टिम्। आवः
वाक्यम् २: इह त्वा धेयुर्हरयः सुशिप्र पिबा त्वस्य सुषुतस्य चारोः॥
पदानि : इह। त्वा। धेयुः। हरयः। सुऽशिप्र। पिब। तु। अस्य। सुऽसुतस्य। चारोः

१००. मण्डलम् ३, सूक्तम् ५१, मन्त्रः ८ (ऋक्सङ्ख्या : २९०८)
वाक्यम् १: स वावशान इह पाहि सोमं मरुद्भिरिन्द्र सखिभिः सुतं नः।
पदानि : सः। वावशानः। इह। पाहि। सोमम्। मरुत्ऽभिः। इन्द्र। सखिऽभिः। सुतम्। नः
वाक्यम् २: जातं यत्त्वा परि देवा अभूषन्महे भराय पुरुहूत विश्वे॥
पदानि : जातम्। यत्। त्वा। परि। देवाः। अभूषन्। महे। भराय। पुरुऽहूत। विश्वे

१०१. मण्डलम् ४, सूक्तम् १, मन्त्रः १६ (ऋक्सङ्ख्या : ३०६८)
वाक्यम् १: ते मन्वत प्रथमं नाम धेनोस्तिः सप्त मातुः परमाणि विन्दन्।
पदानि : ते। मन्वत। प्रथमम्। नाम। धेनोः। त्रिः। सप्त। मातुः। परमाणि। विन्दन्
वाक्यम् २: तज्जानतीरभ्यनूषत व्रा आविर्भुवदरुणीर्यशसा गोः॥
पदानि : तत्। जानतीः। अभि। अनूषत। व्राः। आविः। भुवत्। अरुणीः। यशसा। गोः

१०२. मण्डलम् ४, सूक्तम् १, मन्त्रः १७ (ऋक्सङ्ख्या : ३०६९)
वाक्यम् १: नेशत्तमो दुधितं रोचत द्यौरुद्वेव्या उषसो भानुरर्त।

पदानि : नेशत्। तमः। दुधितम्। रोचत। द्यौः। उत्। देव्याः। उषसः। भानुः। अर्त
वाक्यम् २: आ सूर्यो बृहतस्तिष्ठदज्राँ ऋजु मर्तेषु वृजिना च पश्यन्॥
पदानि : आ। सूर्यः। बृहतः। तिष्ठत्। अज्रान्। ऋजु। मर्तेषु। वृजिना। च। पश्यन्

१०३. मण्डलम् ४, सूक्तम् २, मन्त्रः ११ (ऋक्सङ्ख्या : ३०८३)
वाक्यम् १: चित्तिमचित्तिं चिनवद्वि विद्वान्पृष्ठेव वीता वृजिना च मर्तान्।
पदानि : चित्तिम्। अचित्तिम्। चिनवत्। वि। विद्वान्। पृष्ठाऽइव। वीता। वृजिना। च। मर्तान्
वाक्यम् २: राये चं नः स्वपत्याय देव दितिं च रास्वादितिमुरुष्य॥
पदानि : राये। च। नः। सुऽअपत्यायं। देव। दितिम्। च। रास्व। अदितिम्। उरुष्य

१०४. मण्डलम् ४, सूक्तम् ४, मन्त्रः ६ (ऋक्सङ्ख्या : ३११४)
वाक्यम् १: स ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत्।
पदानि : सः। ते। जानाति। सुऽमतिम्। यविष्ठ। यः। ईवते। ब्रह्मणे। गातुम्। ऐरत्
वाक्यम् २: विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो वि दुरो अभि द्यौत्॥
पदानि : विश्वानि। अस्मै। सुऽदिनानि। रायः। द्युम्नानि। अर्यः। वि। दुरः। अभि। द्यौत्

१०५. मण्डलम् ४, सूक्तम् १२, मन्त्रः २ (ऋक्सङ्ख्या : ३१९२)
वाक्यम् १: इध्मं यस्ते जभरच्छश्रमाणो महो अग्ने अनीकमा सपर्यन्।
पदानि : इध्मम्। यः। ते। जभरत्। शश्रमाणः। महः। अग्ने। अनीकम्। आ। सपर्यन्
वाक्यम् २: स इधानः प्रतिं दोषामुषासं पुष्यन्नयिं सचते घ्नन्नमित्रान्॥
पदानि : सः। इधानः। प्रतिं। दोषाम्। उषसम्। पुष्यन्। रयिम्। सचते। घ्नन्। अमित्रान्

१०६. मण्डलम् ४, सूक्तम् १६, मन्त्रः ३ (ऋक्सङ्ख्या : ३२१९)
वाक्यम् १: कविर्न निण्यं विदथानि साधन्वृषा यत्सेकं विपिपानो अर्चात्।
पदानि : कविः। न। निण्यम्। विदथानि। साधन्। वृषा। यत्। सेकम्। विऽपिपानः। अर्चात्
वाक्यम् २: दिव इत्था जीजनत्सप्त कारून्ह्रा चिच्चक्रुर्वयुना गृणन्तः॥
पदानि : दिवः। इत्था। जीजनत्। सप्त। कारून्। अह्रा। चित्। चक्रुः। वयुना। गृणन्तः

१०७. मण्डलम् ४, सूक्तम् १६, मन्त्रः १४ (ऋक्सङ्ख्या : ३२३०)
वाक्यम् १: सूर उपाके तन्वं१ दधानो वि यत्ते चेत्यमृतस्य वर्पः।
पदानि : सूरः। उपाके। तन्वम्। दधानः। वि। यत्। ते। चेतिं। अमृतस्य। वर्पः
वाक्यम् २: मृगो न हस्ती तविषीमुषाणः सिंहो न भीम आयुधानि बिभ्रत्॥
पदानि : मृगः। न। हस्ती। तविषीम्। उषाणः। सिंहः। न। भीमः। आयुधानि। बिभ्रत्

१०८. मण्डलम् ४, सूक्तम् १७, मन्त्रः १९ (ऋक्सङ्ख्या : ३२५६)
वाक्यम् १: स्तुत इन्द्रो मघवा यद्ध वृत्रा भूरीण्येको अप्रतीनिं हन्ति।
पदानि : स्तुतः। इन्द्रः। मघऽवा। यत्। ह। वृत्रा। भूरीणि। एकः। अप्रतीनिं। हन्ति
वाक्यम् २: अस्य प्रियो जरिता यस्य शर्मन्नकिर्देवा वारयन्ते न मर्ताः॥
पदानि : अस्य। प्रियः। जरिता। यस्य। शर्मन्। नकिः। देवाः। वारयन्ते। न। मर्ताः

१०९. मण्डलम् ४, सूक्तम् १८, मन्त्रः ७ (ऋक्सङ्ख्या : ३२६५)
वाक्यम् १: किमु ष्विदस्मै निविदो भनन्तेन्द्रस्यावद्यं दिधिषन्त आपः।
पदानि : किम्। ऊँ इति। स्वित्। अस्मै। निऽविदः। भनन्त। इन्द्रस्य। अवद्यम्। दिधिषन्ते। आपः
वाक्यम् २: ममैतान्पुत्रो महता वधेन वृत्रं जघन्वाँ असृजद्वि सिन्धून्॥
पदानि : मम। एतान्। पुत्रः। महता। वधेन। वृत्रम्। जघन्वान्। असृजत्। वि। सिन्धून्

११०. मण्डलम् ४, सूक्तम् १८, मन्त्रः ११ (ऋक्सङ्ख्या : ३२६९)
वाक्यम् १: उत माता महिषमन्ववेनदमी त्वा जहति पुत्र देवाः।
पदानि : उत। माता। महिषम्। अनु। अवेनत्। अमी इति। त्वा। जहति। पुत्र। देवाः
वाक्यम् २: अथाब्रवीद्वृत्रमिन्द्रो हनिष्यन्त्सखे विष्णो वितरं वि क्रमस्व॥
पदानि : अथ। अब्रवीत्। वृत्रम्। इन्द्रः। हनिष्यन्। सखे। विष्णो इति। विऽतरम्। वि। क्रमस्व

१११. मण्डलम् ४, सूक्तम् २२, मन्त्रः ४ (ऋक्सङ्ख्या : ३३०८)
वाक्यम् १: विश्वा रोधांसि प्रवतश्च पूर्वीर्द्यौर्ऋष्वाज्जनिमन्रेजत क्षाः।
पदानि : विश्वा। रोधांसि। प्रऽवतः। च। पूर्वीः। द्यौः। ऋष्वात्। जनिमन्। रेजत। क्षाः
वाक्यम् २: आ मातरा भरति शुष्म्या गोर्नृवत्परिज्मन्नोनुवन्त वाताः॥
पदानि : आ। मातरा। भरति। शुष्मी। आ। गोः। नृऽवत्। परिऽज्मन्। नोनुवन्त। वाताः

११२. मण्डलम् ४, सूक्तम् २३, मन्त्रः २ (ऋक्सङ्ख्या : ३३१७)
वाक्यम् १: को अस्य वीरः सधमादमाप समानंश सुमतिभिः को अस्य।
पदानि : कः। अस्य। वीरः। सधऽमादम्। आप। सम्। आनंश। सुमतिऽभिः। कः। अस्य
वाक्यम् २: कदस्य चित्रं चिकिते कदूती वृधे भुवच्छशमानस्य यज्योः॥
पदानि : कत्। अस्य। चित्रम्। चिकिते। कत्। ऊती। वृधे। भुवत्। शशमानस्य। यज्योः

११३. मण्डलम् ४, सूक्तम् २६, मन्त्रः १ (ऋक्सङ्ख्या : ३३४६)
वाक्यम् १: अहं मनुरभवं सूर्यश्चाहं कक्षीवाँ ऋषिरस्मि विप्रः।
पदानि : अहम्। मनुः। अभवम्। सूर्यः। च। अहम्। कक्षीवान्। ऋषिः। अस्मि। विप्रः
वाक्यम् २: अहं कुत्समार्जुनेयं न्यृञ्जेऽहं कविरुशना पश्यता मा॥
पदानि : अहम्। कुत्सम्। आर्जुनेयम्। नि। ऋञ्जे। अहम्। कविः। उशना। पश्यत। मा

११४. मण्डलम् ४, सूक्तम् २७, मन्त्रः १ (ऋक्सङ्ख्या : ३३५३)
वाक्यम् १: गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा।
पदानि : गर्भे। नु। सन्। अनु। एषाम्। अवेदम्। अहम्। देवानाम्। जनिमानि। विश्वा
वाक्यम् २: शतं मा पुर आयसीररक्षन्नधं श्येनो जवसा निरदीयम्॥
पदानि : शतम्। मा। पुरः। आयसीः। अरक्षन्। अधं। श्येनः। जवसा। निः। अदीयम्

११५. मण्डलम् ४, सूक्तम् २७, मन्त्रः ४ (ऋक्सङ्ख्या : ३३५६)
वाक्यम् १: ऋजिप्य ईमिन्द्रावतो न भुज्युं श्येनो जभार बृहतो अधि ष्णोः।
पदानि : ऋजिप्यः। ईम्। इन्द्रऽवतः। न। भुज्युम्। श्येनः। जभार। बृहतः। अधि। स्नोः
वाक्यम् २: अन्तः पतत्पतत्र्यस्य पर्णमध यामनि प्रसितस्य तद्वेः॥
पदानि : अन्तरिति। पतत्। पतत्रि। अस्य। पर्णम्। अध। यामनि। प्रऽसितस्य। तत्। वेरितिवेः

११६. मण्डलम् ४, सूक्तम् ३३, मन्त्रः १० (ऋक्सङ्ख्या : ३४४०)
वाक्यम् १: ये हरी॑ मे॒धयो॒क्था मद॑न्त इन्द्रा॑य च॒क्रुः सु॒युजा॒ ये अश्वा॑।
पदानि : ये। हरी॒ इति॑। मे॒धया॑। उ॒क्था। मद॑न्तः। इन्द्रा॑य। च॒क्रुः। सु॒ऽयुजा॑। ये। अश्वा॑
वाक्यम् २: ते रा॒यस्पोषं॒ द्रवि॑णान्य॒स्मे ध॒त्त ऋ॑भवः क्षेम॒यन्तो॒ न मि॒त्रम्॥
पदानि : ते। रा॒यः। पोष॑म्। द्रवि॑णानि। अ॒स्मे इति॑। ध॒त्त। ऋ॒भ॒वः॒। क्षे॒म॒ऽयन्तः॑। न। मि॒त्रम्

११७. मण्डलम् ४, सूक्तम् ३४, मन्त्रः ३ (ऋक्सङ्ख्या : ३४४४)
वाक्यम् १: अ॒यं वो॑ य॒ज्ञ ऋ॑भवोऽकारि॒ यमा म॑नुष्वत्प्र॒दिवो॑ दधि॒ध्वे।
पदानि : अ॒यम्। वः॒। य॒ज्ञः। ऋ॒भ॒वः॒। अ॒का॒रि॒। यम्। आ। म॒नु॒ष्व॒त्। प्र॒ऽदिवः॑। दु॒धि॒ध्वे
वाक्यम् २: प्र वोऽच्छा॑ जुजुषा॒णासो॑ अस्थुरभू॑त॒ विश्वे॑ अग्रि॒याव॑ाजाः॥
पदानि : प्र। वः॒। अच्छ॑। जु॒जु॒षा॒णासः॑। अ॒स्थुः॒। अभू॑त। विश्वे॑। अ॒ग्रि॒या। उ॒त। वा॒जाः॒

११८. मण्डलम् ४, सूक्तम् ३५, मन्त्रः १ (ऋक्सङ्ख्या : ३४५३)
वाक्यम् १: इ॒होप॑ यात शवसो नपातः॒ सौध॑न्वना ऋभवो॒ माप॑ भूत।
पदानि : इ॒ह। उप॑। या॒त॒। श॒व॒सः॒। न॒पा॒तः॒। सौध॑न्वनाः। ऋ॒भ॒वः॒। मा। अप॑। भू॒त॒
वाक्यम् २: अ॒स्मिन्हि वः॒ सव॑ने रत्न॒धेयं॒ गम॒न्त्विन्द्र॒मनु॑ वो॒ मदा॑सः॥
पदानि : अ॒स्मिन्। हि। वः॒। सव॑ने। र॒त्न॒ऽधेय॑म्। गम॑न्तु। इन्द्र॑म्। अनु॑। वः॒। मदा॑सः

११९. मण्डलम् ४, सूक्तम् ३६, मन्त्रः ४ (ऋक्सङ्ख्या : ३४६५)
वाक्यम् १: एकं॒ वि च॑क्र च॒मस॑ं चतु॑र्वयं॒ निश्च॒र्मणो॒ गाम॑रिणीत धी॒तिभिः॑।
पदानि : एक॑म्। वि। च॒क्र॒। च॒मस॑म्। चतुः॑ऽवयम्। निः। चर्म॑णः। गाम्। अ॒रि॒णी॒त॒। धी॒तिऽभिः॑
वाक्यम् २: अथा॑ दे॒वेष्व॑मृत॒त्वमा॑नश श्रु॒ष्टी वा॑जा ऋभवस्तद्व॑ उ॒क्थ्य॑म्॥
पदानि : अथ॑। दे॒वेषु॑। अ॒मृ॒त॒ऽत्वम्। आ॒न॒श॒। श्रु॒ष्टी। वा॒जाः॒। ऋ॒भ॒वः॒। तत्। वः॒। उ॒क्थ्य॑म्

१२०. मण्डलम् ४, सूक्तम् ४२, मन्त्रः ६ (ऋक्सङ्ख्या : ३५१६)
वाक्यम् १: अ॒हं ता विश्वा॑ चकरं॒ नकि॑र्मा॒ दैव्यं॑ सहो॑ वरते॒ अप्र॑तीतम्।
पदानि : अ॒हम्। ता। विश्वा॑। च॒क॒र॒म्। नकिः॑। मा॒। दैव्य॑म्। सहः॑। व॒र॒ते॒। अप्र॑तिऽइतम्
वाक्यम् २: यन्मा॒ सोमा॑सो म॒मद॒न्यदु॒क्थोभे भ॑येते॒ रज॑सी अपा॒रे॥
पदानि : यत्। मा॒। सोमा॑सः। म॒मद॑न्। यत्। उ॒क्था। उ॒भे इति॑। भ॒ये॒ते॒ इति॑। रज॑सी॒ इति॑। अ॒पा॒रे इति॑

१२१. मण्डलम् ४, सूक्तम् ५०, मन्त्रः ८ (ऋक्सङ्ख्या : ३५७१)
वाक्यम् १: स इत्क्षे॑ति॒ सुधि॑त॒ ओक॑सि॒ स्वे तस्मा॒ इळा॑ पिन्वते॒ विश्व॒दानी॑म्।
पदानि : सः। इत्। क्षे॒ति॒। सुऽधि॑तः। ओक॑सि। स्वे। तस्मै॑। इळा॑। पि॒न्व॒ते॒। वि॒श्व॒ऽदानी॑म्
वाक्यम् २: तस्मै॒ विशः॑ स्व॒यमे॒वा न॑मन्ते॒ यस्मि॑न्ब्र॒ह्मा राज॑नि॒ पूर्व॒ एति॑॥
पदानि : तस्मै॑। विशः॑। स्व॒यम्। ए॒व। न॒म॒न्ते॒। यस्मि॑न्। ब्र॒ह्मा। राज॑नि। पूर्वः॑। एति॑

१२२. मण्डलम् ४, सूक्तम् ५५, मन्त्रः १ (ऋक्सङ्ख्या : ३६०६)
वाक्यम् १: को व॑स्त्रा॒ता व॑सवः॒ को व॑रू॒ता द्यावा॑भूमी अदिते॒ त्रासी॑थां नः।
पदानि : कः। वः॒। त्रा॒ता। व॒स॒वः॒। कः। व॒रू॒ता। द्यावा॑भूमी॒ इति॑। अ॒दि॒ते॒। त्रासी॑थाम्। नः॒

वाक्यम् २: सहीयसो वरुण मित्र मर्तात्को वोऽध्वरे वरिवो धाति देवाः ॥
पदानि : सहीयसः । वरुण । मित्र । मर्तात् । कः । वः । अध्वरे । वरिवः । धाति । देवाः

१२३. मण्डलम् ४, सूक्तम् ५५, मन्त्रः ४ (ऋक्सङ्ख्या : ३६०९)
वाक्यम् १: व्यर्यमा वरुणश्चेति पन्थामिषस्पतिः सुवितं गातुमग्निः ।
पदानि : वि । अर्यमा । वरुणः । चेति । पन्थाम् । इषः । पतिः । सुवितम् । गातुम् । अग्निः
वाक्यम् २: इन्द्राविष्णू नृवदु षु स्तवाना शर्म नो यन्तममवद्वरूथम् ॥
पदानि : इन्द्राविष्णू इति । नृऽवत् । ऊँ इति । सु । स्तवाना । शर्म । नः । यन्तम् । अमऽवत् । वरूथम्

१२४. मण्डलम् ५, सूक्तम् १, मन्त्रः १० (ऋक्सङ्ख्या : ३६५१)
वाक्यम् १: तुभ्यं भरन्ति क्षितयो यविष्ठ बलिमग्ने अन्तित ओत दूरात् ।
पदानि : तुभ्यम् । भरन्ति । क्षितयः । यविष्ठ । बलिम् । अग्ने । अन्तितः । आ । उत । दूरात्
वाक्यम् २: आ भन्दिष्ठस्य सुमतिं चिकिद्धि बृहत्ते अग्ने महि शर्म भद्रम् ॥
पदानि : आ । भन्दिष्ठस्य । सुऽमतिम् । चिकिद्धि । बृहत् । ते । अग्ने । महि । शर्म । भद्रम्

१२५. मण्डलम् ५, सूक्तम् ३, मन्त्रः ३ (ऋक्सङ्ख्या : ३६६८)
वाक्यम् १: तवं श्रिये मरुतो मर्जयन्त रुद्र यत्ते जनिम चारु चित्रम् ।
पदानि : तवं । श्रिये । मरुतः । मर्जयन्त । रुद्र । यत् । ते । जनिम । चारु । चित्रम्
वाक्यम् २: पदं यद्विष्णोरुपमं निधायि तेनं पासि गुह्यं नाम गोनाम् ॥
पदानि : पदम् । यत् । विष्णोः । उपऽमम् । निऽधायि । तेनं । पासि । गुह्यम् । नामं । गोनाम्

१२६. मण्डलम् ५, सूक्तम् १२, मन्त्रः २ (ऋक्सङ्ख्या : ३७४८)
वाक्यम् १: ऋतं चिकित्व ऋतमिच्चिकिद्ध्यृतस्य धारा अनु तृन्धि पूर्वीः ।
पदानि : ऋतम् । चिकित्वः । ऋतम् । इत् । चिकिद्धि । ऋतस्यं । धाराः । अनु । तृन्धि । पूर्वीः
वाक्यम् २: नाहं यातुं सहसा न द्वयेनं ऋतं सपाम्यरुषस्य वृष्णः ॥
पदानि : न । अहम् । यातुम् । सहसा । न । द्वयेनं । ऋतम् । सपामि । अरुषस्यं । वृष्णः

१२७. मण्डलम् ५, सूक्तम् ३०, मन्त्रः २ (ऋक्सङ्ख्या : ३८५६)
वाक्यम् १: अवाचचक्षं पदमस्य सस्वरुग्रं निधातुरन्वायमिच्छन् ।
पदानि : अवं । अचचक्षम् । पदम् । अस्य । सस्वः । उग्रम् । निऽधातुः । अनु । आयम् । इच्छन्
वाक्यम् २: अपृच्छमन्याँ उत ते म आहुरिन्द्रं नरो बुबुधाना अशेम ॥
पदानि : अपृच्छम् । अन्यान् । उत । ते । मे । आहुः । इन्द्रम् । नरः । बुबुधानाः । अशेम

१२८. मण्डलम् ५, सूक्तम् ३१, मन्त्रः ३ (ऋक्सङ्ख्या : ३८७२)
वाक्यम् १: उद्यत्सहः सहस आजनिष्ट देदिष्ट इन्द्र इन्द्रियाणि विश्वा ।
पदानि : उत् । यत् । सहः । सहसः । आ । अजनिष्ट । देदिष्टे । इन्द्रः । इन्द्रियाणि । विश्वा
वाक्यम् २: प्राचोदयत्सुदुघा वव्रे अन्तर्वि ज्योतिषा संववृत्वत्तमोऽवः ॥
पदानि : प्र । अचोदयत् । सुऽदुघाः । वव्रे । अन्तः । वि । ज्योतिषा । सम्ऽववृत्वत् । तमः । अवरित्यवः

१२९. मण्डलम् ५, सूक्तम् ३३, मन्त्रः ४ (ऋक्सङ्ख्या : ३८९८)

वाक्यम् १: पुरू यत्ते इन्द्र सन्त्युक्था गवे चकर्थोर्वरासु युध्यन्।
पदानि : पुरु। यत्। ते। इन्द्र। सन्ति। उक्था। गवे। चकर्थ। उर्वरासु। युध्यन्
वाक्यम् २: ततक्षे सूर्याय चिदोकसि स्वे वृषा समत्सु दासस्य नाम चित्॥
पदानि : ततक्षे। सूर्याय। चित्। ओकसि। स्वे। वृषा। समत्ऽसु। दासस्य। नाम। चित्

१३०. मण्डलम् ५, सूक्तम् ३७, मन्त्रः ४ (ऋक्सङ्ख्या : ३९३१)
वाक्यम् १: न स राजा व्यथते यस्मिन्निन्द्रस्तीव्रं सोमं पिबति गोसखायम्।
पदानि : न। सः। राजा। व्यथते। यस्मिन्। इन्द्रः। तीव्रम्। सोमम्। पिबति। गोऽसखायम्
वाक्यम् २: आ सत्वनैरजति हन्ति वृत्रं क्षेति क्षितीः सुभगो नाम पुष्यन्॥
पदानि : आ। सत्वनैः। अजति। हन्ति। वृत्रम्। क्षेति। क्षितीः। सुऽभगः। नाम। पुष्यन्

१३१. मण्डलम् ५, सूक्तम् ४१, मन्त्रः ६ (ऋक्सङ्ख्या : ३९५७)
वाक्यम् १: प्र वो वायुं रथयुजं कृणुध्वं प्र देवं विप्रं पनितारमर्कैः।
पदानि : प्र। वः। वायुम्। रथऽयुजम्। कृणुध्वम्। प्र। देवम्। विप्रम्। पनितारम्। अर्कैः
वाक्यम् २: इषुध्यवं ऋतसापः पुरंधीर्वस्वीर्नो अत्र पत्नीरा धिये धुः॥
पदानि : इषुध्यवः। ऋतऽसापः। पुरम्ऽधीः। वस्वीः। नः। अत्र। पत्नीः। आ। धिये। धुरितिं धुः

१३२. मण्डलम् ५, सूक्तम् ४१, मन्त्रः ९ (ऋक्सङ्ख्या : ३९६०)
वाक्यम् १: तुजे नस्तने पर्वताः सन्तु स्वैतवो ये वसवो न वीराः।
पदानि : तुजे। नः। तने। पर्वताः। सन्तु। स्वऽएतवः। ये। वसवः। न। वीराः
वाक्यम् २: पनित आप्यो यजतः सदा नो वर्धान्नः शंसं नर्यो अभिष्टौ॥
पदानि : पनितः। आप्यः। यजतः। सदा। नः। वर्धात्। नः। शंसम्। नर्यः। अभिष्टौ

१३३. मण्डलम् ५, सूक्तम् ४२, मन्त्रः २ (ऋक्सङ्ख्या : ३९७३)
वाक्यम् १: प्रति मे स्तोममदितिर्जगृभ्यात्सूनुं न माता हृद्यं सुशेवम्।
पदानि : प्रति। मे। स्तोमम्। अदितिः। जगृभ्यात्। सूनुम्। न। माता। हृद्यम्। सुऽशेवम्
वाक्यम् २: ब्रह्म प्रियं देवहितं यदस्त्यहं मित्रे वरुणे यन्मयोभु॥
पदानि : ब्रह्म। प्रियम्। देवऽहितम्। यत्। अस्ति। अहम्। मित्रे। वरुणे। यत्। मयःऽभु

१३४. मण्डलम् ५, सूक्तम् ८०, मन्त्रः ५ (ऋक्सङ्ख्या : ४३१७)
वाक्यम् १: एषा शुभ्रा न तन्वो विदानोर्ध्वेव स्नाती दृशये नो अस्थात्।
पदानि : एषा। शुभ्रा। न। तन्वः। विदाना। ऊर्ध्वाऽइव। स्नाती। दृशये। नः। अस्थात्
वाक्यम् २: अप द्वेषो बाधमाना तमांस्युषा दिवो दुहिता ज्योतिषागात्॥
पदानि : अप। द्वेषः। बाधमाना। तमांसि। उषाः। दिवः। दुहिता। ज्योतिषा। आ। अगात्

१३५. मण्डलम् ५, सूक्तम् ८१, मन्त्रः २ (ऋक्सङ्ख्या : ४३२०)
वाक्यम् १: विश्वा रूपाणि प्रति मुञ्चते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे।
पदानि : विश्वा। रूपाणि। प्रति। मुञ्चते। कविः। प्र। असावीत्। भद्रम्। द्विऽपदे। चतुःऽपदे
वाक्यम् २: वि नाकमख्यत्सविता वरेण्योऽनु प्रयाणमुषसो वि राजति॥
पदानि : वि। नाकम्। अख्यत्। सविता। वरेण्यः। अनु। प्रऽयानम्। उषसः। वि। राजति

१३६. मण्डलम् ५, सूक्तम् ८१, मन्त्रः ४ (ऋक्सङ्ख्या : ४३२२)
वाक्यम् १: उत यासि सवितस्त्रीणि रोचनोत सूर्यस्य रश्मिभिः समुच्यसि ।
पदानि : उत । यासि । सवितरितिं । त्रीणिं । रोचना । उत । सूर्यस्य । रश्मिऽभिः । सम् । उच्यसि
वाक्यम् २: उत रात्रीमुभयतः परीयस उत मित्रो भवसि देव धर्मभिः ॥
पदानि : उत । रात्रीम् । उभयतः । परिं । ईयसे । उत । मित्रः । भवसि । देव । धर्मऽभिः

१३७. मण्डलम् ५, सूक्तम् ८३, मन्त्रः ६ (ऋक्सङ्ख्या : ४३३८)
वाक्यम् १: दिवो नो वृष्टिं मरुतो ररीध्वं प्र पिन्वत वृष्णो अश्वस्य धाराः ।
पदानि : दिवः । नः । वृष्टिम् । मरुतः । ररीध्वम् । प्र । पिन्वत । वृष्णः । अश्वस्य । धाराः
वाक्यम् २: अर्वाङेतेन स्तनयित्नुनेह्यपो निषिञ्चन्नसुरः पिता नः ॥
पदानि : अर्वाङ् । एतेन । स्तनयित्नुना । आ । इहि । अपः । निऽसिञ्चन् । असुरः । पिता । नः

१३८. मण्डलम् ६, सूक्तम् १, मन्त्रः २ (ऋक्सङ्ख्या : ४३७०)
वाक्यम् १: अधा होता न्यसीदो यजीयानिळस्पद इषयन्नीड्यः सन् ।
पदानि : अध । होता । नि । असीदः । यजीयान् । इळः । पदे । इषयन् । ईड्यः । सन्
वाक्यम् २: तं त्वा नरः प्रथमं देवयन्तो महो राये चितयन्तो अनु ग्मन् ॥
पदानि : तम् । त्वा । नरः । प्रथमम् । देवऽयन्तः । महः । राये । चितयन्तः । अनु । ग्मन्

१३९. मण्डलम् ६, सूक्तम् १, मन्त्रः ६ (ऋक्सङ्ख्या : ४३७४)
वाक्यम् १: सपर्येण्यः स प्रियो विक्ष्वग्निर्होता मन्द्रो नि षसादा यजीयान् ।
पदानि : सपर्येण्यः । सः । प्रियः । विक्षु । अग्निः । होता । मन्द्रः । नि । ससाद । यजीयान्
वाक्यम् २: तं त्वा वयं दम आ दीदिवांसमुप ज्ञुबाधो नमसा सदेम ॥
पदानि : तम् । त्वा । वयम् । दमे । आ । दीदिऽवांसम् । उप । ज्ञुऽबाधः । नमसा । सदेम

१४०. मण्डलम् ६, सूक्तम् ३, मन्त्रः १ (ऋक्सङ्ख्या : ४३९३)
वाक्यम् १: अग्ने स क्षेषदृतपा ऋतेजा उरु ज्योतिर्नशते देवयुष्टे ।
पदानि : अग्ने । सः । क्षेषत् । ऋतऽपाः । ऋतेऽजाः । उरु । ज्योतिः । नशते । देवऽयुः । ते
वाक्यम् २: यं त्वं मित्रेण वरुणः सजोषा देव पासि त्यजसा मर्तमंहः ॥
पदानि : यम् । त्वम् । मित्रेण । वरुणः । सऽजोषाः । देव । पासि । त्यजसा । मर्तम् । अंहः

१४१. मण्डलम् ६, सूक्तम् ३, मन्त्रः ८ (ऋक्सङ्ख्या : ४४००)
वाक्यम् १: धायोभिर्वा यो युज्येभिरर्कैर्विद्युन्न दंविद्योत्स्वेभिः शुष्मैः ।
पदानि : धायःऽभिः । वा । यः । युज्येभिः । अर्कैः । विऽद्युत् । न । दुविद्योत् । स्वेभिः । शुष्मैः
वाक्यम् २: शर्धो वा यो मरुतां ततक्ष ऋभुर्न त्वेषो रंभसानो अद्यौत् ॥
पदानि : शर्धः । वा । यः । मरुताम् । ततक्ष । ऋभुः । न । त्वेषः । रभसानः । अद्यौत्

१४२. मण्डलम् ६, सूक्तम् ४, मन्त्रः ६ (ऋक्सङ्ख्या : ४४०६)
वाक्यम् १: आ सूर्यो न भानुमद्भिरर्कैरग्ने ततन्थ रोदसी वि भासा ।
पदानि : आ । सूर्यः । न । भानुमत्ऽभिः । अर्कैः । अग्ने । ततन्थ । रोदसी इतिं । वि । भासा
वाक्यम् २: चित्रो नयत्परि तमांस्यक्तः शोचिषा पत्मन्नौशिजो न दीयन् ॥

पदानि : चित्रः । नयत् । परिं । तमाँसि । अक्तः । शोचिषा । पत्मन् । औशिजः । न । दीयन्

१४३. मण्डलम् ६, सूक्तम् ५, मन्त्रः ६ (ऋक्सङ्ख्या : ४४१४)
वाक्यम् १: स तत्कृधीषितस्तूयमग्ने स्पृधो बाधस्व सहसा सहस्वान् ।
पदानि : सः । तत् । कृधि । इषितः । तूयम् । अग्ने । स्पृधः । बाधस्व । सहसा । सहस्वान्
वाक्यम् २: यच्छस्यसे द्युभिरक्तो वचोभिस्तज्जुषस्व जरितुर्घोषि मन्म ॥
पदानि : यत् । शस्यसे । द्युऽभिः । अक्तः । वचःऽभिः । तत् । जुषस्व । जरितुः । घोषिं । मन्म

१४४. मण्डलम् ६, सूक्तम् १३, मन्त्रः २ (ऋक्सङ्ख्या : ४४६४)
वाक्यम् १: त्वं भगो न आ हि रत्नमिषे परिज्मेव क्षयसि दस्मवर्चाः ।
पदानि : त्वम् । भगः । नः । आ । हि । रत्नम् । इषे । परिज्माऽइव । क्षयसि । दस्मऽवर्चाः
वाक्यम् २: अग्ने मित्रो न बृहत ऋतस्यासिं क्षत्ता वामस्य देव भूरेः ॥
पदानि : अग्ने । मित्रः । न । बृहतः । ऋतस्य । असिं । क्षत्ता । वामस्य । देव । भूरेः

१४५. मण्डलम् ६, सूक्तम् १५, मन्त्रः १२ (ऋक्सङ्ख्या : ४४८६)
वाक्यम् १: त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात् ।
पदानि : त्वम् । अग्ने । वनुष्यतः । नि । पाहि । त्वम् । ऊँ इतिं । नः । सहसाऽवन् । अवद्यात्
वाक्यम् २: सं त्वा ध्वस्मन्वदभ्येतु पाथः सं रयिः स्पृहयाय्यः सहस्री ॥
पदानि : सम् । त्वा । ध्वस्मन्ऽवत् । अभि । एतु । पाथः । सम् । रयिः । स्पृहयाय्यः । सहस्री

१४६. मण्डलम् ६, सूक्तम् १७, मन्त्रः ६ (ऋक्सङ्ख्या : ४५४७)
वाक्यम् १: तव क्रत्वा तव तदुसनाभिरामासु पक्वं शच्या नि दीधः ।
पदानि : तव । क्रत्वा । तव । तत् । दुसनाभिः । आमासु । पक्वम् । शच्या । नि । दीधरितिं दीधः
वाक्यम् २: और्णोर्दुरः उस्रियाभ्यो वि दृळ्होदूर्वाद्गा असृजो अङ्गिरस्वान् ॥
पदानि : और्णोः । दुरः । उस्रियाभ्यः । वि । दृळ्हा । उत् । ऊर्वात् । गाः । असृजः । अङ्गिरस्वान्

१४७. मण्डलम् ६, सूक्तम् १८, मन्त्रः ५ (ऋक्सङ्ख्या : ४५६१)
वाक्यम् १: तन्नः प्रत्नं सख्यमस्तु युष्मे इत्था वदद्भिर्वलमङ्गिरोभिः ।
पदानि : तत् । नः । प्रत्नम् । सख्यम् । अस्तु । युष्मे इतिं । इत्था । वदत्ऽभिः । वलम् । अङ्गिरःऽभिः
वाक्यम् २: हन्नच्युतच्युद्दस्मेषयन्तमृणोः पुरो वि दुरो अस्य विश्वाः ॥
पदानि : हन् । अच्युतऽच्युत् । दस्म । इषयन्तम् । ऋणोः । पुरः । वि । दुरः । अस्य । विश्वाः

१४८. मण्डलम् ६, सूक्तम् २०, मन्त्रः १० (ऋक्सङ्ख्या : ४५९४)
वाक्यम् १: सनेम तेऽवसा नव्य इन्द्र प्र पूरवः स्तवन्त एना यज्ञैः ।
पदानि : सनेमं । ते । अवसा । नव्यः । इन्द्र । प्र । पूरवः । स्तवन्ते । एना । यज्ञैः
वाक्यम् २: सप्त यत्पुरः शर्म शारदीर्दर्द्धन्दासीः पुरुकुत्सायं शिक्षन् ॥
पदानि : सप्त । यत् । पुरः । शर्म । शारदीः । दर्त् । हन् । दासीः । पुरुऽकुत्साय । शिक्षन्

१४९. मण्डलम् ६, सूक्तम् २३, मन्त्रः १ (ऋक्सङ्ख्या : ४६२१)
वाक्यम् १: सुत इत्त्वं निमिश्ल इन्द्र सोमे स्तोमे ब्रह्मणि शस्यमान उक्थे ।

पदानि : सुते । इत् । त्वम् । निऽमिश्लः । इन्द्र । सोमे । स्तोमे । ब्रह्मणि । शस्यमाने । उक्थे
वाक्यम् २: यद्वा युक्ताभ्यां मघवन्हरिभ्यां बिभ्रद्वज्रं बाह्वोरिन्द्र यासि ॥
पदानि : यत् । वा । युक्ताभ्याम् । मघऽवन् । हरिऽभ्याम् । बिभ्रत् । वज्रम् । बाह्वोः । इन्द्र । यासि

१५०. मण्डलम् ६, सूक्तम् २४, मन्त्रः ३ (ऋक्सङ्ख्या : ४६३३)
वाक्यम् १: अक्षो न चक्र्योः शूर बृहन्प्र ते मह्ना रिरिचे रोदस्योः ।
पदानि : अक्षः । न । चक्र्योः । शूर । बृहन् । प्र । ते । मह्ना । रिरिचे । रोदस्योः
वाक्यम् २: वृक्षस्य नु ते पुरुहूत वया व्यूतयो रुरुहुरिन्द्र पूर्वीः ॥
पदानि : वृक्षस्य । नु । ते । पुरुऽहूत । वयाः । वि । ऊतयः । रुरुहुः । इन्द्र । पूर्वीः

१५१. मण्डलम् ६, सूक्तम् २४, मन्त्रः ६ (ऋक्सङ्ख्या : ४६३६)
वाक्यम् १: वि त्वदापो न पर्वतस्य पृष्ठादुक्थेभिरिन्द्रानयन्त यज्ञैः ।
पदानि : वि । त्वत् । आपः । न । पर्वतस्य । पृष्ठात् । उक्थेभिः । इन्द्र । अनयन्त । यज्ञैः
वाक्यम् २: तं त्वाभिः सुष्टुतिभिर्वाजयन्त आजिं न जग्मुर्गिर्वाहो अश्वाः ॥
पदानि : तम् । त्वा । आभिः । सुस्तुतिऽभिः । वाजयन्तः । आजिम् । न । जग्मुः । गिर्वाहः । अश्वाः

१५२. मण्डलम् ६, सूक्तम् २५, मन्त्रः ८ (ऋक्सङ्ख्या : ४६४८)
वाक्यम् १: अनु ते दायि मह इन्द्रियाय सत्रा ते विश्वमनु वृत्रहत्ये ।
पदानि : अनु । ते । दायि । महे । इन्द्रियाय । सत्रा । ते । विश्वम् । अनु । वृत्रऽहत्ये
वाक्यम् २: अनु क्षत्रमनु सहो यजत्रेन्द्र देवेभिरनु ते नृषह्ये ॥
पदानि : अनु । क्षत्रम् । अनु । सहः । यजत्र । इन्द्र । देवेभिः । अनु । ते । नृऽसह्ये

१५३. मण्डलम् ६, सूक्तम् २६, मन्त्रः ४ (ऋक्सङ्ख्या : ४६५३)
वाक्यम् १: त्वं रथं प्र भरो योधमृष्वमावो युध्यन्तं वृषभं दशद्युम् ।
पदानि : त्वम् । रथम् । प्र । भरः । योधम् । ऋष्वम् । आवः । युध्यन्तम् । वृषभम् । दशऽद्युम्
वाक्यम् २: त्वं तुग्रं वेतसवे सचाहन्त्वं तुजिं गृणन्तमिन्द्र तूतोः ॥
पदानि : त्वम् । तुग्रम् । वेतसवे । सचा । अहन् । त्वम् । तुजिम् । गृणन्तम् । इन्द्र । तूतोरितिं तूतोः

१५४. मण्डलम् ६, सूक्तम् २९, मन्त्रः ३ (ऋक्सङ्ख्या : ४६७६)
वाक्यम् १: श्रिये ते पादा दुव आ मिमिक्षुर्धृष्णुर्वज्री शवसा दक्षिणावान् ।
पदानि : श्रिये । ते । पादा । दुवः । आ । मिमिक्षुः । धृष्णुः । वज्री । शवसा । दक्षिणऽवान्
वाक्यम् २: वसानो अत्कं सुरभिं दृशे कं स्वर्ण नृतविषिरो बभूथ ॥
पदानि : वसानः । अत्कम् । सुरभिम् । दृशे । कम् । स्वः । न । नृतो इतिं । इषिरः । बभूथ

१५५. मण्डलम् ६, सूक्तम् २९, मन्त्रः ६ (ऋक्सङ्ख्या : ४६७९)
वाक्यम् १: एवेदिन्द्रः सुहवं ऋष्वो अस्तूती अनूती हिरिशिप्रः सत्वा ।
पदानि : एव । इत् । इन्द्रः । सुऽहवः । ऋष्वः । अस्तु । ऊती । अनूती । हिरिऽशिप्रः । सत्वा
वाक्यम् २: एवा हि जातो असमात्योजाः पुरू च वृत्रा हनति नि दस्यून् ॥
पदानि : एव । हि । जातः । असमातिऽओजाः । पुरु । च । वृत्रा । हनति । नि । दस्यून्

१५६. मण्डलम् ६, सूक्तम् ४४, मन्त्रः ११ (ऋक्सङ्ख्या : ४७५८)
वाक्यम् १: मा जस्वने वृषभ नो ररीथा मा ते रेवतः सख्ये रिषाम ।
पदानि : मा । जस्वने । वृषभ । नः । ररीथाः । मा । ते । रेवतः । सख्ये । रिषाम
वाक्यम् २: पूर्वीष्ट इन्द्र निष्षिधो जनेषु जह्यसुष्वीन्प्र वृहापृणतः ॥
पदानि : पूर्वीः । ते । इन्द्र । निः ऽसिधः । जनेषु । जहि । असुस्वीन् । प्र । वृह । अपृणतः

१५७. मण्डलम् ६, सूक्तम् ४७, मन्त्रः २९ (ऋक्सङ्ख्या : ४८४७)
वाक्यम् १: उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् ।
पदानि : उप । श्वासय । पृथिवीम् । उत । द्याम् । पुरुऽत्रा । ते । मनुताम् । विऽस्थितम् । जगत्
वाक्यम् २: स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अप सेध शत्रून् ॥
पदानि : सः । दुन्दुभे । सऽजूः । इन्द्रेण । देवैः । दूरात् । दवीयः । अप । सेध । शत्रून्

१५८. मण्डलम् ६, सूक्तम् ६३, मन्त्रः १ (ऋक्सङ्ख्या : ५०२७)
वाक्यम् १: क्र१ त्या वल्गू पुरुहूताद्य दूतो न स्तोमोऽविदन्नमस्वान् ।
पदानि : क्र । त्या । वल्गू इति । पुरुऽहूता । अद्य । दूतः । न । स्तोमः । अविदत् । नमस्वान्
वाक्यम् २: आ यो अर्वाङ्नासत्या ववर्त प्रेष्ठा ह्यसथो अस्य मन्मन् ॥
पदानि : आ । यः । अर्वाक् । नासत्या । ववर्त । प्रेष्ठा । हि । असथः । अस्य । मन्मन्

१५९. मण्डलम् ६, सूक्तम् ६६, मन्त्रः ४ (ऋक्सङ्ख्या : ५०५३)
वाक्यम् १: न य ईषन्ते जनुषोऽया न्व१न्तः सन्तोऽवद्यानि पुनानाः ।
पदानि : न । ये । ईषन्ते । जनुषः । अया । नु । अन्तरिति । सन्तः । अवद्यानि । पुनानाः
वाक्यम् २: निर्यद्दुह्रे शुचयोऽनु जोषमनु श्रिया तन्वमुक्षमाणाः ॥
पदानि : निः । यत् । दुह्रे । शुचयः । अनु । जोषम् । अनु । श्रिया । तन्वम् । उक्षमाणाः

१६०. मण्डलम् ६, सूक्तम् ६७, मन्त्रः ४ (ऋक्सङ्ख्या : ५०६४)
वाक्यम् १: अश्वा न या वाजिना पूतबन्धू ऋता यद्गर्भमदितिर्भरध्यै ।
पदानि : अश्वा । न । या । वाजिना । पूतबन्धू इति पूतऽबन्धू । ऋता । यत् । गर्भम् । अदितिः । भरध्यै
वाक्यम् २: प्र या महि महान्ता जायमाना घोरा मर्ताय रिपवे नि दीधः ॥
पदानि : प्र । या । महि । महान्ता । जायमाना । घोरा । मर्ताय । रिपवे । नि । दीधरिति दीधः

१६१. मण्डलम् ६, सूक्तम् ६७, मन्त्रः ६ (ऋक्सङ्ख्या : ५०६६)
वाक्यम् १: ता हि क्षत्रं धारयेथे अनु द्यून्दृंहेथे सानुमुपमादिव द्योः ।
पदानि : ता । हि । क्षत्रम् । धारयेथे इति । अनु । द्यून् । दृंहेथे इति । सानुम् । उपमात् ऽइव । द्योः
वाक्यम् २: दृळ्हो नक्षत्र उत विश्वदेवो भूमिमातान्द्यां धासिनायोः ॥
पदानि : दृळ्हः । नक्षत्रः । उत । विश्वऽदेवः । भूमिम् । आ । अतान् । द्याम् । धासिना । आयोः

१६२. मण्डलम् ६, सूक्तम् ६८, मन्त्रः ९ (ऋक्सङ्ख्या : ५०८०)
वाक्यम् १: प्र सम्राजे बृहते मन्म नु प्रियमर्च देवाय वरुणाय सप्रथः ।
पदानि : प्र । सम्ऽराजे । बृहते । मन्म । नु । प्रियम् । अर्च । देवाय । वरुणाय । सऽप्रथः
वाक्यम् २: अयं य उर्वी महिना महिव्रतः क्रत्वा विभात्यजरो न शोचिषा ॥
पदानि : अयम् । यः । उर्वी इति । महिना । महिऽव्रतः । क्रत्वा । विऽभाति । अजरः । न । शोचिषा

१६३. मण्डलम् ६, सूक्तम् ७५, मन्त्रः १८ (ऋक्सङ्ख्या : ५१३२)
वाक्यम् १: ममाणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानु वस्ताम्।
पदानि : ममाणि। ते। वर्मणा। छादयामि। सोमः। त्वा। राजा। अमृतेन। अनु। वस्ताम्
वाक्यम् २: उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु॥
पदानि : उरोः। वरीयः। वरुणः। ते। कृणोतु। जयन्तम्। त्वा। अनु। देवाः। मदन्तु

१६४. मण्डलम् ७, सूक्तम् १, मन्त्रः २० (ऋक्सङ्ख्या : ५१५३)
वाक्यम् १: नू मे ब्रह्माण्यग्न उच्छशाधि त्वं देव मघवद्भ्यः सुषूदः।
पदानि : नु। मे। ब्रह्माणि। अग्ने। उत्। शशाधि। त्वम्। देव। मघवत्ऽभ्यः। सुसूदः
वाक्यम् २: रातौ स्यामोभयासस आ ते यूयं पात स्वस्तिभिः सदा नः॥
पदानि : रातौ। स्याम। उभयासः। आ। ते। यूयम्। पात। स्वस्तिऽभिः। सदा। नः

१६५. मण्डलम् ७, सूक्तम् १, मन्त्रः २२ (ऋक्सङ्ख्या : ५१५५)
वाक्यम् १: मा नो अग्ने दुर्भृतये सचैषु देवेद्धेष्वग्निषु प्र वोचः।
पदानि : मा। नः। अग्ने। दुःऽभृतये। सचा। एषु। देवऽइद्धेषु। अग्निषु। प्र। वोचः
वाक्यम् २: मा ते अस्मान्दुर्मतयो भूमाज्झितेवस्य सूनो सहसो नशन्त॥
पदानि : मा। ते। अस्मान्। दुःऽमतयः। भूमात्। चित्। देवस्य। सूनो इति। सहसः। नशन्त

१६६. मण्डलम् ७, सूक्तम् १, मन्त्रः २५ (ऋक्सङ्ख्या : ५१५८)
वाक्यम् १: नू मे ब्रह्माण्यग्न उच्छशाधि त्वं देव मघवद्भ्यः सुषूदः।
पदानि : नु। मे। ब्रह्माणि। अग्ने। उत्। शशाधि। त्वम्। देव। मघवत्ऽभ्यः। सुसूदः
वाक्यम् २: रातौ स्यामोभयासस आ ते यूयं पात स्वस्तिभिः सदा नः॥
पदानि : रातौ। स्याम। उभयासः। आ। ते। यूयम्। पात। स्वस्तिऽभिः। सदा। नः

१६७. मण्डलम् ७, सूक्तम् ३, मन्त्रः ७ (ऋक्सङ्ख्या : ५१७६)
वाक्यम् १: यथा वः स्वाहाग्नये दाशेम परीळाभिर्घृतवद्भिश्च हव्यैः।
पदानि : यथा। वः। स्वाहा। अग्नये। दाशेम। परि। इळाभिः। घृतवत्ऽभिः। च। हव्यैः
वाक्यम् २: तेभिर्नो अग्ने अमितैर्महोभिः शतं पूर्भिरायसीभिर्नि पाहि॥
पदानि : तेभिः। नः। अग्ने। अमितैः। महःऽभिः। शतम्। पूःऽभिः। आयसीभिः। नि। पाहि

१६८. मण्डलम् ७, सूक्तम् ४, मन्त्रः ५ (ऋक्सङ्ख्या : ५१८४)
वाक्यम् १: आ यो योनिं देवकृतं ससाद क्रत्वा ह्यग्निरमृताँ अतारीत्।
पदानि : आ। यः। योनिम्। देवऽकृतम्। ससाद। क्रत्वा। हि। अग्निः। अमृतान्। अतारीत्
वाक्यम् २: तमोषधीश्च वनिनश्च गर्भं भूमिश्च विश्वधायसं बिभर्ति॥
पदानि : तम्। ओषधीः। च। वनिनः। च। गर्भम्। भूमिः। च। विश्वऽधायसम्। बिभर्ति

१६९. मण्डलम् ७, सूक्तम् १०, मन्त्रः २ (ऋक्सङ्ख्या : ५२२७)
वाक्यम् १: स्वर्ण वस्तोरुषसामरोचि यज्ञं तन्वाना उशिजो न मन्म।
पदानि : स्वः। न। वस्तोः। उषसाम्। अरोचि। यज्ञम्। तन्वानाः। उशिजः। न। मन्म

वाक्यम् २: अग्निर्जन्मानि देव आ वि विद्वान्द्रवद्दूतो देवयावा वनिष्ठः ॥
पदानि : अग्निः । जन्मानि । देवः । आ । वि । विद्वान् । द्रवत् । दूतः । देवऽयावा । वनिष्ठः

१७०. मण्डलम् ७, सूक्तम् १२, मन्त्रः २ (ऋक्सङ्ख्या : ५२३७)
वाक्यम् १: स मह्ना विश्वा दुरितानि साह्वान्ग्निः ष्टवे दम आ जातवेदाः ।
पदानि : सः । मह्ना । विश्वा । दुःऽइतानि । सह्वान् । अग्निः । स्तवे । दमे । आ । जातऽवेदाः
वाक्यम् २: स नो रक्षिषद्दुरितादवद्यादस्मान्गृणत उत नो मघोनः ॥
पदानि : सः । नः । रक्षिषत् । दुःऽइतात् । अवद्यात् । अस्मान् । गृणतः । उत । नः । मघोनः

१७१. मण्डलम् ७, सूक्तम् १८, मन्त्रः ३ (ऋक्सङ्ख्या : ५२८१)
वाक्यम् १: इमा उ त्वा पस्पृधानासो अत्र मन्द्रा गिरो देवयन्तीरुप स्थुः ।
पदानि : इमाः । ऊँ इति । त्वा । पस्पृधानासः । अत्र । मन्द्राः । गिरः । देवऽयन्तीः । उप । स्थुः
वाक्यम् २: अर्वाचीं ते पथ्या राय एतु स्यामं ते सुमतावि न्द्र शर्मन् ॥
पदानि : अर्वाचीं । ते । पथ्या । रायः । एतु । स्याम । ते । सुऽमतौ । इन्द्र । शर्मन्

१७२. मण्डलम् ७, सूक्तम् १८, मन्त्रः १४ (ऋक्सङ्ख्या : ५२९२)
वाक्यम् १: नि गव्यवोऽनवो द्रुह्यवश्च षष्टिः शता सुषुपुः षट् सहस्रा ।
पदानि : नि । गव्यवः । अनवः । दुह्यवः । च । षष्टिः । शता । सुसुपुः । षट् । सहस्रा
वाक्यम् २: षष्टिर्वीरासो अधि षड्वोयु विश्वेदिन्द्रस्य वीर्या कृतानि ॥
पदानि : षष्टिः । वीरासः । अधि । षट् । दुवः । ऽयु । विश्वा । इत् । इन्द्रस्य । वीर्या । कृतानि

१७३. मण्डलम् ७, सूक्तम् १८, मन्त्रः १७ (ऋक्सङ्ख्या ; ५२९५)
वाक्यम् १: आग्नेयं चित्तद्वेकं चकार सिंह्यं चित्पेत्वेना जघान ।
पदानि : आग्नेयं । चित् । तत् । ऊँ इति । एकम् । चकार । सिंह्यम् । चित् । पेत्वेन । जघान
वाक्यम् २: अवं स्रक्तीर्वेश्यावृश्वदिन्द्रः प्रायच्छद्विश्वा भोजना सुदासे ॥
पदानि : अवं । स्रक्तीः । वेश्या । अवृश्वत् । इन्द्रः । प्र । अयच्छत् । विश्वा । भोजना । सुऽदासे

१७४. मण्डलम् ७, सूक्तम् १९, मन्त्रः ९ (ऋक्सङ्ख्या : ५३१२)
वाक्यम् १: सद्यश्चिन्नु ते मघवन्नभिष्टौ नरः शंसन्त्युक्थशासः उक्था ।
पदानि : सद्यः । चित् । नु । ते । मघऽवन् । अभिष्टौ । नरः । शंसन्ति । उक्थऽशासः । उक्था
वाक्यम् २: ये ते हवेभिर्वि पणीँरदाशन्नस्मान्वृणीष्व युज्याय तस्मै ॥
पदानि : ये । ते । हवेभिः । वि । पणीन् । अदाशन् । अस्मान् । वृणीष्व । युज्याय । तस्मै

१७५. मण्डलम् ७, सूक्तम् २५, मन्त्रः १ (ऋक्सङ्ख्या : ५३५६)
वाक्यम् १: आ ते मह इन्द्रोत्युग्र समन्यवो यत्समरन्त सेनाः ।
पदानि : आ । ते । महः । इन्द्र । ऊती । उग्र । सऽमन्यवः । यत् । सम्ऽअरन्त । सेनाः
वाक्यम् २: पतांति दिद्युन्नर्यस्य बाह्वोर्मा ते मनो विष्वद्य१ग्वि चारीत् ॥
पदानि : पतांति । दिद्युत् । नर्यस्य । बाह्वोः । मा । ते । मनः । विष्वद्यक् । वि । चारीत्

१७६. मण्डलम् ७, सूक्तम् २५, मन्त्रः २ (ऋक्सङ्ख्या : ५३५७)

वाक्यम् १: नि दुर्ग इन्द्र श्नथिह्यमित्रान्नभि ये नो मर्तासो अमन्ति।
पदानि : नि। दुःऽगे। इन्द्र। श्नथिहि। अमित्रान्। अभि। ये। नः। मर्तासः। अमन्ति
वाक्यम् २: आरे तं शंसं कृणुहि निनित्सोरा नो भर संभरणं वसूनाम्॥
पदानि : आरे। तम्। शंसम्। कृणुहि। निनित्सोः। आ। नः। भर। सम्ऽभरणम्। वसूनाम्

१७७. मण्डलम् ७, सूक्तम् २५, मन्त्रः ३ (ऋक्सङ्ख्या : ५३५८)
वाक्यम् १: शतं ते शिप्रिन्नूतयः सुदासे सहस्रं शंसा उत रातिरस्तु।
पदानि : शतम्। ते। शिप्रिन्। ऊतयः। सुऽदासे। सहस्रम्। शंसाः। उत। रातिः। अस्तु
वाक्यम् २: जहि वधर्वनुषो मर्त्यस्यास्मे द्युम्नमधि रत्नं च धेहि॥
पदानि : जहि। वधः। वनुषः। मर्त्यस्य। अस्मे इति। द्युम्नम्। अधि। रत्नम्। च। धेहि

१७८. मण्डलम् ७, सूक्तम् २७, मन्त्रः २ (ऋक्सङ्ख्या : ५३६८)
वाक्यम् १: य इन्द्र शुष्मो मघवन्ते अस्ति शिक्षा सखिभ्यः पुरुहूत नृभ्यः।
पदानि : यः। इन्द्र। शुष्मः। मघऽवन्। ते। अस्ति। शिक्ष। सखिऽभ्यः। पुरुऽहूत। नृऽभ्यः
वाक्यम् २: त्वं हि दृळ्हा मघवन्विचेता अपा वृधि परिवृतं न राधः॥
पदानि : त्वम्। हि। दृळ्हा। मघऽवन्। विऽचेताः। अप। वृधि। परिऽवृतम्। न। राधः

१७९. मण्डलम् ७, सूक्तम् ३०, मन्त्रः ३ (ऋक्सङ्ख्या : ५३८४)
वाक्यम् १: अहा यदिन्द्र सुदिना व्युच्छान्दधो यत्केतुमुपमं समत्सु।
पदानि : अहा। यत्। इन्द्र। सुऽदिना। विऽउच्छान्। दधः। यत्। केतुम्। उपऽमम्। समत्ऽसु
वाक्यम् २: न्यग्निः सीददसुरो न होता हुवानो अत्र सुभगाय देवान्॥
पदानि : नि। अग्निः। सीदत्। असुरः। न। होता। हुवानः। अत्र। सुऽभगाय। देवान्

१८०. मण्डलम् ७, सूक्तम् ४०, मन्त्रः २ (ऋक्सङ्ख्या : ५५१३)
वाक्यम् १: मित्रस्तन्नो वरुणो रोदसी च द्युभक्तमिन्द्रो अर्यमा ददातु।
पदानि : मित्रः। तत्। नः। वरुणः। रोदसी इति। च। द्युऽभक्तम्। इन्द्रः। अर्यमा। ददातु
वाक्यम् २: दिदेष्टु देव्यदितिी रेक्णो वायुश्च यन्नियुवैते भगश्च॥
पदानि : दिदेष्टु। देवी। अदितिः। रेक्णः। वायुः। च। यत्। नियुवैते इति निऽयुवैते। भगः। च

१८१. मण्डलम् ७, सूक्तम् ४०, मन्त्रः ४ (ऋक्सङ्ख्या : ५५१५)
वाक्यम् १: अयं हि नेता वरुण ऋतस्य मित्रो राजानो अर्यमापो धुः।
पदानि : अयम्। हि। नेता। वरुणः। ऋतस्य। मित्रः। राजानः। अर्यमा। अपः। धुरिति धुः
वाक्यम् २: सुहवा देव्यदितिरनर्वा ते नो अंहो अतिं पर्षन्नरिष्टान्॥
पदानि : सुऽहवा। देवी। अदितिः। अनर्वा। ते। नः। अंहः। अतिं। पर्षन्। अरिष्टान्

१८२. मण्डलम् ७, सूक्तम् ५८, मन्त्रः ५ (ऋक्सङ्ख्या : ५६२२)
वाक्यम् १: ताँ आ रुद्रस्य मीळ्हुषो विवासे कुविन्नंसन्ते मरुतः पुनर्नः।
पदानि : तान्। आ। रुद्रस्य। मीळ्हुषः। विवासे। कुवित्। नंसन्ते। मरुतः। पुनः। नः
वाक्यम् २: यत्स्वर्ता जिह्मीळिरे यदाविरव तदेनं ईमहे तुराणाम्॥
पदानि : यत्। स्वर्ता। जिह्मीळिरे। यत्। आविः। अव। तत्। एनः। ईमहे। तुराणाम्

१८३. मण्डलम् ७, सूक्तम् ६०, मन्त्रः २ (ऋक्सङ्ख्या : ५६३७)
वाक्यम् १: एष स्य मित्रावरुणा नृचक्षा उभे उदेति सूर्यो अभि ज्मन्।
पदानि : एषः। स्यः। मित्रावरुणा। नृऽचक्षाः। उभे इति। उत्। एति। सूर्यः। अभि। ज्मन्
वाक्यम् २: विश्वस्य स्थातुर्जगतश्च गोपा ऋजु मर्तेषु वृजिना च पश्यन्॥
पदानि : विश्वस्य। स्थातुः। जगतः। च। गोपाः। ऋजु। मर्तेषु। वृजिना। च। पश्यन्

१८४. मण्डलम् ७, सूक्तम् ६२, मन्त्रः ५ (ऋक्सङ्ख्या : ५६५९)
वाक्यम् १: प्र बाहवा सिसृतं जीवसे नु आ नो गव्यूतिमुक्षतं घृतेन।
पदानि : प्र। बाहवा। सिसृतम्। जीवसे। नुः। आ। नः। गव्यूतिम्। उक्षतम्। घृतेन
वाक्यम् २: आ नो जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा॥
पदानि : आ। नः। जने। श्रवयतम्। युवाना। श्रुतम्। मे। मित्रावरुणा। हवा। इमा

१८५. मण्डलम् ७, सूक्तम् ६७, मन्त्रः ५ (ऋक्सङ्ख्या : ५७००)
वाक्यम् १: प्राचीमु देवाश्विना धियं मेऽमृध्रां सातये कृतं वसूयुम्।
पदानि : प्राचीम्। ऊँ इति। देवा। अश्विना। धियम्। मे। अमृध्राम्। सातये। कृतम्। वसुऽयुम्
वाक्यम् २: विश्वा अविष्टं वाज आ पुरंधीस्ता नः शक्तं शचीपती शचीभिः॥
पदानि : विश्वाः। अविष्टम्। वाजे। आ। पुरम्ऽधीः। ता। नः। शक्तम्। शचीपती इति शचीऽपती। शचीभिः

१८६. मण्डलम् ७, सूक्तम् ७७, मन्त्रः ५ (ऋक्सङ्ख्या : ५७७१)
वाक्यम् १: अस्मे श्रेष्ठेभिर्भानुभिर्वि भाह्युषो देवि प्रतिरन्ती न आयुः।
पदानि : अस्मे इति। श्रेष्ठेभिः। भानुऽभिः। वि। भाहि। उषः। देवि। प्रऽतिरन्ती। नः। आयुः
वाक्यम् २: इषं च नो दधती विश्ववारे गोमदश्वावद्रथवच्च राधः॥
पदानि : इषम्। च। नः। दधती। विश्वऽवारे। गोऽमत्। अश्वऽवत्। रथऽवत्। च। राधः

१८७. मण्डलम् ७, सूक्तम् ७९, मन्त्रः २ (ऋक्सङ्ख्या : ५७७९)
वाक्यम् १: व्यञ्जते दिवो अन्तेष्वक्तून्विशो न युक्ता उषसो यतन्ते।
पदानि : वि। अञ्जते। दिवः। अन्तेषु। अक्तून्। विशः। न। युक्ताः। उषसः। यतन्ते
वाक्यम् २: सं ते गावस्तम आ वर्तयन्ति ज्योतिर्यच्छन्ति सवितेव बाहू॥
पदानि : सम्। ते। गावः। तमः। आ। वर्तयन्ति। ज्योतिः। यच्छन्ति। सविताऽइव। बाहू इति

१८८. मण्डलम् ७, सूक्तम् ८३, मन्त्रः ३ (ऋक्सङ्ख्या : ५८०४)
वाक्यम् १: सं भूम्या अन्ता ध्वसिरा अदृक्षतेन्द्रावरुणा दिवि घोष आरुहत्।
पदानि : सम्। भूम्याः। अन्ताः। ध्वसिराः। अदृक्षत। इन्द्रावरुणा। दिवि। घोषः। आ। अरुहत्
वाक्यम् २: अस्थुर्जनानामुप मामरातयोऽर्वागवसा हवनश्रुता गतम्॥
पदानि : अस्थुः। जनानाम्। उप। माम्। अरातयः। अर्वाक्। अवसा। हवनऽश्रुता। आ। गतम्

१८९. मण्डलम् ७, सूक्तम् ८६, मन्त्रः ५ (ऋक्सङ्ख्या : ५८२६)
वाक्यम् १: अव द्रुग्धानि पित्र्या सृजा नोऽव या वयं चकृमा तनूभिः।
पदानि : अव। द्रुग्धानि। पित्र्या। सृज। नः। अव। या। वयम्। चकृम। तनूभिः
वाक्यम् २: अव राजन्पशुतृपं न तायुं सृजा वत्सं न दाम्नो वसिष्ठम्॥

पदानि : अवं । राजन् । पशुऽतृपंम् । न । तायुम् । सृज । वत्सम् । न । दाम्नः । वसिंष्ठम्

१९०. मण्डलम् ७, सूक्तम् ८८, मन्त्रः ४ (ऋक्सङ्ख्या : ५८४०)
वाक्यम् १: वसिंष्ठं ह वरुणो नाव्याधाद्दृषिं चकार स्वपा महोंभिः ।
पदानि : वसिंष्ठम् । ह । वरुणः । नावि । आ । अधात् । ऋषिंम् । चकार । सुऽअपाः । महःऽभिः
वाक्यम् २: स्तोतारं विप्रः सुदिनत्वे अह्नां यान्नु द्यावस्ततनन्यादुषासः ॥
पदानि : स्तोतारंम् । विप्रः । सुदिनऽत्वे । अह्नाम् । यात् । नु । द्यावः । ततनन् । यात् । उषसः

१९१. मण्डलम् ७, सूक्तम् ९३, मन्त्रः ६ (ऋक्सङ्ख्या : ५८७३)
वाक्यम् १: इमामु षु सोमंसुतिमुपं नु एन्द्राग्नी सौमनसायं यातम् ।
पदानि : इमाम् । ऊँ इतिं । सु । सोमंऽसुतिम् । उपं । नः । आ । इन्द्राग्नी इतिं । सौमनसायं । यातम्
वाक्यम् २: नू चिद्धि पंरिमम्राथे अस्माना वां शश्वद्भिर्वृतीय वाजैः ॥
पदानि : नु । चित् । हि । परिमम्राथे इतिं परिऽमम्राथे । अस्मान् । आ । वाम् । शश्वत्ऽभिः । ववृतीय । वाजैः

१९२. मण्डलम् ७, सूक्तम् ९७, मन्त्रः ४ (ऋक्सङ्ख्या : ५९०३)
वाक्यम् १: स आ नो योनिं सदतु प्रेष्ठो बृहस्पतिर्विश्ववारो यो अस्तिं ।
पदानि : सः । आ । नः । योनिंम् । सदतु । प्रेष्ठः । बृहस्पतिः । विश्वऽवारः । यः । अस्तिं
वाक्यम् २: कामो रायः सुवीर्यस्य तं दात्पर्षन्नो अतिं सश्चतो अरिंष्टान् ॥
पदानि : कामः । रायः । सुऽवीर्यस्य । तम् । दात् । पर्षत् । नः । अतिं । सश्चतः । अरिंष्टान्

१९३. मण्डलम् ७, सूक्तम् ९८, मन्त्रः २ (ऋक्सङ्ख्या : ५९११)
वाक्यम् १: यद्दधिषे प्रदिवि चार्वन्नं दिवेदिवे पीतिमिदस्य वक्षि ।
पदानि : यत् । दधिषे । प्रऽदिविं । चारु । अन्नम् । दिवेऽदिवे । पीतिम् । इत् । अस्य । वक्षि
वाक्यम् २: उत हृदोत मनसा जुषाण उशन्निन्द्र प्रस्थितान्पाहि सोमान् ॥
पदानि : उत । हृदा । उत । मनसा । जुषाणः । उशन् । इन्द्र । प्रऽस्थितान् । पाहि । सोमान्

१९४. मण्डलम् ७, सूक्तम् ९८, मन्त्रः ५ (ऋक्सङ्ख्या : ५९१४)
वाक्यम् १: प्रेन्द्रस्य वोचं प्रथमा कृतानि प्र नूतना मघवा या चकारं ।
पदानि : प्र । इन्द्रस्य । वोचम् । प्रथमा । कृतानिं । प्र । नूतना । मघऽवा । या । चकारं
वाक्यम् २: यदेददेवीरसहिष्ट माया अथाभवत्केवलः सोमो अस्य ॥
पदानि : यदा । इत् । अदेवीः । असहिष्ट । मायाः । अथं । अभवत् । केवलः । सोमः । अस्य

१९५. मण्डलम् ८, सूक्तम् १९, मन्त्रः १८ (ऋक्सङ्ख्या : ६४३९)
वाक्यम् १: त इद्वेदिं सुभग त आहुतिं ते सोतुं चक्रिरे दिवि ।
पदानि : ते । इत् । वेदिंम् । सुऽभग । ते । आऽहुंतिम् । ते । सोतुंम् । चक्रिरे । दिवि
वाक्यम् २: त इद्वाजेभिर्जिग्युर्महद्धनं ये त्वे कामं न्येरिरे ॥
पदानि : ते । इत् । वाजेभिः । जिग्युः । महत् । धनम् । ये । त्वे इतिं । कामंम् । निऽएरिरे

१९६. मण्डलम् ८, सूक्तम् ४८, मन्त्रः १५ (ऋक्सङ्ख्या : ७०१२)
वाक्यम् १: त्वं नः सोम विश्वतो वयोधास्त्वं स्वर्विदा विशा नृचक्षाः ।

पदानि : त्वम्। नः। सोम। विश्वतः। वयःऽधाः। त्वम्। स्वःऽवित्। आ। विश। नृऽचक्षाः
वाक्यम् २: त्वं न इन्द ऊतिभिः सजोषाः पाहि पश्चातादुत वा पुरस्तात्॥
पदानि : त्वम्। नः। इन्दो इति। ऊतिऽभिः। सऽजोषाः। पाहि। पश्चातात्। उत। वा। पुरस्तात्

१९७. मण्डलम् ८, सूक्तम् ५३, मन्त्रः ८ (ऋक्सङ्ख्या : ७०६०)
वाक्यम् १: अहं हि ते हरिवो ब्रह्म वाजयुराजिं यामि सदोतिभिः।
पदानि : अहम्। हि। ते। हरिऽवः। ब्रह्म। वाजऽयुः। आजिम्। यामि। सदा। ऊतिऽभिः
वाक्यम् २: त्वामिदेव तममे समश्वयुर्गव्युरग्रे मथीनाम्॥
पदानि : त्वाम्। इत्। एव। तम्। अमे। सम्। अश्वऽयुः। गव्युः। अग्रे। मथीनाम्

१९८. मण्डलम् ८, सूक्तम् १००, मन्त्रः ५ (ऋक्सङ्ख्या : ७६३१)
वाक्यम् १: आ यन्मा वेना अरुहन्नृतस्यँ एकमासीनं हर्यतस्य पृष्ठे।
पदानि : आ। यत्। मा। वेनाः। अरुहन्। ऋतस्य। एकम्। आसीनम्। हर्यतस्य। पृष्ठे
वाक्यम् २: मनश्चिन्मे हृद आ प्रत्यवोचदचिक्रदज्छिशुमन्तः सखायः॥
पदानि : मनः। चित्। मे। हृदे। आ। प्रति। अवोचत्। अचिक्रदन्। शिशुऽमन्तः। सखायः

१९९. मण्डलम् ९, सूक्तम् ६८, मन्त्रः ४ (ऋक्सङ्ख्या : ८३०४)
वाक्यम् १: स मातरा विचरन्वाजयन्नपः प्र मेधिरः स्वधया पिन्वते पदम्।
पदानि : सः। मातरा। विऽचरन्। वाजयन्। अपः। प्र। मेधिरः। स्वधया। पिन्वते। पदम्
वाक्यम् २: अंशुर्यवेन पिपिशे यतो नृभिः सं जामिभिर्नसते रक्षते शिरः॥
पदानि : अंशुः। यवेन। पिपिशे। यतः। नृऽभिः। सम्। जामिऽभिः। नसते। रक्षते। शिरः

२००. मण्डलम् ९, सूक्तम् ६८, मन्त्रः ७ (ऋक्सङ्ख्या : ८३०७)
वाक्यम् १: त्वां मृजन्ति दश योषणः सुतं सोम ऋषिभिर्मतिभिर्धीतिभिर्हितम्।
पदानि : त्वाम्। मृजन्ति। दश। योषणः। सुतम्। सोम। ऋषिऽभिः। मतिऽभिः। धीतिऽभिः। हितम्
वाक्यम् २: अव्यो वारेभिरुत देवहूतिभिर्नृभिर्यतो वाजमा दर्षि सातये॥
पदानि : अव्यः। वारेभिः। उत। देवहूतिऽभिः। नृऽभिः। यतः। वाजम्। आ। दर्षि। सातये

२०१. मण्डलम् ९, सूक्तम् ६८, मन्त्रः ९ (ऋक्सङ्ख्या : ८३०९)
वाक्यम् १: अयं दिव इयर्ति विश्वमा रजः सोमः पुनानः कलशेषु सीदति।
पदानि : अयम्। दिवः। इयर्ति। विश्वम्। आ। रजः। सोमः। पुनानः। कलशेषु। सीदति
वाक्यम् २: अद्भिर्गोभिर्मृज्यते अद्रिभिः सुतः पुनान इन्दुर्वरिवो विदत्प्रियम्॥
पदानि : अत्ऽभिः। गोभिः। मृज्यते। अद्रिऽभिः। सुतः। पुनानः। इन्दुः। वरिवः। विदत्। प्रियम्

२०२. मण्डलम् ९, सूक्तम् ६९, मन्त्रः ३ (ऋक्सङ्ख्या : ८३१३)
वाक्यम् १: अव्ये वधूयुः पवते परि त्वचि श्रथ्नीते नप्तीरदितेर्ऋतं यते।
पदानि : अव्ये। वधूऽयुः। पवते। परि। त्वचि। श्रथ्नीते। नप्तीः। अदितेः। ऋतम्। यते
वाक्यम् २: हरिरक्रान्यजतः संयतो मदो नृम्णा शिशानो महिषो न शोभते॥
पदानि : हरिः। अक्रान्। यजतः। सम्ऽयतः। मदः। नृम्णा। शिशानः। महिषः। न। शोभते

२०३. मण्डलम् ९, सूक्तम् ७२, मन्त्रः ३ (ऋक्सङ्ख्या : ८३४२)
वाक्यम् १: अरंममाणो अत्येति गा अभि सूर्यस्य प्रियं दुहितुस्तिरो रवम्।
पदानि : अरंममाणः। अति। एति। गाः। अभि। सूर्यस्य। प्रियम्। दुहितुः। तिरः। रवम्
वाक्यम् २: अन्वस्मै जोषमभरद्विनंगृसः सं द्वयीभिः स्वसृभिः क्षेति जामिभिः॥
पदानि : अनु। अस्मै। जोषम्। अभरत्। विनम्ऽगृसः। सम्। द्वयीभिः। स्वसृऽभिः। क्षेति। जामिऽभिः

२०४. मण्डलम् ९, सूक्तम् ७३, मन्त्रः १ (ऋक्सङ्ख्या : ८३४९)
वाक्यम् १: स्रक्के द्रप्सस्य धमतः समस्वरन्नृतस्य योना समरन्त नाभयः।
पदानि : स्रक्के। द्रप्सस्य। धमतः। सम्। अस्वरन्। ऋतस्य। योना। सम्। अरन्त। नाभयः
वाक्यम् २: त्रीन्स मूर्ध्नो असुरश्चक्र आरभे सत्यस्य नावः सुकृतमपीपरन्॥
पदानि : त्रीन्। सः। मूर्ध्नः। असुरः। चक्रे। आऽरभे। सत्यस्य। नावः। सुऽकृतम्। अपीपरन्

२०५. मण्डलम् ९, सूक्तम् ७३, मन्त्रः ३ (ऋक्सङ्ख्या : ८३५१)
वाक्यम् १: पवित्रंवन्तः परि वाचमासते पितैषां प्रत्नो अभि रक्षति व्रतम्।
पदानि : पवित्रंऽवन्तः। परि। वाचम्। आसते। पिता। एषाम्। प्रत्नः। अभि। रक्षति। व्रतम्
वाक्यम् २: महः समुद्रं वरुणस्तिरो दधे धीरा इच्छेकुर्धरुणेष्वारभम्॥
पदानि : महः। समुद्रम्। वरुणः। तिरः। दधे। धीराः। इत्। शेकुः। धरुणेषु। आऽरभम्

२०६. मण्डलम् ९, सूक्तम् ७५, मन्त्रः ५ (ऋक्सङ्ख्या : ८३७१)
वाक्यम् १: परि सोम प्र धन्वा स्वस्तये नृभिः पुनानो अभि वासयाशिरम्।
पदानि : परि। सोम। प्र। धन्व। स्वस्तये। नृऽभिः। पुनानः। अभि। वासय। आऽशिरम्
वाक्यम् २: ये ते मदा आहनसो विहायसस्तेभिरिन्द्रं चोदय दातवे मघम्॥
पदानि : ये। ते। मदाः। आहनसः। विऽहायसः। तेभिः। इन्द्रम्। चोदय। दातवे। मघम्

२०७. मण्डलम् ९, सूक्तम् ७८, मन्त्रः १ (ऋक्सङ्ख्या : ८३८२)
वाक्यम् १: प्र राजा वाचं जनयन्नसिष्यदद्रपो वसानो अभि गा इयक्षति।
पदानि : प्र। राजा। वाचम्। जनयन्। असिस्यदत्। अपः। वसानः। अभि। गाः। इयक्षति
वाक्यम् २: गृभ्णाति रिप्रमविरस्य तान्वा शुद्धो देवानामुप याति निष्कृतम्॥
पदानि : गृभ्णाति। रिप्रम्। अविः। अस्य। तान्वा। शुद्धः। देवानाम्। उप। याति। निःऽकृतम्

२०८. मण्डलम् ९, सूक्तम् ७८, मन्त्रः २ (ऋक्सङ्ख्या : ८३८३)
वाक्यम् १: इन्द्राय सोम परि षिच्यसे नृभिर्नृचक्षा ऊर्मिः कविरज्यसे वने।
पदानि : इन्द्राय। सोम। परि। सिच्यसे। नृऽभिः। नृऽचक्षाः। ऊर्मिः। कविः। अज्यसे। वने
वाक्यम् २: पूर्वीर्हि ते स्रुतयः सन्ति यातवे सहस्रमश्वा हरयश्चमूषदः॥
पदानि : पूर्वीः। हि। ते। स्रुतयः। सन्ति। यातवे। सहस्रम्। अश्वाः। हरयः। चमूऽसदः

२०९. मण्डलम् ९, सूक्तम् ८१, मन्त्रः २ (ऋक्सङ्ख्या : ८३९८)
वाक्यम् १: अच्छा हि सोमः कलशाँ असिष्यददत्यो न वोळ्हा रघुवर्तनिर्वृषा।
पदानि : अच्छ। हि। सोमः। कलशान्। असिस्यदत्। अत्यः। न। वोळ्हा। रघुऽवर्तनिः। वृषा
वाक्यम् २: अथा देवानामुभयस्य जन्मनो विद्वाँ अश्नोत्यमुत इतश्च यत्॥
पदानि : अथ। देवानाम्। उभयस्य। जन्मनः। विद्वान्। अश्नोति। अमुतः। इतः। च। यत्

२१०. मण्डलम् ९, सूक्तम् ८२, मन्त्रः १ (ऋक्सङ्ख्या : ८४०२)
वाक्यम् १: असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत्।
पदानि : असावि। सोमः। अरुषः। वृषा। हरिः। राजाऽइव। दस्मः। अभि। गाः। अचिक्रदत्
वाक्यम् २: पुनानो वारं पर्येत्यव्ययं श्येनो न योनिं घृतवन्तमासदम्॥
पदानि : पुनानः। वारम्। परि। एति। अव्ययम्। श्येनः। न। योनिम्। घृतऽवन्तम्। आऽसदम्

२११. मण्डलम् ९, सूक्तम् ८२, मन्त्रः ४ (ऋक्सङ्ख्या : ८४०५)
वाक्यम् १: जायेव पत्यावधि शेवं मंहसे पज्रायां गर्भ शृणुहि ब्रवीमि ते।
पदानि : जायाऽइव। पत्यौ। अधि। शेवं। मंहसे। पज्रायाः। गर्भ। शृणुहि। ब्रवीमि। ते
वाक्यम् २: अन्तर्वाणीषु प्र चरा सु जीवसेऽनिन्द्यो वृजने सोम जागृहि॥
पदानि : अन्तः। वाणीषु। प्र। चर। सु। जीवसे। अनिन्द्यः। वृजने। सोम। जागृहि

२१२. मण्डलम् ९, सूक्तम् ८४, मन्त्रः ३ (ऋक्सङ्ख्या : ८४१४)
वाक्यम् १: आ यो गोभिः सृज्यत ओषधीष्वा देवानां सुम्न इषयन्नुपावसुः।
पदानि : आ। यः। गोभिः। सृज्यते। ओषधीषु। आ। देवानाम्। सुम्ने। इषयन्। उपऽवसुः
वाक्यम् २: आ विद्युतां पवते धारया सुत इन्द्रं सोमो मादयन्दैव्यं जनम्॥
पदानि : आ। विऽद्युताम्। पवते। धारया। सुतः। इन्द्रम्। सोमः। मादयन्। दैव्यम्। जनम्

२१३. मण्डलम् ९, सूक्तम् ८६, मन्त्रः ८ (ऋक्सङ्ख्या : ८४३६)
वाक्यम् १: राजा समुद्रं नद्यो३ वि गाहतेऽपामूर्मिं सचते सिन्धुषु श्रितः।
पदानि : राजा। समुद्रम्। नद्यः। वि। गाहते। अपाम्। ऊर्मिम्। सचते। सिन्धुषु। श्रितः
वाक्यम् २: अध्यस्थात्सानु पवमानो अव्ययं नाभा पृथिव्या धरुणो महो दिवः॥
पदानि : अधि। अस्थात्। सानु। पवमानः। अव्ययम्। नाभा। पृथिव्याः। धरुणः। महः। दिवः

२१४. मण्डलम् ९, सूक्तम् ८६, मन्त्रः १८ (ऋक्सङ्ख्या : ८४४६)
वाक्यम् १: आ नः सोम संयतं पिप्युषीमिषमिन्दो पवस्व पवमानो अस्मिधम्।
पदानि : आ। नः। सोम। सम्ऽयतम्। पिप्युषीम्। इषम्। इन्दो इति। पवस्व। पवमानः। अस्मिधम्
वाक्यम् २: या नो दोहते त्रिरह्नसंश्चुषी क्षुमद्वाजवन्मधुमत्सुवीर्यम्॥
पदानि : या। नः। दोहते। त्रिः। अह्न्। असश्चुषी। क्षुऽमत्। वाजऽवत्। मधुऽमत्। सुऽवीर्यम्

२१५. मण्डलम् ९, सूक्तम् ८६, मन्त्रः २१ (ऋक्सङ्ख्या : ८४४९)
वाक्यम् १: अयं पुनान उषसो वि रोचयदयं सिन्धुभ्यो अभवदु लोककृत्।
पदानि : अयम्। पुनानः। उषसः। वि। रोचयत्। अयम्। सिन्धुऽभ्यः। अभवत्। ऊँ इति। लोकऽकृत्
वाक्यम् २: अयं त्रिः सप्त दुदुहान आशिरं सोमो हृदे पवते चारु मत्सरः॥
पदानि : अयम्। त्रिः। सप्त। दुदुहानः। आऽशिरम्। सोमः। हृदे। पवते। चारु। मत्सरः

२१६. मण्डलम् ९, सूक्तम् ८६, मन्त्रः ४७ (ऋक्सङ्ख्या : ८४७५)
वाक्यम् १: प्र ते धारा अत्यण्वानि मेष्यः पुनानस्य संयतो यन्ति रंहयः।
पदानि : प्र। ते। धाराः। अति। अण्वानि। मेष्यः। पुनानस्य। सम्ऽयतः। यन्ति। रंहयः

वाक्यम् २: यद्गोभिरिन्दो चम्वोः समज्यस आ सुवानः सोम कलशेषु सीदसि ॥
पदानि : यत्। गोभिः। इन्दो इति। चम्वोः। सम्ऽअज्यसे। आ। सुवानः। सोम। कलशेषु। सीदसि

२१७. मण्डलम् ९, सूक्तम् ८९, मन्त्रः १ (ऋक्सङ्ख्या : ८४९४)
वाक्यम् १: प्रो स्य वह्निः पथ्याभिरस्यान्दिवो न वृष्टिः पवमानो अक्षाः।
पदानि : प्रो इति। स्यः। वह्निः। पथ्याभिः। अस्यान्। दिवः। न। वृष्टिः। पवमानः। अक्षारिति
वाक्यम् २: सहस्रधारो असदन्न्य१स्मे मातुरुपस्थे वन आ च सोमः ॥
पदानि : सहस्रऽधारः। असदत्। नि। अस्मे इति। मातुः। उपऽस्थे। वने। आ। च। सोमः

२१८. मण्डलम् ९, सूक्तम् ९०, मन्त्रः ५ (ऋक्सङ्ख्या : ८५०५)
वाक्यम् १: मत्सि सोम वरुणं मत्सि मित्रं मत्सीन्द्रमिन्दो पवमान विष्णुम्।
पदानि : मत्सि। सोम। वरुणम्। मत्सि। मित्रम्। मत्सि। इन्द्रम्। इन्दो इति। पवमान। विष्णुम्
वाक्यम् २: मत्सि शर्धो मारुतं मत्सि देवान्मत्सि महामिन्द्रमिन्दो मदाय ॥
पदानि : मत्सि। शर्धः। मारुतम्। मत्सि। देवान्। मत्सि। महाम्। इन्द्रम्। इन्दो इति। मदाय

२१९. मण्डलम् ९, सूक्तम् ९६, मन्त्रः ७ (ऋक्सङ्ख्या : ८५४०)
वाक्यम् १: प्रावीविपद्वाच ऊर्मिं न सिन्धुर्गिरः सोमः पवमानो मनीषाः।
पदानि : प्र। अवीविपत्। वाचः। ऊर्मिम्। न। सिन्धुः। गिरः। सोमः। पवमानः। मनीषाः
वाक्यम् २: अन्तः पश्यन्वृजनेमावराण्या तिष्ठति वृषभो गोषु जानन् ॥
पदानि : अन्तरिति। पश्यन्। वृजना। इमा। अवराणि। आ। तिष्ठति। वृषभः। गोषु। जानन्

२२०. मण्डलम् ९, सूक्तम् ९६, मन्त्रः ११ (ऋक्सङ्ख्या : ८५४४)
वाक्यम् १: त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः।
पदानि : त्वया। हि। नः। पितरः। सोम। पूर्वे। कर्माणि। चक्रुः। पवमान। धीराः
वाक्यम् २: वन्वन्नवातः परिधीँरपोर्णु वीरेभिरश्वैर्मघवा भवा नः ॥
पदानि : वन्वन्। अवातः। परिऽधीन्। अप। ऊर्णु। वीरेभिः। अश्वैः। मघऽवा। भव। नः

२२१. मण्डलम् ९, सूक्तम् ९६, मन्त्रः २२ (ऋक्सङ्ख्या : ८५५५)
वाक्यम् १: प्रास्य धारा बृहतीरसृग्रन्नक्तो गोभिः कलशाँ आ विवेश।
पदानि : प्र। अस्य। धाराः। बृहतीः। असृग्रन्। अक्तः। गोभिः। कलशान्। आ। विवेश
वाक्यम् २: सामं कृण्वन्त्सामन्यो विपश्चित्क्रन्दन्नेत्यभि सख्युर्न जामिम् ॥
पदानि : सामं। कृण्वन्। सामन्यः। विपःऽचित्। क्रन्दन्। एति। अभि। सख्युः। न। जामिम्

२२२. मण्डलम् ९, सूक्तम् ९७, मन्त्रः ५४ (ऋक्सङ्ख्या : ८६११)
वाक्यम् १: महीमे अस्य वृषनाम शूषे माँश्चत्वे वा पृशने वा वधत्रे।
पदानि : महिं। इमे इति। अस्य। वृषनामं। शूषे इति। माँश्चत्वे। वा। पृशने। वा। वधत्रे इति
वाक्यम् २: अस्वापयन्निगुतः स्नेहयद्वापामित्राँ अपाचितो अचेतः ॥
पदानि : अस्वापयत्। निऽगुतः। स्नेहयत्। च। अप। अमित्रान्। अप। अचितः। अच। इतः

२२३. मण्डलम् १०, सूक्तम् १, मन्त्रः ३ (ऋक्सङ्ख्या : ८८०१)

वाक्यम् १: विष्णु॑रि॒त्था प॑र॒मम॑स्य वि॒द्वाञ्जा॒तो बृ॑ह॒न्नभि पा॑ति तृ॒तीय॑म्।
पदानि : विष्णुः। इ॒त्था। प॒र॒मम्। अ॒स्य॒। वि॒द्वान्। जा॒तः। बृ॒ह॒न्। अ॒भि। पा॒ति॒। तृ॒तीय॑म्
वाक्यम् २: आ॒सा यद॑स्य॒ पयो॒ अक्र॑त॒ स्वं सचेतसो अ॒भ्यर्च॑न्त्य॒त्र॥
पदानि : आ॒सा। यत्। अ॒स्य॒। पयः। अक्र॑त। स्वम्। सऽचेतसः। अ॒भि। अ॒र्च॒न्ति॒। अत्र॑

२२४. मण्डलम् १०, सूक्तम् ५, मन्त्रः ७ (ऋक्सङ्ख्या : ८८३३)
वाक्यम् १: अस॑च्च॒ सच्च॑ पर॒मे व्यो॑म॒न्दक्ष॑स्य॒ जन्म॒न्नदि॑तेरु॒पस्थे॑।
पदानि : अस॑त्। च॒। सत्। च॒। प॒र॒मे। विऽओ॑मन्। दक्ष॑स्य। जन्म॑न्। अदि॑तेः। उ॒पऽस्थे॑
वाक्यम् २: अ॒ग्निर्ह नः प्रथ॒मजा ऋ॒तस्य॒ पूर्व॒ आयु॑नि वृ॒षभश्च॑ धे॒नुः॥
पदानि : अ॒ग्निः। ह॒। नः॒। प्र॒थ॒मऽजाः। ऋ॒तस्य॑। पूर्वे॑। आयु॑नि। वृ॒ष॒भः। च॒। धे॒नुः

२२५. मण्डलम् १०, सूक्तम् ११, मन्त्रः ३ (ऋक्सङ्ख्या : ८८८२)
वाक्यम् १: सो चि॒न्नु भ॒द्रा क्षु॒मती॒ यश॑स्वत्यु॒षा उ॑वास॒ मन॑वे॒ स्व॑र्वती।
पदानि : सो इति॑। चि॒त्। नु। भ॒द्रा। क्षु॒ऽमती॑। यश॑स्वति। उ॒षाः। उ॒वा॒स॒। मन॑वे। स्वः॑ऽवती
वाक्यम् २: यदी॑मु॒शन्त॑मु॒शता॑मनु॒ क्रतु॑म॒ग्निं होता॑रं वि॒दथा॑य॒ जीज॑नन्॥
पदानि : यत्। ई॒म्। उ॒शन्त॑म्। उ॒श॒ताम्। अनु॑। क्रतु॑म्। अ॒ग्निम्। होता॑रम्। वि॒दथा॑य। जीज॑नन्

२२६. मण्डलम् १०, सूक्तम् १४, मन्त्रः २ (ऋक्सङ्ख्या : ८९०४)
वाक्यम् १: य॒मो नो॑ गा॒तुं प्र॑थ॒मो वि॑वेद॒ नैषा गव्यू॑ति॒रप॑भर्त॒वा उ॑।
पदानि : य॒मः। नः॒। गा॒तुम्। प्र॒थ॒मः। वि॒वे॒द॒। न। ए॒षा। गव्यू॑तिः। अप॑ऽभर्त॒वै। ऊँ॒ इति॑
वाक्यम् २: यत्रा॑ नः॒ पूर्वे॑ पि॒तरः॑ परे॒युरे॒ना ज॑ज्ञा॒नाः प॒थ्या॒३॒॑ अनु॒ स्वाः॥
पदानि : यत्र॑। नः॒। पूर्वे॑। पि॒तरः॑। प॒रा॒ऽई॒युः। ए॒ना। ज॒ज्ञा॒नाः। प॒थ्याः॑। अनु॑। स्वाः

२२७. मण्डलम् १०, सूक्तम् १५, मन्त्रः २ (ऋक्सङ्ख्या : ८९२०)
वाक्यम् १: इ॒दं पि॒तृभ्यो॒ नमो॑ अस्त्व॒द्य ये पूर्वा॑सो॒ य उप॑रास॒ ई॒युः।
पदानि : इ॒दम्। पि॒तृऽभ्यः॑। नमः॑। अ॒स्तु॒। अ॒द्य। ये। पूर्वा॑सः। ये। उप॑रासः। ई॒युः
वाक्यम् २: ये पार्थि॑वे॒ रज॑स्या निष॑त्ता॒ ये वा॑ नू॒नं सु॑वृ॒जना॑सु वि॒क्षु॥
पदानि : ये। पार्थि॑वे। रज॑सि। आ। निऽस॑त्ताः। ये। वा॒। नू॒नम्। सु॒ऽवृ॒जना॑सु। वि॒क्षु

२२८. मण्डलम् १०, सूक्तम् १६, मन्त्रः ६ (ऋक्सङ्ख्या : ८९३८)
वाक्यम् १: यत्ते॑ कृ॒ष्णः श॑कु॒न आ॑तु॒तोद॑ पिपी॒लः स॒र्प उ॒त वा॒ श्वाप॑दः।
पदानि : यत्। ते॒। कृ॒ष्णः। श॒कु॒नः। आ॒ऽतु॒तोद॑। पि॒पी॒लः। स॒र्पः। उ॒त। वा॒। श्वाप॑दः
वाक्यम् २: अ॒ग्निष्टद्वि॒श्वाद॑ग॒दं कृ॑णोतु॒ सोम॑श्च॒ यो ब्रा॑ह्म॒णाँ आ॑वि॒वेश॑॥
पदानि : अ॒ग्निः। तत्। वि॒श्वऽअ॑त्। अ॒ग॒दम्। कृ॒णो॒तु॒। सोमः॑। च॒। यः। ब्रा॒ह्म॒णान्। आ॒ऽवि॒वेश॑

२२९. मण्डलम् १०, सूक्तम् २७, मन्त्रः १५ (ऋक्सङ्ख्या : ९०६३)
वाक्यम् १: स॒प्त वी॒रासो॑ अध॒रादु॑दा॒यन्न॒ष्टोत्त॒रात्ता॒त्सम॑जग्मिर॒न्ते।
पदानि : स॒प्त। वी॒रासः॑। अ॒ध॒रात्। उत्। आ॒य॒न्। अ॒ष्ट। उ॒त्ऽत॒रात्ता॑त्। सम्। अ॒ज॒ग्मि॒र॒न्। ते
वाक्यम् २: नव॑ प॒श्चाता॑त्स्थि॒विम॑न्त॑ आय॒न्दश॒ प्राक्सानु॒ वि ति॑र॒न्त्यश्नः॥
पदानि : नव॑। प॒श्चाता॑त्। स्थि॒विऽम॑न्तः। आ॒य॒न्। दश॑। प्राक्। सानु॑। वि। ति॒र॒न्ति॒। अश्नः॑

२३०. मण्डलम् १०, सूक्तम् २९, मन्त्रः ७ (ऋक्सङ्ख्या : ९०९१)
वाक्यम् १: आ मध्वो॑ अस्मा असिच॒न्नम॑त्र॒मिन्द्रा॑य पू॒र्णं स हि स॒त्यरा॑धाः ।
पदानि : आ । मध्वः॑ । अ॒स्मै॒ । अ॒सि॒च॒न् । अम॑त्रम् । इन्द्रा॑य । पू॒र्णम् । सः । हि । स॒त्यऽरा॑धाः
वाक्यम् २: स वा॑वृधे॒ वरि॑म॒न्ना पृ॑थि॒व्या अ॒भि क्रत्वा॒ नर्यः॒ पौंस्यै॑श्च ॥
पदानि : सः । व॒वृ॒धे॒ । वरि॑मन् । आ । पृ॒थि॒व्याः । अ॒भि । क्रत्वा॑ । नर्यः॑ । पौंस्यैः॑ । च॒

२३१. मण्डलम् १०, सूक्तम् २९, मन्त्रः ८ (ऋक्सङ्ख्या : ९०९२)
वाक्यम् १: व्या॑न॒ळिन्द्रः॒ पृत॑नाः॒ स्वोजा॒ आस्मै॒ यत॑न्ते स॒ख्याय॑ पू॒र्वीः ।
पदानि : वि । आ॒न॒ट् । इन्द्रः॑ । पृत॑नाः । सु॒ऽओजाः॑ । आ । अ॒स्मै॒ । य॒त॒न्ते॒ । स॒ख्याय॑ । पू॒र्वीः
वाक्यम् २: आ स्मा॒ रथं॒ न पृत॑नासु तिष्ठ॒ यं भ॒द्रया॑ सु॒म॒त्या चो॒दया॑से ॥
पदानि : आ । स्म॒ । रथ॑म् । न । पृत॑नासु । ति॒ष्ठ॒ । यम् । भ॒द्रया॑ । सु॒ऽम॒त्या । चो॒दया॑से

२३२. मण्डलम् १०, सूक्तम् ३१, मन्त्रः ५ (ऋक्सङ्ख्या : ९११२)
वाक्यम् १: इ॒यं सा भू॑या उ॒षसा॑मिव॒ क्षा यद्ध॑ क्षु॒मन्तः॒ शव॑सा स॒माय॑न् ।
पदानि : इ॒यम् । सा । भू॒याः॒ । उ॒षसा॑म्ऽइव । क्षाः । यत् । ह॒ । क्षु॒ऽमन्तः॑ । शव॑सा । स॒म्ऽआय॑न् ।
वाक्यम् २: अ॒स्य स्तु॒तिं ज॑रि॒तुर्भिक्ष॑माणा॒ आ नः॑ शग्मास॒ उप॑ यन्तु वाजाः॑ ॥
पदानि : अ॒स्य । स्तु॒तिम् । ज॒रि॒तुः । भिक्ष॑माणाः । आ । नः॒ । श॒ग्मासः॑ । उप॑ । य॒न्तु॒ । वाजाः॑

२३३. मण्डलम् १०, सूक्तम् ३१, मन्त्रः ८ (ऋक्सङ्ख्या : ९११५)
वाक्यम् १: नैताव॑दे॒ना प॒रो अ॒न्यद॑स्त्यु॒क्षा स द्यावा॑पृथि॒वी बि॑भर्ति ।
पदानि : न । ए॒ताव॑त् । ए॒ना । प॒रः । अ॒न्यत् । अ॒स्ति॒ । उ॒क्षा । सः । द्यावा॑पृथि॒वी इति॑ । बि॒भ॒र्ति॒
वाक्यम् २: त्वचं॑ प॒वित्रं॑ कृणुत स्व॒धाव॒न्यदी॑ सू॒र्यं॑ न ह॒रितो॒ वह॑न्ति ॥
पदानि : त्वच॑म् । प॒वित्र॑म् । कृ॒णु॒त॒ । स्व॒धाऽवा॑न् । यत् । ई॒म् । सूर्य॑म् । न । ह॒रितः॑ । वह॑न्ति

२३४. मण्डलम् १०, सूक्तम् ३२, मन्त्रः ५ (ऋक्सङ्ख्या : ९१२३)
वाक्यम् १: प्र वोऽच्छा॑ रिरिचे देव॒युष्प॒दमेको॑ रु॒द्रेभि॑र्याति तु॒र्वणिः॑ ।
पदानि : प्र । वः॒ । अच्छ॑ । रि॒रि॒चे॒ । दे॒व॒ऽयुः । प॒दम् । एकः॑ । रु॒द्रेभिः॑ । याति॑ । तु॒र्वणिः॑
वाक्यम् २: ज॒रा वा॒ येष्व॒मृते॑षु दा॒वने॒ परि॑ व॒ ऊमे॑भ्यः सिञ्चता॒ मधु॑ ॥
पदानि : ज॒रा । वा॒ । येषु॑ । अ॒मृते॑षु । दा॒वने॑ । परि॑ । वः॒ । ऊमे॑भ्यः । सि॒ञ्च॒त॒ । मधु॑

२३५. मण्डलम् १०, सूक्तम् ३४, मन्त्रः ४ (ऋक्सङ्ख्या : ९१४०)
वाक्यम् १: अ॒न्ये जा॒यां परि॑ मृशन्त्यस्य॒ यस्याग्रं॑धद्वेद॒ने वा॒ज्य१॑क्षः ।
पदानि : अ॒न्ये । जा॒याम् । परि॑ । मृ॒श॒न्ति॒ । अ॒स्य॒ । यस्य॑ । अग्रं॑धत् । वे॒द॒ने । वा॒जी । अ॒क्षः
वाक्यम् २: पि॒ता मा॒ता भ्रात॑र एनमाहुर्न जा॑नीमो॒ नय॑ता ब॒द्धमे॒तम् ॥
पदानि : पि॒ता । मा॒ता । भ्रात॑रः । ए॒न॒म् । आ॒हुः॒ । न । जा॒नी॒मः॒ । नय॑त । ब॒द्धम् । ए॒तम्

२३६. मण्डलम् १०, सूक्तम् ३५, मन्त्रः १४ (ऋक्सङ्ख्या : ९१६४)
वाक्यम् १: यं दे॒वासोऽव॑थ वाज॒सातौ॒ यं त्राय॑ध्वे॒ यं पि॑पृथात्यंह॑सः ।
पदानि : यम् । दे॒वा॒सः॒ । अव॑थ । वा॒ज॒ऽसातौ॑ । यम् । त्राय॑ध्वे । यम् । पि॒पृ॒थ॒ । अति॑ । अंह॑सः
वाक्यम् २: यो वो॑ गोपी॒थे न भ॒यस्य॒ वेद॒ ते स्या॑म दे॒ववी॑तये तुरासः ॥

पदानि : यः । वः । गोऽपीथे । न । भयस्य । वेद । ते । स्याम । देवऽवीतये । तुरासः

२३७. मण्डलम् १०, सूक्तम् ३६, मन्त्रः २ (ऋक्सङ्ख्या : ९१६६)
वाक्यम् १: द्यौश्च नः पृथिवी च प्रचेतस ऋतावरी रक्षतामंहसो रिषः ।
पदानि : द्यौः । च । नः । पृथिवी । च । प्रऽचेतसा । ऋतवरी इत्यृतऽवरी । रक्षताम् । अंहसः । रिषः
वाक्यम् २: मा दुर्विदत्रा निर्ऋतिर्न ईशत तद्देवानामवो अद्या वृणीमहे ॥
पदानि : मा । दुःऽविदत्रा । निःऽऋतिः । नः । ईशत । तत् । देवानाम् । अवः । अद्य । वृणीमहे

२३८. मण्डलम् १०, सूक्तम् ३७, मन्त्रः ३ (ऋक्सङ्ख्या : ९१८१)
वाक्यम् १: न ते अदेवः प्रदिवो नि वासते यदेतशेभिः पतरै रथर्यसि ।
पदानि : न । ते । अदेवः । प्रऽदिवः । नि । वासते । यत् । एतशेभिः । पतरैः । रथर्यसि
वाक्यम् २: प्राचीनमन्यदनु वर्तते रज उदन्येन ज्योतिषा यासि सूर्य ॥
पदानि : प्राचीनम् । अन्यत् । अनु । वर्तते । रजः । उत् । अन्येन । ज्योतिषा । यासि । सूर्य

२३९. मण्डलम् १०, सूक्तम् ३७, मन्त्रः ४ (ऋक्सङ्ख्या : ९१८२)
वाक्यम् १: येन सूर्य ज्योतिषा बाधसे तमो जगच्च विश्वमुदियर्षि भानुना ।
पदानि : येन । सूर्य । ज्योतिषा । बाधसे । तमः । जगत् । च । विश्वम् । उत्ऽइयर्षि । भानुना
वाक्यम् २: तेनास्मद्विश्वामनिरामनाहुतिमपामीवामप दुष्ष्वप्न्यं सुव ॥
पदानि : तेन । अस्मत् । विश्वाम् । अनिराम् । अनाहुतिम् । अप । अमीवाम् । अप । दुःऽस्वप्न्यम् । सुव

२४०. मण्डलम् १०, सूक्तम् ३८, मन्त्रः ३ (ऋक्सङ्ख्या : ९१९३)
वाक्यम् १: यो नो दास आर्यो वा पुरुष्टुतादेव इन्द्र युधये चिकेतति ।
पदानि : यः । नः । दासः । आर्यः । वा । पुरुऽस्तुत । अदेवः । इन्द्र । युधये । चिकेतति
वाक्यम् २: अस्माभिष्टे सुषहाः सन्तु शत्रवस्त्वया वयं तान्वनुयाम संगमे ॥
पदानि : अस्माभिः । ते । सुऽसहाः । सन्तु । शत्रवः । त्वया । वयम् । तान् । वनुयाम । सम्ऽगमे

२४१. मण्डलम् १०, सूक्तम् ३८, मन्त्रः ४ (ऋक्सङ्ख्या ; ९१९४)
वाक्यम् १: यो दुभ्रेभिर्हव्यो यश्च भूरिभिर्यो अभीके वरिवोविन्नृषाह्यो ।
पदानि : यः । दुभ्रेभिः । हव्यः । यः । च । भूरिऽभिः । यः । अभीके । वरिवःऽवित् । नृऽसह्यो
वाक्यम् २: तं विखादे सस्निमद्य श्रुतं नरमर्वाञ्चमिन्द्रमवसे करामहे ॥
पदानि : तम् । विऽखादे । सस्निम् । अद्य । श्रुतम् । नरम् । अर्वाञ्चम् । इन्द्रम् । अवसे । करामहे

२४२. मण्डलम् १०, सूक्तम् ४०, मन्त्रः ९ (ऋक्सङ्ख्या : ९२१८)
वाक्यम् १: जनिष्ट योषा पतयत्कनीनको वि चारुहन्वीरुधो दंसना अनु ।
पदानि : जनिष्ट । योषा । पतयत् । कनीनकः । वि । च । अरुहन् । वीरुधः । दंसनाः । अनु
वाक्यम् २: आस्मै रीयन्ते निवनेव सिन्धवोऽस्मा अह्वे भवति तत्पतित्वनम् ॥
पदानि : आ । अस्मै । रीयन्ते । निवनाऽइव । सिन्धवः । अस्मै । अह्वे । भवति । तत् । पतिऽत्वनम्

२४३. मण्डलम् १०, सूक्तम् ४२, मन्त्रः १ (ऋक्सङ्ख्या : ९२२७)
वाक्यम् १: अस्तेव सु प्रतरं लायमस्यन्भूषन्निव प्र भरा स्तोममस्मै ।

पदानि : अस्ताऽइव । सु । प्रऽतरम् । लायम् । अस्यन् । भूषन्ऽइव । प्र । भर । स्तोमम् । अस्मै
वाक्यम् २: वाचा विप्रास्तरत वाचमर्यो नि रामय जरितः सोम इन्द्रम् ॥
पदानि : वाचा । विप्राः । तरत । वाचम् । अर्यः । नि । रमय । जरितरिति । सोमे । इन्द्रम्

२४४. मण्डलम् १०, सूक्तम् ४२, मन्त्रः ५ (ऋक्सङ्ख्या : ९२३१)
वाक्यम् १: धनं न स्पन्द्रं बहुलं यो अस्मै तीव्रान्त्सोमाँ आसुनोति प्रयस्वान् ।
पदानि : धनम् । न । स्पन्द्रम् । बहुलम् । यः । अस्मै । तीव्रान् । सोमान् । आऽसुनोति । प्रयस्वान्
वाक्यम् २: तस्मै शत्रून्त्सुतुकान्भ्रातरह्नो नि स्वष्ट्रान्युवति हन्ति वृत्रम् ॥
पदानि : तस्मै । शत्रून् । सुऽतुकान् । भ्रातः । अह्नः । नि । सुऽअष्ट्रान् । युवति । हन्ति । वृत्रम्

२४५. मण्डलम् १०, सूक्तम् ४३, मन्त्रः ४ (ऋक्सङ्ख्या : ९२४१)
वाक्यम् १: वयो न वृक्षं सुपलाशमासदन्त्सोमास इन्द्रं मन्दिनश्चमूषदः ।
पदानि : वयः । न । वृक्षम् । सुऽपलाशम् । आ । असदन् । सोमासः । इन्द्रम् । मन्दिनः । चमूऽसदः
वाक्यम् २: प्रैषामनीकं शवसा दविद्युतद्विदत्स्वर्मनवे ज्योतिरार्यम् ॥
पदानि : प्र । एषाम् । अनीकम् । शवसा । दविद्युतत् । विदत् । स्वः । मनवे । ज्योतिः । आर्यम्

२४६. मण्डलम् १०, सूक्तम् ४३, मन्त्रः ७ (ऋक्सङ्ख्या : ९२४४)
वाक्यम् १: आपो न सिन्धुमभि यत्समक्षरन्त्सोमास इन्द्रं कुल्या इव ह्रदम् ।
पदानि : आपः । न । सिन्धुम् । अभि । यत् । सम्ऽअक्षरन् । सोमासः । इन्द्रम् । कुल्याःऽइव । ह्रदम्
वाक्यम् २: वर्धन्ति विप्रा महो अस्य सादने यवं न वृष्टिर्दिव्येन दानुना ॥
पदानि : वर्धन्ति । विप्राः । महः । अस्य । सदने । यवम् । न । वृष्टिः । दिव्येन । दानुना

२४७. मण्डलम् १०, सूक्तम् ४४, मन्त्रः ७ (ऋक्सङ्ख्या : ९२५५)
वाक्यम् १: एवैवापागपरे सन्तु दूढ्योऽश्वा येषां दुर्युज आयुयुज्रे ।
पदानि : एव । एव । अपाक् । अपरे । सन्तु । दुःऽध्यः । अश्वाः । येषाम् । दुःऽयुजः । आऽयुयुज्रे
वाक्यम् २: इत्था ये प्रागुपरे सन्ति दावने पुरूणि यत्र वयुनानि भोजना ॥
पदानि : इत्था । ये । प्राक् । उपरे । सन्ति । दावने । पुरूणि । यत्र । वयुनानि । भोजना

२४८. मण्डलम् १०, सूक्तम् ४८, मन्त्रः १ (ऋक्सङ्ख्या : ९२९०)
वाक्यम् १: अहं भुवं वसुनः पूर्व्यस्पतिरहं धनानि सं जयामि शश्वतः ।
पदानि : अहम् । भुवम् । वसुनः । पूर्व्यः । पतिः । अहम् । धनानि । सम् । जयामि । शश्वतः
वाक्यम् २: मां हवन्ते पितरं न जन्तवोऽहं दाशुषे वि भजामि भोजनम् ॥
पदानि : माम् । हवन्ते । पितरम् । न । जन्तवः । अहम् । दाशुषे । वि । भजामि । भोजनम्

२४९. मण्डलम् १०, सूक्तम् ४८, मन्त्रः २ (ऋक्सङ्ख्या : ९२९१)
वाक्यम् १: अहमिन्द्रो रोधो वक्षो अथर्वणस्तिताय गा अजनयमहेरधिं ।
पदानि : अहम् । इन्द्रः । रोधः । वक्षः । अथर्वणः । तिताय । गाः । अजनयम् । अहेः । अधिं
वाक्यम् २: अहं दस्युभ्यः परिं नृम्णमा ददे गोत्रा शिक्षन्दधीचे मातरिश्वने ॥
पदानि : अहम् । दस्युऽभ्यः । परिं । नृम्णम् । आ । ददे । गोत्रा । शिक्षन् । दधीचे । मातरिश्वने

२५०. मण्डलम् १०, सूक्तम् ५०, मन्त्रः ६ (ऋक्सङ्ख्या : ९३१७)
वाक्यम् १: एता विश्वा सवना तूतुमा कृषे स्वयं सूनो सहसो यानि दधिषे।
पदानि : एता। विश्वा। सवना। तूतुमा। कृषे। स्वयम्। सूनो इति। सहसः। यानि। दधिषे
वाक्यम् २: वराय ते पात्रं धर्मणे तना यज्ञो मन्त्रो ब्रह्मोद्यतं वचः॥
पदानि : वराय। ते। पात्रम्। धर्मणे। तना। यज्ञः। मन्त्रः। ब्रह्म। उत्ऽयतम्। वचः

२५१. मण्डलम् १०, सूक्तम् ५१, मन्त्रः ६ (ऋक्सङ्ख्या : ९३२४)
वाक्यम् १: अग्नेः पूर्वे भ्रातरो अर्थमेतं रथीवाध्वानमन्वावरीवुः।
पदानि : अग्नेः। पूर्वे। भ्रातरः। अर्थम्। एतम्। रथीऽइव। अध्वानम्। अनु। आ। अवरीवुरिति
वाक्यम् २: तस्माद्भिया वरुण दूरमायं गौरो न क्षेप्नोरविजे ज्यायाः॥
पदानि : तस्मात्। भिया। वरुण। दूरम्। आयम्। गौरः। न। क्षेप्नोः। अविजे। ज्यायाः

२५२. मण्डलम् १०, सूक्तम् ५२, मन्त्रः २ (ऋक्सङ्ख्या : ९३२९)
वाक्यम् १: अहं होता न्यसीदं यजीयान्विश्वे देवा मरुतो मा जुनन्ति।
पदानि : अहम्। होता। नि। असीदम्। यजीयान्। विश्वे। देवाः। मरुतः। मा। जुनन्ति
वाक्यम् २: अहरहरश्विनाध्वर्यवं वां ब्रह्मा समिद्धवति साहुतिर्वाम्॥
पदानि : अहःऽअहः। अश्विना। आध्वर्यवम्। वाम्। ब्रह्मा। सम्ऽइत्। भवति। सा। आऽहुतिः। वाम्

२५३. मण्डलम् १०, सूक्तम् ५९, मन्त्रः ७ (ऋक्सङ्ख्या : ९३९०)
वाक्यम् १: पुनर्नो असुं पृथिवी ददातु पुनर्द्यौर्देवी पुनरन्तरिक्षम्।
पदानि : पुनः। नः। असुम्। पृथिवी। ददातु। पुनः। द्यौः। देवी। पुनः। अन्तरिक्षम्
वाक्यम् २: पुनर्नः सोमस्तन्वं ददातु पुनः पूषा पथ्यां३ या स्वस्तिः॥
पदानि : पुनः। नः। सोमः। तन्वम्। ददातु। पुनरिति। पूषा। पथ्याम्। या। स्वस्तिः

२५४. मण्डलम् १०, सूक्तम् ६१, मन्त्रः १६ (ऋक्सङ्ख्या : ९४२१)
वाक्यम् १: अयं स्तुतो राजा वन्दि वेधा अपश्च विप्रस्तरति स्वसेतुः।
पदानि : अयम्। स्तुतः। राजा। वन्दि। वेधाः। अपः। च। विप्रः। तरति। स्वऽसेतुः
वाक्यम् २: स कक्षीवन्तं रेजयत्सो अग्निं नेमिं न चक्रमर्वतो रघुद्रु॥
पदानि : सः। कक्षीवन्तम्। रेजयत्। सः। अग्निम्। नेमिम्। न। चक्रम्। अर्वतः। रघुऽद्रु

२५५. मण्डलम् १०, सूक्तम् ६३, मन्त्रः १६ (ऋक्सङ्ख्या : ९४५९)
वाक्यम् १: स्वस्तिरिद्धि प्रपथे श्रेष्ठा रेक्णस्वत्यभि या वाममेति।
पदानि : स्वस्तिः। इत्। हि। प्रऽपथे। श्रेष्ठा। रेक्णस्वती। अभि। या। वामम्। एति
वाक्यम् २: सा नो अमा सो अरणे नि पातु स्वावेशा भवतु देवगोपा॥
पदानि : सा। नः। अमा। सो इति। अरणे। नि। पातु। सुऽआवेशा। भवतु। देवऽगोपा

२५६. मण्डलम् १०, सूक्तम् ७०, मन्त्रः ९ (ऋक्सङ्ख्या : ९५५२)
वाक्यम् १: देवं त्वष्टुर्यद्धं चारुत्वमानड्यदङ्गिरसामभवः सचाभूः।
पदानि : देवं। त्वष्टुः। यत्। ह। चारुऽत्वम्। आनट्। यत्। अङ्गिरसाम्। अभवः। सचाऽभूः
वाक्यम् २: स देवानां पाथ उप प्र विद्वानुशन्यक्षि द्रविणोदः सुरत्नः॥
पदानि : सः। देवानाम्। पाथः। उप। प्र। विद्वान्। उशन्। यक्षि। द्रविणःऽदः। सुऽरत्नः

२५७. मण्डलम् १०, सूक्तम् ७५, मन्त्रः १ (ऋक्सङ्ख्या : ९५९२)
वाक्यम् १: प्र सु व आपो महिमानमुत्तमं कारुर्वोचाति सदने विवस्वतः ।
पदानि : प्र । सु । वः । आपः । महिमानम् । उत्ऽतमम् । कारुः । वोचाति । सदने । विवस्वतः
वाक्यम् २: प्र सप्तसप्त त्रेधा हि चक्रमुः प्र सृत्वरीणामति सिन्धुरोजसा ॥
पदानि : प्र । सप्तऽसप्त । त्रेधा । हि । चक्रमुः । प्र । सृत्वरीणाम् । अति । सिन्धुः । ओजसा

२५८. मण्डलम् १०, सूक्तम् ७५, मन्त्रः ३ (ऋक्सङ्ख्या : ९५९४)
वाक्यम् १: दिवि स्वनो यतते भूम्योपर्यनन्तं शुष्ममुदियर्ति भानुना ।
पदानि : दिवि । स्वनः । यतते । भूम्याम् । उपरि । अनन्तम् । शुष्मम् । उत् । इयर्ति । भानुना
वाक्यम् २: अभ्रादिव प्र स्तनयन्ति वृष्टयः सिन्धुर्यदेति वृषभो न रोरुवत् ॥
पदानि : अभ्रात्ऽइव । प्र । स्तनयन्ति । वृष्टयः । सिन्धुः । यत् । एति । वृषभः । न । रोरुवत्

२५९. मण्डलम् १०, सूक्तम् ७९, मन्त्रः ४ (ऋक्सङ्ख्या : ९६२८)
वाक्यम् १: तद्वामेमृतं रोदसी प्र ब्रवीमि जायमानो मातरा गर्भो अत्ति ।
पदानि : तत् । वाम् । ऋतम् । रोदसी इति । प्र । ब्रवीमि । जायमानः । मातरा । गर्भः । अत्ति
वाक्यम् २: नाहं देवस्य मर्त्यश्चिकेताग्निरङ्ग विचेताः स प्रचेताः ॥
पदानि : न । अहम् । देवस्य । मर्त्यः । चिकेत । अग्निः । अङ्ग । विऽचेताः । सः । प्रऽचेताः

२६०. मण्डलम् १०, सूक्तम् ७९, मन्त्रः ६ (ऋक्सङ्ख्या : ९६३०)
वाक्यम् १: किं देवेषु त्यज एनश्चकर्थाग्ने पृच्छामि नु त्वामविद्वान् ।
पदानि : किम् । देवेषु । त्यजः । एनः । चकर्थ । अग्ने । पृच्छामि । नु । त्वाम् । अविद्वान्
वाक्यम् २: अक्रीळन्क्रीळन्हरिरत्तवेऽदन्वि पर्वशश्चकर्त गामिवासिः ॥
पदानि : अक्रीळन् । क्रीळन् । हरिः । अत्तवे । अदन् । वि । पर्वऽशः । चकर्त । गाम्ऽइव । असिः

२६१. मण्डलम् १०, सूक्तम् ८२, मन्त्रः ३ (ऋक्सङ्ख्या : ९६४८)
वाक्यम् १: यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा ।
पदानि : यः । नः । पिता । जनिता । यः । विऽधाता । धामानि । वेद । भुवनानि । विश्वा
वाक्यम् २: यो देवानां नामधा एक एव तं सँप्रश्नं भुवना यन्त्यन्या ॥
पदानि : यः । देवानाम् । नामऽधाः । एकः । एव । तम् । सम्ऽप्रश्नम् । भुवना । यन्ति । अन्या

२६२. मण्डलम् १०, सूक्तम् ८२, मन्त्रः ५ (ऋक्सङ्ख्या : ९६५०)
वाक्यम् १: परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति ।
पदानि : परः । दिवा । परः । एना । पृथिव्या । परः । देवेभिः । असुरैः । यत् । अस्ति
वाक्यम् २: कं स्विद्गर्भं प्रथमं दध्र आपो यत्र देवाः समपश्यन्त विश्वे ॥
पदानि : कम् । स्वित् । गर्भम् । प्रथमम् । दध्रे । आपः । यत्र । देवाः । सम्ऽअपश्यन्त । विश्वे

२६३. मण्डलम् १०, सूक्तम् ८३, मन्त्रः २ (ऋक्सङ्ख्या : ९६५४)
वाक्यम् १: मन्युरिन्द्रो मन्युरेवास देवो मन्युर्होता वरुणो जातवेदाः ।
पदानि : मन्युः । इन्द्रः । मन्युः । एव । आस । देवः । मन्युः । होता । वरुणः । जातऽवेदाः

वाक्यम् २: मन्युं विशं ईळते मानुषीर्याः पाहि नो मन्यो तपसा सजोषाः ॥
पदानि : मन्युम्। विशः। ईळते। मानुषीः। याः। पाहि। नः। मन्यो इति। तपसा। सऽजोषाः

२६४. मण्डलम् १०, सूक्तम् ८३, मन्त्रः ३ (ऋक्सङ्ख्या : ९६५५)
वाक्यम् १: अभीहि मन्यो तवसस्तवीयान्तपसा युजा वि जहि शत्रून्।
पदानि : अभि। इहि। मन्यो इति। तवसः। तवीयान्। तपसा। युजा। वि। जहि। शत्रून्
वाक्यम् २: अमित्रहा वृत्रहा दस्युहा च विश्वा वसून्या भरा त्वं नः ॥
पदानि : अमित्रऽहा। वृत्रऽहा। दस्युऽहा। च। विश्वा। वसूनि। आ। भर। त्वम्। नः

२६५. मण्डलम् १०, सूक्तम् ८५, मन्त्रः २१ (ऋक्सङ्ख्या : ९६८७)
वाक्यम् १: उदीर्ष्वातः पतिवती ह्येषा विश्वावसुं नमसा गीर्भिरीळे।
पदानि : उत्। ईर्ष्व। अतः। पतिऽवती। हि। एषा। विश्वऽवसुम्। नमसा। गीःऽभिः। ईळे
वाक्यम् २: अन्यामिच्छ पितृषदं व्यक्तां स ते भागो जनुषा तस्यं विद्धि ॥
पदानि : अन्याम्। इच्छ। पितृऽसदम्। विऽअक्ताम्। सः। ते। भागः। जनुषा। तस्यं। विद्धि

२६६. मण्डलम् १०, सूक्तम् ८५, मन्त्रः २६ (ऋक्सङ्ख्या : ९६९२)
वाक्यम् १: पूषा त्वेतो नयतु हस्तगृह्याश्विना त्वा प्र वहतां रथेन।
पदानि : पूषा। त्वा। इतः। नयतु। हस्तऽगृह्य। अश्विना। त्वा। प्र। वहताम्। रथेन
वाक्यम् २: गृहानगच्छ गृहपत्नी यथासो वशिनी त्वं विदथमा वदासि ॥
पदानि : गृहान्। गच्छ। गृहऽपत्नी। यथा। असः। वशिनी। त्वम्। विदथम्। आ। वदासि

२६७. मण्डलम् १०, सूक्तम् ८५, मन्त्रः २७ (ऋक्सङ्ख्या : ९६९३)
वाक्यम् १: इह प्रियं प्रजया ते समध्यतामस्मिन्गृहे गार्हपत्याय जागृहि।
पदानि : इह। प्रियम्। प्रऽजया। ते। सम्। ऋध्यताम्। अस्मिन्। गृहे। गार्हऽपत्याय। जागृहि
वाक्यम् २: एना पत्या तन्वं१ सं सृजस्वाधा जिव्री विदथमा वदाथः ॥
पदानि : एना। पत्या। तन्वम्। सम्। सृजस्व। अध। जिव्री इति। विदथम्। आ। वदाथः

२६८. मण्डलम् १०, सूक्तम् ८७, मन्त्रः ३ (ऋक्सङ्ख्या : ९७३९)
वाक्यम् १: उभोभयाविन्नुप धेहि दंष्ट्रा हिंस्रः शिशानोऽवरं परं च।
पदानि : उभा। उभयाविन्। उप। धेहि। दंष्ट्रा। हिंस्रः। शिशानः। अवरम्। परम्। च
वाक्यम् २: उतान्तरिक्षे परि याहि राजञ्जम्भैः सं धेह्यभि यातुधानान् ॥
पदानि : उत। अन्तरिक्षे। परि। याहि। राजन्। जम्भैः। सम्। धेहि। अभि। यातुऽधानान्

२६९. मण्डलम् १०, सूक्तम् ८८, मन्त्रः ६ (ऋक्सङ्ख्या : ९७६७)
वाक्यम् १: मूर्धा भुवो भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन्।
पदानि : मूर्धा। भुवः। भवति। नक्तम्। अग्निः। ततः। सूर्यः। जायते। प्रातः। उत्ऽयन्
वाक्यम् २: मायामू तु यज्ञियानामेतामपो यत्तूर्णिश्चरति प्रजानन् ॥
पदानि : मायाम्। ऊँ इति। तु। यज्ञियानाम्। एताम्। अपः। यत्। तूर्णिः। चरति। प्रऽजानन्

२७०. मण्डलम् १०, सूक्तम् ८८, मन्त्रः १८ (ऋक्सङ्ख्या : ९७७९)

वाक्यम् १: कत्यग्नयः कति सूर्यासः कत्युषासः कत्यु स्विदापः ।
पदानि : कति । अग्नयः । कति । सूर्यासः । कति । उषसः । कति । ऊँ इति । स्वित् । आपः
वाक्यम् २: नोपस्पिजं वः पितरो वदामि पृच्छामि वः कवयो विद्मने कम् ॥
पदानि : न । उपऽस्पिजम् । वः । पितरः । वदामि । पृच्छामि । वः । कवयः । विद्मने । कम्

२७१. मण्डलम् १०, सूक्तम् ८९, मन्त्रः १० (ऋक्सङ्ख्या : ९७९०)
वाक्यम् १: इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत्पर्वतानाम् ।
पदानि : इन्द्रः । दिवः । इन्द्रः । ईशे । पृथिव्याः । इन्द्रः । अपाम् । इन्द्रः । इत् । पर्वतानाम्
वाक्यम् २: इन्द्रो वृधामिन्द्र इन्मेधिराणामिन्द्रः क्षेमे योगे हव्य इन्द्रः ॥
पदानि : इन्द्रः । वृधाम् । इन्द्रः । इत् । मेधिराणाम् । इन्द्रः । क्षेमे । योगे । हव्यः । इन्द्रः

२७२. मण्डलम् १०, सूक्तम् ९२, मन्त्रः १३ (ऋक्सङ्ख्या : ९८४२)
वाक्यम् १: प्र नः पूषा चरथँ विश्वदेव्योऽपां नपादवतु वायुरिष्टये ।
पदानि : प्र । नः । पूषा । चरथम् । विश्वऽदेव्यः । अपाम् । नपात् । अवतु । वायुः । इष्टये
वाक्यम् २: आत्मानं वस्यो अभि वातमर्चत तदश्विना सुहवा यामनि श्रुतम् ॥
पदानि : आत्मानम् । वस्यः । अभि । वातम् । अर्चत । तत् । अश्विना । सुऽहवा । यामनि । श्रुतम्

२७३. मण्डलम् १०, सूक्तम् ९४, मन्त्रः १ (ऋक्सङ्ख्या : ९८६०)
वाक्यम् १: प्रैते वदन्तु प्र वयं वदाम ग्रावभ्यो वाचं वदता वदद्भ्यः ।
पदानि : प्र । एते । वदन्तु । प्र । वयम् । वदाम । ग्रावऽभ्यः । वाचम् । वदत । वदत्ऽभ्यः
वाक्यम् २: यदद्रयः पर्वताः साकमाशवः श्लोकं घोषं भरथेन्द्राय सोमिनः ॥
पदानि : यत् । अद्रयः । पर्वताः । साकम् । आशवः । श्लोकम् । घोषम् । भरथ । इन्द्राय । सोमिनः

२७४. मण्डलम् १०, सूक्तम् ९४, मन्त्रः ३ (ऋक्सङ्ख्या : ९८६२)
वाक्यम् १: एते वदन्त्यविदन्नना मधु न्यूङ्खयन्ते अधि पक्व आमिषि ।
पदानि : एते । वदन्ति । अविदन् । अना । मधु । नि । ऊङ्खयन्ते । अधि । पक्वे । आमिषि
वाक्यम् २: वृक्षस्य शाखामरुणस्य बप्सतस्ते सूभर्वा वृषभाः प्रेमराविषुः ॥
पदानि : वृक्षस्यं । शाखाम् । अरुणस्यं । बप्सतः । ते । सूभर्वाः । वृषभाः । प्र । ईम् । अराविषुः

२७५. मण्डलम् १०, सूक्तम् ९५, मन्त्रः ९ (ऋक्सङ्ख्या : ९८८२)
वाक्यम् १: यदासु मर्तो अमृतासु निस्पृक्सं क्षोणीभिः क्रतुभिर्न पृङ्क्ते ।
पदानि : यत् । आसु । मर्तः । अमृतासु । निऽस्पृक् । सम् । क्षोणीभिः । क्रतुऽभिः । न । पृङ्क्ते
वाक्यम् २: ता आतयो न तन्वः शुम्भत स्वा अश्वासो न क्रीळयो दन्दशानाः ॥
पदानि : ताः । आतयः । न । तन्वः । शुम्भत । स्वाः । अश्वासः । न । क्रीळयः । दन्दशानाः

२७६. मण्डलम् १०, सूक्तम् ९५, मन्त्रः १२ (ऋक्सङ्ख्या : ९८८५)
वाक्यम् १: कदा सूनुः पितरं जात इच्छाच्चक्रन्नाश्रु वर्तयद्विजानन् ।
पदानि : कदा । सूनुः । पितरम् । जातः । इच्छात् । चक्रन् । न । अश्रु । वर्तयत् । विऽजानन्
वाक्यम् २: को दंपती समनसा वि यूयोदध यदग्निः श्वशुरेषु दीदयत् ॥
पदानि : कः । दंपती इति दम्ऽपती । सऽमनसा । वि । यूयोत् । अध । यत् । अग्निः । श्वशुरेषु । दीदयत्

२७७. मण्डलम् १०, सूक्तम् ९८, मन्त्रः २ (ऋक्सङ्ख्या : ९९२९)
वाक्यम् १: आ देवो दूतो अजिरश्चिकित्वान्त्वद्देवापे अभि मामगच्छत्।
पदानि : आ। देवः। दूतः। अजिरः। चिकित्वान्। त्वत्। देवऽआपे। अभि। माम्। अगच्छत्
वाक्यम् २: प्रतीचीनः प्रति मामा ववृत्स्व दधामि ते द्युमतीं वाचमासन्॥
पदानि : प्रतीचीनः। प्रति। माम्। आ। ववृत्स्व। दधामि। ते। द्युऽमतीम्। वाचम्। आसन्

२७८. मण्डलम् १०, सूक्तम् १०१, मन्त्रः ८ (ऋक्सङ्ख्या : ९९७१)
वाक्यम् १: व्रजं कृणुध्वं स हि वो नृपाणो वर्म सीव्यध्वं बहुला पृथूनि।
पदानि : व्रजम्। कृणुध्वम्। सः। हि। वः। नृऽपानः। वर्म। सीव्यध्वम्। बहुला। पृथूनि
वाक्यम् २: पुरः कृणुध्वमायसीरधृष्टा मा वः सुस्रोच्चमसो दृंहता तम्॥
पदानि : पुरः। कृणुध्वम्। आयसीः। अधृष्टाः। मा। वः। सुस्रोत्। चमसः। दृंहत। तम्

२७९. मण्डलम् १०, सूक्तम् १०४, मन्त्रः ८ (ऋक्सङ्ख्या : १०००८)
वाक्यम् १: सप्तापो देवीः सुरणा अमृक्ता याभिः सिन्धुमतर इन्द्र पूर्भित्।
पदानि : सप्त। आपः। देवीः। सुऽरणाः। अमृक्ताः। याभिः। सिन्धुम्। अतरः। इन्द्र। पूःऽभित्
वाक्यम् २: नवतिं स्रोत्या नवं च स्रवन्तीर्देवेभ्यो गातुं मनुषे च विन्दः॥
पदानि : नवतिम्। स्रोत्याः। नवं। च। स्रवन्तीः। देवेभ्यः। गातुम्। मनुषे। च। विन्दः

२८०. मण्डलम् १०, सूक्तम् १०७, मन्त्रः १ (ऋक्सङ्ख्या : १००३४)
वाक्यम् १: आविरभून्महि माघोनमेषां विश्वं जीवं तमसो निरमोचि।
पदानि : आविः। अभूत्। महि। माघोनम्। एषाम्। विश्वम्। जीवम्। तमसः। निः। अमोचि
वाक्यम् २: महि ज्योतिः पितृभिर्दत्तमागादुरुः पन्था दक्षिणाया अदर्शि॥
पदानि : महि। ज्योतिः। पितृऽभिः। दत्तम्। आ। अगात्। उरुः। पन्थाः। दक्षिणायाः। अदर्शि

२८१. मण्डलम् १०, सूक्तम् १०७, मन्त्रः ७ (ऋक्सङ्ख्या : १००४०)
वाक्यम् १: दक्षिणाश्वं दक्षिणा गां ददाति दक्षिणा चन्द्रमुत यद्धिरण्यम्।
पदानि : दक्षिणा। अश्वम्। दक्षिणा। गाम्। ददाति। दक्षिणा। चन्द्रम्। उत। यत्। हिरण्यम्
वाक्यम् २: दक्षिणान्नं वनुते यो न आत्मा दक्षिणां वर्म कृणुते विजानन्॥
पदानि : दक्षिणा। अन्नम्। वनुते। यः। नः। आत्मा। दक्षिणाम्। वर्म। कृणुते। विऽजानन्

२८२. मण्डलम् १०, सूक्तम् १११, मन्त्रः ३ (ऋक्सङ्ख्या : १००७६)
वाक्यम् १: इन्द्रः किल श्रुत्या अस्य वेद स हि जिष्णुः पथिकृत्सूर्याय।
पदानि : इन्द्रः। किल। श्रुत्यै। अस्य। वेद। सः। हि। जिष्णुः। पथिऽकृत्। सूर्याय
वाक्यम् २: आन्मेनां कृण्वन्नच्युतो भुवद्गोः पतिर्दिवः सनजा अप्रतीतः॥
पदानि : आत्। मेनाम्। कृण्वन्। अच्युतः। भुवत्। गोः। पतिः। दिवः। सनऽजाः। अप्रतिऽइतः

२८३. मण्डलम् १०, सूक्तम् १११, मन्त्रः ९ (ऋक्सङ्ख्या : १००८२)
वाक्यम् १: सृजः सिन्धूँरहिना जग्रसानाँ आदिदेताः प्र विविज्रे जवेन।
पदानि : सृजः। सिन्धून्। अहिना। जग्रसानान्। आत्। इत्। एताः। प्र। विविज्रे। जवेन
वाक्यम् २: मुमुक्षमाणा उत या मुमुच्रेऽधेदेता न रमन्ते नितिक्ताः॥

पदानि : मुमुक्षमाणाः । उत । याः । मुमुग्रे । अध । इत् । एताः । न । रमन्ते । निऽतिक्ताः

२८४. मण्डलम् १०, सूक्तम् ११२, मन्त्रः २ (ऋक्सङ्ख्या : १००८५)
वाक्यम् १: यस्ते रथो मनसो जवीयानेन्द्र तेन सोमपेयाय याहि ।
पदानि : यः । ते । रथः । मनसः । जवीयान् । आ । इन्द्र । तेन । सोमऽपेयाय । याहि
वाक्यम् २: तूयमा ते हरयः प्र द्रवन्तु येभिर्यासि वृषभिर्मन्दमानः ॥
पदानि : तूयम् । आ । ते । हरयः । प्र । द्रवन्तु । येभिः । यासि । वृषऽभिः । मन्दमानः

२८५. मण्डलम् १०, सूक्तम् ११४, मन्त्रः ७ (ऋक्सङ्ख्या : १०११०)
वाक्यम् १: चतुर्दशान्ये महिमानो अस्य तं धीरा वाचा प्र णयन्ति सप्त ।
पदानि : चतुःऽदश । अन्ये । महिमानः । अस्य । तम् । धीराः । वाचा । प्र । नयन्ति । सप्त
वाक्यम् २: आप्नानं तीर्थं क इह प्र वोचद्येन पथा प्रपिबन्ते सुतस्य ॥
पदानि : आप्नानम् । तीर्थम् । कः । इह । प्र । वोचत् । येन । पथा । प्रऽपिबन्ते । सुतस्य

२८६. मण्डलम् १०, सूक्तम् १२२, मन्त्रः २ (ऋक्सङ्ख्या : १०१८३)
वाक्यम् १: जुषाणो अग्ने प्रति हर्य मे वचो विश्वानि विद्वान्वयुनानि सुक्रतो ।
पदानि : जुषाणः । अग्ने । प्रति । हर्य । मे । वचः । विश्वानि । विद्वान् । वयुनानि । सुक्रतो इति सुऽक्रतो
वाक्यम् २: घृतनिर्णिग्ब्रह्मणे गातुमेरय तवं देवा अजनयन्ननु व्रतम् ॥
पदानि : घृतऽनिर्निक् । ब्रह्मणे । गातुम् । आ । ईरय । तवं । देवाः । अजनयन् । अनु । व्रतम्

२८७. मण्डलम् १०, सूक्तम् १२८, मन्त्रः ५ (ऋक्सङ्ख्या : १०२३५)
वाक्यम् १: देवीः षळुर्वीरुरु नः कृणोत विश्वे देवास इह वीरयध्वम् ।
पदानि : देवीः । षट् । उर्वीः । उरु । नः । कृणोत । विश्वे । देवासः । इह । वीरयध्वम्
वाक्यम् २: मा हास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन् ॥
पदानि : मा । हास्महि । प्रऽजया । मा । तनूभिः । मा । रधाम । द्विषते । सोम । राजन्

२८८. मण्डलम् १०, सूक्तम् १२९, मन्त्रः ३ (ऋक्सङ्ख्या : १०२४२)
वाक्यम् १: तमं आसीत्तमसा गूळ्हमग्रेऽप्रकेतं सलिलं सर्वमा इदम् ।
पदानि : तमः । आसीत् । तमसा । गूळ्हम् । अग्रे । अप्रऽकेतम् । सलिलम् । सर्वम् । आः । इदम्
वाक्यम् २: तुच्छ्येनाभ्वपिहितं यदासीत्तपसस्तन्महिनाजायतैकम् ॥
पदानि : तुच्छ्येन । आभु । अपिऽहितम् । यत् । आसीत् । तपसः । तत् । महिना । अजायत । एकम्

२८९. मण्डलम् १०, सूक्तम् १३८, मन्त्रः १ (ऋक्सङ्ख्या : १०३०३)
वाक्यम् १: तव त्य इन्द्र सख्येषु वह्नय ऋतं मन्वाना व्यदर्दिरुर्वलम् ।
पदानि : तवं । त्ये । इन्द्र । सख्येषु । वह्नयः । ऋतम् । मन्वानाः । वि । अदर्दिरुः । वलम्
वाक्यम् २: यत्रा दशस्यन्नुषसो रिणन्नपः कुत्साय मन्मन्नह्यश्च दंसयः ॥
पदानि : यत्र । दशस्यन् । उषसः । रिणन् । अपः । कुत्साय । मन्मन् । अह्यः । च । दंसयः

२९०. मण्डलम् १०, सूक्तम् १३८, मन्त्रः ६ (ऋक्सङ्ख्या : १०३०८)
वाक्यम् १: एता त्या ते श्रुत्यानि केवला यदेक एकमकृणोरयज्ञम् ।

पदानि : एता । त्या । ते । श्रुत्यानि । केवला । यत् । एकः । एकम् । अकृणोः । अयज्ञम्
वाक्यम् २: मासां विधानमदधा अधि द्यवि त्वया विभिन्नं भरति प्रधिं पिता ॥
पदानि : मासाम् । विऽधानम् । अदधाः । अधिं । द्यविं । त्वया । विऽभिन्नम् । भरति । प्रऽधिम् । पिता

२९१. मण्डलम् १०, सूक्तम् १४२, मन्त्रः २ (ऋक्सङ्ख्या : १०३२८)
वाक्यम् १: प्रवत्ते अग्ने जनिमा पितूयतः साचीव विश्वा भुवना न्यृञ्जसे ।
पदानि : प्रऽवत् । ते । अग्ने । जनिम । पितुऽयतः । साचीऽइव । विश्वा । भुवना । नि । ऋञ्जसे
वाक्यम् २: प्र सप्तयः प्र सनिषन्त नो धियः पुरश्चरन्ति पशुपा इव त्मना ॥
पदानि : प्र । सप्तयः । प्र । सनिषन्त । नः । धियः । पुरः । चरन्ति । पशुपाःऽइव । त्मना

२९२. मण्डलम् १०, सूक्तम् १४८, मन्त्रः ३ (ऋक्सङ्ख्या : १०३६६)
वाक्यम् १: अर्यो वा गिरो अभ्यर्च विद्वानृषीणां विप्रः सुमतिं चकानः ।
पदानि : अर्यः । वा । गिरः । अभि । अर्च । विद्वान् । ऋषीणाम् । विप्रः । सुऽमतिम् । चकानः
वाक्यम् २: ते स्याम ये रणयन्त सोमैरेनोत तुभ्यं रथोळ्ह भक्षैः ॥
पदानि : ते । स्याम । ये । रणयन्त । सोमैः । एना । उत । तुभ्यम् । रथऽओळ्ह । भक्षैः

२९३. मण्डलम् १०, सूक्तम् १४८, मन्त्रः ४ (ऋक्सङ्ख्या : १०३६७)
वाक्यम् १: इमा ब्रह्मेन्द्र तुभ्यं शंसि दा नृभ्यो नृणां शूर शवः ।
पदानि : इमा । ब्रह्म । इन्द्र । तुभ्यम् । शंसि । दाः । नृऽभ्यः । नृणाम् । शूर । शवः
वाक्यम् २: तेभिर्भव सक्रतुर्येषु चाकन्नुत त्रायस्व गृणत उत स्तीन् ॥
पदानि : तेभिः । भव । सऽक्रतुः । येषु । चाकन् । उत । त्रायस्व । गृणतः । उत । स्तीन्

२९४. मण्डलम् १०, सूक्तम् १६०, मन्त्रः २ (ऋक्सङ्ख्या : १०४२६)
वाक्यम् १: तुभ्यं सुतास्तुभ्यमु सोत्वासस्त्वां गिरः श्वात्र्या आ ह्वयन्ति ।
पदानि : तुभ्यम् । सुताः । तुभ्यम् । ऊँ इति । सोत्वासः । त्वाम् । गिरः । श्वात्र्याः । आ । ह्वयन्ति
वाक्यम् २: इन्द्रेदमद्य सवनं जुषाणो विश्वस्य विद्वाँ इह पाहि सोमम् ॥
पदानि : इन्द्र । इदम् । अद्य । सवनम् । जुषाणः । विश्वस्य । विद्वान् । इह । पाहि । सोमम्

२९५. मण्डलम् १०, सूक्तम् १६५, मन्त्रः ४ (ऋक्सङ्ख्या : १०४५५)
वाक्यम् १: यदुलूको वदति मोघमेतद्यत्कपोतः पदमग्नौ कृणोति ।
पदानि : यत् । उलूकः । वदति । मोघम् । एतत् । यत् । कपोतः । पदम् । अग्नौ । कृणोति
वाक्यम् २: यस्य दूतः प्रहित एष एतत्तस्मै यमाय नमो अस्तु मृत्यवे ॥
पदानि : यस्य । दूतः । प्रऽहितः । एषः । एतत् । तस्मै । यमाय । नमः । अस्तु । मृत्यवे

२९६. मण्डलम् १०, सूक्तम् १७८, मन्त्रः ३ (ऋक्सङ्ख्या : १०५१०)
वाक्यम् १: सद्यश्चिद्यः शवसा पञ्च कृष्टीः सूर्य इव ज्योतिषापस्ततान ।
पदानि : सद्यः । चित् । यः । शवसा । पञ्च । कृष्टीः । सूर्यःऽइव । ज्योतिषा । अपः । ततान
वाक्यम् २: सहस्रसाः शतसा अस्य रंहिर्न स्मा वरन्ते युवतिं न शर्याम् ॥
पदानि : सहस्रऽसाः । शतऽसाः । अस्य । रंहिः । न । स्म । वरन्ते । युवतिम् । न । शर्याम्

एकादशपदवाक्यकाः मन्त्राः
(७५ मन्त्राः)

१. मण्डलम् १, सूक्तम् ३१, मन्त्रः १८ (ऋक्सङ्ख्या : ३६८)
वाक्यम् १: एतेनाग्ने ब्रह्मणा वावृधस्व शक्ती वा यत्ते चकृमा विदा वा।
पदानि : एतेन। अग्ने। ब्रह्मणा। ववृधस्व। शक्ती। वा। यत्। ते। चकृम। विदा। वा
वाक्यम् २: उत प्र णेष्यभि वस्यो अस्मान्त्सं नः सृज सुमत्या वाजवत्या॥
पदानि : उत। प्र। नेषि। अभि। वस्यः। अस्मान्। सम्। नः। सृज। सुऽमत्या। वाजऽवत्या

२. मण्डलम् १, सूक्तम् ३२, मन्त्रः १४ (ऋक्सङ्ख्या : ३८२)
वाक्यम् १: अहेर्यातारं कमपश्य इन्द्र हृदि यत्ते जघ्नुषो भीरगच्छत्।
पदानि : अहेः। यातारम्। कम्। अपश्यः। इन्द्र। हृदि। यत्। ते। जघ्नुषः। भीः। अगच्छत्
वाक्यम् २: नवं च यन्नवतिं च स्रवन्तीः श्येनो न भीतो अतरो रजांसि॥
पदानि : नवं। च। यत्। नवतिम्। च। स्रवन्तीः। श्येनः। न। भीतः। अतरः। रजांसि

३. मण्डलम् १, सूक्तम् ८४, मन्त्रः १७ (ऋक्सङ्ख्या : ९३१)
वाक्यम् १: क ईषते तुज्यते को बिभाय को मंसते सन्तमिन्द्रं को अन्ति।
पदानि : कः। ईषते। तुज्यते। कः। बिभाय। कः। मंसते। सन्तम्। इन्द्रम्। कः। अन्ति
वाक्यम् २: कस्तोकाय क इभायोत रायेऽधिं ब्रवत्तन्वेऽ को जनाय॥
पदानि : कः। तोकाय। कः। इभाय। उत। राये। अधिं। ब्रवत्। तन्वे। कः। जनाय

४. मण्डलम् १, सूक्तम् १०९, मन्त्रः १ (ऋक्सङ्ख्या : ११८९)
वाक्यम् १: वि ह्यख्यं मनसा वस्य इच्छन्निन्द्राग्नी ज्ञास उत वा सजातान्।
पदानि : वि। हि। अख्यम्। मनसा। वस्यः। इच्छन्। इन्द्राग्नी इति। ज्ञासः। उत। वा। सऽजातान्
वाक्यम् २: नान्या युवत्प्रमतिरस्ति मह्यं स वां धियं वाजयन्तीमतक्षम्॥
पदानि : न। अन्या। युवत्। प्रऽमतिः। अस्ति। मह्यम्। सः। वाम्। धियम्। वाजऽयन्तीम्। अतक्षम्

५. मण्डलम् १, सूक्तम् ११४, मन्त्रः ९ (ऋक्सङ्ख्या : १२६४)
वाक्यम् १: उप ते स्तोमान्पशुपा इवाकरं रास्वा पितर्मरुतां सुम्नमस्मे।
पदानि : उप। ते। स्तोमान्। पशुपाःऽइव। आ। अकरम्। रास्व। पितः। मरुताम्। सुम्नम्। अस्मे इति
वाक्यम् २: भद्रा हि ते सुमतिर्मृळयत्तमाथा वयमव इत्ते वृणीमहे॥
पदानि : भद्रा। हि। ते। सुऽमतिः। मृळयत्ऽतमा। अथ। वयम्। अवः। इत्। ते। वृणीमहे

६. मण्डलम् १, सूक्तम् ११९, मन्त्रः २ (ऋक्सङ्ख्या : १३३५)
वाक्यम् १: ऊर्ध्वा धीतिः प्रत्यस्य प्रयामन्यधायि शस्मन्त्समयन्त आ दिशः।
पदानि : ऊर्ध्वा। धीतिः। प्रति। अस्य। प्रऽयामनि। अधायि। शस्मन्। सम्। अयन्ते। आ। दिशः
वाक्यम् २: स्वदामि घर्मं प्रति यन्त्यूतय आ वामूर्जानी रथमश्विनारुहत्॥
पदानि : स्वदामि। घर्मम्। प्रति। यन्ति। ऊतयः। आ। वाम्। ऊर्जानी। रथम्। अश्विना। अरुहत्

७. मण्डलम् १, सूक्तम् १४०, मन्त्रः ५ (ऋक्सङ्ख्या : १५३०)
वाक्यम् १: आदस्य ते ध्वसयन्तो वृथेरते कृष्णमभ्वं महि वर्पः करिक्रतः ।
पदानि : आत् । अस्य । ते । ध्वसयन्तः । वृथा । ईरते । कृष्णम् । अभ्वम् । महि । वर्पः । करिक्रतः
वाक्यम् २: यत्सीं महीमवनिं प्राभि मर्मृशदभिश्वसन्त्स्तनयन्नेति नानदत् ॥
पदानि : यत् । सीम् । महीम् । अवनिम् । प्र । अभि । मर्मृशत् । अभिऽश्वसन् । स्तनयन् । एति । नानदत्

८. मण्डलम् १, सूक्तम् १६४, मन्त्रः २९ (ऋक्सङ्ख्या : १७४४)
वाक्यम् १: अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधिं श्रिता ।
पदानि : अयम् । सः । शिङ्क्ते । येन । गौः । अभिऽवृता । मिमाति । मायुम् । ध्वसनौ । अधिं । श्रिता
वाक्यम् २: सा चित्तिभिर्नि हि चकार मर्त्यं विद्युद्भवन्ती प्रति वव्रिमौहत ॥
पदानि : सा । चित्तिऽभिः । नि । हि । चकार । मर्त्यम् । विऽद्युत् । भवन्ती । प्रति । वव्रिम् । औहत

९. मण्डलम् १, सूक्तम् १६५, मन्त्रः ३ (ऋक्सङ्ख्या : १७७०)
वाक्यम् १: कुतस्त्वमिन्द्र माहिनः सन्नेको यासि सत्पते किं त इत्था ।
पदानि : कुतः । त्वम् । इन्द्र । माहिनः । सन् । एकः । यासि । सत्ऽपते । किम् । ते । इत्था
वाक्यम् २: सं पृच्छसे समराणः शुभानैर्वोचेस्तन्नो हरिवो यत्ते अस्मे ॥
पदानि : सम् । पृच्छसे । सम्ऽअराणः । शुभानैः । वोचेः । तत् । नः । हरिऽवः । यत् । ते । अस्मे इति

१०. मण्डलम् १, सूक्तम् १७३, मन्त्रः ३ (ऋक्सङ्ख्या : १८४३)
वाक्यम् १: नक्षद्धोता परि सद्म मिता यन्भरद्गर्भमा शरदः पृथिव्याः ।
पदानि : नक्षत् । होता । परि । सद्म । मिता । यन् । भरत् । गर्भम् । आ । शरदः । पृथिव्याः
वाक्यम् २: क्रन्ददश्वो नयमानो रुवद्गौरन्तर्दूतो न रोदसी चरद्वाक् ॥
पदानि : क्रन्दत् । अश्वः । नयमानः । रुवत् । गौः । अन्तः । दूतः । न । रोदसी इति । चरत् । वाक्

११. मण्डलम् १, सूक्तम् १७३, मन्त्रः ११ (ऋक्सङ्ख्या : १८५१)
वाक्यम् १: यज्ञो हि ष्मेन्द्रं कश्चिदृन्धञ्जुहुराणश्चिन्मनसा परियन् ।
पदानि : यज्ञः । हि । स्म । इन्द्रम् । कः । चित् । ऋन्धन् । जुहुराणः । चित् । मनसा । परिऽयन्
वाक्यम् २: तीर्थे नाच्छा तातृषाणमोको दीर्घो न सिध्रमा कृणोत्यध्वा ॥
पदानि : तीर्थे । न । अच्छ । ततृषाणम् । ओकः । दीर्घः । न । सिध्रम् । आ । कृणोति । अध्वा

१२. मण्डलम् २, सूक्तम् १, मन्त्रः २ (ऋक्सङ्ख्या : २००८)
वाक्यम् १: तवाग्ने होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निदृतायतः ।
पदानि : तव । अग्ने । होत्रम् । तव । पोत्रम् । ऋत्वियम् । तव । नेष्ट्रम् । त्वम् । अग्नित् । ऋतऽयतः
वाक्यम् २: तव प्रशास्तं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे ॥
पदानि : तव । प्रऽशास्तम् । त्वम् । अध्वरिऽयसि । ब्रह्मा । च । असि । गृहऽपतिः । च । नः । दमे

१३. मण्डलम् २, सूक्तम् १, मन्त्रः ६ (ऋक्सङ्ख्या : २०१२)
वाक्यम् १: त्वमग्ने रुद्रो असुरो महो दिवस्त्वं शर्धो मारुतं पृक्ष ईशिषे ।
पदानि : त्वम् । अग्ने । रुद्रः । असुरः । महः । दिवः । त्वम् । शर्धः । मारुतम् । पृक्षः । ईशिषे
वाक्यम् २: त्वं वातैररुणैर्यासि शंगयस्त्वं पूषा विधतः पासि नु त्मना ॥
पदानि : त्वम् । वातैः । अरुणैः । यासि । शम्ऽगयः । त्वम् । पूषा । विधतः । पासि । नु । त्मना

१४. मण्डलम् २, सूक्तम् १३, मन्त्रः २ (ऋक्सङ्ख्या : २१३३)
वाक्यम् १: सध्रीमा यन्ति परि बिभ्रतीः पयो विश्वप्स्न्याय प्र भरन्त भोजनम्।
पदानि : सध्री। ईम्। आ। यन्ति। परि। बिभ्रतीः। पयः। विश्वऽप्स्न्याय। प्र। भरन्त। भोजनम्
वाक्यम् २: समानो अध्वा प्रवतामनुष्यदे यस्ताकृणोः प्रथमं सास्युक्थ्यः॥
पदानि : समानः। अध्वा। प्रऽवताम्। अनुऽस्यदे। यः। ता। अकृणोः। प्रथमम्। सः। असि। उक्थ्यः

१५. मण्डलम् २, सूक्तम् २३, मन्त्रः १६ (ऋक्सङ्ख्या : २२३७)
वाक्यम् १: मा नः स्तेनेभ्यो ये अभि द्रुहस्पदे निरामिणो रिपवोऽन्नेषु जागृधुः।
पदानि : मा। नः। स्तेनेभ्यः। ये। अभि। द्रुहः। पदे। निरामिणः। रिपवः। अन्नेषु। जगृधुः
वाक्यम् २: आ देवानामोहते वि व्रयो हृदि बृहस्पते न परः साम्नो विदुः॥
पदानि : आ। देवानाम्। ओहते। वि। व्रयः। हृदि। बृहस्पते। न। परः। साम्नः। विदुः

१६. मण्डलम् २, सूक्तम् २८, मन्त्रः ६ (ऋक्सङ्ख्या : २२८८)
वाक्यम् १: अपो सु म्यक्ष वरुण भियसं मत्सम्राळृतावोऽनु मा गृभाय।
पदानि : अपो इति। सु। म्यक्ष। वरुण। भियसम्। मत्। सम्ऽराट्। ऋतऽवः। अनु। मा। गृभाय
वाक्यम् २: दामेव वत्साद्वि मुमुग्ध्यंहो नहि त्वदारे निमिषश्चनेशे॥
पदानि : दामऽइव। वत्सात्। वि। मुमुग्धि। अंहः। नहि। त्वत्। आरे। निऽमिषः। चन। ईशे

१७. मण्डलम् २, सूक्तम् २९, मन्त्रः ५ (ऋक्सङ्ख्या : २२९८)
वाक्यम् १: प्र व एको मिमय भूर्यागो यन्मा पितेव कितवं शशास।
पदानि : प्र। वः। एकः। मिमय। भूरि। आगः। यत्। मा। पिताऽइव। कितवम्। शशास
वाक्यम् २: आरे पाशा आरे अघानि देवा मा माधि पुत्रे विमिव ग्रभीष्ट॥
पदानि : आरे। पाशाः। आरे। अघानि। देवाः। मा। मा। अधि। पुत्रे। विम्ऽइव। ग्रभीष्ट

१८. मण्डलम् २, सूक्तम् ३८, मन्त्रः ४ (ऋक्सङ्ख्या : २३८७)
वाक्यम् १: पुनः समव्यद्वितं वयन्ती मध्या कर्तोर्न्यधाच्छक्म धीरः।
पदानि : पुनरिति। सम्। अव्यत्। विऽततम्। वयन्ती। मध्या। कर्तोः। नि। अधात्। शक्म। धीरः
वाक्यम् २: उत्संहायास्थाद्वयृ१तूँरदर्धरमतिः सविता देव आगात्॥
पदानि : उत्। सम्ऽहाय। अस्थात्। वि। ऋतून्। अदुर्धः। अरमतिः। सविता। देवः। आ। अगात्

१९. मण्डलम् ३, सूक्तम् ३१, मन्त्रः १४ (ऋक्सङ्ख्या : २७२९)
वाक्यम् १: मह्या ते सख्यं वश्मि शक्तीरा वृत्रघ्ने नियुतो यन्ति पूर्वीः।
पदानि : महि। आ। ते। सख्यम्। वश्मि। शक्तीः। आ। वृत्रऽघ्ने। निऽयुतः। यन्ति। पूर्वीः
वाक्यम् २: महि स्तोत्रमव आगन्म सूरेरस्माकं सु मघवन्बोधि गोपाः॥
पदानि : महि। स्तोत्रम्। अवः। आ। अगन्म। सूरेः। अस्माकम्। सु। मघऽवन्। बोधि। गोपाः

२०. मण्डलम् ३, सूक्तम् ५८, मन्त्रः ४ (ऋक्सङ्ख्या : ३००६)
वाक्यम् १: आ मन्येथामा गतं कच्चिदेवैर्विश्वे जनासो अश्विना हवन्ते।
पदानि : आ। मन्येथाम्। आ। गतम्। कत्। चित्। एवैः। विश्वे। जनासः। अश्विना। हवन्ते

वाक्यम् २: इ॒मा हि वां॑ गोऋ॑जीका॒ मधू॑नि॒ प्र मि॒त्रासो॒ न द॑दुरु॒स्रो अग्रे॑ ॥
पदानि : इ॒मा । हि । वा॒म् । गोऽऋ॑जीका । मधू॑नि । प्र । मि॒त्रासः॑ । न । द॒दुः॒ । उ॒स्रः । अग्रे॑

२१. मण्डलम् ४, सूक्तम् २३, मन्त्रः ६ (ऋक्सङ्ख्या : ३३२१)
वाक्यम् १: किमाद॑मंत्रं सु॒ख्यं सखि॑भ्यः क॒दा नु ते भ्रात्रं॑ प्र ब्र॑वाम ।
पदानि : किम् । आत् । अम॑न्त्रम् । सु॒ख्यम् । सखि॑ऽभ्यः । क॒दा । नु । ते॒ । भ्रात्र॑म् । प्र । ब्र॒वा॒म॒
वाक्यम् २: श्रि॒ये सु॒दृशो॒ वपु॑रस्य॒ सर्गाः॒ स्व१॒॑र्ण चि॒त्रत॑ममिष॒ आ गोः ॥
पदानि : श्रि॒ये । सु॒ऽदृशः॑ । वपुः॑ । अ॒स्य॒ । सर्गाः॑ । स्वः॑ । न । चि॒त्रऽत॑मम् । इ॒षे॒ । आ । गोः

२२. मण्डलम् ४, सूक्तम् २४, मन्त्रः ५ (ऋक्सङ्ख्या : ३३३१)
वाक्यम् १: आदिद्ध॒ नेम॑ इन्द्रि॒यं य॑जन्त॒ आदित्प॒क्तिः पु॑रो॒ळाश॑ं रिरिच्यात् ।
पदानि : आत् । इत् । ह॒ । नेमे॑ । इ॒न्द्रि॒यम् । य॒ज॒न्ते॒ । आत् । इत् । प॒क्तिः । पु॒रो॒ळाश॑म् । रि॒रि॒च्या॒त् ।
वाक्यम् २: आदित्सोमो॒ वि प॑पृच्या॒दसु॑ष्वी॒नादि॑ज्जु॒जोष॑ वृष॒भं यज॑ध्यै ॥
पदानि : आत् । इत् । सोमः॑ । वि । प॒पृ॒च्या॒त् । असु॑स्वीन् । आत् । इत् । जु॒जो॒ष॒ । वृ॒ष॒भम् । यज॑ध्यै

२३. मण्डलम् ४, सूक्तम् ३३, मन्त्रः ५ (ऋक्सङ्ख्या : ३४३५)
वाक्यम् १: ज्ये॒ष्ठ आ॑ह चम॒सा द्वा क॒रेति॒ कनी॑या॒न्त्रीन्कृ॑णवा॒मेत्या॑ह ।
पदानि : ज्ये॒ष्ठः । आ॒ह॒ । च॒म॒सा । द्वा । क॒र॒ । इति॑ । कनी॑यान् । त्रीन् । कृ॒ण॒वा॒म॒ । इति॑ । आ॒ह॒
वाक्यम् २: क॒नि॒ष्ठ आ॑ह चतु॒रस्क॒रेति॒ त्वष्टः॑ ऋभव॒स्तत्प॑नयद्वचो॑ वः ॥
पदानि : क॒नि॒ष्ठः । आ॒ह॒ । च॒तुरः॑ । क॒र॒ । इति॑ । त्वष्टा॑ । ऋ॒भ॒वः॒ । तत् । प॒न॒य॒त् । वचः॑ । वः॒

२४. मण्डलम् ४, सूक्तम् ३६, मन्त्रः ७ (ऋक्सङ्ख्या : ३४६८)
वाक्यम् १: श्रेष्ठं॑ वः॒ पेशो॒ अधि॑ धायि दर्श॒तं स्तोमो॑ वाजा ऋभवस्तं॑ जु॒जु॒ष्टन ।
पदानि : श्रेष्ठ॑म् । वः॒ । पेशः॑ । अधि॑ । धा॒यि॒ । दर्श॒तम् । स्तोमः॑ । वा॒जाः॒ । ऋ॒भ॒वः॒ । तम् । जु॒जु॒ष्ट॒न॒
वाक्यम् २: धीरा॑सो॒ हि ष्ठा क॒वयो॑ विपश्चि॒तस्तान्व॑ एना ब्रह्म॒णा वे॑दयामसि ॥
पदानि : धीरा॑सः । हि । स्थ । क॒वयः॑ । वि॒प॒ःऽचितः॑ । तान् । वः॒ । ए॒ना । ब्र॒ह्म॒णा । आ । वे॒द॒या॒म॒सि॒

२५. मण्डलम् ४, सूक्तम् ४३, मन्त्रः ६ (ऋक्सङ्ख्या : ३५२६)
वाक्यम् १: सिन्धु॑र्ह वां र॒सया॑ सिञ्चदश्वा॒न्घृणा वयो॑ऽरुषासः॒ परि॑ ग्मन् ।
पदानि : सिन्धुः॑ । ह॒ । वा॒म् । र॒सया॑ । सि॒ञ्च॒त् । अश्वा॑न् । घृणा । वयः॑ । अ॒रु॒षासः॑ । परि॑ । ग्म॒न् ।
वाक्यम् २: तदू॒ षु वा॑मजि॒रं चे॒ति॒ यानं॒ येन॒ पती॒ भव॑थः सू॒र्यायाः॑ ॥
पदानि : तत् । ऊँ॒ इति॑ । सु । वा॒म् । अ॒जि॒रम् । चे॒ति॒ । यान॑म् । येन॑ । पती॒ इति॑ । भव॑थः । सू॒र्यायाः॑

२६. मण्डलम् ४, सूक्तम् ५३, मन्त्रः ७ (ऋक्सङ्ख्या : ३५९९)
वाक्यम् १: आग॑न्दे॒व ऋ॒तुभि॒र्वर्ध॑तु क्ष॒यं द॑धा॒तु॒ नः स॒वि॒ता सु॑प्र॒जामिष॑म् ।
पदानि : आ । अ॒ग॒न् । दे॒वः । ऋ॒तुऽभिः॑ । वर्ध॑तु । क्ष॒य॑म् । द॒धा॒तु॒ । नः॒ । स॒वि॒ता । सु॒ऽप्र॒जाम् । इष॑म् ।
वाक्यम् २: स नः॑ क्षपाभि॒रह॑भिश्च जिन्वतु प्र॒जाव॑न्तं र॒यिम॒स्मे समि॑न्वतु ॥
पदानि : सः । नः॒ । क्ष॒पा॒भिः॑ । अह॑ऽभिः । च॒ । जि॒न्व॒तु॒ । प्र॒जाऽव॑न्तम् । र॒यिम् । अ॒स्मे इति॑ । सम् । इ॒न्व॒तु॒

२७. मण्डलम् ५, सूक्तम् ३४, मन्त्रः ४ (ऋक्सङ्ख्या : ३९०८)

वाक्यम् १: यस्यावंधीत्पितरं यस्य मातरं यस्य शक्रो भ्रातरं नात ईषते ।
पदानि : यस्य । अवंधीत् । पितरम् । यस्य । मातरम् । यस्य । शक्रः । भ्रातरम् । न । अतः । ईषते
वाक्यम् २: वेतीद्वस्य प्रयंता यतंकरो न किल्बिषादीषते वस्वं आकरः ॥
पदानि : वेति । इत् । ऊँ इति । अस्य । प्रऽयंता । यतम्ऽकरः । न । किल्बिषात् । ईषते । वस्वः । आऽकरः

२८. मण्डलम् ५, सूक्तम् ३४, मन्त्रः ७ (ऋक्सङ्ख्या : ३९११)
वाक्यम् १: समीं पणेरंजति भोजनं मुषे वि दाशुषे भजति सूनरं वसु ।
पदानि : सम् । ईम् । पणेः । अजति । भोजनम् । मुषे । वि । दाशुषे । भजति । सूनरम् । वसु
वाक्यम् २: दुर्गे चन घ्रियते विश्व आ पुरु जनो यो अस्य तविषीमचुक्रुधत् ॥
पदानि : दुःऽगे । चन । घ्रियते । विश्वः । आ । पुरु । जनः । यः । अस्य । तविषीम् । अचुक्रुधत्

२९. मण्डलम् ५, सूक्तम् ४०, मन्त्रः ७ (ऋक्सङ्ख्या : ३९४९)
वाक्यम् १: मा मामिमं तव सन्तमत्र इरस्या द्रुग्धो भियसा नि गारीत् ।
पदानि : मा । माम् । इमम् । तवं । सन्तम् । अत्रे । इरस्या । द्रुग्धः । भियसा । नि । गारीत्
वाक्यम् २: त्वं मित्रो असि सत्यराधास्तौ मेहावंतं वरुणश्च राजा ॥
पदानि : त्वम् । मित्रः । असि । सत्यऽराधाः । तौ । मा । इह । अवतम् । वरुणः । च । राजा

३०. मण्डलम् ५, सूक्तम् ४४, मन्त्रः १४ (ऋक्सङ्ख्या : ४०२०)
वाक्यम् १: यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति ।
पदानि : यः । जागार । तम् । ऋचः । कामयन्ते । यः । जागार । तम् । ऊँ इति । सामानि । यन्ति
वाक्यम् २: यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ॥
पदानि : यः । जागार । तम् । अयम् । सोमः । आह । तवं । अहम् । अस्मि । सख्ये । निऽओकाः

३१. मण्डलम् ५, सूक्तम् ५३, मन्त्रः ९ (ऋक्सङ्ख्या : ४१०३)
वाक्यम् १: मा वो रसानितभा कुभा क्रुमुर्मा वः सिन्धुर्नि रीरमत् ।
पदानि : मा । वः । रसा । अनितभा । कुभा । क्रुमुः । मा । वः । सिन्धुः । नि । रीरमत्
वाक्यम् २: मा वः परिं ष्ठात्सरयुः पुरीषिण्यस्मे इत्सुम्नमस्तु वः ॥
पदानि : मा । वः । परिं । स्थात् । सरयुः । पुरीषिणी । अस्मे इतिं । इत् । सुम्नम् । अस्तु । वः

३२. मण्डलम् ५, सूक्तम् ५४, मन्त्रः १५ (ऋक्सङ्ख्या : ४१२५)
वाक्यम् १: तद्वो यामि द्रविणं सद्यऊतयो येना स्व१र्ण ततनाम नॄरभि ।
पदानि : तत् । वः । यामि । द्रविणम् । सद्यःऽऊतयः । येन । स्वः । न । ततनाम । नॄन् । अभि
वाक्यम् २: इदं सु मे मरुतो हर्यता वचो यस्य तरेम तरसा शतं हिमाः ॥
पदानि : इदम् । सु । मे । मरुतः । हर्यत । वचः । यस्य । तरेम । तरसा । शतम् । हिमाः

३३. मण्डलम् ५, सूक्तम् ५७, मन्त्रः ६ (ऋक्सङ्ख्या : ४१५०)
वाक्यम् १: ऋष्टयो वो मरुतो अंसयोरधि सह ओजो बाह्वोर्वो बलं हितम् ।
पदानि : ऋष्टयः । वः । मरुतः । अंसयोः । अधिं । सहः । ओजः । बाह्वोः । वः । बलम् । हितम्
वाक्यम् २: नृम्णा शीर्षस्वायुधा रथेषु वो विश्वा वः श्रीरधिं तनूषु पिपिशे ॥
पदानि : नृम्णा । शीर्षऽसु । आयुधा । रथेषु । वः । विश्वा । वः । श्रीः । अधिं । तनूषु । पिपिशे

३४. मण्डलम् ५, सूक्तम् ८१, मन्त्रः ५ (ऋक्सङ्ख्या : ४३२३)
वाक्यम् १: उतेशिषे प्रसवस्य त्वमेक इदुत पूषा भवसि देव यामभिः ।
पदानि : उत । ईशिषे । प्रऽसवस्य । त्वम् । एकः । इत् । उत । पूषा । भवसि । देव । यामऽभिः
वाक्यम् २: उतेदं विश्वं भुवनं वि राजसि श्यावाश्वस्ते सवितः स्तोममानशे ॥
पदानि : उत । इदम् । विश्वम् । भुवनम् । वि । राजसि । श्यावऽअश्वः । ते । सवितरिति । स्तोमम् । आनशे

३५. मण्डलम् ६, सूक्तम् १३, मन्त्रः ४ (ऋक्सङ्ख्या : ४४६६)
वाक्यम् १: यस्ते सूनो सहसो गीर्भिरुक्थैर्यज्ञैर्मर्तो निशितिं वेद्यानट् ।
पदानि : यः । ते । सूनो इति । सहसः । गीःऽभिः । उक्थैः । यज्ञैः । मर्तः । निऽशितिम् । वेद्या । आनट्
वाक्यम् २: विश्वं स देव प्रति वारमग्ने धत्ते धान्यं१ पत्यते वसव्यैः ॥
पदानि : विश्वम् । सः । देव । प्रति । वा । अरम् । अग्ने । धत्ते । धान्यम् । पत्यते । वसव्यैः

३६. मण्डलम् ६, सूक्तम् १७, मन्त्रः २ (ऋक्सङ्ख्या : ४५४३)
वाक्यम् १: स ईं पाहि य ऋजीषी तरुत्रो यः शिप्रवान्वृषभो यो मतीनाम् ।
पदानि : सः । ईम् । पाहि । यः । ऋजीषी । तरुत्रः । यः । शिप्रऽवान् । वृषभः । यः । मतीनाम्
वाक्यम् २: यो गोत्रभिद्वज्रभृद्यो हरिष्ठाः स इन्द्र चित्राँ अभि तृन्धि वाजान् ॥
पदानि : यः । गोत्रऽभित् । वज्रऽभृत् । यः । हरिऽस्थाः । सः । इन्द्र । चित्रान् । अभि । तृन्धि । वाजान्

३७. मण्डलम् ६, सूक्तम् १७, मन्त्रः १४ (ऋक्सङ्ख्या : ४५५५)
वाक्यम् १: स नो वाजाय श्रवस इषे चं राये धेहि द्युमत इन्द्र विप्रान् ।
पदानि : सः । नः । वाजाय । श्रवसे । इषे । च । राये । धेहि । द्युऽमतः । इन्द्र । विप्रान्
वाक्यम् २: भरद्वाजे नृवत इन्द्र सूरीन्दिवि चं स्मैधि पार्ये न इन्द्र ॥
पदानि : भरत्ऽवाजे । नृऽवतः । इन्द्र । सूरीन् । दिवि । च । स्म । एधि । पार्ये । नः । इन्द्र

३८. मण्डलम् ६, सूक्तम् १९, मन्त्रः ९ (ऋक्सङ्ख्या : ४५८०)
वाक्यम् १: आ ते शुष्मो वृषभ एतु पश्चादोत्तरादधरादा पुरस्तात् ।
पदानि : आ । ते । शुष्मः । वृषभः । एतु । पश्चात् । आ । उत्तरात् । अधरात् । आ । पुरस्तात्
वाक्यम् २: आ विश्वतो अभि समेत्वर्वाङिन्द्र द्युम्नं स्वर्वद्धेह्यस्मे ॥
पदानि : आ । विश्वतः । अभि । सम् । एतु । अर्वाङ् । इन्द्र । द्युम्नम् । स्वःऽवत् । धेहि । अस्मे इति

३९. मण्डलम् ६, सूक्तम् ४०, मन्त्रः १ (ऋक्सङ्ख्या : ४७३०)
वाक्यम् १: इन्द्र पिब तुभ्यं सुतो मदायावं स्य हरी वि मुचा सखाया ।
पदानि : इन्द्र । पिब । तुभ्यम् । सुतः । मदाय । अव । स्य । हरी इति । वि । मुच । सखाया
वाक्यम् २: उत प्र गाय गण आ निषद्याथा यज्ञाय गृणते वयो धाः ॥
पदानि : उत । प्र । गाय । गणे । आ । निऽसद्य । अथ । यज्ञाय । गृणते । वयः । धाः

४०. मण्डलम् ६, सूक्तम् ५०, मन्त्रः ९ (ऋक्सङ्ख्या : ४८९५)
वाक्यम् १: उत त्वं सूनो सहसो नो अद्या देवाँ अस्मिन्नध्वरे ववृत्याः ।
पदानि : उत । त्वम् । सूनो इति । सहसः । नः । अद्य । आ । देवान् । अस्मिन् । अध्वरे । ववृत्याः
वाक्यम् २: स्यामहं ते सदमिद्रातौ तव स्याम्ग्नेऽवसा सुवीरः ॥

पदानि : स्याम्। अहम्। ते। सदम्। इत्। रातौ। तवं। स्याम्। अग्ने। अवसा। सुऽवीरः

४१. मण्डलम् ६, सूक्तम् ५१, मन्त्रः ८ (ऋक्सङ्ख्या : ४९०९)
वाक्यम् १: नम इदुग्रं नम आ विवासे नमो दाधार पृथिवीमुत द्याम्।
पदानि : नमः। इत्। उग्रम्। नमः। आ। विवासे। नमः। दाधार। पृथिवीम्। उत। द्याम्
वाक्यम् २: नमो देवेभ्यो नमं ईश एषां कृतं चिदेनो नमसा विवासे॥
पदानि : नमः। देवेभ्यः। नमः। ईशे। एषाम्। कृतम्। चित्। एनः। नमसा। आ। विवासे

४२. मण्डलम् ६, सूक्तम् ६६, मन्त्रः ५ (ऋक्सङ्ख्या : ५०५४)
वाक्यम् १: मक्षू न येषु दोहसे चिदया आ नामं धृष्णु मारुतं दधानाः।
पदानि : मक्षु। न। येषु। दोहसे। चित्। अयाः। आ। नामं। धृष्णु। मारुतम्। दधानाः
वाक्यम् २: न ये स्तौना अयासो मह्ना नू चित्सुदानुरवं यासदुग्रान्॥
पदानि : न। ये। स्तौनाः। अयासः। मह्ना। नु। चित्। सुऽदानुः। अवं। यासत्। उग्रान्

४३. मण्डलम् ७, सूक्तम् ७, मन्त्रः ६ (ऋक्सङ्ख्या : ५२११)
वाक्यम् १: एते द्युम्नेभिर्विश्वमातिरन्त मन्त्रं ये वारं नर्या अतक्षन्।
पदानि : एते। द्युम्नेभिः। विश्वम्। आ। अतिरन्त। मन्त्रम्। ये। वा। अरम्। नर्याः। अतक्षन्
वाक्यम् २: प्र ये विशस्तिरन्त श्रोषमाणा आ ये मे अस्य दीधयन्नृतस्यं॥
पदानि : प्र। ये। विशः। तिरन्त। श्रोषमाणाः। आ। ये। मे। अस्य। दीधयन्। ऋतस्यं

४४. मण्डलम् ७, सूक्तम् १८, मन्त्रः ११ (ऋक्सङ्ख्या : ५२८९)
वाक्यम् १: एकं च यो विंशतिं चं श्रवस्या वैकर्णयोर्जनात्राजा न्यस्तः।
पदानि : एकम्। च। यः। विंशतिम्। च। श्रवस्या। वैकर्णयोः। जनान्। राजा। नि। अस्तरित्यस्तः
वाक्यम् २: दस्मो न सद्मन्नि शिशाति बर्हिः शूरः सर्गमकृणोदिन्द्र एषाम्॥
पदानि : दस्मः। न। सद्मन्। नि। शिशाति। बर्हिः। शूरः। सर्गम्। अकृणोत्। इन्द्रः। एषाम्

४५. मण्डलम् ७, सूक्तम् २१, मन्त्रः ६ (ऋक्सङ्ख्या : ५३३०)
वाक्यम् १: अभि क्रत्वेन्द्र भूरध ज्मन्न ते विव्यङ्महिमानं रजांसि।
पदानि : अभि। क्रत्वा। इन्द्र। भूः। अधं। ज्मन्। न। ते। विव्यक्। महिमानम्। रजांसि
वाक्यम् २: स्वेना हि वृत्रं शवसा जघन्थ न शत्रुरन्तं विविदद्युधा ते॥
पदानि : स्वेनं। हि। वृत्रम्। शवसा। जघन्थ। न। शत्रुः। अन्तम्। विविदत्। युधा। ते

४६. मण्डलम् ७, सूक्तम् २८, मन्त्रः २ (ऋक्सङ्ख्या : ५३७३)
वाक्यम् १: हवं त इन्द्र महिमा व्यानड्ब्रह्म यत्पासिं शवसिन्नृषीणाम्।
पदानि : हवम्। ते। इन्द्र। महिमा। वि। आनट्। ब्रह्म। यत्। पासिं। शवसिन्। ऋषीणाम्
वाक्यम् २: आ यद्वज्रं दधिषे हस्तं उग्र घोरः सन्क्रत्वा जनिष्ठा अषाळ्हः॥
पदानि : आ। यत्। वज्रम्। दधिषे। हस्ते। उग्र। घोरः। सन्। क्रत्वा। जनिष्ठाः। अषाळ्हः

४७. मण्डलम् ७, सूक्तम् ३८, मन्त्रः ३ (ऋक्सङ्ख्या : ५४९९)
वाक्यम् १: अपिं ष्टुतः सविता देवो अस्तु यमा चिद्विश्वे वसवो गृणन्तिं।

पदानि : अपि॑। स्तुतः। स॒वि॒ता। दे॒वः। अ॒स्तु॒। यम्। आ। चि॒त्। विश्वे॑। वस॑वः। गृ॒ण॒न्ति॑
वाक्यम् २: स नः॒ स्तोमा॑न्नमस्य१श्चनो॑ धाद्विश्वेभिः पातु पा॒युभि॒र्नि सू॒रीन्॥
पदानि : सः। नः॒। स्तोमा॑न्। न॒म॒स्यः॑। चनः॑। धा॒त्। विश्वे॑भिः। पा॒तु॒। पा॒युऽभिः॑। नि। सू॒रीन्

४८. मण्डलम् ७, सूक्तम् ४१, मन्त्रः ३ (ऋक्सङ्ख्या : ५५२१)
वाक्यम् १: भग॒ प्रणे॑तर्भग॒ सत्य॑रा॒धो भगे॒मां धिय॒मुद॑वा॒ दद॑न्नः।
पदानि : भग॑। प्रने॑तरिति॒ प्रऽने॑तः। भग॑। सत्य॑ऽराधः। भग॑। इ॒माम्। धिय॑म्। उत्। अ॒व॒। दद॑त्। नः॒
वाक्यम् २: भग॒ प्र णो॑ जनय॒ गोभि॒रश्वै॒र्भग॒ प्र नृभि॑र्नृ॒वन्तः॑ स्याम॥
पदानि : भग॑। प्र। नः॒। ज॒न॒य॒। गोभिः॑। अश्वैः॑। भग॑। प्र। नृऽभिः॑। नृ॒ऽवन्तः॑। स्या॒म॒

४९. मण्डलम् ७, सूक्तम् ५६, मन्त्रः २१ (ऋक्सङ्ख्या : ५६०६)
वाक्यम् १: मा वो॑ दा॒त्रान्म॑रुतो निर॑राम॒ मा प॒श्चाद्घ्म रथ्यो॑ विभा॒गे।
पदानि : मा। वः॒। दा॒त्रात्। म॒रु॒तः॒। निः। अ॒रा॒म॒। मा। प॒श्चात्। दु॒ध्म॒। र॒थ्यः॑। वि॒ऽभा॒गे
वाक्यम् २: आ नः॑ स्पा॒र्हे भ॑जतना वस॒व्ये३॑ यदी॑ सु॒जा॒तं वृ॑षणो वो॒ अस्ति॑॥
पदानि : आ। नः॒। स्पा॒र्हे। भ॒ज॒त॒न॒। व॒स॒व्ये। यत्। ई॒म्। सु॒ऽजा॒तम्। वृ॒ष॒णः॒। वः॒। अस्ति॑

५०. मण्डलम् ७, सूक्तम् ५७, मन्त्रः ४ (ऋक्सङ्ख्या : ५६१४)
वाक्यम् १: ऋध॒क्सा वो॑ मरुतो दि॒द्यु॑दस्तु यद्व आगः॑ पुरुषता॒ करा॑म।
पदानि : ऋध॑क्। सा। वः॒। म॒रु॒तः॒। दि॒द्यु॑त्। अ॒स्तु॒। यत्। वः॒। आगः॑। पु॒रु॒षता॑। करा॑म
वाक्यम् २: मा व॒स्तस्या॒मपि॑ भूमा यजत्रा अ॒स्मे वो॑ अस्तु सुम॒तिश्चनि॑ष्ठा॥
पदानि : मा। वः॒। तस्या॑म्। अपि॑। भू॒म॒। य॒ज॒त्राः॒। अ॒स्मे इति॑। वः॒। अ॒स्तु॒। सु॒ऽम॒तिः। चनि॑ष्ठा

५१. मण्डलम् ७, सूक्तम् ६९, मन्त्रः ५ (ऋक्सङ्ख्या : ५७१९)
वाक्यम् १: यो ह॒ स्य वां॑ रथिरा॒ वस्त॑ उ॒स्रा रथो॑ युजा॒नः प॑रि॒यात॑ि व॒र्तिः।
पदानि : यः। ह॒। स्यः। वा॒म्। र॒थि॒रा॒। वस्ते। उ॒स्राः। रथः॑। युजा॒नः। प॒रि॒ऽयाति॑। व॒र्तिः
वाक्यम् २: तेन॑ नः॒ शं योरु॒षसो॒ व्यु॑ष्टौ॒ न्य॑श्विना वहतं य॒ज्ञे अ॒स्मिन्॥
पदानि : तेन॑। नः॒। शम्। योः। उ॒षसः॑। विऽउ॑ष्टौ। नि। अ॒श्वि॒ना॒। व॒ह॒त॒म्। य॒ज्ञे। अ॒स्मिन्

५२. मण्डलम् ७, सूक्तम् ७०, मन्त्रः १ (ऋक्सङ्ख्या : ५७२३)
वाक्यम् १: आ वि॑श्ववाराश्विना गतं नः॒ प्र तत्स्थान॑मवाचि वां पृथि॒व्याम्।
पदानि : आ। वि॒श्व॒ऽवा॒रा॒। अ॒श्वि॒ना॒। ग॒त॒म्। नः॒। प्र। तत्। स्थान॑म्। अ॒वा॒चि॒। वा॒म्। पृ॒थि॒व्याम्
वाक्यम् २: अश्वो॒ न वा॒जी शु॒नपृ॑ष्ठो अस्था॒दा यत्से॒दथु॑र्ध्रु॒वसे॒ न योनि॑म्॥
पदानि : अश्वः॑। न। वा॒जी। शु॒नऽपृ॑ष्ठः। अ॒स्था॒त्। आ। यत्। से॒दथुः॑। ध्रु॒वसे॑। न। योनि॑म्

५३. मण्डलम् ७, सूक्तम् ८२, मन्त्रः ८ (ऋक्सङ्ख्या : ५७९९)
वाक्यम् १: अ॒र्वाङ्नरा॒ दैव्ये॑नाव॒सा ग॑तं शृणुतं हव॑ं यदि॑ मे॒ जुजो॑षथः।
पदानि : अ॒र्वाक्। नरा॒। दैव्ये॑न। अ॒व॒सा। आ। ग॒त॒म्। शृ॒णु॒त॒म्। हव॑म्। यदि॑। मे॒। जुजो॑षथः
वाक्यम् २: युवोर्हि स॒ख्यमुत वा॒ यदाप्यं॑ मार्डी॒कमि॑न्द्रावरुणा॒ नि य॑च्छतम्॥
पदानि : यु॒वोः॒। हि। स॒ख्यम्। उ॒त। वा॒। यत्। आप्य॑म्। मा॒र्डी॒कम्। इ॒न्द्रा॒व॒रु॒णा॒। नि। य॒च्छ॒त॒म्

५४. मण्डलम् ९, सूक्तम् ७७, मन्त्रः २ (ऋक्सङ्ख्या : ८३७८)
वाक्यम् १: स पूर्व्यः पवते यं दिवस्परि श्येनो मथायदिषितस्तिरो रजः ।
पदानि : सः । पूर्व्यः । पवते । यम् । दिवः । परि । श्येनः । मथायत् । इषितः । तिरः । रजः
वाक्यम् २: स मध्व आ युवते वेविजान इत्कृशानोरस्तुर्मनसाह बिभ्युषा ॥
पदानि : सः । मध्वः । आ । युवते । वेविजानः । इत् । कृशानोः । अस्तुः । मनसा । अह । बिभ्युषा

५५. मण्डलम् ९, सूक्तम् ७९, मन्त्रः ४ (ऋक्सङ्ख्या : ८३९०)
वाक्यम् १: दिवि ते नाभा परमो य आददे पृथिव्यास्ते रुरुहुः सानवि क्षिपः ।
पदानि : दिवि । ते । नाभा । परमः । यः । आऽददे । पृथिव्याः । ते । रुरुहुः । सानवि । क्षिपः
वाक्यम् २: अद्रयस्त्वा बप्सति गोरधि त्वच्य१प्सु त्वा हस्तैर्दुदुहुर्मनीषिणः ॥
पदानि : अद्रयः । त्वा । बप्सति । गोः । अधि । त्वचि । अप्ऽसु । त्वा । हस्तैः । दुदुहुः । मनीषिणः

५६. मण्डलम् ९, सूक्तम् ८६, मन्त्रः १५ (ऋक्सङ्ख्या : ८४४३)
वाक्यम् १: सो अस्य विशे महि शर्म यच्छति यो अस्य धामं प्रथमं व्यानशे ।
पदानि : सः । अस्य । विशे । महि । शर्म । यच्छति । यः । अस्य । धामं । प्रथमम् । विऽआनशे
वाक्यम् २: पदं यदस्य परमे व्योमन्यतो विश्वा अभि सं याति संयतः ॥
पदानि : पदम् । यत् । अस्य । परमे । विऽओमनि । अतः । विश्वाः । अभि । सम् । याति । सम्ऽयतः

५७. मण्डलम् १०, सूक्तम् १६, मन्त्रः ३ (ऋक्सङ्ख्या : ८९३५)
वाक्यम् १: सूर्यं चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ पृथिवीं च धर्मणा ।
पदानि : सूर्यम् । चक्षुः । गच्छतु । वातम् । आत्मा । द्याम् । च । गच्छ । पृथिवीम् । च । धर्मणा
वाक्यम् २: अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रतिं तिष्ठा शरीरैः ॥
पदानि : अपः । वा । गच्छ । यदि । तत्र । ते । हितम् । ओषधीषु । प्रतिं । तिष्ठ । शरीरैः

५८. मण्डलम् १०, सूक्तम् १८, मन्त्रः १ (ऋक्सङ्ख्या : ८९६१)
वाक्यम् १: परं मृत्यो अनु परेहि पन्थां यस्ते स्व इतरो देवयानात् ।
पदानि : परम् । मृत्यो इतिं । अनु । परा । इहि । पन्थाम् । यः । ते । स्वः । इतरः । देवऽयानात् ।
वाक्यम् २: चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् ॥
पदानि : चक्षुष्मते । शृण्वते । ते । ब्रवीमि । मा । नः । प्रऽजाम् । रिरिषः । मा । उत । वीरान्

५९. मण्डलम् १०, सूक्तम् २७, मन्त्रः ५ (ऋक्सङ्ख्या : ९०५३)
वाक्यम् १: न वा उ मां वृजने वारयन्ते न पर्वतासो यदहं मनस्ये ।
पदानि : न । वै । ऊँ इतिं । माम् । वृजने । वारयन्ते । न । पर्वतासः । यत् । अहम् । मनस्ये
वाक्यम् २: मम स्वनात्क्रुधुकर्णो भयात एवेदनु द्यून्किरणः समेजात् ॥
पदानि : मम । स्वनात् । क्रुधुऽकर्णः । भयाते । एव । इत् । अनु । द्यून् । किरणः । सम् । एजात्

६०. मण्डलम् १०, सूक्तम् ३४, मन्त्रः १४ (ऋक्सङ्ख्या : ९१५०)
वाक्यम् १: मित्रं कृणुध्वं खलु मृळता नो मा नो घोरेण चरताभि धृष्णु ।
पदानि : मित्रम् । कृणुध्वम् । खलु । मृळत । नः । मा । नः । घोरेण । चरत । अभि । धृष्णु
वाक्यम् २: नि वो नु मन्युर्विशतामरातिरन्यो बभ्रूणां प्रसितौ न्वस्तु ॥
पदानि : नि । वः । नु । मन्युः । विशताम् । अरातिः । अन्यः । बभ्रूणाम् । प्रऽसितौ । नु । अस्तु

६१. मण्डलम् १०, सूक्तम् ४०, मन्त्रः २ (ऋक्सङ्ख्या : ९२११)
वाक्यम् १: कुहꣳ स्विद्दोषा कुहꣳ वस्तोरश्विना कुहाभिपित्वं करतः कुहोषतुः ।
पदानि : कुहꣳ । स्वित् । दोषा । कुहꣳ । वस्तोः । अश्विना । कुहꣳ । अभिऽपित्वम् । करतः । कुहꣳ । ऊषतुः
वाक्यम् २: को वां शयुत्रा विधवेव देवरं मर्यं न योषा कृणुते सधस्थ आ ॥
पदानि : कः । वाम् । शयुऽत्रा । विधवाऽइव । देवरम् । मर्यम् । न । योषा । कृणुते । सधऽस्थे । आ

६२. मण्डलम् १०, सूक्तम् ४०, मन्त्रः ६ (ऋक्सङ्ख्या : ९२१५)
वाक्यम् १: युवं कवी ष्ठः पर्यश्विना रथं विशो न कुत्सो जरितुर्नशायथः ।
पदानि : युवम् । कवी इति । स्थः । परि । अश्विना । रथम् । विशः । न । कुत्सः । जरितुः । नशायथः
वाक्यम् २: युवोर्हु मक्षा पर्यश्विना मध्वासा भरत निष्कृतं न योषणा ॥
पदानि : युवोः । हु । मक्षा । परि । अश्विना । मधु । आसा । भरत । निःऽकृतम् । न । योषणा

६३. मण्डलम् १०, सूक्तम् ४०, मन्त्रः ७ (ऋक्सङ्ख्या : ९२१६)
वाक्यम् १: युवं ह भुज्युं युवमश्विना वशं युवं शिञ्जारमुशनामुपारथुः ।
पदानि : युवम् । ह । भुज्युम् । युवम् । अश्विना । वशम् । युवम् । शिञ्जारम् । उशनाम् । उप । आरथुः
वाक्यम् २: युवो ररावा परि सख्यमासते युवोरहमवसा सुम्नमा चके ॥
पदानि : युवोः । ररावा । परि । सख्यम् । आसते । युवोः । अहम् । अवसा । सुम्नम् । आ । चके

६४. मण्डलम् १०, सूक्तम् ४२, मन्त्रः ३ (ऋक्सङ्ख्या : ९२२९)
वाक्यम् १: किमङ्ग त्वा मघवन्भोजमाहुः शिशीहि मा शिशयं त्वा शृणोमि ।
पदानि : किम् । अङ्ग । त्वा । मघऽवन् । भोजम् । आहुः । शिशीहि । मा । शिशयम् । त्वा । शृणोमि
वाक्यम् २: अप्रस्वती मम धीरस्तु शक्र वसुविदं भगमिन्द्रा भरा नः ॥
पदानि : अप्रस्वती । मम । धीः । अस्तु । शक्र । वसुऽविदम् । भगम् । इन्द्र । आ । भर । नः

६५. मण्डलम् १०, सूक्तम् ४४, मन्त्रः ५ (ऋक्सङ्ख्या : ९२५३)
वाक्यम् १: गमन्नस्मे वसून्या हि शंसिषं स्वाशिषं भरमा याहि सोमिनः ।
पदानि : गमन् । अस्मे इति । वसूनि । आ । हि । शंसिषम् । सुऽआशिषम् । भरम् । आ । याहि । सोमिनः
वाक्यम् २: त्वमीशिषे सास्मिन्ना सत्सि बर्हिष्यनाधृष्या तव पात्राणि धर्मणा ॥
पदानि : त्वम् । ईशिषे । सः । अस्मिन् । आ । सत्सि । बर्हिषि । अनाधृष्या । तव । पात्राणि । धर्मणा

६६. मण्डलम् १०, सूक्तम् ७५, मन्त्रः ४ (ऋक्सङ्ख्या : ९५९५)
वाक्यम् १: अभि त्वा सिन्धो शिशुमिन्न मातरो वाश्रा अर्षन्ति पयसेव धेनवः ।
पदानि : अभि । त्वा । सिन्धो इति । शिशुम् । इत् । न । मातरः । वाश्राः । अर्षन्ति । पयसाऽइव । धेनवः
वाक्यम् २: राजेव युध्वा नयसि त्वमित्सिचौ यदासामग्रं प्रवतामिनक्षसि ॥
पदानि : राजाऽइव । युध्वा । नयसि । त्वम् । इत् । सिचौ । यत् । आसाम् । अग्रम् । प्रऽवताम् । इनक्षसि

६७. मण्डलम् १०, सूक्तम् ८३, मन्त्रः ६ (ऋक्सङ्ख्या : ९६५८)
वाक्यम् १: अयं ते अस्म्युप मेह्यर्वाङ्प्रतीचीनः सहुरे विश्वधायः ।
पदानि : अयम् । ते । अस्मि । उप । मा । आ । इहि । अर्वाङ् । प्रतीचीनः । सहुरे । विश्वऽधायः

वाक्यम् २: मन्यो॑ वज्रिन्नभि मामा व॑वृत्स्व हना॑व॒ दस्यू॑रुत बो॑ध्या॒पेः ॥
पदानि : मन्यो॒ इति॑ । व॒ज्रि॒न् । अ॒भि । माम् । आ । व॒वृ॒त्स्व॒ । हना॑व । दस्यू॑न् । उ॒त । बो॒धि॒ । आ॒पेः

६८. मण्डलम् १०, सूक्तम् ८९, मन्त्रः ११ (ऋक्सङ्ख्या : ९७९१)
वाक्यम् १: प्रा॑क्तु॒भ्य इन्द्रः॑ प्र वृ॒धो अह॑भ्यः॒ प्रान्तरि॑क्षा॒त्प्र स॑मु॒द्रस्य॑ धा॒सेः ।
पदानि : प्र । अ॒क्तु॒ऽभ्यः॑ । इन्द्रः॑ । प्र । वृ॒धः । अह॑ऽभ्यः । प्र । अ॒न्तरि॑क्षात् । प्र । स॒मु॒द्रस्य॑ । धा॒सेः
वाक्यम् २: प्र वात॑स्य॒ प्रथ॑सः॒ प्र ज्मो अन्ता॒त्प्र सिन्धु॑भ्यो रिरिचे॒ प्र क्षि॒तिभ्यः॑ ॥
पदानि : प्र । वात॑स्य । प्रथ॑सः । प्र । ज्मः । अन्ता॑त् । प्र । सिन्धु॑ऽभ्यः । रि॒रि॒चे॒ । प्र । क्षि॒तिऽभ्यः॑

६९. मण्डलम् १०, सूक्तम् ९५, मन्त्रः ५ (ऋक्सङ्ख्या : ९८७८)
वाक्यम् १: त्रिः स्म॒ माह्नः॑ श्नथयो वैत॒सेनो॑त स्म॒ मेऽव्य॑त्यै पृणासि ।
पदानि : त्रिः । स्म॒ । मा॒ । अह्नः॑ । श्न॒थ॒यः॒ । वै॒त॒सेन॑ । उ॒त । स्म॒ । मे॒ । अव्य॑त्यै । पृ॒णा॒सि॒
वाक्यम् २: पुरू॑र॒वोऽनु॑ ते॒ केत॑माय॒ राजा॑ मे वीर त॒न्व१॑स्तदा॑सीः ॥
पदानि : पुरू॑रवः । अनु॑ । ते॒ । केत॑म् । आ॒य॒म् । राजा॑ । मे॒ । वी॒र॒ । त॒न्वः॑ । तत् । आ॒सीः॒

७०. मण्डलम् १०, सूक्तम् ९८, मन्त्रः १२ (ऋक्सङ्ख्या : ९९३९)
वाक्यम् १: अग्ने॒ बाध॑स्व॒ वि मृधो॒ वि दुर्गहापामी॑वा॒मप॒ रक्षा॑ꣳसि सेध ।
पदानि : अग्ने॑ । बाध॑स्व । वि । मृधः॑ । वि । दुः॒ऽगहा॑ । अप॑ । अमी॑वाम् । अप॑ । रक्षा॑ꣳसि । से॒ध॒
वाक्यम् २: अ॒स्मात्स॑मु॒द्राद्बृ॒हतो दि॒वो नो॒ऽपां भूमा॑न॒मुप॑ नः सृजेह ॥
पदानि : अ॒स्मात् । स॒मु॒द्रात् । बृ॒हतः॑ । दि॒वः॑ । नः॒ । अ॒पाम् । भूमा॑नम् । उप॑ । नः॒ । सृ॒ज॒ । इ॒ह

७१. मण्डलम् १०, सूक्तम् १०६, मन्त्रः ११ (ऋक्सङ्ख्या : १००३३)
वाक्यम् १: ऋ॒ध्याम॒ स्तोम॑ꣳ सनु॒याम॒ वाज॒मा नो॒ मन्त्रं॑ स॒रथे॒होप॑ यातम् ।
पदानि : ऋ॒ध्याम॑ । स्तोम॑म् । स॒नु॒याम॑ । वाज॑म् । आ । नः॒ । मन्त्र॑म् । स॒ऽरथा॑ । इ॒ह । उप॑ । या॒त॒म् ।
वाक्यम् २: यशो॒ न प॒क्वं मधु॒ गोष्व॒न्तरा भूतां॑शो॒ अ॒श्विनो॒: काम॑मप्राः ॥
पदानि : यशः॑ । न । प॒क्वम् । मधु॑ । गोषु॑ । अ॒न्तः । आ । भूत॑ऽअꣳशः । अ॒श्विनोः॑ । काम॑म् । अ॒प्राः॒

७२. मण्डलम् १०, सूक्तम् ११४, मन्त्रः ९ (ऋक्सङ्ख्या : १०११२)
वाक्यम् १: कश्छन्द॑सां योग॒मा वे॑द॒ धीरः॒ को धिष्ण्यां॑ प्रति॒ वाचं॑ पपाद ।
पदानि : कः । छन्द॑साम् । योग॑म् । आ । वे॒द॒ । धीरः॑ । कः । धिष्ण्या॑म् । प्रति॑ । वाच॑म् । प॒पा॒द॒
वाक्यम् २: कमृ॒त्विजा॑मष्टमं शूर॑माहुर्हरी॒ इन्द्र॑स्य नि चि॑काय॒ कः स्वि॑त् ॥
पदानि : कम् । ऋ॒त्विजा॑म् । अ॒ष्ट॒मम् । शूर॑म् । आ॒हुः॒ । हरी॒ इति॑ । इन्द्र॑स्य । नि । चि॒का॒य॒ । कः । स्वि॒त्

७३. मण्डलम् १०, सूक्तम् ११७, मन्त्रः ९ (ऋक्सङ्ख्या : १०१४०)
वाक्यम् १: स॒मौ चि॒द्धस्तौ॑ न स॒मं वि॑विष्टः॑ सं॒मा॒तरा॑ चि॒न्न स॒मं दु॑हाते ।
पदानि : स॒मौ । चि॒त् । हस्तौ॑ । न । स॒मम् । वि॒ऽवि॒ष्टः॒ । स॒म्ऽमा॒तरा॑ । चि॒त् । न । स॒मम् । दु॒हा॒ते॒ इति॑
वाक्यम् २: य॒मयो॑श्चिन्न स॒मा वी॒र्या॑णि ज्ञा॒ती चि॒त्सन्तौ॑ न स॒मं पृ॑णीतः ॥
पदानि : य॒मयोः॑ । चि॒त् । न । स॒मा । वी॒र्या॑णि । ज्ञा॒ती इति॑ । चि॒त् । सन्तौ॑ । न । स॒मम् । पृ॒णी॒तः॒

७४. मण्डलम् १०, सूक्तम् १२०, मन्त्रः ३ (ऋक्सङ्ख्या : १०१६५)

वाक्यम् १: त्वे क्रतुमपि॑ वृञ्जन्ति॒ विश्वे॒ द्विर्यदे॒ते त्रिर्भव॒न्त्यूमाः॑ ।
पदानि : त्वे इति॑ । क्रतु॑म् । अपि॑ । वृ॒ञ्ज॒न्ति॒ । विश्वे॑ । द्विः । यत् । ए॒ते । त्रिः । भव॑न्ति । ऊमाः॑
वाक्यम् २: स्वा॒दोः स्वादी॑यः स्वा॒दुना॑ सृ॒जा सम॒दः सु मधु मधु॒नाभि यो॑धीः ॥
पदानि : स्वा॒दोः । स्वादी॑यः । स्वा॒दुना॑ । सृ॒ज॒ । सम् । अ॒दः । सु । मधु॑ । मधु॑ना । अ॒भि । यो॒धीः॒

७५. मण्डलम् १०, सूक्तम् १४७, मन्त्रः १ (ऋक्सङ्ख्या : १०३५९)
वाक्यम् १: श्रत्ते दधामि प्रथ॒मायं॑ म॒न्यवेऽह॒न्यद्वृ॒त्रं नर्यं॑ वि॒वेर॒पः ।
पदानि : श्रत् । ते॒ । दधा॑मि । प्र॒थ॒माय॑ । म॒न्यवे॑ । अह॑न् । यत् । वृ॒त्रम् । नर्य॑म् । वि॒वेः । अ॒पः
वाक्यम् २: उ॒भे यत्त्वा॒ भव॑तो॒ रोद॑सी अनु॒ रेज॑ते॒ शुष्मा॑त्पृथि॒वी चि॑दद्रिवः ॥
पदानि : उ॒भे इति॑ । यत् । त्वा॒ । भव॑तः । रोद॑सी॒ इति॑ । अनु॑ । रेज॑ते । शुष्मा॑त् । पृ॒थि॒वी । चि॒त् । अ॒द्रि॒ऽवः॒

द्वादशपदवाक्यकाः मन्त्राः
(१६ मन्त्राः)

१. मण्डलम् १, सूक्तम् ५७, मन्त्रः ५ (ऋक्सङ्ख्या : ६७०)
वाक्यम् १: भूरि॑ त इन्द्र वी॒र्य१॑ त॒वं स्मस्य॒स्य स्तो॒तुर्मघव॒न्काम॒मा पृ॑ण ।
पदानि : भूरि॑ । ते॒ । इ॒न्द्र॒ । वी॒र्य॑म् । तव॑ । स्म॒सि॒ । अ॒स्य । स्तो॒तुः । म॒घ॒ऽव॒न् । काम॑म् । आ । पृ॒ण॒
वाक्यम् २: अनु॑ ते॒ द्यौर्बृ॒हती वी॒र्यं॑ मम इ॒यं च॑ ते पृथि॒वी ने॒म ओज॑से ॥
पदानि : अनु॑ । ते॒ । द्यौः । बृ॒हती । वी॒र्य॑म् । म॒मे॒ । इ॒यम् । च॒ । ते॒ । पृ॒थि॒वी । ने॒मे॒ । ओज॑से

२. मण्डलम् १, सूक्तम् १०४, मन्त्रः ५ (ऋक्सङ्ख्या : ११४२)
वाक्यम् १: प्रति॒ यत्स्या नीथाद॑र्शि॒ दस्यो॒रोको॒ नाच्छा॒ सद॑नं जान॒ती गा॑त् ।
पदानि : प्रति॑ । यत् । स्या । नीथा॑ । अद॑र्शि । दस्योः॑ । ओकः॑ । न । अच्छ॑ । सद॑नम् । जा॒न॒ती । गा॒त्
वाक्यम् २: अध॑ स्मा नो मघवञ्चर्कृतादि॒न्मा नो॑ म॒घेव॑ निष्ष॒पी परा॑ दाः ॥
पदानि : अध॑ । स्म॒ । नः॒ । म॒घ॒ऽव॒न् । च॒र्कृ॒तात् । इत् । मा । नः॒ । म॒घाऽइ॑व । नि॒ष्ष॒पी । परा॑ । दाः॒

३. मण्डलम् १, सूक्तम् १४०, मन्त्रः ११ (ऋक्सङ्ख्या : १५३६)
वाक्यम् १: इ॒दम॑ग्ने सुधि॑तं दुर्धि॒तादधि॑ प्रि॒यादु॑ चिन्मन्म॑नः॒ प्रेयो॑ अस्तु ते ।
पदानि : इ॒दम् । अ॒ग्ने॒ । सु॒ऽधि॑तम् । दुः॒ऽधि॑तात् । अधि॑ । प्रि॒यात् । ऊँ॒ इति॑ । चि॒त् । मन्म॑नः । प्रेयः॑ । अ॒स्तु॒ । ते॒
वाक्यम् २: यत्ते शु॒क्रं त॒न्वो॒३॒॑ रोच॑ते शु॒चि॒ तेना॒स्मभ्यं॑ वनसे रत्न॒मा त्वम् ॥
पदानि : यत् । ते॒ । शु॒क्रम् । त॒न्वः॑ । रोच॑ते । शु॒चि॑ । तेन॑ । अ॒स्मभ्य॑म् । व॒न॒से॒ । रत्न॑म् । आ । त्वम्

४. मण्डलम् १, सूक्तम् १७३, मन्त्रः ८ (ऋक्सङ्ख्या : १८४८)
वाक्यम् १: ए॒वा हि ते॒ शं सव॑ना समुद्र आपो॒ यत्त॑ आ॒सु मद॑न्ति दे॒वीः ।
पदानि : ए॒व । हि । ते॒ । शम् । सव॑ना । स॒मु॒द्रे॒ । आपः॑ । यत् । ते॒ । आ॒सु । मद॑न्ति । दे॒वीः
वाक्यम् २: विश्वा॑ ते॒ अनु॒ जोष्या॑ भू॒द्गौः सू॒रीँश्चि॒द्यदि॑ धि॒षा वे॒षि॒ जना॑न् ॥
पदानि : विश्वा॑ । ते॒ । अनु॑ । जोष्या॑ । भू॒त् । गौः । सू॒रीन् । चि॒त् । यदि॑ । धि॒षा । वे॒षि॑ । जना॑न्

५. मण्डलम् २, सूक्तम् २८, मन्त्रः १० (ऋक्सङ्ख्या : २२९२)
वाक्यम् १: यो मे राजन्युज्यो वा सखा वा स्वप्ने भयं भीरवे मह्यमाह।
पदानि : यः। मे। राजन्। युज्यः। वा। सखा। वा। स्वप्ने। भयम्। भीरवे। मह्यम्। आह
वाक्यम् २: स्तेनो वा यो दिप्सति नो वृको वा त्वं तस्मादुरुण पाह्यस्मान्॥
पदानि : स्तेनः। वा। यः। दिप्सति। नः। वृकः। वा। त्वम्। तस्मात्। उरुण। पाहि। अस्मान्

६. मण्डलम् ३, सूक्तम् ३३, मन्त्रः ८ (ऋक्सङ्ख्या : २७६२)
वाक्यम् १: एतद्वचो जरितर्मापि मृष्ठा आ यत्ते घोषानुत्तरा युगानि।
पदानि : एतत्। वचः। जरितः। मा। अपि। मृष्ठाः। आ। यत्। ते। घोषान्। उत्ऽतरा। युगानि
वाक्यम् २: उक्थेषु कारो प्रति नो जुषस्व मा नो नि कः पुरुषत्रा नमस्ते॥
पदानि : उक्थेषु। कारो इति। प्रति। नः। जुषस्व। मा। नः। नि। करिति कः। पुरुषऽत्रा। नमः। ते

७. मण्डलम् ५, सूक्तम् २, मन्त्रः ५ (ऋक्सङ्ख्या : ३६५८)
वाक्यम् १: के मे मर्यकं वि यवन्त गोभिर्न येषां गोपा अरणश्चिदास।
पदानि : के। मे। मर्यकम्। वि। यवन्त। गोभिः। न। येषाम्। गोपाः। अरणः। चित्। आस
वाक्यम् २: य ईं जगृभुरव ते सृजन्त्वाजाति पश्व उप नश्चिक्वित्वान्॥
पदानि : ये। ईम्। जगृभुः। अव। ते। सृजन्तु। आ। अजाति। पश्वः। उप। नः। चिक्वित्वान्

८. मण्डलम् ६, सूक्तम् ९, मन्त्रः ६ (ऋक्सङ्ख्या : ४४४२)
वाक्यम् १: वि मे कर्णा पतयतो वि चक्षुर्वीरुदं ज्योतिर्हृदय आहितं यत्।
पदानि : वि। मे। कर्णा। पतयतः। वि। चक्षुः। वि। इदम्। ज्योतिः। हृदये। आऽहितम्। यत्
वाक्यम् २: वि मे मनश्चरति दूरआधीः किं स्विद्वक्ष्यामि किमु नू मनिष्ये॥
पदानि : वि। मे। मनः। चरति। दूरेऽआधीः। किम्। स्वित्। वक्ष्यामि। किम्। ऊँ इति। नु। मनिष्ये

९. मण्डलम् ६, सूक्तम् १५, मन्त्रः ११ (ऋक्सङ्ख्या : ४४८५)
वाक्यम् १: तमग्ने पास्युत तं पिपर्षि यस्त आनट् कवये शूर धीतिम्।
पदानि : तम्। अग्ने। पासि। उत। तम्। पिपर्षि। यः। ते। आनट्। कवये। शूर। धीतिम्
वाक्यम् २: यज्ञस्य वा निशितिं वोदितिं वा तमित्पृणक्षि शवसोत राया॥
पदानि : यज्ञस्य। वा। निऽशितिम्। वा। उत्ऽइतिम्। वा। तम्। इत्। पृणक्षि। शवसा। उत। राया

१०. मण्डलम् ६, सूक्तम् २७, मन्त्रः १ (ऋक्सङ्ख्या : ४६५८)
वाक्यम् १: किमस्य मदे किम्वस्य पीताविन्द्रः किमस्य सख्ये चकार।
पदानि : किम्। अस्य। मदे। किम्। ऊँ इति। अस्य। पीतौ। इन्द्रः। किम्। अस्य। सख्ये। चकार
वाक्यम् २: रणा वा ये निषदि किं ते अस्य पुरा विविद्रे किमु नूतनासः॥
पदानि : रणाः। वा। ये। निऽसदि। किम्। ते। अस्य। पुरा। विविद्रे। किम्। ऊँ इति। नूतनासः

११. मण्डलम् ६, सूक्तम् २८, मन्त्रः ३ (ऋक्सङ्ख्या : ४६६८)
वाक्यम् १: न ता नशन्ति न दभाति तस्करो नासामामित्रो व्यथिरा दधर्षति।
पदानि : न। ताः। नशन्ति। न। दभाति। तस्करः। न। आसाम्। आमित्रः। व्यथिः। आ। दधर्षति
वाक्यम् २: देवाँश्च याभिर्यजते ददाति च ज्योगित्ताभिः सचते गोपतिः सह॥

पदानि : देवान्। च। याभिः। यजते। ददाति। च। ज्योक्। इत्। ताभिः। सचते। गोऽपतिः। सह

१२. मण्डलम् १०, सूक्तम् २९, मन्त्रः ३ (ऋक्सङ्ख्या : ९०८७)
वाक्यम् १: कस्ते मद इन्द्र रन्त्यो भूद्दुरो गिरो अभ्युग्रो वि धावति।
पदानि : कः। ते। मदः। इन्द्र। रन्त्यः। भूत्। दुरः। गिरः। अभि। उग्रः। वि। धाव
वाक्यम् २: कद्वाहो अर्वागुप मा मनीषा आ त्वा शक्यामुपमं राधो अन्नैः॥
पदानि : कत्। वाहः। अर्वाक्। उप। मा। मनीषा। आ। त्वा। शक्याम्। उपऽमम्। राधः। अन्नैः

१३. मण्डलम् १०, सूक्तम् ३७, मन्त्रः २ (ऋक्सङ्ख्या : ९१८०)
वाक्यम् १: सा मा सत्योक्तिः परि पातु विश्वतो द्यावा च यत्र ततनन्नहानि च।
पदानि : सा। मा। सत्यऽउक्तिः। परि। पातु। विश्वतः। द्यावा। च। यत्र। ततनन्। अहानि। च
वाक्यम् २: विश्वमन्यन्नि विशते यदेजति विश्वाहापो विश्वाहोदेति सूर्यः॥
पदानि : विश्वम्। अन्यत्। नि। विशते। यत्। एजति। विश्वाहा। आपः। विश्वाहा। उत्। एति। सूर्यः

१४. मण्डलम् १०, सूक्तम् ४३, मन्त्रः २ (ऋक्सङ्ख्या : ९२३९)
वाक्यम् १: न घा त्वद्रिगप वेति मे मनस्त्वे इत्कामं पुरुहूत शिश्रय।
पदानि : न। घ। त्वद्रिक्। अप। वेति। मे। मनः। त्वे इति। इत्। कामम्। पुरुऽहूत। शिश्रय
वाक्यम् २: राजेव दस्म नि षदोऽधि बर्हिष्यस्मिन्त्सु सोमेऽवपानमस्तु ते॥
पदानि : राजाऽइव। दस्म। नि। सदः। अधि। बर्हिषि। अस्मिन्। सु। सोमे। अवऽपानम्। अस्तु। ते

१५. मण्डलम् १०, सूक्तम् ११४, मन्त्रः ४ (ऋक्सङ्ख्या : १०१०७)
वाक्यम् १: एकः सुपर्णः स समुद्रमा विवेश स इदं विश्वं भुवनं वि चष्टे।
पदानि : एकः। सुऽपर्णः। सः। समुद्रम्। आ। विवेश। सः। इदम्। विश्वम्। भुवनम्। वि। चष्टे
वाक्यम् २: तं पाकेन मनसापश्यमन्तितस्तं माता रेळ्हि स उ रेळ्हि मातरम्॥
पदानि : तम्। पाकेन। मनसा। अपश्यम्। अन्तितः। तम्। माता। रेळ्हि। सः। ऊँ इति। रेळ्हि। मातरम्

१६. मण्डलम् १०, सूक्तम् १४२, मन्त्रः १ (ऋक्सङ्ख्या : १०३२७)
वाक्यम् १: अयमग्ने जरिता त्वे अभूदपि सहसः सूनो नह्यन्यदस्त्याप्यम्।
पदानि : अयम्। अग्ने। जरिता। त्वे इति। अभूत्। अपि। सहसः। सूनो इति। नहि। अन्यत्। अस्ति। आप्यम्
वाक्यम् २: भद्रं हि शर्म त्रिवरूथमस्ति त आरे हिंसानामप दिद्युमा कृधि॥
पदानि : भद्रम्। हि। शर्म। त्रिऽवरूथम्। अस्ति। ते। आरे। हिंसानाम्। अप। दिद्युम्। आ। कृधि

चतुर्दशपदवाक्यकाः मन्त्राः
(२ मन्त्रौ)

१. मण्डलम् १, सूक्तम् १३५, मन्त्रः ७ (ऋक्सङ्ख्या : १४९८)
वाक्यम् १: अतिं वायो ससतो याहि शश्वतो यत्र ग्रावा वदति तत्र गच्छतं गृहमिन्द्रश्च गच्छतम्।
पदानि : अतिं। वायो इतिं। ससतः। याहि। शश्वतः। यत्र। ग्रावा। वदति। तत्र। गच्छतम्। गृहम्। इन्द्रः। च। गच्छतम्
वाक्यम् २: वि सूनृता ददृशे रीयते घृतमा पूर्णया नियुता याथो अध्वरमिन्द्रश्च याथो अध्वरम्॥
पदानि : वि। सूनृता। ददृशे। रीयते। घृतम्। आ। पूर्णया। नियुता। याथः। अध्वरम्। इन्द्रः। च। याथः। अध्वरम्

२. मण्डलम् २, सूक्तम् ३०, मन्त्रः ७ (ऋक्सङ्ख्या : २३०७)
वाक्यम् १: न मा तमन्न श्रमन्नोत तन्द्रन्न वोचाम मा सुनोतेति सोमम्।
पदानि : न। मा। तमत्। न। श्रमत्। न। उत। तन्द्रत्। न। वोचाम। मा। सुनोत। इतिं। सोमम्
वाक्यम् २: यो मे पृणाद्यो ददद्यो निबोधाद्यो मा सुन्वन्तमुप गोभिरायत्॥
पदानि : यः। मे। पृणात्। यः। ददत्। यः। निऽबोधात्। यः। मा। सुन्वन्तम्। उप। गोभिः। आ। अयत्